UNIVERSAL
LIBRARY
OU_184607
UNIVERSAL
LIBRARY

page missing book 302to303and 340to 341

BIBLIOTHECA INDICA:

A

Collection of Oriental Works

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1131.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE CATAPATHA BRĀHMANA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYANA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. II, FASCICULUS I.

CALCUTTA:

PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1905.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS Mr. BERNARD QUARITCH, 15, Piccadilly, London, W., and Mr. Otto Harrassowitz, Bookseller, Leipzig, Germany.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.		
Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...		1	8
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /1/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-5 @ /1/		7	8
Aphorisms of Sāṇdilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /5/ each ...		2	4
Acvavaidyaka, (Text) Fasc. 1-5 @ /1/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2-5 ; Vol. II. Fasc. 1-5 @ 1/ each		9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1-2		0	12
Baudhayana Srauta Sutra, Fasc. 1-3 @ /3/ each		1	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5		1	14
Bṛihaddēvatā, (Text) Fasc. 1-4 @ /1/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /1/ each		2	4
Bodhicaryavátara of Cantidevi, Fasc. 1-3		1	2
Çatadusani, Fasc. 1-2		0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-3, Vol III Fasc 1-7,...		6	6
Çatasahasrika-prajñāpāramitā, (Text) Part I, Fasc. 1-10 @ /1/ each ...		3	12
*Caturvarga Chintāmaṇi, (Text) Vols. II, 1-25 ; III. Part I, Fasc. 1-18 Part II, Fasc. 1-10 @ /1/ each ; Vol. IV, Fasc. 1-4		21	6
Çlokavartika, (English) Fasc. 1-5		3	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 6-17 @ /6/ each ...		4	8
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 @ /5/ each ; Vol 4, Fasc. 1		6	0
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /1/ each		1	2
Dan Kriya Kaumundi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7...		2	10
Ditto Ācārasāra, Vol II, Fasc. I.		0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /7/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-3, @ /6/ each		9	0
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ /1/ each		1	2
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ /12/ each		6	12
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-19 @ /1/ each		4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /1/		2	4
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /5/ each		3	0
Nityacarapaddhati Fasc. 1-7 (Text) @ /1/		2	10
Nityacarapradiph, Fasc. 1-6		2	4
Nyāyabinduṭikā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6, Vol. II, Fasc. 1-3 @ /1/ each		3	6

शतपथब्राह्मणम् ।

अथ

द्वितीयकाण्डम् ।

॥ अथ प्रथमः प्रपाठकः ॥

॥ प्रथमं ब्राह्मणम् ॥

॥ अपि वा प्रथमाध्याये प्रथमं ब्राह्मणम् ॥

॥ हरिः ॐ ॥

स यदा ऽइतश्चेतश्च सम्भरति । तत्सम्भराणाꣳ सम्भारत्वं यत्र-यत्राग्नेर्न्यक्तं ततस्ततः सम्भरति तद्यशसेव त्वदेवैन मेतत् समर्द्धयति पशुभिरिव त्वन्मिथुनेनेव त्वत् सम्भरन् ॥ १ ॥

अथोल्लिखति । तद्यदेवास्यै पृथिव्या ऽअभिष्ठितं व्वाभिष्ठूतं* वा तदेवास्या ऽएतदुद्वन्त्यथ यत्रियाया मेव पृथिव्या माधत्ते तस्माद्वा ऽउल्लिखति ॥ २ ॥

'वाभिष्ठूतं'—इति घ । एवं सर्वत्र बोध्यम् ।

अथाङ्गिरभ्युद्यति । एष वा अपाꣳ सम्भारो यदङ्गिरभ्युद्यति तदादपः सम्भरत्यन्नं वा आपोऽन्नꣳ हि वा आपस्तस्मादादेमं लोक माप आग*च्छन्त्यथेहान्नाद्यं जायते तदन्नाद्येनैवैन मेतत् समर्द्धयति ॥ ३ ॥

योषा वा आपः । वृषाग्निर्म्मिथुनेनैवैन मेतत्प्रजननेन समर्द्धयत्यङ्गिर्व्वा इदꣳ सर्व्वं माप मङ्गिरेवैन मेतदाप्त्वाधत्ते तस्मादपः सम्भरति ॥ ४ ॥

अथ हिरण्यꣳ सम्भरति । अग्निर्ह वा अपोऽभिदध्यौ मिथुन्याभिः स्या मिति ताः सम्बभूव तासु रेतः प्रासिञ्चत्तद्धिरण्य मभवत्तस्मादेतदग्निसङ्काश मग्नेर्हि रेतस्तस्मादपु ष्विन्दन्त्यपु हि प्रासिञ्चत्तस्मादेनेन न धावयति न किञ्चन करोत्यथ यशो देवरेतसꣳ हि तद्यशसैवैन मेतत् समर्द्धयति सरेतस मेव क्रुत्वा मग्नि माधत्ते तस्माद्धिरण्यꣳ सम्भरति ॥ ५ ॥

अथोषाग्त्सम्भरति । असौ ह वै द्यौरस्यै पृथिव्या एतान् पशून् प्रददौ तस्मात्पशव्य मूषर मित्याहुः पशवो ह्येवैते साक्षादेव तत् पशुभिरेवैन मेतत् समर्द्धयति तेऽमुत आगता अस्यां पृथिव्यां प्रतिष्ठितास्तु

---

* 'आग'—इति क ।

मनयोर्द्यावापृथिव्यो रसं मन्यन्ते तदनयोरेवैन मेतद् द्यावापृथिव्यो रसेन समर्द्धयति तस्मादूषान्त्स-म्भरति ॥ ६ ॥

अथाखुकरीषꣳ सम्भरति । आखवो ह वा ऽअस्यै पृथिव्यै रसं विदुस्तस्मात् तेऽधोऽध ऽइमां पृथिवीं चरन्तः पौविष्ठा ऽअस्यै हि रसं विदुस्ते यत्र ते ऽस्यै पृथिव्यै रसं विदुस्तत उत्किरन्ति तदस्या* ऽएवैन मेतत् पृथिव्यै रसेन समर्द्धयति तस्मादाखुकरीषꣳ सम्भरति पुरीष्य ऽइति वै त माहुर्यः श्रियं गच्छति समानं वै पुरीषं च करीषं च तदेतस्यैवावरुद्ध्यै तस्मादाखु-करीषꣳ सम्भरति ॥ ७ ॥

अथ शर्करा: सम्भरति । देवाश्च वा ऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे सा हेयं पृथिव्यलेलायद्यथा पुष्करपर्ण मेवं ताꣳ ह स्म व्वातः संव्वहति सोपैव देवान् जगामोपासुरान्त्सा यत्र देवानुपजगाम ॥ ८ ॥

तद्देवोचुः । हन्तेमां प्रतिष्ठां दृꣳहामहै तस्यां ध्रुवा-या मग्निधिलाया मग्नी ऽआदधामहै ततोऽस्यै सपत्नान् न्निर्भज्याम ऽइति ॥ ९ ॥

'तस्मादस्या'—इति ख ।

तद्यथा शङ्कुभिश्वर्म व्यिहन्यात्। एव मिमां प्रतिष्ठाए शर्कराभिः पर्यबृए्हन्त सेयं ध्रुवाशिथिला प्रतिष्ठा तस्यां ध्रुवाया मशिथिलाया मग्नी ऽआदधत ततोऽस्यै सपत्नान् निरभजन् ॥ १० ॥

तथो ऽएवैष ऽएतत्। इमां प्रतिष्ठाए शर्कराभिः परिबृए्हते तस्यां ध्रुवाया मशिथिलाया मग्नी ऽआधत्ते ततोऽस्यै सपत्नान्निर्भजति तस्माच्छर्कराः सम्भरति ॥ ११ ॥

तान्वा ऽएतान्। पञ्च सम्भारान्त्सम्भरति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्त्तवः संव्वत्सरस्य ॥ १२ ॥

तदाहुः। षडेवऽर्त्तवः संव्वत्सरस्येति न्यून मु तर्हि मिथुनं प्रजननं क्रियते न्यूनाद्वा ऽइमाः प्रजाः प्रजायन्ते तच्छ्रेयस मुत्तरावत् तस्मात् पञ्च भवन्ति यदु षडेव ऽर्त्तवः संव्वत्सरस्येत्यग्निरेवैतेषाए षष्ठस्तथो ऽएवैतदन्यूनं भवति ॥ १३ ॥

तदाहुः। नैवैकञ्चन सम्भारए सम्भरेदित्यस्यां वा ऽएते सर्व्वे पृथिव्यां भवन्ति स यदेवास्यां माधत्ते तत् सर्व्वान्सम्भारानाप्नोति तस्मान्नैवैकञ्चन सम्भारए सम्भरेदिति तदु समेव भरेद्यदेवास्यां माधत्ते तत्

सर्वान्त्सम्भारानाप्नोति यदु सम्भारैः सम्भृतैर्भवति तदु भवति तस्मादु स मेव भरेत् ॥ १४ ॥ १ ॥

॥ इति प्रथमप्रपाठके प्रथमं ब्राह्मणम् [१.१.] ॥

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थाना मुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
आद्ये काण्डे प्रपञ्चेन पौर्णमासेष्टिरीरिता ।
सा सम्पूर्णोपदेशत्वादन्यासां प्रकृतिर्मता * ॥ ३ ॥
पवमानेष्टयादिकानां द्वितीये त्वग्निसिद्धये ।
आधानं पवमानेष्टिरग्निहोत्र मुपस्थितिः ॥
चातुर्मास्यादिकः सर्वो हविर्यज्ञोऽत्र वर्ण्यते ॥ ४ ॥

---

* अथ यत्र सर्वं कर्त्तव्यं प्रकर्षेण कर्मान्तरनैरपेक्ष्येणोपदिश्यते, सा प्रकृतिः । यत्र विशेषरूप मेव कर्त्तव्यं श्रुत्योपदिश्यते इतरत् सर्वं प्रकृतेरतिदिश्यते, सा विकृतिः । प्रकृतिश्च द्विविधा; मूलप्रकृतिरवान्तरप्रकृतिश्चेतिभेदात् । सर्वात्मना कर्मान्तरनिरपेक्षा मूलप्रकृतिः । कतिपयेष्वङ्गेषु कर्मान्तरश्चापेक्षते स्वयञ्च केषुचित् कर्मसु निरपेक्षतीया भवति, सेय मवान्तरप्रकृतिः । सर्वेषेदं मीमांसायाः सप्तमाष्टमाध्यायाभ्यां विचार्य निरूपितम् । तथाच न्यायमालाया अष्टमाध्यायस्य प्रथमपादीयचतुर्थाधिकरणद्वितीयवर्णके इष्ट्याग्निहोत्रसोमाना मेव सर्वयागमूलप्रकृतित्वं निर्णीतम् ।

तत्र तावत् सर्वेष्टिप्रकृतित्वेन प्राक् प्रतिपादिताया दर्शपूर्णमासेष्टेः, विधास्यमानानां अग्निहोत्रादिकर्मणां च त्रेताग्निसाध्यत्वात् * तत्रेतुभूत माधानं प्रतिपाद्यते। तत्र चोदकहिरण्यादिसम्भाराणां पञ्चानां † सम्भरणं विधित्सुः सम्भारनामनिर्वचनं करोति—"स यदा इति। 'इतश्च' अस्माद् वक्ष्यमाणादुदकहिरण्यादिद्रव्यजातात् 'सः' अध्वर्युस्तदेकदेश माहृत्य 'यद्' यस्मादेकस्थाने 'सम्भरति' समूहीकरोति, 'तत्' तस्मात् सम्भियन्त इति सम्भाराः, इति व्युत्पत्त्या तेषां 'सम्भार'-नाम सम्पन्न मित्यर्थः। "इतश्चेतश्चेति। "नित्यवीप्सयोः"—इति ‡ द्विर्वचनम्।

एतदेव विशदयन् सम्भरणं विधियते— "यत्र-यत्रेति। यस्मिन् यस्मिन् पदार्थे 'अग्नेः' सम्बन्धि तेजो 'न्यक्तं' निलीनं भवति, तस्मात् सर्वस्मात् अपि सम्भरणं कार्य मित्यर्थः॥

एतत् सम्भरणीयद्रव्यविशेषोपजीवनेन प्रशंसति— "तद्यत्सर्वेति। सम्भरतीत्युपरिष्टात्सर्वशेषतया श्रुतत्वात् त्रिष्वपि वाक्येषु त्वदित्यनन्तरं सम्बध्यते। त्वच्छब्दश्च एकशब्दपर्यायः; "उत त्वः पश्यन्"-इत्यादौ § तथा दर्शनात्। "अप्येकः पश्यन् न पश्यति वात मिति यास्कः ¶। 'तत्' तत्र 'तत्' एकं हिरण्याख्यं

---

* "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः। अग्नित्रय मिदं त्रेता"—इति अ० को० २, ७, २०।

† १ उदकम्, २ हिरण्यम्, ३ ऊषाः (पशवः), ४ आखुकरीषम् (आखुपुरीषम्), ५ शर्कराः (कङ्करिति ख्याताः)।

‡ पा० सू० ८, १, ४। § ऋ० सं० १०, ७१, ४।

¶ निरु० १, ६, ३।

वसु 'सम्भरन्' 'एनम्' अग्निम् एतेन सम्भरणेन 'यज्ञस्यैव समर्द्धयति'। हिरण्यस्य यशोरूपत्व मग्रे वक्ष्यते *।

एव मुत्तरवाक्ययोरपि योजना। तत्र त्वदितिपदाभ्यामुषोदकद्रव्यौ विवक्षितौ। तयोश्च पशुमिथुनरूपत्वे † उपरिष्टात् समाम्नास्येते ‡ ॥ १ ॥

तस्य च हिरण्यादिसम्भारस्य निवपन मुल्लेखनाभ्युक्षणसंस्कृतेष्वेव गार्हपत्याद्यायतनेषु कार्य मित्यभिप्रेत्य प्रथम मुल्लेखनं विधाय प्रशंसति— "अथोल्लिखतीति। 'अस्यै पृथिव्यै'—इति षष्ठ्यर्थे चतुर्थी §। 'अस्याः पृथिव्याः' सम्बन्धि, यत् 'अभिष्ठितम्' उपर्यवस्थानेन पादस्पर्शजनितम्, 'अभिद्रुतम्' तदुपरि निर्जीवनादिजनितञ्चेत्यर्थः। 'वा'-शब्दो चार्थौ। "यन्नियाया मिति। यन्नार्हाया मित्यर्थः ॥ २ ॥

उल्लिखितानां मन्त्रायतनानां मभ्युक्षणं विधत्ते—"अथेति। एतदभितः सर्वतो यदभ्युक्षणम्, 'एष वा अपां सम्भारः'; न तु हिरण्यादिवत् पृथगुपादाय तासां निवपनं कार्य मित्यर्थः। "अन्नं वा इत्यादि। निगदसिद्धम् ॥ ३ ॥

एव मन्त्राद्यहेतुत्वेनाभ्युक्षणं प्रशस्य मिथुनरूपेण प्रशंसति— "योषा वा इति। अपां स्त्रीलिङ्गत्वादग्नेश्च पुंल्लिङ्गत्वादुभयमिलितं सदेकं मिथुनम्, तच्च पुत्रपौत्रादिप्रजननहेतुरिति

---

* 'अथ यज्ञः'—इत्यादि द्रष्टव्यम् (५ क०)।

† यदि च श्रुतौ मिथुनस्याग्रे विधानम्, पश्वूनां तत उत्तरम्; तथापि "अल्पाच्तरम् (पा० सू० २, २, ३४.)—इतिप्राशस्त्यात्पशुशब्दस्येह द्वन्द्वनिमित्तः पूर्वनिपातो बोध्यः।

‡ इहैवानुपदं चतुर्थषष्ठकण्डिकयोर्द्रष्टव्ये। § पा० २, ३, ६१ सू० वा०।

'एनम्' अग्निं 'समर्धयति' एतेन 'मिथुनेन'। त्वदिति प्रागुक्तं तद्धितं भवति।

एवं लिङ्गोपजीवनेन प्रशस्य अप्शब्दप्रतिपादितार्थपर्यालोचनयापि प्रशंसति— "अद्भिर्वा इति। "आपो वा इद मग्रे सलिल मासीत्"— इति श्रुतिः *। सर्वम् 'इदम्' जगत् 'अद्भिः' खलु 'आप्तम्' अत आपनशीलाभिस्ताभिरद्भिः 'एनम्' अग्निं प्राप्य 'आधत्ते' इत्यर्थः। यस्मादेवं तस्मात् सम्भारनिवपनसमयेऽभ्युक्षणार्थं कस्मिंश्चित् पात्रे अपः सम्भरेदिति निगमयति— "तस्मादिति ॥ ४ ॥

हिरण्यस्य सम्भरणं विधत्ते—"अथ हिरण्य मिति। तस्य हिरण्यस्याग्निरेतस्त्वं प्रतिपादयति— "अग्निर्ह वा इत्यादिना। 'अभिदध्यौ' अभिध्यातवानित्यर्थः। "ध्यै चिन्तायाम् † "— इत्यस्माल्लिटि "आत औ णलः"— इत्यौत्वम् ‡। अभिध्यानप्रकार माह— "मिथुन्याभिरिति। 'आभिः' अद्भिः अभ्युक्षणाद्भिः स्त्रीभिः 'मिथुनीस्याम्' प्रयोगमिथुनं तत्संयोगान्मिथुनं भवानीत्यर्थः। मिथुनशब्दादभूततद्भावे चिः §। "तस्मादेतदिति। यस्मादग्निर्वीर्यं हिरण्यात्मना परिणतम्, 'तस्मात्' एतत् हिरण्यम् 'अग्निसङ्काशम्' अग्नेः सदृश मेव वर्ण्यत उपलभ्यते। यस्माच्चाप्सु निषिक्तम्, 'तस्मात्' तत् हिरण्यम् 'अप्सु' 'विन्दन्ति' लभन्ते इत्यर्थः। "तस्मादेनेनेति। यस्मादाग्नेयं हिरण्यम् 'तस्मादेनेन' दन्तान् 'न धावयेत्'। तथा यदन्यत् किमपि हीनं कर्म, तदपि तेन न कुर्यादित्यर्थः।

---

* तै० ब्रा० १. १. ३. ५। † भ्वा० प० ६३३ धा०।
‡ पा० सू० ७. १. ३४। § पा० ५. ४. ५० सू० २ वा०।

"अथ यश इति। 'अथ'-शब्दो वाक्यालङ्कारे। यस्मात्तद्धिरण्यं 'देवरेतसं' देवस्याग्नेर्वीर्यम्, तस्माद् यशोरूपम्। देवरेतस मिति "अनसन्तात्"-इत्यकारः समासान्तः *। तथाच हिरण्यसम्भरणेन 'यशसैव' 'एनम्' अग्निं समृद्धं करोति। एतेन "यशसेव त्वदिति प्रागुक्तं † व्याख्यातं भवति। "सरेतस मेवेति। हिरण्यस्य सम्भरणाभावे हि रेतसोऽन्यत्र स्थितत्वात् तद्रहित आहितोऽग्निरक्तस्य एव भवति; तत्सम्भरणे तु सरेतसः सः ॥ ५ ॥

"अथोषानिति। ऊषाणां पशुरूपत्वं प्रतिपादयन् तत् समृद्धिहेतुत्वेन स्तौति—"असौ ह वा इति। यस्मात् 'पृथिव्यै' द्युलोकेन इमे पशवो दत्ताः, 'तस्मात्' तत्सम्बन्धि 'ऊषरम्' ऊषयुक्तं स्थानं 'पशव्यम्' पशुभ्यो हितम् 'इति' ब्रह्मवादिनः 'आहुः'। 'पशवो हि' तादृशं स्थान मासाद्य लिहन्ति; अतः पशुहितत्वात् पशवात्मकाः 'एवैते' ऊषाः। "ऊषर मिति। "ऊषसुषिमुष्कमधो रः"-इति ‡ मत्वर्थीयो रः। स्पष्ट मन्यत्। द्यावापृथिव्यो रसत्वेनैतान् प्रशंसति—"तेऽमुत इति। 'अमुतः' अमुष्माद् द्युलोकात् 'आगताः', 'अस्यां पृथिव्यां प्रतिष्ठिताः' च; अतः पशवात्मकस्य ऊषद्रव्यस्य द्यावापृथिवीरसत्वम्। किं ततः इत्याह— "तदनयोरिति ॥ ६ ॥

द्रव्यान्तरस्य सम्भरणं विधत्ते — "अथाखुकरीष मिति। (आखुभिः खननेन विलात् बहिर्नीताः पांशव आखुकरीषम्)¶। "आखवो हेति। यस्मात् 'आखवः' पृथिवीरसजाताः,

---

* पा० सू० ५. ४. १०३।

† १ पृ० १२४ पं०, ७ पृ० * इति च द्रष्टव्यम्। ‡ पा० सू० ५. २. १०७।

¶ बन्धन्यन्तर्गतग्रन्थोऽयं च-पुस्तकमात्रे विद्यते।

'तस्मात्' एव पृथिवीमध्ये 'अधोऽधः' खनन्तः, पृथिव्या अन्तरधस्तात् समीपे 'चरन्तः' तद्रसास्वादनसम्बन्धिनि 'यत्र' यस्थाने 'रसं' 'विदुः' जानन्ति, तत् स्थानं गत्वा 'रसम्' उपजीव्य पांशून् बहिः 'उत्किरन्ति' उत्क्षिपन्ति। "कॄ विक्षेपे"—इति * धातुः। अत आखूत्करस्य पृथिवीरसत्वात् तेनैव 'एनम्' अग्निं समृद्धं करोति। प्रकारान्तरेण स्तौति—"पुरीष्य इतीति। 'यः' खलु 'श्रियं' सम्पदं 'गच्छति', 'तं पुरीष्य इति' लोका वर्णयन्ति। तच्चैवं पुरीषस्यैव श्रीप्राप्तिहेतुता, करीषस्य कि मायात मित्यत आह—"समान मिति। पुरीषकरीषशब्दावत्र समानार्थावित्यर्थः। अतः करीषसम्बन्धादग्निः श्रियं प्राप्नोति। तादृशस्याग्नेरवरोधाय करीषसम्भरणं कार्य मित्यर्थः ॥ ७ ॥

शर्कराणां सम्भरणं विधत्ते—"अथ शर्करा इति। सन्निश्रिताः सूक्ष्मपाषाणाः शर्कराः। तेषा मधिश्रितानां दार्व्यहेतुत्व मितिहासेन दर्शयति—"देवाश्च वा, इति। देवासुरा उभये स्पर्द्धाश्चक्रिरे। देवासुरेषु युद्धाय कृतोद्यमेषु तद्भयात् 'पृथिवी अलेलायद्' चाञ्चल्यं प्राप्नोति। तत्र दृष्टान्त माह—"यथेति। 'यथा' जलस्योपरि 'पुष्करपर्णम्' इतस्ततः चञ्चलं भवति, 'एवम्' पृथिव्यपि इतस्ततः कम्पिता। 'तां' तदवस्था मापन्नां पृथिवीं 'वातः' वायुः पुष्करपर्णवदेव 'संवहति स्म'। यथा दारुमयीं (नावं) कश्चित् परपारं नयति, स्थानात् स्थानान्तरं प्रापयति। 'सा' त्वेवं कम्पमाना पृथिवी उभयविधानपि तान् 'उपाजगाम' ॥ ८ ॥

---

* तु० प० १३६ धा०।

यदा च सा देवानवाप्नोत्, तदा तत्कृतं परिहारं दर्शयति — "तद्धोचुरिति। 'प्रतिष्ठां' प्रतिष्ठितां 'दृंहामहै' दृढीकरवामहै। 'ध्रुवावां' निश्चलायाम्, 'अग्निथिलायां' दृढायाम्। वाक्यार्थः स्पष्टः। 'ततः' तस्मात् अग्न्याधानात् 'अस्यै' अस्याः पृथिव्याः सकाशात् शत्रुभूतानसुरान् 'निर्भज्यामः' निर्भक्तान् भागरहितान् कुर्यामेत्यर्थः। इत्थं प्रतिज्ञायथाः ॥ ९ ॥

प्रतिज्ञातैः कृतं दर्शयति— "तद्यथेति। 'यथा' आर्द्रं 'चर्म' भूमौ प्रसार्य 'शङ्कुभिः' परितो 'विहन्यात्', 'एवं' 'प्रतिष्ठां' सर्वप्राण्यास्पदभूताम् 'इमां' पृथिवीं शर्कराभिः 'पर्यबृंहन्त' परितः शर्करास्थापनेन दृढीकृतवन्तः। निगदसिद्ध मन्यद् ॥ १० ॥

एवं पुराहृत्त मुदाहृत्यैतद्दृष्टान्तेन प्रकृत मनुसन्धत्ते — "तथो एवेति। उक्तार्थ मेतत् ॥ ११ ॥

विहितसम्भरण मनूद्य तत्सङ्ख्योपजीवनेन प्रशंसति— "तान् वा एतानिति। 'तान्' पूर्वोक्तान् 'पञ्च सम्भारान्' 'सम्भरति'। उदकहिरण्योषाखुकरीषशर्कराः पञ्च सम्भाराः। "पाङ्क्तो यज्ञ इति। पञ्चपदा पङ्क्तिः *; 'यज्ञः' अपिधानाकरम्भादिपञ्चहविष्क इति † पञ्चसङ्ख्यायोगात् 'पाङ्क्तः'। अस्थिमज्जेतिपञ्चधातुमयत्वात् 'पशुः' अपि 'पाङ्क्तः' ‡। संवत्सरसम्बन्धिनः 'ऋतवः' वसन्ताद्या अपि पञ्चसङ्ख्याकाः। हेमन्तशिशिरयोः समासाभिप्राय मेतत्। तथा चैतरेयकम्— "हेमन्तशिशिरयोः समासेन"–इति ¶ ॥ १२ ॥

---

* ऐ० ब्रा० ६, ४, ४; ५, ४, २।

† "धानाः, करम्भः, परिवापः पुरोडाशः, पयस्येति" ऐ० ब्रा० २, ३, ६।

‡ ऐ० ब्रा० ६, ५, ३। ¶ ऐ० ब्रा० १, १, १।

तदेतत् पञ्चत्वं लोकप्रसिद्धिविरुद्धमित्याक्षिपति— "तदाहुरिति। हेमन्तशिशिरौ हि पृथक्त्वेन लोके प्रसिद्धौ; अतस्तयोरैक्यं न युक्तमितिभावः। परिहरति— "न्यून मिति। 'तर्हि' तथा सति ऋतुषट्के मिथुनत्रयसम्पत्तिः; पञ्चके तु तन्मिथुनत्रय मेकेन 'न्यूनं' भवति, तच्च प्रजननसाधनम् *। अत्र लोकप्रसिद्धिं माह— "न्यूनादिति। स्त्रीपुंसयोर्वीर्यस्य परस्परन्यूनत्वे सति तस्मात् 'न्यूनात्' मिथुनात् स्त्रीपुंसलक्षणानि अपत्यानि 'जायन्ते'। यस्मादेवं 'तस्मात्' पञ्चसम्भारलक्षणेन यत् मिथुनस्य न्यूनत्वम्, 'तत्' 'प्रजाःश्रेयसम्', 'प्रजाः' परदिवसे श्रेयसो जनकम्। "प्रशस्यस्य श्रीयः श्रेयसः"—इत्यच् समासान्तः †। तथा 'उत्तरावत्', 'उत्तरा' आगामिनी अभिवृद्धिः, तथोपेत मित्यर्थः। एव ऋतूनां षट्कैऽपि सम्भाराणां पञ्चसङ्ख्याकत्वं मुपपाद्याथापि न्यूनत्वं नाम कश्चित् नेष्ट इत्याशङ्क्य ‡ परिहरति—"यद्यु इति। यदि षड्ऋतुत्वं संवत्सरस्य सङ्ख्यास्ति, तर्हि एतेषां सम्भाराणा माधीयमानः 'अग्निरेव' 'षष्ठः' षट्सङ्ख्यापूरकः ॥ १३ ॥

असम्भार पञ्च माह— "तदाहुरिति। "एकञ्चनेति। एक मपीत्यर्थः। अत्रोपपत्ति माह— "अस्या मिति। आरोपित सर्वसम्भारभूतायां पृथिव्या माधानादेव तत्कार्यप्राप्तेर्न पृथक् सम्भारापेक्षेत्यर्थः। सम्भरणपञ्च मेव निगमयति— "तदु स मेवेति। "यदु सम्भारैरिति। 'यत्' खल्वाधाने सम्भृतैः 'सम्भारैः' निष्पन्नं भवति, 'तत्' खल्वाधानं भवति; सम्भारविरहे तु

---

* 'तच्चाप्रजननसाधनम्'—इति च,।

† पा० सू० ५,४४, ८०।

‡ 'कश्चिन्मन्येतित्याशङ्क्य'— इति च।

तदाधान मेव न भवतीति कुतस्तस्य पृथिवीसम्बन्धवशात् सम्भरणप्राप्तिरित्यर्थः ॥ १४ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे प्रथमाध्याये प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्.)

कृत्तिकास्वग्नी ऽआदधीत । एता वा ऽअग्निनक्षत्रं यत्कृत्तिकास्तद्वै सलोम योऽग्निनक्षत्रेऽग्नी आदधाते तस्मात् कृत्तिकास्वादधीत * ॥ १ ॥

एकं द्वे त्रीणि । चत्वारीति वा ऽअन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत् कृत्तिकास्वङ्गूमान मेवैतदुपैति तस्मात् कृत्तिकास्वादधीत ॥ २ ॥

एता ह वै प्राच्यै दिशो न च्यवन्ते । सर्वाणि ह वा ऽअन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते तत् प्राच्या मेवास्यैतद्दिश्याहितौ भवतस्तस्मात् कृत्तिकास्वादधीत † ॥ ३ ॥

अथ यस्मान्न कृत्तिकास्वादधीत । ऋच्छाणा‡

---

* 'दधीत'—इति ग, घ, ङ । † 'दधीत'—'इति ग, घ, ङ ।
‡ 'ऽर्च्छाणा'— इति ग, घ, ङ ।

ह वा ऽएता अग्रे पत्नय आसुः सप्तऽर्षीनु ह स्म वै पुरुऽर्चा इत्याचक्षते ता मिथुनेन व्यार्ध्यन्तामी स्मेतराहि सप्तऽर्षय उद्यन्ति पुर एता अश्व मिव वै तद्यो मिथुनेन व्यृद्धः स नेन् मिथुनेन व्यृद्धा ऽइति तस्मान्न कृत्तिकास्वादधीत ॥ ४ ॥

तद्वै व दधीत । अग्निर्व्वा ऽएतासां मिथुन मग्निनैता मिथुनेन समृद्धास्तस्मादेव दधीत ॥ ५ ॥

रोहिण्या मग्नी ऽआदधीत । रोहिण्याꣳ ह वै प्रजापतिः प्रजाकामो*ऽग्नी ऽआदधे स प्रजा असृजत ता अस्य प्रजाः सृष्टा एकरूपा उपसमब्धास्तस्मू रोहिण्य इवैव तद्वै रोहिण्यै रोहिणीत्वं बहुर्हैव प्रजया पशुभिर्भवति य एवं विद्वान् रोहिण्या माधत्ते ॥ ६ ॥

'रोहिण्या मु ह वै पशवः । अग्नी ऽआदधिरे मनुष्याणां कामꣳ रोहेमेति ते मनुष्याणां काम मरोहन् यु मु हैव तत् पशवो मनुष्येषु काम मरोहँस्तु मु हैव पशुषु कामꣳ रोहति य एवं विद्वान् रोहिण्या माधत्ते ॥ ७ ॥

मृगशीर्षेऽग्नी ऽआदधीत । एतद्वै प्रजापतेः

* 'प्रजाकामो,— इति ग, घ ।

शिरो यन् मृगशीर्षꣳ श्रोर्व्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्ङस्य श्रेष्ठो भवत्यसावमुष्यार्ङस्य शिर इत्याहुः श्रियꣳ ह गच्छति य एवं विद्वान् मृगशीर्ष ऽआधत्ते ॥ ८ ॥

अथ यस्मान्न मृगशीर्ष ऽआदधीत । प्रजापतेर्वा एतच्छरीरं यच्च वा ऽएनं तदविध्यंस्तदिषुणा त्रिकाण्डेनेत्याहुः स एतच्छरीर मजहादासु वै शरीर मयत्त्रियं निर्व्वीर्यं तस्मान्न मृगशीर्ष ऽआदधीत ॥ ९ ॥

तदेव दधीत । न वा ऽएतस्य देवस्य वास्तु नायत्त्रियं न शरीर मस्ति यत् प्रजापतेस्तस्मादेव दधीत पुनर्वस्वोः पुनराधेय मादधीतेति ॥ १० ॥

फल्गुनीष्वग्नी ऽआदधीत । एता वा ऽइन्द्रनक्षत्रं यत् फल्गुन्योऽस्य प्रतिनाम्न्योऽर्जुनो ह वै नामेन्द्रो यदस्य गुह्य नामार्जुन्यो वै नामैतास्ता एतत् परोऽक्ष माचक्षते फल्गुन्य इति को ह्येतस्यार्हति गुह्यं नाम ग्रहीतु मिन्द्रो वै यजमानस्तस्य ऽएवैतन्नक्षत्रेऽग्नी आधत्त ऽइन्द्रो यज्ञस्य देवतेतेनो हास्यैतत्सेन्द्र मग्न्याधेयं भवति पूर्वयोरादधीत पुरस्तात् क्रतुर्हैवास्मै भवत्युत्तरयोरादधीत प्रवःश्रेयसꣳ हैवास्मा ऽउत्तरावद् भवति ॥ ११ ॥

हस्तेऽग्नी ऽआदधीत । य इच्छेत्प्र मे दीये-तेति तदा ऽअनुष्ठ्या यद्धस्तेन प्रदीयते प्र हैवास्मै दीयते ॥ १२ ॥

चित्राया मग्नी ऽआदधीत । देवाश्चवा असुरा-श्चोभये प्राजापत्याः पस्पृधिरे त ऽउभय ऽएवामुं लोकꣳ समारुरुक्षाञ्चक्रुर्दिव मेव ततोऽसुरा रौहिण मित्यग्निं चिक्यिरेऽनेनामुं लोकꣳ समारोच्याम इति ॥ १३ ॥

इन्द्रो ह वा ऽईक्षाञ्चक्रे । इमं चेद्दाऽइमे चिन्वते तत एव नोऽभिभवन्तीति स ब्राह्मणो ब्रुवाण एकेष्टकां प्रबध्येयाय * ॥ १४ ॥

स होवाच । हन्ताह मिमा मप्युपदधा ऽइति तथेति ता मुपाधत्त तेषा मल्पकादेवाग्निरसञ्चित आस ॥ १५ ॥

अथ होवाच । अन्वा ऽअहं तां दाख्षे या ममे-क्षेति ता मभिपद्या बबर्ह † तस्या मावृढाया मग्नि-र्व्यवशशादाग्नेर्व्यवशाद मन्वसुरा व्यवशेदुः स ता एवेष्टका वज्रान् कृत्वा ग्रीवाः प्रचिच्छेद ॥ १६ ॥

ते ह देवाः समेत्योचुः । चित्रं वा ऽअभूम य

* 'प्रबध्येयाय' — इति ग. घ । † 'ववर्ह' — इति क, ख ।

ऽद्भ्यतः सपत्नानवधिष्मेति तद्वै चित्राय चित्रात्वं* चित्रꣳ ह भवति हन्ति सपत्नान् हन्ति द्विषन्तं भ्रातृव्यं य एवं विद्वांश्चित्राया माधत्ते तस्मादेतत् क्षत्रिय एव नक्षत्र मुपैत्यैन्द्राग्नꣳसतीव ह्येष सपत्नान् वीव जिगीषते ॥ १७ ॥

नाना ह वा ऽएतान्यये क्षत्राण्यासुः। यथैवासौ सूर्य्य एवं तेषा मेष उदयनेव वीर्य्यं क्षत्र मादत्त तस्मादादित्यो नाम यदेषां वीर्य्यं क्षत्र मादत्त ॥१८॥

ते ह देवा ऊचुः। यानि वै तानि क्षत्राण्य-भूवन् न वै तानि क्षत्राण्यभूवन्निति तद्वै नक्षत्राणां नक्षत्रत्वं तस्मादु सूर्य्यनक्षत्र ऽएव स्यादेष ह्येषां वीर्य्यं क्षत्र मादत्त यद्यु नक्षत्रकामः स्यादेतद्वा ऽअनपराद्धं नक्षत्रं यत् सूर्य्यः स एतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेत तदुपैत्यैत्तस्मादु सूर्य्यनक्षत्र ऽएव स्यात् ॥ १९ ॥ २ ॥

॥ इति प्रथमप्रपाठके द्वितीयं ब्राह्मणम् [१. २] ॥

कर्मणः कालसापेक्षत्वात् आधानस्य नक्षत्रं † विवक्षते— "कृत्तिकास्वित्यादिना। 'अग्नी' गार्हपत्याहवनीयावित्यर्थः।

* 'चित्रात्व२'—ग, घ। † 'नक्षत्राणि'— इति च।

अग्निदेवताकत्वादग्निनक्षत्रं कृत्तिकाख्यम्। श्रूयते हि—"कृत्तिकानक्षत्रमग्निर्देवतेति *। तस्मिन्नग्निनक्षत्रेऽग्न्याधानं 'सलोम' सदृशं, योग्य मिति यावत् ॥ १ ॥

अथैतस्य नक्षत्रस्य बहुत्वोपजीवनेन प्रशंसति—"एक मिति। कृत्तिकाः 'अन्यानि नक्षत्राणि' एक-द्वि-त्रि-चतुः-रुक्षाकाधिष्ठानान्यल्पीयांसि, कृत्तिकासु षट्रुक्षाधिष्ठानयोगात् 'भूयिष्ठाः' बहुतराः। तत्रार्द्रादीनाम् 'एकम्' अधिष्ठानम्, फल्गुन्यादीनां 'द्वे', अश्विन्यादीनां 'त्रीणि', पुनर्वस्वादीनां 'चत्वारि'। 'तत्' तस्मात्, एभ्यो भूयिष्ठनक्षत्राधानात् यजमानोऽपि 'भूमानं' बहुत्व मेवोपगच्छतीत्यर्थः ॥ २ ॥

नियतदिक्सम्बन्धवर्गेणैताः प्रशंसति—"एता ह वा इति। 'प्राच्यै' प्राच्याः 'दिशः' सकाशात् 'न च्यवन्ते' दक्षिणत उत्तरतो वा विक्षेपवशात् न चलन्ति, किन्तु नियमेन पूर्वप्राच्या मेवोद्यन्ति; 'अन्यानि' तु 'नक्षत्राणि' प्राचीदिग्भागाद् दक्षिणत उत्तरतो वा विक्षेपवशात् चलन्ति, प्राचीदिग्भागाद् दक्षिणत उत्तरतश्च नियमेन परिवर्त्तन्ते। "तत् प्राच्या मित्यादि। निगदसिद्धम् ॥ ३ ॥

कृत्तिकास्वाधानपक्षं मिथुनव्यूढिहेतुत्वान्निषेधति—"अथ यस्मादिति। 'यस्माद्' वक्ष्यमाणदोषोऽस्ति, तस्मात् कृत्तिकासु न आदधीत'। कोऽसौ दोषः? तमुपन्यस्यति—"ऋक्षाणां हेति। ऋक्षशब्दार्थं माह—"सप्तर्षीनिति। 'ऋक्षं' नक्षत्रम्; तद्रूपेणावस्थानात्। इह 'ऋक्ष'-शब्देन सप्तर्षयोऽभिधीयन्ते। "पुर

---

* 'एतद्वा अग्नेर्नक्षत्रं यत् कृत्तिकाः'—इति तै० ब्रा० १.१.२.१।

कृत्वा इति * प्रकृतिभावो ह्रस्वश्च† । 'व्यार्द्धन्त' विगतर्द्धिका अभवन् । व्यृद्धि मिव‡ देशभेदोदयेन स्पष्टयति—"अमी हीति । 'अमी' खलु 'समर्षयः' 'उत्तराहि' । "आहि च दूरे"—इति § आहिप्रत्ययः । दूरदेशे उत्तरदिग्भागे 'उद्यन्ति' । 'एताः कृत्तिकाः 'पुरः' पूर्वस्यां दिशि । अत एव तासां विभिन्नदेशावस्थानेन ¶ पुरुषसम्भोगविरहात् मिथुनव्यृद्धिः । तच्चासमीचीनमित्याह—"अग्न मिव वै तदिति । अतः कृत्तिकास्वाधानं कुर्वन्नपि तदत् मिथुनेन व्यृध्यते, अतो 'न इत्' नैवाहं 'मिथुनेन' 'व्यृद्धै' व्यृद्धो भवानीत्यभिप्रेत्य तच्च नादधातीत्यर्थः ॥ ४ ॥

अथैतद्दोषं परिहरन्नाधानपक्ष मेव निगमयति—"तद्वै वेति । 'तत् उ आ एव' तस्मिन्नपि नक्षत्रे आदधीतैव । "अग्निर्वा इत्यादि, स्पष्टम् ॥ ५ ॥

नक्षत्रान्तरं विधाय प्रशंसति—"रोहिण्या मिति । 'आदधे' आधानं कृतवान् । 'उपस्तभ्याः' प्रतिबद्धगतयो ‖ विनाग्नयरहिताः पुत्रपौत्रादिरूपेणैकरूपा अविच्छिन्नप्रवाहाः 'तस्थुः' स्थितवत्यः **। ताश्च 'रोहिण्यः' स्वर्गादिलोकारोहणसाधनभूता इति स्थिताः ††। एतदुपजीवनेन नामनिर्वचनं करोति—"तद्वा इति । स्पष्टार्थं मन्यत् ॥ ६ ॥

रोहिण्याधानं प्रकारान्तरेण प्रशंसति—"रोहिण्या मु हैति ।

---

* पुरश्चर्त्या इत्येव पाठो दृश्यते मूलपुस्तकेषु ।

† पा० ६. १. १२० सूत्रं द्रष्टव्यम् । ‡ 'व्यृद्धि मिव'—इति च ।

§ पा० सू० ५. ३. ३७. ।

¶ 'अत एवातीवसम्भिन्नदेशावस्थानेन'—इति च ।

‖ 'प्रतिबद्धजातयो'—इति च । ** 'स्थितवन्त्यः'—इति च ।

†† 'साधना इति'—इति च ।

मनुष्याणां कामं रोहेमेति। 'मनुष्याणां' 'कामः' भोग्यवस्तु-विषयः, तत्पूरणसामर्थ्ययोग्येन तं प्राप्नुयामेत्यर्थः। "य मु ह्रैवेति। रोहिण्याधानेन काम्यमानं भोग्यवस्तुजातं पूरण-सामर्थ्ययोगात् 'मनुष्येषु' अवस्थितं 'य मु' य मेव 'कामं' प्राप्नुवन्, 'तम्' एव 'पशुषु' अवस्थितं रोहिण्या माधानतः प्राप्नोति *। एत मेव सर्वे जना उपजीव्यत्वेन कामयन्त इति भावः ॥ ७ ॥

नक्षत्रान्तरं विधाय प्रशंसति—"मृगशीर्षं इति। पुरा खलु प्रजापतिः मृगरूप † माख्याय मृगीभूतां स्वदुहितर मभ्या-गमत् ‡। "एतद्वा इति। एतत् ज्ञात्वा अकार्यकारिणः प्रजापतेः शिरः छेत्तुं देवाः कञ्चित् क्रोधमयं पुरुषं निर्माय प्रत्यतिष्ठन्। स चेषुणा तस्य शिरश्चिच्छेद। तच्च मृग-शरीर मिषुच्छिन्नशिरश्चेत्येतदुभय § मन्तरिक्ष मुत्प्लुत्य नक्षत्रात्म-नावस्थितं सन्दृश्यते। तथा चैतरेयकम्—"प्रजापतिर्वै स्वां दुहितर सम्प्रध्यायत्'—इत्युपक्रम्य "सो एवेषुस्त्रिकाण्डा"—इत्यन्ते-नाय मर्थः प्रतिपादितः ¶। ईदृशी श्रुत्यन्तरप्रसिद्धिरत्र 'वै'-शब्देन द्योत्यते ‖। "श्रोर्वैशिर इत्यादि। व्याख्यातम् ॥ ८ ॥

तदेतन्मृगशीर्षाधानं निषेधति—'अथ यस्मान्नेति। मृग-शीर्षाधानं न कार्यम्, अत्र हेतुः प्रतिपाद्यत इत्यर्थः। कोऽसौ हेतुः ? त माह—"प्रजापतेरिति। मृगशीर्षाख्यस्य नक्षत्रस्य

---

* "यो रोहिण्या मग्नि माधत्ते,ऋध्नोत्येव"—इति तै० ब्रा० १.१.२.२।

† 'ऋष्यरूप'—इति च। ‡ 'मेवोपागमत्'—इति च।

§ 'इषुः शिरश्चेत्येतदुभय'—इति च। ¶ तै० ब्रा० ३. ३. ६।

‖ 'प्रतिपाद्यते'—इति छ, ज।

प्रजापतिशरीरत्वं माह— 'यत्र' यस्मिन् समये 'एनं' प्रजापतिं मृगरूपम्, * 'तत्' तेन स्वदुश्चिह्नगमनरूपेण दोषेण हेतुना देवाः 'अविध्यन्', 'तत्' तदानीं पत्रदारुशल्यरूपावयवत्रयोपेतेन † 'इषुणा' खलु तच्छिरश्छिन्नम् ‡ 'इत्याहुः' ब्रह्मवादिनः। 'सः' च प्रजापतिस्तदानीम् 'एतच्छरीरम्' त्यक्तवान्। अतो निरात्मकत्वात् 'निर्वीर्यं' नक्षत्रात्मनावस्थितं मृगशिरः 'वास्तु' शून्यस्थानम्। यत एवात्मना त्यक्तम्, अत एव 'शरीरं' विशरणशीलम्; अतएव च 'अयज्ञियं' यज्ञानर्हम्, न हि मृगशरीरस्य यज्ञात्मत्वं सम्भवति। 'तस्मात्' तदात्मके मृगशीर्षाख्ये नक्षत्रे आधानं न युक्त मित्यर्थः॥ ६॥

इमं दोषं परिहरन् प्रागुक्त मेव पक्षं निगमयति— "तद्वैवेति। "देवस्येति। मनुष्येण त्यक्तस्य वास्त्वादिरूपत्वम्, अयं हि प्रजापतिर्देवः, तेन त्यक्तस्य तत्त्वाभावात् वास्त्वादिरूपो दोषो नास्ति; मृगरूपस्य शिरः स्वमहिम्नैव नक्षत्ररूपत्वं सम्यक्तम्, न खलु मानुषं शिरस्तथा भवितु मर्हति। तस्मात् तत्राधाने नोक्तदोष इत्यर्थः॥

पुनर्वस्वाख्यस्य नक्षत्रस्य लिङ्गवशात् पुनराधेय-विषयता माह— "पुनर्वस्वोरिति। आहिताग्नेः मध्यगतानां पुनर्वस्वाभिन्नवशादाधानं पुनराधेयम् §। नक्षत्रं चैतत् नष्टस्य वसुनः

---

* 'क्षणान्मृगरूपम्'—इति च।

† " 'त्रिकाण्डा' अनीकं, ग्राह्याः, तेजन मित्यवयवत्रयोपेता"— इति ऐ० ब्रा० ३. ३. ६. सा० भा०। ‡ 'च्छिनत्ति'—इति क्व. ज।

§ 'पुनराधेय माधानप्रतिज्ञातस्य"— इत्यादीनि सूत्राणि द्रष्टव्यानि (का० श्रौ० सू० ११. १.—१५.)।

पुनःप्राप्तिहेतुत्वात् पुनर्वस्वाख्यम् *। तथाच तैत्तिरीयके स्पष्टमाम्नातम्—"स पुनर्वस्वोरग्निमादधीत, पुनरेवैनं वामं वसूपावर्त्तते"—इति † ॥ १० ॥

"फल्गुनीष्वग्नी इति। पूर्वोत्तरफल्गुन्याख्ययोर्नक्षत्रयोः प्रत्येकमधिष्ठानद्वित्वयोगात् द्वित्वम्। फल्गुनीनामोपजीवनेन प्रशंसति—"एता वा इति। कथमस्य नक्षत्रस्येन्द्रसम्बन्ध इत्यत आह—"अप्यस्येति। 'अस्य' इन्द्रस्य प्रतिनिधिभूताः फल्गुन्यः सम्भाव्यन्ते। 'अपि' सम्भावनार्थः। प्रतिनिधित्वं च समानशब्दाभिधेयत्वादित्याह—"अर्जुनो ह्येति। 'अर्जुनः' 'इति' हि इन्द्रस्य रहस्यं नाम; अत एव खलु तत्पुत्रे पाण्डुमध्यमे प्रवृत्तिः। अर्जुनफल्गुनशब्दौ च पर्यायौ; अर्जुनः फल्गुनः पार्थ इति समानार्थपरिगणनात्। 'अर्जुन्यः' एव 'एताः', पारोक्ष्येण 'फल्गुन्य इति' उच्यन्ते। न तु किं पारोक्ष्येणेत्यत आह—"कोऽर्हतीति। अतः फल्गुनीशब्दस्य परम्परयेन्द्रोपलक्षकत्वात् तन्नामकं नक्षत्रम्। "इन्द्रो वा इत्यादि, स्पष्टम्। फल्गुनीषु पूर्वोत्तरत्वमुपजीव्य हित माधानं प्रशंसति—"पूर्वयोरित्यादिना ‡। "पुरस्तात् क्रतुरिति। पूर्वस्मिन्नागामिनि काले ऽग्निष्टोमादिलक्षणः 'क्रतुः' शीघ्रं सिद्ध्यतीत्यर्थः। "श्रेयसमित्यादि। उक्तार्थम् § ॥ ११ ॥

---

* 'पुनर्वस्वोः'—इति का० श्रौ० सू० ४. ११. ५।

† तै० ब्रा० १. १. २. ३।

‡ "पूर्वयोः फल्गुन्योरग्निमादधीत"—इत्यादि, "उत्तरयोः फल्गुन्योरग्निमादधीत"—इत्यादि च तै० ब्रा० १. १. २. ४।

§ "कृत्तिकारोहिणीमृगशिरःफल्गुनीषु"—इति का०श्रौ०सू० ४. ७. २।

"हस्तेऽग्नीत्यादि। निगदसिद्धम्। स्वहस्तेन 'यत्' खलु दानम्, 'तद्' एव 'अनुष्ठया' अनुष्ठानेन समीचीनम्। अतो हस्तनक्षत्रे अग्न्याधानात् परकर्त्तृकं हस्तेन दानं प्राप्नोतीति तात्पर्यार्थः * ॥ १२ ॥

"चित्राया मित्यादि। "आरुरुक्षाञ्चक्रुरिति। आरोढु मिच्छां कृतवन्त इत्यर्थः। अमु मिति 'अदस्'-शब्देन पारोक्षेण यो लोको निर्दिष्टः, तं विशिनष्टि—"दिव मेवेति। 'ततः' अनन्तरम् 'असुराः' 'रौहिण मिति' एतन्नामकं रोहणसाधनम् 'अग्निं' 'चिक्ये'। व्यत्ययेनैकवचनम्, † 'चिक्यिरे' चितवन्तः। "अनेनेत्यादि। स्पष्टम् ॥ १३ ॥

"इन्द्रो हेति। "इमं चेत्यादि। यम् 'इमम्' अग्निं वयं चेष्यामः, इम मेव चेदसुरा अपि चिन्वीरन्, 'ततः' तस्मात् 'एव' साधनात् 'नः' अस्मान् 'अभिभवन्ति' असुराः, अभिभवितुं समर्था भवन्ति। 'इति' विचार्य, 'सः' इन्द्रः 'ब्राह्मणः' भूत्वा असुरद्दितं ब्रुवाण एव 'एका मिष्टकां' 'प्रवध्य' गृहीत्वा 'इयाय' जगाम ॥ १४ ॥

"स होवाचेति। गत्वा च तान् असुरान् 'उवाच'। 'अहम्' अपि 'इमाम्' इष्टकां भवदीयेऽग्नौ 'उपदधै' उपधानं करवाणि 'इति'। 'तथा इति' तैरनुज्ञातः, 'ताम्' इष्टकां तत्र 'आधत्त'। अन्यदीये चयने अन्यदीयेष्टकोपधान मशास्त्रीय मित्येतस्मात् 'अल्पकादेव' भेषात् ‡ 'तेषाम्' असुराणाम् 'अग्निः' असम्यक् चितो विकल्पो बभूव ॥ १५ ॥

---

* "हस्तो लाभकामस्य"— इति का० श्रौ सू० ४. ७. ३।

† पा० सू० १. ४. ६। ‡ 'भेत्रे भंगो यथोचितात्'— इत्यमरः २. ८. २३।

"अथ होवाचेति। 'अथ' कालान्तरे स एव ब्राह्मणरूप इन्द्रः तानसुरान् 'उवाच'। 'इह' अस्मिन् चितप्रदेशे 'या' 'मम' इष्टका, 'ताम्' 'आदास्ये' इत्युक्त्वा तत्समीप मभिप्राप्य, ताम्' इष्टकाम् 'आववर्ह' * उद्यमम्, तस्मात् स्थानादचालय-दित्यर्थः। "हृङ् उद्यमने"-इति † धातुः। 'तस्यां' चेष्टकायां चित्याग्नेः सकाशाच्चालितायां सत्यां, सः 'अग्निः' 'व्यवसशाद' ‡ विशीर्णो बभूव। तदनन्तरं तच्चेतारः 'असुराः' च 'व्यवशेदुः' § व्यवसन्नाः ¶ शिथिला बभूवुः। "स ता इत्यादि स्पष्टम्। "ओवा इति। असुरसम्बधिनीः ॥ १६ ॥

"ते ह देवा इति। चित्याख्येष्टका। अस्या एवं चित्र-हेतुत्वात् 'चित्या' नाम सम्पन्न मित्यर्थः। "चित्रं वै इत्यादि निगद-सिद्धम्। "तस्मादेतदित्यादि। यस्मादुक्तरीत्या चित्या-नक्षत्रस्य शत्रुहननसाधनत्वम्, 'तस्मात्' अधीने 'क्षत्रिय एव' 'एतत्' नक्षत्रं ('उपैर्क्षेत्') स्वीकुर्यात् ॥। तत्र कारण माह— "जिघांसतीवेति। 'एषः' खलु क्षत्रियः अन्यान् शत्रून् 'जिघांसति' हन्तु मिच्छति 'इव', तथा 'विजिगीषते' 'इव' विजेतु मिच्छतीव। तस्माच्छत्रुहननकामस्य क्षत्रियस्यैवैतन्नक्षत्रम्, नान्यस्येत्यर्थः ** ॥ १७ ॥

---

*—† 'आववर्ह'—इति, 'हृङ्'- इति च क—घ-ढौ, मतान्तरे.ऽस्मि न्धेव धातुरन्यस्मात्पूर्वोऽपि। ‡ 'अवशसाद'— इति क।

§—¶ 'अवसेदुः'— इति च। 'अवशन्नाः'— इति क, ज।

‖ "स चित्राया मभि मादधीत"— इत्यादि तै० ब्रा० १. १. २. ६।

** "चित्रायां क्षत्रियस्य"— इति का० श्रौ० सू० ४. ७. ४।

सूर्येणापहृतवीर्याणि कृत्तिकादिनक्षत्राण्यनादृत्य तेजस्विनि सूर्यात्मके नक्षत्रे उद्यति सति आधानं कार्यमित्याह—"नाना ह वा इति। पुरा खलु कृत्तिकादिनक्षत्रमण्डलानि सूर्यमण्डलवत् तेजस्विन्येव बभूवुः। 'एषः' खलु 'सूर्यः' 'उद्यन्' क्षत्रं तेजः सामर्थ्यं च उदय मापद्यन् 'एव' 'तेषां' 'वीर्यं' 'आदत्त' स्वीकृतवान्। 'तस्मात्' आदानात् 'आदित्यः' इति उच्यते ॥ १८ ॥

नक्षत्रनामधेयं निर्वक्ति—"ते हेति। 'यानि' खलु पुरा 'क्षत्राणि' 'अभूवन्', 'तानि' इदानीं सूर्येण क्षत्रगुणस्यापहृतत्वात्, न विद्यते क्षत्र मेषा मिति व्युत्पत्त्या 'नक्षत्राणि' सम्पन्नानीत्यर्थः। यस्मादेवं कृत्तिकादीन्यपहृतवीर्याणि, 'तस्मात्' एव कारणात् सूर्यात्मके 'एव' तेजस्विनि नक्षत्रे आधानं स्यात् *। तत्र हेतु माह—"एष ह्येति। 'हि' यस्मात् 'एषः' सूर्यः 'एषां' नक्षत्राणां वीर्यादिकम् 'आदत्ते', तस्मात् स्ववीर्ये तस्मिन्नाधानं युज्यत इत्यर्थः। यदि च यजमानः तत्तत्पूजार्थं नक्षत्रकामः स्यात्, तदानी मपि सूर्यात्मक मेव नक्षत्र मुपादधीतेत्याह— "एतद्वा इति। 'अनपराद्धम्'—इति हेतुगर्भविशेषणम्। यतस्तेजोवियोगलक्षणापराधरहितम्, अतस्तदेव सूर्यात्मकं नक्षत्रं कामयेतेत्यर्थः। तेन कृत्स्ननक्षत्राणां प्राप्ति माह—"स एतेनैवेति। 'एतेनैव' सूर्येणोद्यता पुण्यकालात्मना

---

* सूर्यो नक्षत्रं कालोपलक्षणं यस्य सोऽयं सूर्यनक्षत्रः; सूर्योपलक्षिते एव काले आदधीत, न नक्षत्रोपलक्षिते इत्यर्थः। कथं तत् सूर्यकालं लक्षयति? 'उदगयनम्'—इत्याद्याहेह वक्ष्यामी।

क्तस्यनक्षत्रेऽप्याधानफल मुपगच्छेत् । 'तस्मात्' सूर्यात्मके एव नक्षत्रे उद्यति सति आधानं स्यात्, न रात्रा-वित्यर्थः * ॥ १६ ॥ २ ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥

---

* (१) "अग्नेः कृत्तिकाः ० ० ०। (२) प्रजापते रोहिणी ० ० ०। ३) सोमस्यैन्वका [मृगशिरा:] ० ० ०। (४) रुद्रस्य बाहू [आर्द्रा] ० ० ०। (५) अदित्यै पुनर्वसू ० ० ०। (६) बृहस्पते स्तिष्यः [पुष्यः] ० ० ०। (७) सर्पाणा मश्लेषाः ० ० ०। (८) पितॄणां मघाः ० ० ०। (६) अर्यमणः पूर्वे फल्गुनी ० ० ०। (१०) भगस्योत्तरे ० ० ०। (११) देवस्य सवितुर्हस्तः ० ० ०। (१२) इन्द्रस्य चित्रा ० ० ०। (१३) वायो-र्निष्ट्या [स्वाती] ० ० ०। (१४) इन्द्राग्नियोर्विशाखे ० ० ०। (१५) मित्र-स्यानूराधाः ० ० ०। (१६) इन्द्रस्य रोहिणी [ज्येष्ठा] ० ० ०। (१७) निर्ऋत्यै मूलबर्हिणी ० ० ०। (१८) अपां पूर्वाषाढाः ० ० ०। (१६) विश्वेषां देवाना मुत्तराः ० ० ०। (२०) विष्णोः श्रोणा [श्रवणा] ० ० ०। (२१) वसूनां श्रविष्ठाः [धनिष्ठाः] ० ० ०। (२२) इन्द्रस्य शतभिषक् ० ० ०। (२३) अजस्यैकपदः पूर्वे प्रोष्ठपदाः ० ० ०। (२४) अहेर्बुध्नियस्योत्तरे ० ० ०। (२५) पूष्णो रेवती ० ० ०। (२६) अश्विनोरश्वयुजौ ० ० ०। (२७) यमस्यापभरणीः ० ० ०।— "इति तै० ब्रा० १. ५. १ अ०। ततो ऽग्रे २अ०— (२८) "अभिजिन्नाम नक्षत्रं मुपरिष्टादषाढाना मधस्ताच्छ्रो-णायै"—इत्यादि उत्तराषाढानक्षत्रस्य यच्चतुर्थः पादः, श्रवणनक्षत्रस्य च यः प्रथमः पादः, तदुभयं मिलित्वा नक्षत्रसन्धिरूप मभिजिदाख्यं किञ्चि-न्नक्षत्रम्'— इति च तत्र सा०। अत्र च "कृत्तिकाः प्रथमं विशाखे उत्तमम्, तानि (१—१४) देवनक्षत्राणि; अनूराधाः प्रथम मपभरणी-

(अथ तृतीयं ब्राह्मणम.)

व्वसन्तो ग्रीष्मो व्वर्षाः *। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य एवापूर्यतेऽर्द्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरङ्गः पूर्व्वाह्णो देवा अपराह्णः पितरः ॥१॥

ते वा ऽएत ऽऋतवः। देवाः पितरः स यो हैवं व्विद्वान् देवाः पितर इति ह्वयत्या हास्य देवा देवह्वयं गच्छन्त्या पितरः पितृह्वय मवन्ति हैनं देवा देवह्वयेऽवन्ति पितरः पितृह्वये य एवं व्विद्वान् देवाः पितर इति ह्वयति ॥ २ ॥

स यत्रोदङ्ङावर्त्तते†। देवेषु तर्हि भवति‡ देवांस्तर्ह्यभिगोपायत्यथ यत्र दक्षिणावर्त्तते पितृषु तर्हि भवति पितॄंस्तर्ह्यभिगोपायति ॥ ३ ॥

स यत्रोदङ्ङावर्त्तते§। तर्ह्यग्नी ऽआदधीतापहत-

रुत्तमम्, तानि (१५–२८) यमनक्षत्राणि। यानि देवनक्षत्राणि, तानि दक्षिणेन परियन्ति; यानि यमनक्षत्राणि, तान्युत्तरेण। ० ० ०। यान्येव देवनक्षत्राणि, तेषु कुर्वीत यत्कारी स्यात्; पुण्याह्न एव कुरुते"—इति च तत्रैव तत उत्तरम्। * 'व्वर्षाः'—इति ग, घ।

†, § 'दङ्ङावर्त्तते'—इति क। 'दगावर्त्तते'—इति ग, घ।

‡ 'भवति'—इति च ट्ठो डा०-वेबरेण।

पाप्मानो देवा अप पाप्मानꣳ हतेऽमृता देवा नामृतत्वꣳशाशास्ति सर्व्वं मायुरेति यस्तर्ह्याधत्तेऽथ यत्र दक्षिणावर्त्तते यस्तर्ह्याधत्तेऽनपहतपाप्मानः पितरो न पाप्मान मपहते मर्त्याः पितरः पुरा हायुषो म्रियते यस्तर्ह्याधत्ते ॥ ४ ॥

ब्रह्मैव व्वसन्तः । ऋचं ग्रीष्मो व्विडेव व्वर्षास्तस्माद् ब्राह्मणो व्वसन्त ऽआदधीत ब्रह्म हि व्वसन्तस्तस्मात् ऋचियो ग्रीष्म ऽआदधीत ऋचꣳ हि ग्रीष्मस्तस्माद्वैश्य व्वर्षास्वादधीत व्विड्ढि व्वर्षाः ॥ ५ ॥

स यः कामयेत । ब्रह्मवर्च्चसी स्या मिति व्वसन्ते स आदधीत ब्रह्म वै व्वसन्तो ब्रह्मवर्च्चसी हैव भवति ॥ ६ ॥

अथ यः कामयेत । ऋचꣳ श्रिया यशसा स्या मिति ग्रीष्मे स आदधीत ऋचं वै ग्रीष्मः ऋचꣳ हैव श्रिया यशसा भवति ॥ ७ ॥

अथ यः कामयेत । बहुः प्रजया पशुभिः स्या मिति व्वर्षासु स आदधीत व्विड् वै व्वर्षा अन्नं व्विशो बहुर्हैव प्रजया पशुभिर्भवति य एवं व्विद्वान् वर्षास्वाधत्ते ॥ ८ ॥

ते वा ऽएत ऽऋतवः । उभय ऽएवापहतपाप्मानः सूर्य एवैषां पाप्मनोऽपहन्त्योद्यन्नेवैषा मुभयेषां पाप्मान मपहन्ति तस्माद्दैवैनं कदा च यन्न ऽउपनमेदृथाग्नी ऽआदधीत न ह्वः ह्व मुपासीत को हि मनुष्यस्य ह्वो वेद ॥ ९ ॥ ३ ॥

॥ श्रुति प्रथमप्रपाठके तृतीयं ब्राह्मणम् [१.३.] ॥

अथाधानस्य वसन्ताद्यृतुविध्यर्थं ऋत्वादीनां देवपित्रात्मना द्वेधा विभाग माह— "वसन्त इत्यादिना । वसन्ताद्यृतुसमये देवानां सूर्यदर्शनादहर्भवतीति तेषां तादात्म्यम् ; शरदादीनां तद्दैलक्षण्यात् पितृरूपत्वम् । "य एवापूर्यते"—इत्यादि, निगदसिद्धम् ॥ १ ॥

"ते वा एत ऋतव इति । "स यो हैवं विद्वानित्यादि । एव मृतूनां देवत्वं पितृत्वं च 'विद्वान्' तान् ऋतून् 'देवाः पितरः' 'इति' 'ह्वयति' व्यवहरेदित्यर्थः । तस्य फल माह— "आ हास्येति । 'अस्य' आह्वातुः 'देवहूयं देवाह्वानं प्रति देवा आगच्छन्ति, तथा 'पितृहूयं पैतृक माह्वानं प्रति पितरोऽप्यागच्छन्ति । आगताश्च ते स्वसम्बन्धे कर्मणि 'एनम्' आह्वातारम् 'अवति' इत्यर्थः ॥ २ ॥

आधानस्योदगयनं कालं विधित्सुर्द्वयोरप्ययनयोर्देवपितृसम्बन्धं क्रमेणाह— "स यत्रेति । 'सः' सूर्यो यस्मिन् काले दक्षिणगोलादुत्तरगोलं प्रति 'उदङ्' पर्यावर्त्तते, 'तर्हि' तदा, तस्मिन् समये मेरोरुपरिभागेऽवस्थितानां देवानां स दृष्टि-

गोचरो भवतीति तेषु उदङ् 'देवेषु' प्रकाशो भवतीति। 'अथ' 'यत्र' यस्मिन् काले पुनरुत्तरगोलाद् दक्षिणगोलं पर्यावर्त्तते, तदा दक्षिणदिगवस्थितस्य प्रकाशः, स तु तेषु 'पितृषु' भवति ॥ ३ ॥

एव मुत्तरायणे दक्षिणायने च देवपितृसम्बन्ध मभिधाय, तत्सम्बद्ध माधान मपि तत्रैव कार्य मिति विधत्ते—"स यत्रेति। "अपहतपाप्मान इति। देवानां पापराहित्यात् मरणधर्मराहित्याच्च तत्सम्बन्धिन्ययनेऽन्याधानकारिणोऽपि तदुभयं सिद्धयतीत्यर्थः। दक्षिणायने आधातुरुक्तवैपरीत्य माह—"अथ यत्रेति ॥४॥

एव मुदगयनं विधाय तत्रापि ब्रह्मक्षत्रादिवर्णानुसारेण ऋतुव्यवस्थां करोति— "ब्रह्मैव वसन्त इत्यादिना। वसन्ताद्या ऋतवः जात्या ब्रह्मक्षत्राद्यात्मकाः, अतस्तेषां क्रमेण तत्तज्जात्याधानकालत्वम् * ॥ ५ ॥

एवं नित्यपक्ष मभिधाय काम्यपक्ष माह— "स य इति। "ब्रह्मवर्चसी हैवेति। ब्राह्मणजात्यात्मके वसन्ते आधानात् क्षत्रियादिरपि ब्राह्मणतेजस्सम्पन्नो भवतीत्यर्थः। एव मुत्तरत्रापि योज्यम् ॥ ६ ॥

"अथ यः कामयेतेति। "क्षत्रं श्रियेति। क्षत्रियजातेरपि 'श्रिया' सम्पदा कीर्त्या च क्षत्रात्मकः स्या मिति कामयमानस्य ब्राह्मणादेः ग्रीष्म आधानकाल इत्यर्थः ॥ ७ ॥

---

* "वसन्तो ब्राह्मण-ब्रह्मवर्चसकामयोः, ग्रीष्मः क्षत्रिय-श्रीकामयोः, वर्षाः प्रजापशुकाम—वैश्यरथक्षताम्"—इति का० श्रौ० सू० ४. ७. ५, ६, ७। "शिशिरः सार्ववर्णिकः"— इति च शाखान्तरम्।

"अथ यः कामयेतेति। बहुप्रजापश्वादिसमृद्धिकामस्य वैश्यस्यापि तत्फलप्राप्तये वर्षास्वाधानं सम्यग्यत इत्यर्थः ॥ ८ ॥

एव मयनविशेष मृतुविशेषं चाभिधाय पक्षान्तरं च वक्तुं सर्वेषा मप्यृतूनां पापसम्बन्धराहित्य माह— "ते वा एत इति। "उभय एवेति। देवपित्रसम्बन्धितया द्विधा प्रतिपादिता एवेत्यर्थः। पापराहित्ये कारण माह— "सूर्य एवेति। यस्मादेव सर्वेऽप्यृतवः पापराहित्येन शुद्धाः, 'तस्मात्' यस्मिन् कस्मिंश्चिदृतौ सोमयाग मभिगच्छेत्, 'अथ' अनन्तर मेव अग्न्याधानं कुर्यात्; "न श्वः—श्व मुपासीतेति। 'श्वः करवाणि'—इत्येवं कालान्तरप्रतीक्षा न कुर्यात्। तत्र हेतु माह— "को ह्येति। 'मनुष्यस्य' 'श्वः' श्वःकालसम्बन्धि जीवनं 'कः' नाम 'वेद' जानीयात्? आयुषोऽस्थिरत्वादित्यर्थः ॥ ९ ॥ ३ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे प्रथमाध्याये तृतीयं ब्राह्मणम् ॥

(अथ चतुर्थं ब्राह्मणम्.)

यदहरस्य श्वोऽग्न्याधेयꣳ स्यात्। द्विर्वैवाग्नीयान्मनो ह वै देवा मनुष्यस्याजानन्ति तेऽस्येतच्छ्वो-

ऽग्न्याधेयं विदुस्तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः ॥ १ ॥

तन्वे* वानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्व्वोऽश्नीयादथ किं मु यो देवेष्वनश्नत्सु पूर्व्वोऽश्नीयात् तस्मादु दिवैवाश्नीयात्तदपि† काम मेव नक्त मश्नीयान्नो ह्येनाहिताग्नेव्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्तस्माद्दपि काम मेव नक्त मश्नीयात् ॥ २ ॥

तद्वैकेऽज मुपव्वसन्ति। आग्नेयोऽजोऽग्नेरेव सर्व्वत्वायेति व्वदन्तस्तदु तथा न कुर्याद्यद्यस्याजः स्यादग्नीध ऽएवैनं प्रातर्दद्यात्तेनैव तं काम माप्नोति तस्मादु तन्नाद्रियेत ‡ ॥ ३ ॥

अथ चातुष्प्राश्य मोदनं पचन्ति। कुन्दाऽएतेन प्रीणीम इति यथा येन व्वाहनेन स्यन्तस्यन्तस्यात्तत् सुहितं कर्त्तवे ब्रूयादेव मेतदिति व्वदन्तस्तदु तथा न कुर्याद्यदा ऽस्य ब्राह्मणाः कुले व्वसन्त्यृत्विजस्या-

---

* 'तन्वे'—इयि क, ख, ङ।

† 'त्तदपि'—इति च डा०-वेबर-दृष्टः।

‡ 'तं नाद्रियेत'— इति ख, डा०-वेबरेण च दृष्टः।

ऋत्विजश्च तेनैव तं कामं माप्नोति तस्मादु तन्नाद्रियेत * ॥ ४ ॥

तस्य सर्पि†रासेचनं कृत्वा । सर्पिरासिच्याश्वत्थौदुम्बरीभिः समिधो घृतेनान्वज्य समिद्भिर्घृतवतीभिरग्निमभ्यादधति शमीगर्भं मेतदाप्नुम इति ब्रुवन्तः स यः पुरस्तात्संवत्सरं मभ्यादध्यात् स ह तं कामं माप्नुयात् तस्मादु तन्नाद्रियेत ‡ ॥ ५ ॥

तदु होवाच भाल्लवेयः § । यथा वा ऽअन्यत्करिष्यन्त्सोऽन्यत् कुर्याद्यथान्यद्वदिष्यन्त्सोऽन्यद्वदेद्यथान्येन पथैष्यन्त्सोऽन्येन प्रतिपद्येतैवं तद्य एतं चातुष्प्राश्य मोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते यस्मिन्नग्नाहचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयाद्यत्त दक्षिणा वा हरेयुरनु वा गमयेयुर्दक्षिणा वा क्षेनꣳ हरन्त्यन्वाहार्यपचनो भविष्यतीत्यनु वा गमयन्ति ॥ ६ ॥

अथ जायति जायति देवाः¶ । ता॥देवानेवैतदुपा-

---

*, ‡ 'तं नाद्रियेत'— इति ख, ङ।-वेबरेण च दृष्टः ।

† 'सर्पि'— इति च दृष्टो वे० । § 'भाल्लवेयो'— इति क, ङ ।

¶ 'देवाः'— इति ग, घ । ॥ 'देवा । स्त'— इति क, ङ ।

वर्त्तते स सदेवतरः * आन्तरस्तपस्वितरोऽग्नी ऽधत्ते तदपि काम मेव स्वप्यान्नो ह्यनाहिताग्नेर्व्रतचर्यास्ति मानुषो ह्येवैष तावद् भवति यावदनाहिताग्निस्तस्माद्रपि काम मेव स्वप्यात् ॥ ७ ॥

तद्वैकेऽनुदिते मथित्वा †। त मुदिते प्राञ्च मुद्धरन्ति तदु तदुभे ऽअहोरात्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च व्वाचश्च पर्याप्त्या ऽइति व्वदन्तस्तदु तथा न कुर्यादुभौ ह्येवास्य तथानुदित ऽआहितौ भवतोऽनुदिते हि मथित्वा त मुदिते प्राञ्च मुद्धरन्ति स य उदित ऽआहवनीयं मन्येत् स ह तत्पर्याप्नुयात् ॥ ८ ॥

अहर्व्वैः देवाः ‡। अनपहतपाप्मानः पितरो न पाप्मान मपहते मर्त्याः पितरः पुरा ह्यायुषो म्रियते योऽनुदिते मन्यत्यपहतपाप्मानो देवा अप पाप्मानꣳ हतेऽमृता देवा नामृतत्वस्याशास्ति सर्व्व मायुरेति श्रीर्हैवाः श्रियं गच्छति युग्मो देवा युग्मो ह भवति य एवं व्विद्वानुदिते मन्यति ॥ ९ ॥

---

* 'सुदेवतरः'— इति ग, घ। † 'मथित्वा'—इति ग, घ।

‡ 'देवाः'—इति ग, घ।

तदाहुः । यन्नऽर्चा न साम्ना न यजुषाग्नि-राधीयतेऽथ केनाधीयत ऽइति ब्रह्मणो ह्येवैष ब्रह्म-णाधीयते व्याग्वै ब्रह्म तस्यै व्याचः सत्य मेव ब्रह्म ता वा ऽएताः सत्य मेव व्याहृतयो भवन्ति तदस्य सत्येनैवाधीयते ॥ १० ॥

भूरिति वै प्रजापतिः । रिमा* मजनयत भुव इत्यन्तरिक्षꣳ स्वरिति दिव मेतावद्वा ऽइदꣳ सर्व्वं यावदिमे लोकाः सर्व्वेणैवाधीयते ॥ ११ ॥

भूरिति वै प्रजापतिः । ब्रह्मा†जनयत भुव इति क्षत्रꣳ स्वरिति विश मेतावद्वा ऽइदꣳ सर्व्वं यावद् ब्रह्म क्षत्रं विट् सर्व्वेणैवाधीयते ॥ १२ ॥

भूरिति वै प्रजापतिः । आत्मान‡ मजनयत भुव इति प्रजाꣳ स्वरिति पशूनेतावद्वा ऽइदꣳ सर्व्वं यावदात्मा प्रजा पशवः सर्व्वेणैवाधीयते ॥ १३ ॥

स वै भूर्भुव इति । एताऽवतैव गार्हपत्य मादधात्यथ यत्सर्व्वैरादध्यात्केनाहवनीय मादध्याद् इे

---

* 'प्रजापति । रिमा'— इति क, ङ ।

† 'प्रजापति । ब्रह्मा'— इति क, ङ ।

‡ 'प्रजापति । रात्मान'— इति क, ङ । § 'इत्थे । ता'— इति ङ ।

ऽअक्षरे परिशिनष्टि तेनो ऽएतान्ययातयामानि भवन्ति तैः सर्व्वैः पञ्चभिराहवनीय मादधाति भूर्भुवः स्वरिति तान्यष्टावक्षराणि सम्पद्यन्तेऽष्टाक्षरा वै गायत्री गायत्र मग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसा-धत्ते ॥ १४ ॥

देवान्ह वा ऽअग्नी ऽआधास्यमानान् । तान्*-सुररक्षसानि ररक्षुर्नाग्निर्जरिष्यते नाग्नी आधास्यध्व ऽइति तद्यदरक्षंस्तस्माद्रक्षाएंसि ॥ १५ ॥

ततो देवा एतं व्वज्रं ददृशुः । यद्ग्नव्वं† तं पुरस्तादुदस्थंस्तस्याभयेऽनाष्ट्रे निवातेऽग्निरजायत तस्माद्यत्राग्निं मन्थिष्यन्त्स्यात्तदग्नव मानेतवै ब्रूयात् स पूर्व्वेणोपतिष्ठते व्वज्र मेवैतदुच्छ्रयति तस्याभयेऽनाष्ट्रे निवातेऽग्निर्जायते ॥ १६ ॥

स वै पूर्व्वराट् स्यात् । स ह्युपरिमितं व्वीर्य्य मभिवर्त्तते‡ यदि पूर्व्वराहं न विन्देदपि य एव कश्चाग्न स्याद्यद्यग्नव न विन्देदप्यनड्वानेव स्यादेष ह्येवानड्वहो बन्धुः ॥ १७ ॥

---

* 'मानां । स्तान'— इति क, ङ ।

† 'ददृशु । र्यदग्नं'—इति क, ङ । ‡ 'वर्त्तते'—इति ङ ।

तं यत्र प्राञ्चः हरन्ति । तत्परस्तादश्वं नयन्ति तत्परस्तादेवैतन्नाष्ट्रा रक्षाꣳस्यपघ्नन्नित्यथाभयेनानाष्ट्रेण हरन्ति ॥ १८ ॥

तं वै तथैव हरेयुः । यथैन * मेष प्रत्यङ्ङुपाचरेदेष वै यज्ञो यदग्निः प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङ् हैवास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥ १९ ॥

एष उ वै प्राणः † । तं ‡ वै § तथैव हरेयुर्यथैन मेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात् पराङ् भवति पराङ् हैवास्मात् प्राणो भवति स यो हैनं तत्रानुव्याहरेत् पराङस्मात् प्राणोऽभूदितीश्वरो ह यत् तदेव स्यात् ॥ २० ॥

अयं वै यज्ञो योऽयं पवते । यं वै तथैव हरेयुर्यथैन मेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं यज्ञः प्रवि

---

* हरेयु। यथैन'— इति ख, ङ।

† 'प्राणः'— इति ग, घ।

‡ 'प्राण। स्तं"— इति क, ङ।

§ 'वै'— इति च इदो डा०-वेबरेण।

शति तं त्रिमे यन्न उपनमत्यथ यस्मात् पराङ् भवति पराङ् हैवास्माद् यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङ्स्माद् यज्ञोऽभूदितीश्वरो ह यत् तथैव स्यात् ॥ २१ ॥

एष उ वै प्राणः । तं * वै † तथैव हरेयुर्यथैन मेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात् पराङ् भवति पराङ् हैवास्मात् प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङ्स्मात् प्राणोऽभूदितीश्वरो ह यत् तथैव स्यात्तस्माद् तथैव हरेयुः ॥ २२ ॥

अथाश्व माक्रमयति । त माक्रमय्य प्राञ्च मुन्नयति तं पुनरावर्त्ततति त मुदञ्चं प्रमुञ्चति व्वीर्य्यं वा ऽअश्वो नेदस्मादिदं पराग्वीर्य्य मसदिति तस्मात् पुनरावर्त्तयति ॥ २३ ॥

त मश्वस्य पद ऽआधत्ते । व्वीर्य्यं वा ऽअश्वो व्वीर्य्य ऽएवैन मेतदाधत्ते तस्मादश्वस्य पद ऽआधत्ते ॥ २४ ॥

---

* 'प्राण । स्त'—इति क, ङ ; प्राणः । ते—इति ग, घ ।

† 'वै' इति च हस्तो डा० वेबरेण ।

स वै तूष्णी मेवाग्य ऽउपस्पृशति । अथोद्यच्छत्य-थोपस्पृशति भूर्भुवः स्वरित्येव तृतीयेनादधाति त्रयो वा ऽइमे लोकास्तदिमानेवैतल्लोकानाप्नोत्ये-तन्त्वेकम् * ॥ २५ ॥

अथेदं द्वितीयम् । तूष्णी मेवाग्य ऽउपस्पृशत्यथो-द्यच्छति भूर्भुवः स्वरित्येव द्वितीयेनादधाति यो वा ऽअस्या मप्रतिष्ठितो भार मुद्यच्छति नैनꣳ शक्नोत्यु-द्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥ २६ ॥

स यत्तूष्णी मुपस्पृशति । तदस्यां प्रतिष्ठायां प्रतितिष्ठन्ति सोऽस्यां प्रतिष्ठित आधत्ते तथा न व्यथते तदु हैतत्पश्चैव दध्रिर ऽआसुरिः पाङ्क्तिर्मा-धुकिः सर्व्वं वा ऽअन्यदियसित मिव प्रथमेनैवोद्यत्या-दध्याद् भूर्भुवः स्वरिति तदेवानियसित मित्युतो यतमथा कामयेत तथा कुर्यात् ॥ २७ ॥

अथ पुरस्तात्परीत्य । पूर्व्वार्द्ध मुल्मुकाना मभिपद्य जपति द्यौरिव भूम्ना पृथिवीव व्वरिम्णेति यथासौ द्यौर्बह्वी नुत्तत्रैरेवं बहुर्भूयास मित्येवैतदाह यदाह द्यौरिव भूम्नेति पृथिवीव व्वरिम्णेति यथेयं

* 'तं न्वेकम्'—इति क, ङ; 'तं न्वेकम्'— इति ख ।

पृथिव्युर्ध्वैवमुरुर्भूयास मित्येवैतदाह तस्मास्ते पृथिवि देवयजनि पृष्ठ इडायास्पदे ह्येनं पृष्ठ आधत्तेऽग्निमन्नाद मन्नाद्यायादधऽइडायन्नादोऽग्निरन्नादो भूयास मित्येवैतदाह सैषाशीरेव स यदि कामयेत जुषेरन्-तदु कामयेतापि नाद्रियेत ॥ २८ ॥

अथ सर्पराज्ञ्या * ऋग्भिरुपतिष्ठते । आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः †। पितरं च प्रयन्त्स्वः। अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ त्रिंशद्धाम विराजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभिरिति तदेवास्यात्र सम्भारैर्वा नक्तंचैर्वर्तुभिर्वा विधानेन वानाप्तं भवति तदेवास्यैतेन सर्वं माप्तं भवति तस्मात् सर्पराज्ञ्या ऋग्भिरुपतिष्ठते ॥ २९ ॥

तदाहुः । न सर्पराज्ञ्या ऋग्भिरुपतिष्ठतेतीयं वै पृथिवी सर्पराज्ञी स यदेवास्या माधत्ते तत् सर्वान् कामानाप्नोति तस्मान्न सर्पराज्ञ्या ऋग्भिरुपतिष्ठतेति ॥ ३० ॥ ५ ॥

॥ इति प्रथमप्रपाठके चतुर्थं ब्राह्मणम् [१. ४.] ॥

---

* 'सर्पराज्ञ्या'—इति ङ, एव मिहोत्तरत्रापि सर्वत्र । † 'पुरः'—इति क,ख ।

अग्न्याधेयदिवसात् पूर्वस्मिन् उपवसथदिवसे कर्त्तव्यं व्रत मुपदिशति— "यदहरस्येति। 'दिवैव'-इत्येवकारेण रात्रा-वशनं व्यावर्त्तते। "मनो ह वै देवाः"—इत्यादि दर्शपूर्णमासिक-प्रस्तावे प्रागेव व्याख्यातम् * ॥ १ ॥

दिवैव भोजनं न रात्राविति प्रतिपाद्य पक्षान्तर माह— "तन्वेवेति। "तदपीति। 'तत्' तत्र विषये 'कामं' यथोक्तं रात्रावपि 'अश्नीयात्'। तत्र कारण माह— "नो ह्यना-हिताग्नेरिति। 'न' खलु 'अनाहिताग्नेः' व्रतचरणम् 'अस्ति'; तस्येतरपुरुषवन्मानुषत्वात्, आहिताग्निर्हि संस्कारेण देवभावं प्राप्तो व्रतचरण मर्हतीति भावः ॥ २ ॥

"तद्वैक इति। "अज मुपवध्नन्तीति। उपवसथदिवसस्य रात्रौ गार्हपत्यागारे कस्यचिदजस्य बन्धनं कार्यं मित्येकेषां मतम्। तेषा मभिप्राय माह— "आग्नेयोऽज इति। अग्निना सह प्रजापतिमुखजातत्वात् 'अजः आग्नेयः' †; अतोऽजस्य सम्बन्ध माधीयमानस्य 'अग्नेः' 'सर्वत्वाय' कात्स्न्यर्थाय सम्पद्यते, 'इति' इम मभिप्रायं वदन्त इत्यर्थः। तदेतन्निरस्यति— "तदु तथा नेति। कथं तर्हि कार्यं मिति, तदाह— "यदीति। 'अस्य' यजमानस्य 'अजः' विद्यते चेत्, 'एनम्' अजम् 'प्रक्षः' आधानदक्षिणाकाले 'अग्नीधे' आग्नीध्राय 'दद्यात्'। तथाच

---

* १. १. १. ७, ८ (१भा० २३९०)।

† "प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत त मग्निर्देवता मन्वसृज्यत, गायत्रीच्छन्दो रथन्तरं साम, ब्राह्मणो मनुष्याणा मजः पशूनाम्। तस्मात् ते मुख्या मुखतो ह्यसृज्यन्त"— इति तै० सं० ७. १. १. ६।

कात्यायनः— "गार्हपत्यागारेऽजं बध्नाति न वा, विद्यमानं प्रातरग्नीधे दद्यात्"—इति *। तेनैवेत्यादि, निगदसिद्धम् ॥ ३ ॥

ब्रह्मौदनपाकविधिं मतभेदकथनेनोक्तं प्रतिपादयति— "अथ चातुष्प्राश्य मोदन मिति। चतुर्भिः अध्वर्युब्रह्मादिभिर्ऋत्विग्भिः प्राश्नितव्य मित्यर्थः। "छन्दांस्यनेनेति। 'अनेन' ब्रह्मौदनपाकेन गायत्रीत्रिष्टुब्जगत्याख्यानि छन्दांसि 'प्रीणीमः' तर्पयाम इत्यभिप्रायः। अस्यौदनस्य चतुर्भिर्ऋत्विग्भिः प्राशनं युक्त मिति दृष्टान्तेनोपपादयति— "यथेति। 'येन वाहनेन' अश्वादिना 'स्यन्त्स्यन्' यास्यन् 'स्यात्', 'तद्' वाहनं 'सुहितं' सुष्ठं कर्त्तुं यथा ब्रूयात्, 'एव मेतत्'; आदौ ऋत्विजां कर्मोपयुक्तानां प्राशनं युक्त मित्यर्थः। स्यन्त्स्यन्निति "स्यन्दू स्रवणे †"—इत्यस्मात्सटः सत्वादेशः।

इमं प्राशनपक्षं निषिध्योपपादयति—"तदु तथेति। 'ऋत्विजश्च अनृत्विजश्च ब्राह्मणाः' 'अस्य' यजमानस्य 'कुले वसन्ति' इति 'यत्', 'तेनैव' वासेन 'तं काम माप्नोति', यः कामः प्राशननिमित्तकः प्रागुक्त इत्यर्थः ॥ ४ ॥

'अथ पक्वस्यौदनस्य कस्मिन्नुपयोग इत्याह— "तस्य सर्पिरासेचन मिति। सर्पिरासिच्यतेऽस्मिन्निति सर्पिरासेचनम्, घृतधारणार्थं मोदनं निम्नं 'कृत्वा' इत्यर्थः। "सर्पिरासिच्येत्यादि स्पष्टम्। "समिद्वतीभिर्घृतवतीभिरिति। समिच्छब्दयुक्ताभिर्घृतशब्दयुक्ताभिश्चेत्यर्थः। तास्च कात्यायन उदाजहार— "आश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्नि मिति

---

* का० श्रौ० सू० ४, ८, १, २। † भ्वा० आ० ७६२ धा०।

प्रत्यृच मिति"–इति *। समिदाधानं कुर्वता मभिप्राय माह— "अमीगर्भं मिति। अमीगर्भो योऽग्नित्यः, तत्स्थो योऽग्निः, तम्, 'एतत्' एतेनाग्नित्यसमिदाधानेन 'आप्नुमः' 'इति' ब्रुवाण इत्यर्थः। तस्य च समिदाधानस्य कालविशेष माह— "स य इति। अग्न्याधानस्य 'पुरस्तात्' 'यः' यजमानः समिधः 'अभ्यादध्यात्', 'सः' खलु 'तं कामम्' प्राप्नुयात्। 'तस्मात्' समिदाधानार्थं एव 'तत्' प्राशनं नादरणीय मिति। निगमयति— "तस्मादिति ॥ ५ ॥

अस्मिन्नर्थे संवादं दर्शयति— "तदु होवाच भाल्लवेय इति। 'तत्' तत्र विषये इन्द्रद्युम्नः 'भाल्लवेयः' उक्तवान्†। कथ मिति; तदाह— "यथा वा इत्यादि। 'यथा' 'अन्यत्' चिकीर्षतः; तदनुपयुक्तस्यान्यस्य करणं यथा व्यधिकरणत्वादसङ्गतम्, तथा अग्नीनाधित्सताग्नावेव किञ्चित् कर्त्तव्यम् 'एतत्' चातुष्प्राश्यकरण मसङ्गतम्; अतोऽसदृशिक एव तथाविधौदनपाक इति भाल्लवेयाभिप्रायः ॥

त मिमं दोषं परिहृत्य प्राशनपक्ष मेव निगमयति— "न हि तदित्यादिना। ऋक्सामादिमन्त्रैर्यस्मिन्नग्नौ समिध माहुतिं च प्रक्षिपेत्, तस्याग्नेर्दक्षिणाहरण मनुगमनं च यदि स्यात्, सोऽग्निरन्वाहार्यपचनः। अन्वाहार्यः ओदनः, तस्य पाकहेतुर्भविष्यति। अतो दक्षिणाहरण मनुगमनं वाहुतिसंस्कृतस्याग्ने-

---

* का० श्रौ० सू० ४. ८. ५।

† इहैव पुनरुपरिष्टादाम्नास्यते "इन्द्रद्युम्नो भाल्लवेयः"— इति (१०. ६. १. १.)। अन्यत्र च— छा० उप० ५. ११. १।

र्नावकल्पते। अतः पक्वतण्डुलो न होमार्थः, किन्तु प्राशनार्थ इत्यभिप्रायः। गत मन्यत् ॥ ६ ॥

तस्यां रात्रौ यजमानस्य जागरणं विधत्ते— "अथ जाग्रतीति। व्यत्ययेन बहुवचनम्, जागर्त्तीत्यर्थः। "जाग्रति देवा इत्यादि। श्वः करिष्यमाणेष्वाधानादिकर्मस्वङ्गभूता ये देवा उपवसथेऽहनि यजमानगृह मागताः, ते खल्वस्यां रात्रौ 'जाग्रति' जागरणं कुर्वन्ति। तेषु च जाग्रत्सु यजमानस्य स्वापो न युक्त इति तेन जागरणेन यजमानो 'देवानेव' जाग्रतः 'उपावर्त्तते' उपगता भवन्ति। 'सः' च यजमानः 'सदेवतरः' अतिशयेन देवसहितः। निद्राभावादिना अतिशयितं श्रम माप्तः। अग्न्याधानयोग्यतां जागरणवशात् प्राप्नोतीत्यर्थः। अथ स्वाप मप्यनुजानाति—"तद्यदीति ॥ ७ ॥

एवं रात्रौ नीताया माधास्यमानस्याग्नेर्मन्थनविषय मेकीयं मत मुपन्यस्यति— "तद्वैक इति। 'अनुदिते' सूर्योदयात् प्रागेवोषाकाले मन्थनं कार्यम्। सूर्ये चोदिते आहवनीयार्थं तस्य प्रागुद्धरणम्। एवं वदता मभिप्राय माह— "तदिति। तेन मन्थनोद्धरणयोः अहोरात्रसम्बन्धित्वेन, अत एव 'अहोरात्रे' 'परिगृह्णीमः' कर्माङ्गतया स्वीकुर्मः। तस्यापि प्रयोजन माह— "प्राणोदानयोरिति। अहोरात्रे परिग्रहस्य तद्रूपयोः 'प्राणोदानयोः' वाङ्मनसयोश्च 'पर्याप्तिः' प्रयोजन मित्येवं प्रतिपादयन्त इत्यर्थः। त मिमं पक्षं निषेधति— "न कुर्यादिति। तत्र दोष माह — "उभौ ह्येवेति। गार्हपत्याहवनीयौ 'उभौ' अपि 'अस्य' यजमानस्य 'अनुदिते' रात्रावेव 'आहिती' भवतः। कथ मुभयोरनुदिते आधान मिति, तत्राह— 'अनुदिते ह्येति।

'अनुदिते' मथितो योऽग्निः, स एवाहवनीयत्वेन स्थाप्यत इति तस्यापि रात्रिसम्बन्धो दुर्निवारः। तस्मात् 'उदिते' एव 'आहवनीयम्' अग्निं 'मन्थेत्' ॥ ८ ॥ ॥ ९ ॥

रात्रौ मन्थनस्य दोषाभिधानसाधनत्वं विधातुं प्रस्तौति— "तदाहुरिति। ऋक्सामयजुरात्मकास्त्रिविधामन्वाः, तैः 'यद्' यस्मात् 'अग्निः न आधीयते', केन तर्हि स आधेय इति ब्रह्मवादिनां प्रश्नः। तस्योत्तरम्— "ब्रह्मणो हेति। ब्रह्मणः सम्बन्धि यद् ब्रह्म, तेनाधानं कार्यम्। किमिति, तदुभयं दर्शयति— "वाग्वा इति। षष्ठ्यन्तेन निर्दिष्टं यद् ब्रह्म, तद् वागात्मकम्; तस्या वाचः सम्बन्धि यद् वाक्यम्, 'सत्यम्' विद्यमानार्थप्रतिपादि, तत् 'एव' 'ब्रह्म'। तत्र वाचः सत्यं किमिति, तद् दर्शयति— "ता वा एता इति। 'ताः' एताः भूरादिव्याहृतयो यदुदीरितसत्यरूपाः, 'तत्' तस्मात् 'अस्य' यजमानस्य व्याहृतिभिरग्न्याधाने 'सत्येनैव' सोऽग्निराहितो भवति ॥ १० ॥

व्याहृतीनां सत्यरूपत्व मुपपादयंस्तत्कारणक माधानं प्रशंसति— "भूरिति वा इति। सृष्टिसमये प्रजापतिः 'भूरिति' अनया व्याहृत्या 'इमां' भूमिम् 'अजनयत्'। "भुव इत्यन्तरिक्ष मित्यादावप्येवं योजना। "इमे त्रयो लोका इति। यावदस्ति, एतावदेव हीदं सर्वं जगदतो भूरादिलोकहेतुभिराधीयमानोऽग्निरनेन 'सर्वेणैव' जगता आहितो भवति ॥ ११ ॥

ब्रह्मक्षत्रादिवर्णत्रयोत्पत्तिहेतुत्वेन तत्कारणक माधानं प्रशंसति— "भूरिति वा इति। 'ब्रह्म' ब्राह्मणजातिः, 'क्षत्रं' क्षत्रियजातिः ॥ १२

आत्मप्रजापशुसर्जनहेतुत्वेन तत् प्रशंसति— "भूरिति वा

इति। "एतावद्वा इति। 'इदं सर्वं' सर्वजगत् 'एतावद् वै' एतावदेव। 'यावत्' स्वरूपेणावस्थितं स्वात्मभोगसम्पादनहेतवः 'प्रजाः' 'पशवः' चेति एतच्चितयान्तर्गत मेव सर्वं जगत्, अनेन 'सर्वेण' सोऽग्निराहितो भवतीत्यर्थः ॥ १३ ॥

एवं साधारण्येन व्याहृतीना माधानसाधनत्वं प्रतिपाद्य, गार्हपत्याधाने विशेष माह— "स वा इति। ताभ्या मेव व्याहृतिभ्यां 'गार्हपत्यम्' 'आदधाति'। तिसृभिरपि व्याहृतिभिः गार्हपत्याधाने आहवनीयाधानस्य मन्त्रो न स्यात्, अतः सुवरिति 'हे अक्षरे' परिशेषयेत्। 'तेन' कारणेन परिशिष्टाक्षरद्वयसहितानि भूराद्यक्षराणि 'अयातयामानि' अगतसाराणि 'भवन्ति'। आहवनीयाधाने तिसृणां व्याहृतीनां विनियोग माह— सर्वैरिति। "तान्यष्टाक्षराणि"—इत्यादि निगदसिद्धम्। "गायत्र मग्नेस्स्कन्द इति। उभयोः प्रजापतिमुखजातत्वात् * ॥ १४ ॥

अग्निमन्थनसमये तस्य पुरस्तादश्वस्य धारणं विधित्सुरितिहासं दर्शयति— "देवानिति। 'अग्नौ' गार्हपत्याहवनीयौ। 'ररक्षुः' निरुद्धवन्त इत्यर्थः। निरोधप्रकार माह— "नाग्निरिति ॥ १५ ॥

देवैः कृतं परिहारं दर्शयति— "ततो देवा इति। अश्वाख्यं यं 'तं' मन्थनदेशस्य 'पुरस्तात्' 'उदश्रयन्' उच्छ्रित मस्थापयन्। 'तस्य' वज्रस्य सम्बन्धिनि, 'अभये' भयरहिते, 'अनाष्ट्रे' रक्षःप्रभृतिनाशकरहिते, 'निवाते' वातरहिते एवम्भूते स्थाने मन्थनाद् 'अग्निः' उदपद्यतेत्यर्थः। एव मितिहास मुपन्यस्य

* तै० सं० ७. १. १. ६. द्रष्टव्यम्।

प्रकृते योजयति— "तस्मादिति। 'आनेतवै' आनेतु मित्यर्थः। तुमर्थे तवैप्रत्ययः *। "स पूर्वेणेत्यादि उक्तप्रायम् ॥ १६ ॥

स चाश्वः पूर्ववयस्क एवानेतव्य इत्याह— "स वै पूर्ववाडिति। पूर्वं वयसि वहतीति पूर्ववाट्'। 'वहश्च'-इति खिः †। तस्यालाभे पक्षान्तर माह— "अपि य एवेति। निगदसिद्ध मन्यत्। "एष ह्येवेति। अश्वविधेयः स्तावकोऽर्थवादः, अनडुद्विधेरपि एष एव स्तावक इत्यर्थः ॥ १७ ॥

आहवनीयदेशं प्रत्यग्नेर्हरणं समाप्याश्वस्यापि पुरस्तात् नयनं विधत्ते— "त मिति। तस्य प्रयोजन माह— "तत्पुरस्तादिति। स चाश्वोऽग्नेः पुरस्तात् गमनमार्गे विद्यमानं रक्षःप्रभृतिकम् 'अपघ्नन्' हिंसन् 'एति' गच्छति। तथा च भयादिरहितेन मार्गेण तस्याग्नेर्हरणं सिध्यतीत्यर्थः ॥ १८ ॥

तस्मिन् हरणे विशेष माह— "तं वा इति। 'यथा' 'एनं' यजमानम् 'एषः' अग्निः 'प्रत्यङ्' 'उपाचरेत्' अभिमुख मुपावर्त्तेत, 'तम्' अग्निम् 'अवहरेयुः' आहवनीयायतनस्य पूर्वभागं प्रापयेयुरित्यर्थः। तस्य प्रयोजन माह— "एष वा इति। 'एषः' 'वै' खलु अग्निः 'यज्ञः' तन्निष्पादकत्वाद्। तस्य प्रत्यगावर्त्तनेन 'एनं' यजमानं 'यज्ञः एव प्रत्यङ् प्रविशति' अभिमुख आवर्त्तते। तथा च 'तं' यजमानं 'क्षिप्रे' अल्पकाले एव, शीघ्रं यज्ञः उपगच्छति। एतद् व्यतिरेकमुखेनोपपादयति—"अथ यस्मादिति। सः अग्निः 'यस्मात्' बहुयजमानात् 'पराङ्' पराङ्मुखः भवति, तर्हि 'अस्मात्' 'यज्ञः' अपि पराङ्मुखो

---

* पा० सू० ३. ४. ९। † पा० सू० ३. २. ६४।

'भवति'। 'तत्र' तथा सति 'यः' कश्चिद् ईश्वः 'एनं' यजमानम् 'अनुव्याहरेत्'। किमिति—"यज्ञोऽस्मात् पराङ् अभूत्"–इति। स यजमानः 'तथैव' भवितुम् 'ईश्वरः' 'स्यात्' ॥ १९ ॥

एव मग्नेर्यज्ञरूपत्वेन प्रत्यगावर्त्तनं प्रतिपाद्य प्राणात्मकत्वादपि तत् प्रतिपादयति—"एष उ वा इति। 'एषः' खल्वग्निः 'प्राणः'। "तं वा इत्यादि, पूर्ववत् ॥ २० ॥

अथैनं यज्ञात्मक मग्निं वायुतादात्म्येन स्तौति—"अयं वा इति। "तं वा इत्यादि, पूर्ववत् ॥ २१ ॥

वाह्यात्मक मग्निं प्राणरूपतया स्तौति—"एष उ वा इति। अन्यत् पूर्ववत् ॥ २२ ॥

एव मग्नेर्हरणप्रकारं प्रतिपाद्य तदनन्तरकर्त्तव्यता माह—"अथाश्व मिति। आहवनीयायतने सम्भारान् निधाय दक्षिणपूर्वपादेन 'अश्व माक्रमयति'। एवम् 'आक्रमय्य' 'प्राञ्चं' नीत्वा 'तम्' अश्वम् 'पुनरावर्त्तयति' आहृत्य स्थापयति। अनन्तर मश्वम् 'उदञ्चम्' उदङ्मुखं प्रमुञ्चति। सूत्रयते हि कात्यायनेन—"सम्भारानधिष्ठाप्य दक्षिणपूर्वपादेन प्राञ्चं नीत्वावर्त्त्य स्थापयति"–इति *। पुनरावर्त्तनस्य प्रयोजन माह—"वीर्यं वेत्यादि। अश्वलक्षणं यत् 'इदं' वीर्यम्, तत् 'नेत्' नैव 'अस्मात्' 'पराग्'–भूतम् भवेदित्यनेनाभिप्रायेण तस्याश्वस्य पुनरावर्त्तनं कार्य मित्यर्थः ॥ २३ ॥

आहृतस्याग्नेराधानं विधत्ते—"त मश्वस्येति। आहवनीयायतने यदश्वस्य पदम्, तस्मिन् 'तम्' अग्निं मन्त्रेण स्थापयेत्। तदेतत् प्रशंसति—"वीर्यं वा इति ॥ २४ ॥

---

* का० श्रौ० सू ४. ६. १४।

तत्र विशेष माह — "स वा इति। 'अग्ने' प्रथमम् अश्वस्य पदं मन्त्रिणा 'तूष्णीम्' 'उपस्पृशति'। तं मन्त्रि मुद्यम्य पुनरपि 'उपस्पृशति'। एवं द्विरुपस्पृश्य तृतीयेनोपस्पर्शनेन व्याहृतिभिः तं मन्त्रिं तस्मिन् पदे स्थापयति। व्याहृतिगतं त्वित्वं प्रशंसति— "त्रयो वा इति। इमं पक्षं निगमयति— "एतदिति। 'एतत्' खल्वाहवनीयाधानस्य 'एकं' विधानमित्यर्थः ॥ २५ ॥

पक्षान्तर मपि वक्तुं प्रतिजानीते — "अथेदं द्वितीय मिति। "तूष्णी मेवेत्यादि। अश्वपदं 'तूष्णीं' सकृदेवाग्निनोपस्पृश्य, तं मुद्यम्य द्वितीयेनोपस्पृशति। न व्याहृतिभिः तत्र स्थापयेदित्यर्थः। एतस्योपस्पर्शनस्य प्रयोजन माह— "यो वा अस्या मिति। 'अस्यां' भूम्यां दृढ़ मनवस्थितः सन् 'यः' वोढा 'भारम् उद्यच्छति', सः 'एनं' भारम् 'उद्यन्तुं' 'न शक्नोति'; प्रत्युत निपततोऽस्योपरि निपतन् भार एव 'एनं' पुरुषं हिनस्ति ॥ २६ ॥

"स यत् तूष्णी मुपस्पृशतीति। यस्तु भूम्यां प्रतिष्ठाय भार मुद्यच्छति, स भारं वोढुं शक्नोतीति। तस्मान मेवैतद् भूमेः सकृदुपस्पर्शनम्। तथा च तेन स्पर्शनेन भूम्यां प्रतिष्ठित एवाग्निराहितो भवति, 'न व्यथते' न चलते। "व्यथ भयचलनयोः"— इति * धातुः। पक्षान्तरं वक्तु मन्यस्मिन् पक्षे दोष माह— "तदु हैतदिति। आसुरिप्रभृतयस्त्रयो मुनयः तदेतदुपस्पृश्योद्यम्य द्वितीयस्पर्शनेनाधानं 'पक्षेव' पक्षाद्भूत मिव 'दधिरे' अधारयन्। एतावता को दोष इति। अग्निनोप-

* भ्वा० आ० ७६५ धा०।

स्पृश्य पुनस्तस्योद्यमनेन तद्व्यतिरिक्तं सर्वं मायतनस्थं सम्भारादिकम् 'इयसितम्' इयत्तया परिच्छिन्नं व्यक्त मिव भवति। अतोऽग्नि मुद्यम्य प्रथमेनैवोद्यमनेन व्याहृतिभिः 'आदध्यात्'। तथा एवं सति 'अनियसितम्' * अव्यक्त मेव सर्वं भवति।

उक्तानां पक्षाणा मिच्छया विकल्प माह— "यतमथेति। एतत् पक्षत्रय मपि सूचितं कात्यायनेन— "अग्निना पदं द्विरुपस्पृश्य तृतीयेनादधाति, द्वितीयेन प्रथमेन वा भूर्भुवःस्वरिति"—इति † ॥ २७ ॥

आहितस्याग्नेः पूर्वभागस्थ मुखमुक मन्त्वारभ्य मन्त्रस्य जपं विधत्ते— "अथ पुरस्तादिति ‡। मन्त्रतात्पर्य माह— "यथासाविति। बहुभिः 'नक्षत्रैः' 'यथासौ द्यौः' 'बह्वी' बहुत्वोपेता, 'एवम्' अह मपि पुत्रपौत्रादिबहुत्वेन 'बहुः भूयासम्' इति, "द्यौरिव भूम्ना"— इत्यस्य भागस्य अर्थः। पृथिवीत्यादिक मनूद्य तात्पर्य माह— 'यथा इयं पृथिवी' 'उर्वी' विस्तीर्णा, 'एवम्' अह मपि 'वरिम्णा' उरुत्वेन सुविस्तीर्णो भूयास मिति। भागान्तर मनूद्य व्याचष्टे— "तस्यास्त इति। उरुत्वं प्रति उपमानभूतायाः 'तस्याः' 'ते' तव 'पृष्ठे' उपरि भागे "अग्निम् आदधे"—इत्युरत्तत्र सम्बन्धः। "अस्यै ह्वीति। अस्याः एव खलु पृथिव्याः 'पृष्ठे' उपरि आधत्ते, अतो युक्तं तस्यास्ते इति वाक्य मिति भावः। अन्तिमं भाग मनूद्य व्याचष्टे— "अग्नि मन्नाद मिति। आहवनीयादिरूपेण हवि-

---

* पूर्वस्मिन् काण्डे (६१० पृ० ५ पं०) "इयसितं" द्रष्टव्यम्।

† का० श्रौ० सू० ४. ६. १६; मन्त्रखेषः; वा० सं० ३. ५. १।

‡ का० श्रौ० सू० ४. ६. १७। मन्त्रस्तु— वा० सं० ३. ५. २।

लक्षणम्, तद्विलक्षणं च सर्वं मन्त्र मतीत्य 'अन्नादोऽग्निः'। एव मन्त्रादशब्देनाग्नेर्विशेषणादन्न मप्यन्नादो भूयास मिति तात्पर्यगम्योऽर्थः। "सैषाशीरित्यादि। 'एषा' मन्त्रात्मिका ऋक् 'आशीः' फलप्रार्थन मेव; अतः सत्यां कामनायां तस्य मन्त्रस्य जपः; तदभावे तु जपोऽपि न कर्त्तव्य इत्यर्थः॥ २८॥

अथ तस्याग्नेः सार्पराज्ञीभिरुपस्थानं विधत्ते—"अथ सर्पराज्ञया इति *। सर्पणशीलानां प्राणिनां राज्ञी 'सर्पराज्ञी', तत्सम्बन्धिनीभिर्ऋग्भिरग्नि मुपतिष्ठते। "का पुनस्ता इति तिस्रऋचः पठति—"आयं गौरिति प्रथमा †, "अक्रन्ददिति रोचनेति द्वितीया ‡, त्रिंशद्धामेति तृतीया §। अस्योपस्थानस्य प्रयोजन माह—"तद् यदेवेति। 'अस्य' यजमानस्य 'अत्र' अग्निन्नाधाने सम्भारादिभिर्विकल्पनिमित्तेन यत् 'अनाप्तम्' अप्राप्तं भवति, 'एतेन' उपस्थानेन 'अस्य' तत् 'सर्वम्' आप्यते सर्पराज्ञयाः सर्वाधिष्ठानभूतत्वात्। अत एव तन्नामनिर्वचन मन्यत्रान्नातम्—"इयं वै सर्पराज्ञी, देवा वै सर्पाः, तेषा मियं राज्ञीति ¶॥ २९॥

तेषां पृथिव्या माधानादेव सम्भारादीनां सर्वेषा मवाप्तत्वात्,

---

* ला० श्रौ० सू० ४. ६. १८।

†, ‡, § वा० सं० ३. ६, ७, ८।

¶ "इयं वै सर्पराज्ञी"—इत्यादि ऐ० ब्रा० ५. ४. ४। अत्र 'सर्पराज्ञी'-शब्देन काचिद् ब्रह्मवादिनी गम्यते। "इयं वै सर्पतो राज्ञी"—इति तै० ब्रा० १. ४. ६. ६। "देवा वै सर्पास्तेषा मियं राज्ञी"—इत्यादि च तै० ब्रा० २. २. ६. १। ता० ब्रा० ६. ८. ७ (ब्रह्मवादिनी)। आर्षे० ब्रा० ३. २६ (सर्पाणाम्)। ऋ० सं० १०, १८६ सा० भा० (ऋषिः)।

तदवाप्तये सर्परात्रीभिरुपस्थानं न कार्यमिति पक्षान्तर माह — "तदाहुरिति ॥ ३० ॥ ४ [१. ४.] ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरींस्त्रिदशतरुलताधेनुभौवर्णभूमीः ।
रत्नोक्षां रुक्मवाजिद्विपसहितरथौ सायणिः सिङ्गणार्यौ,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटज्ञ ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
आज्यौत्थं प्राज्यजन्मा * लवणज मतृणः शार्करं चार्कतेजाः,
रत्नाख्यो रत्नरूपं गिरि मकृत मुदा पात्रसात्सिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

---

* 'प्राज्यबुद्धिर्'— इति च ।

(अथ द्वितीयाध्याये प्रथमं ब्राह्मणम्.)

उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । तदुत्पूर्णाहुतिं जुहोत्यन्नादं वा ऽएतं मात्मनो जनयते* यदग्निं† तस्मा ऽएतदन्नाद्य मपिदधाति यथा कुमाराय जाताय व्वत्साय वा स्तन मपिदध्यादेव मस्मा ऽएतदन्नाद्य मपिदधाति ॥ १ ॥

स एतेनान्नेन शान्तः । उत्तराणि हवीꣳषि‡ श्रप्यमाणान्युपरमति शमुवइ वा ऽअध्वर्युं वा यजमानं वा प्रवहेत्तौ ह्यस्य नेदिष्ठं चरतो यदस्मिन्नेता माहुतिं न जुहुयात् तस्माद्वा ऽएता माहुतिं जुहोति ॥ २ ॥

तां व्वै पूर्णां जुहोति । सर्व्वं वै पूर्णꣳ सर्व्वेणैवैन मेतच्छमयति स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्व्वं वा ऽअनिरुक्तꣳ सर्व्वेणैवैन मेतच्छमयति ॥ ३ ॥

यां व्वै प्रजापतिः । प्रथमा माहुति मजुहोत्

---

* 'जनयते'— इति क, ख, ग ।

† 'यदग्निं'— इति च टीकायां डा०-वेबरेण ।

‡ 'हवीꣳषि'— इति च टीकायां डा०-वेबरेण ।

स्वाहेति वै ता मजुहोत्सो खिदेषा निदानेन तस्मात् स्वाहेति जुहोति तस्यां व्वरं ददाति सर्व्वं वै व्वरः सर्व्वेणैवैन मेतच्छमयति ॥ ४ ॥

तदाहुः । एता मेवाहुतिꣳ हुत्वाथोत्तराणि हवीꣳषि नाद्रियेतैतयैव तं काम माप्नोति यꣳ मभिकाम मुत्तराणि हवीꣳषि निर्व्वपतीति ॥ ५ ॥

स वा ऽअग्नये पवमानाय निर्व्वपति । प्राणो वै पवमानः प्राण मेवास्मिन्नेतद्दधाति तद्वैतयैवास्मिंस्तद्दधात्यन्नꣳ हि प्राणोऽन्न मेषाहुतिः ॥ ६ ॥

अथाग्नये पावकाय निर्व्वपति । अन्नं वै पावक मन्न मेवास्मिन्नेतद्दधाति तद्वैतयैवास्मिंस्तद्दधात्येषा ह्येव पत्यन्न मन्न माहुतिः ॥ ७ ॥

अथाग्नये शुचये निर्व्वपति । व्वीर्य्यं वै शुचि यदा ऽअस्यैतदुज्वलत्येतदस्य व्वीर्य्यꣳ शुचि व्वीर्य्य मेवास्मिन्नेतद्दधाति तद्वैतयैवास्मिंस्तद्दधाति यदा ह्येवास्मिन्नेता माहुतिं जुहोत्यथास्यैतद् व्वीर्य्यꣳ शुच्युज्वलति* ॥ ८ ॥

तस्मादाहुः । एता मेवाहुतिꣳ हुत्वाथोत्तराणि

---

*'ज्वलति' -- इति घ, ङ ।

हवीꣳषि नाद्रियेतैतयैव * तं काम माप्नोति य मभि-
काम मुत्तराणि हवीꣳषि निर्व्वपतीति तदु निर्व्वपे-
देवोत्तराणि हवीꣳषि परोऽक्ष मिव वा ऽएतद्यदद-
स्तदिद मितीव ॥ ९ ॥

स यदग्नये पवमानाय निर्व्वपति। प्राणा वै
पवमानो यदा वै जायतेऽथ प्राणोऽथ यावन् न
जायते मातुर्व्वैव तावत् प्राण मनु प्राणिति यथा
वा तज्जात ऽएवास्मिन्नेतत् प्राणं दधाति ॥ १० ॥

अथ यदग्नये पावकाय निर्व्वपति। अन्नं वै
पावकं तज्जात ऽएवास्मिन्नेतदन्न दधाति ॥ ११ ॥

अथ यदग्नये शुचये निर्व्वपति। व्वीर्य्यं व्वै
शुचि यदा वा ऽअन्नेन व्वर्द्धतेऽथ व्वीर्य्यं तदन्ने नैवैन
मेतद् वर्द्धयित्वाथास्मिन्नेतद् व्वीर्य्यꣳ शुचि दधाति
तस्मादग्नये शुचये ॥ १२ ॥

तद्वेतदेव सद्विपर्य्यस्त मिव। अग्निर्ह यत्र
देवेभ्यो मनुष्यानभ्युपावर्त्त तद्वेत्ताञ्चक्रे मैव सर्व्वे-
णेवात्मना मनुष्यानभ्युपावृत मिति ॥ १३ ॥

स एतास्तिस्रस्तनूरेषु लोकेषु व्विन्यधत्त।

* 'तनयैव'— इति च दृश्यो डा० वेबरेण।

यदस्य पवमानꣳ रूप मासीत्तदस्यां पृथिव्यां न्यधत्ताथ यत् पावकं तदन्तरिक्षेऽथ यच्छुचि तद् दिवि तद्वा ऽऋषयः प्रतिबुबुधिरे य ऽउ तर्ह्यृषय आसुरसर्व्वेण वै न आत्मनाग्निरभ्युपावृततदिति * तस्मा ऽएतानि हवीꣳषि निरवपन् ॥ १४ ॥

स यदग्नये पवमानाय † निर्व्वपति। यदेवास्यास्यां पृथिव्याꣳ रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये पावकाय निर्व्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये निर्व्वपति यदेवास्य दिवि रूपं तदेवास्यैतेनाप्नोत्येव मु कृत्स्नमेवाग्निमनपनिहित माधत्ते तस्मादु† निर्व्वपेदेवोत्तराणि हवीꣳषि ॥ १५ ॥

केवलबर्हिः‡ प्रथमꣳ हविर्भवति। समानबर्हिषी ऽउत्तरे ऽअयं वै लोकः प्रथमꣳ हविरयेद् मन्तरिक्षं द्वितीयं द्यौरेव तृतीयं बहुलेव वा ऽइयं पृथिवी लेलयेवान्तरिक्षं लेलयेवासौ द्यौरुभे

---

* 'वृत्तदिति'— इति ख।

† 'तस्मादु'— इति च दृष्टो डा०-वेबरेण

‡ अत्रैव क्वेदचिन्हः (।) क-पुस्तके।

चिदेनां प्रत्युद्यामिनी* स्ता मिति तस्मात् समानबर्हिषि ॥ १६ ॥

अष्टाकपालाः सर्व्वे पुरोडाशा भवन्ति । अष्टाक्षरा वै गायत्री गायत्र मग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसाधत्ते तानि सर्व्वाणि चतुर्व्विंशतिः कपालानि सम्पद्यन्ते चतुर्व्विंशत्यक्षरा वै गायत्री गायत्र मग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसाधत्ते गायत्रो याज्यानुवाक्या भवन्ति गायत्र मग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसाधत्ते† ॥ १७ ॥

अथादित्ये चरुं निर्व्वपति । प्रच्यवत ऽइव वा ऽएषोऽस्माल्लोकाद्य एतानि हवीँषि निर्व्वपतीमान् हि लोकान्त्समारोहन्नेति ॥ १८ ॥

स यदादित्ये चरुं निर्व्वपति । इयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्या मेवैतत् प्रतिष्ठायां प्रतितिष्ठति तस्मादादित्ये चरुं निर्व्वपति ॥ १९ ॥

तस्मै विराजौ संयाज्ये स्यातां मित्याहुः । विरा-

---

* 'प्रत्युद्यामिनी'— इति घ ।

† "गायत्रो०——०साधत्ते"— इत्येष ग्रन्थभागो च-पुस्तके नास्ति

ष्टुभीय* मित्यथो त्रिष्टुभौ त्रिष्टुभीय मित्यथो जगत्यौ जगती ष्टीय मिति विराजावित्येव† स्याताम् ॥ २० ॥

तस्मै धेनुर्दक्षिणा । धेनुरिव वा ऽइयं मनुष्येभ्यः सर्व्वान् कामान् दुहे माता धेनुर्मातेव वा ऽइयं मनुष्यान् बिभर्त्ति तस्माद् धेनुर्दक्षिणा तन्त्वेक‡ मयनम् ॥ २१ ॥

अथेदं द्वितीयम् । आग्नेय मेवाष्टाकपालं पुरोडाशं निर्व्वपति पुरोऽच मिव वा ऽएतद्यदग्नये पवमानायाग्नये पावकायाग्नये शुचय ऽइतीवाथाङ्गसैवैन मेतत् प्रत्यक्ष माधत्ते तस्मादग्नयेऽथादित्यै चरुं निर्व्वपति स यु एव चरोर्बन्धुः स बन्धुः ॥ २२ ॥ ५ ॥

॥ इति प्रथमप्रपाठके पञ्चमं ब्राह्मणम् [२.१.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त मह वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

आदित आरभ्यैतावत्पर्यन्तं तात्पर्यार्थाभिधानविनियोगादिप्रदर्शनपुरस्सरं वाक्ययोजनं कृतम् ; उपरितनाध्यायमतानि §

---

* 'ष्टुभीय'— इति क, ख, ग । † 'त्विवेव'— इति क, ख, ग ।

‡ 'तन्त्वेक'— इति क, ग ; 'तं त्वेक'— इति ख ।

§ 'तनाध्यायगतानि'— इति घ ।

यानि वाक्यानि, तानि समानन्यायतया * पूर्ववदेव योजयितुं शक्यानीति ग्रन्थविस्तरभयात् केवलं प्रकटार्थकथनं विषमपद-विवरणं च क्रियते ।

एवं गार्हपत्यादग्निषु स्वरूपेण सिद्धेषु शुधितस्याग्नेः शमनाय पूर्णाहुतिं विधत्ते— "उद्धृत्याहवनीय मित्यादिना † ॥ १ ॥

"स एतेनान्नेन शान्त इति । "शश्वद्ध वा अध्वर्यु मिति । अशान्तो खल्वग्निः 'शश्वत्' ध्रुवम् अध्वर्युयजमानयोरन्यतरं प्रदहेत् ; 'तौ' खलु 'अस्य' अग्नेः 'नेदिष्ठम्' अन्तिकतमम्, समीपे सञ्चरेते इत्यर्थः । "अन्तिकबाढयोर्नेदसाधौ"—इतीष्ठनि अन्तिकस्य नेदादेशः ‡ ॥ २ ॥ ॥ ३ ॥

मन्त्ररहितेन स्वाहाकारमात्रेण होम मुपपादयति— "यां वा इति । पुरा खलु प्रजापतिः पुरुषाख्यादि§—सर्वजगत्-सर्जनहेतुभूतां 'प्रथमा माहुतिं' स्वाहाकारेणैव 'अजुहोत्', 'एषा' अपि पूर्णाहुतिः तथा क्रियमाणा 'निदानेन' (निदान-भूतेन ¶) कारणेन 'सो खित्' सैव, प्रजापतिना हुता प्रथमा-हुतिः खल्वित्यर्थः ‖ ॥ ४ ॥

पूर्णाहुतेः सकलकामावाप्तिहेतुत्व माह— तदाहुरिति । 'यं' 'कामम्' 'अभि'-लक्ष्य 'उत्तरणि' पवमानादीनि 'हवींषि'

---

* 'सोमानं धायतया (?)'— इति च ।

† का० श्रौ० सू० ५. १०. ५ क । "ऊर्ध्वरेति यजमानो ब्रूयातु सायम्प्रातरग्निहोत्रे । गार्हपत्यादाहवनीयस्योद्धरण मनस्तमितानुदितयोः"— इति च का० श्रौ० सू० ४. १२. १, २ । ‡ पा० सू० ५. ३. ६२ ।

§ 'प्रभादि-'— इति च । ¶ नास्त्येतत्पदं च पुस्तकादन्यत्र ।

‖ का० श्रौ० सू० ४. १०. ५ ख ।

निरूप्यन्त। 'तं' कामम् 'एतयैव' पूर्णाहुत्या प्राप्नोतीत्यर्थः ॥ ५ ॥

तत्प्राप्तिकारणं माह—"स वा इत्यादिना *। पवमानहविर्भिर्जातेऽग्नौ प्राणान्नवीर्या यथाक्रमं स्थाप्यन्ते। 'तत्' सर्वम् 'एतयैव' पूर्णाहुत्या ॥ ६ ॥ ॥ ७ ॥ ॥ ८ ॥

तस्मादाहुरिति। भक्त मेव सिद्धान्तयति—"उत्तराणीति। आधानान्तरभावीनि अग्नये-पवमानाय-इत्यादीनि विधेयानीत्यर्थः। "परोक्त मिव वेति। 'यदहः' † प्राणान्नवीर्यधारणं पूर्णाहुत्याग्नौ क्रियते, 'एतत्' 'परोक्त मिव', पवमानेष्टिभिः 'तत् ‡ इदम् इति इव' प्रत्यक्षत एव क्रियते; पवमानपावकशुचिशब्दैः प्राणान्नवीर्याणां प्रतिपादनात्। अतस्ता इष्टयो नियमेन कर्त्तव्या इत्यर्थः ॥ ९ ॥

ता इष्टीर्विधाय प्रशंसति—"स यदित्यादिना। "प्राणा वै पवमान इति। पवनक्रिया हि वायुधर्मः, प्राणश्च वायुात्मक इति पवमानशब्देन तत्प्रतिपादनम्। एतेन चाग्निं विग्रिंषन् प्राण मेवास्मिन् जातेऽग्नौ स्थापितवान् भवति। जननात् पूर्वन्तु मातुर्गर्भावस्थस्य तु प्राणो मातुः प्राणादभिन्न इति न तत्र पृथक् तद्धारणापेक्षेत्यर्थः ॥ १० ॥ ॥ ११ ॥

"अथ यदग्नये शुचय इति। "यदा वा अग्नेनेति। लौकिकदृष्टान्तकथनम्। "अग्नेनैवेन मिति। पावकेष्टिरूपेणाग्नेनाग्निं 'वर्द्धयित्वा' अनन्तर मेव 'अस्मिन्' अग्नौ अनया तृतीयेष्ट्या 'शुचिं' दीप्यमानं 'वीर्यं' च धारयतीत्यर्थः ॥ १२ ॥

---

* का० श्रौ० सू० ४, १०, ८, ९।

† 'यदहः'—इति च। ‡ 'तत'—इति च।

"तद्वेतदिति। 'तदेतत्' सर्वं पूर्णाहुतिपक्षे 'सत्' विद्यमान मपि 'विपर्यस्त मिव' भवति। अतो नासौ पक्षो युक्त इत्यर्थः। न केवल मेतावदेवेष्टीनां * प्रयोजनम्, अपि तु मनुष्यैराधीयमानस्याग्नेः कात्स्न्यं मप्याभिः सम्पद्यत इत्याख्यायिकापुरस्सर माह – "अग्निर्ह यत्रेति। "अभ्युपाहृत मिति। अभ्युपागम मित्यर्थः। हृतेर्लुङि उत्तमैकवचने द्युतादित्वात् च्लेरङ् † ॥ १३ ॥

"स एतास्विति ‡। 'सः' अग्निर्हि मनुष्यान् प्रत्यागमनसमये 'एताः' पवमानपावकशुच्याख्याः 'तिस्रः' आत्मीयाः 'तनूः' पृथिव्यन्तरिक्षद्युलोकेषु यथाक्रमं निधाय 'न' 'सर्वेण' कृत्स्नेनैव 'आत्मना' स्वरूपेण अस्मान् 'अभि'-लक्ष्य 'उपाहृतत' उपागमत्। 'इति' इम मर्थम् 'ऋषयः' अबुध्यन्त। 'तस्मै' अग्नये कात्स्न्यसम्पादनाय पवमानहवींषि निरवपन्नित्यर्थः ॥ १४ ॥

"स यदग्नये पवमानायेत्यादि, स्पष्टम्। "अनपनिहित माधत्त इति। यत् पृथिव्यादिष्वग्निना निक्षिप्त मात्मीयं रूपम्, तद् आभिः पवमानेष्टिभिः स्वीकृत्य 'कृत्स्न मेव' तम् 'अग्निम्' आहितवान् भवतीत्यर्थः। "तस्मादिति, निर्वापपक्षनिगमनम्। कात्यायनोऽपि "द्वादशाहान्ते तनूहवींषि निर्वपति"–इति § तनूरूपपवमानेष्टिनिर्वापं प्रक्रम्य "सद्यो वा न वा"–इत्यकरणपक्ष मपि ¶ सूत्रयामास ॥ १५ ॥

---

* 'मेतावदिष्टीनां'– इति च। † पा० सू० ३, १, ५५।
‡ का० श्रौ० सू० ४, १०, ११। § का० श्रौ० सू० ४, १०, ७ क।
¶ का० श्रौ० सू० ४, १०, ७ ग।

"केवलबर्हिरिति। अग्नये पवमानायैतत् यत् 'प्रथमं हविः', तत् 'केवलबर्हिः' यजनम्, न साधारणं तन्त्रयुक्तं कर्त्तव्यम्; हविरन्तरेण न समुच्चित्यानुष्ठेय मित्यर्थः। "समानबर्हिषी इति। 'उत्तरे' तु हविषी समानतन्त्रे कार्ये इत्यर्थः। तदेतद् द्वय मुपपादयति— "अयं वा इत्यादिना। "लीयेवान्तरिक्ष मिति। लीन मिव ह्यन्तरिक्षं नीरूपत्वात्। तथा 'द्यौः' अपि विप्रकृष्टत्वात् लीयमानेव भवति। अत एते 'उभे' अपि 'एनां' पृथिवीं 'प्रति' 'उद्यामिनौ स्ताम्' बाधितु मुद्युक्ते भवेताम्। अतः प्रथमं हविः पृथक्तन्त्रं कार्यम्, उत्तरे तु समानतन्त्रे कार्ये इति। निगमयति— "तस्मादिति ॥ १६ ॥

"अष्टाकपालाः सर्व इत्यादि, स्पष्टम्। "गायत्र्यो याज्यानुवाक्या भवन्तीति। यागान्तरेषु * हि पुरोनुवाक्या गायत्री, याज्या त्रिष्टप्; अत्र तु पुरोनुवाक्या याज्याः सर्वा गायत्राः कर्त्तव्याः। अतएवाश्वलायनेन तथैव सूत्रितम्— "अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः ० — ० स नः पावक दीदिवोऽग्ने पावक रोचिषाग्निः शुचिव्रततम उद्यदग्ने शुचयस्तवेति † ॥ १७ ॥

"अथादित्ये चरु मिति ‡। "इमान् हि लोकान्त्समारोहन्नेतीति। पृथिव्यन्तरिक्षद्युलोकात्मकानि पवमानहवींषि क्रमेण निर्वपंस्तद्वारा इमानेव पृथिव्यादिलोकान् सोपानक्रमेण सम्यगारोहन्नस्माल्लोकात् 'प्रच्यवते'। अतस्तत्परिहारायादित्येष्टिः कर्त्तव्येत्यर्थः ॥ १८, १९ ॥

---

* 'यागान्तरेष्ठा'— इति च। † आश्व० श्रौ० सू० २. १. २०—२५।
‡ का० श्रौ० सू० ४. १०. १०।

"तस्यै विराजो संयाज्ये इति। "प्रेहो अग्ने*"-"इमो अग्ने"† इत्येते स्विष्टकृतो याज्यानुवाक्ये 'स्याताम्' इत्यर्थः। "विराजावित्त्वेवेति, तु-शब्देन त्रिष्टुब्जगतीपक्षौ व्यावर्त्तेते ॥ २० ॥

"तस्यै धेनुरिति ‡। "एतन्वेक मथन मिति §। पवमानेष्टियजताम् 'एतत् नु एकम्' अनुष्ठानस्य विधानम् ॥ २१ ॥

अन्यदप्यस्तीत्याह— "अथेद मिति। "आग्नेय मेवेति। न तु पवमानादिविशेषण मादरणीय मित्येवकारार्थः। "परोक्ष मिव वा इति। पवमानादिविशेषणैर्विशेष्यमाणोऽग्निस्तत्र वैशिष्ट्याद्वारा पारोक्ष्य मापद्यते; अतस्तत्परिहारेण 'अञ्जसा' ऋजुनैव मार्गेण केवलाग्नये निर्वपन् तं प्रत्यक्षत एव स्वीकरोतीत्यर्थः। अस्मिन्नपि पक्षे अदित्ययागः कर्त्तव्य इत्याह— "अथादित्या इति। "स य एवेति। प्रागुक्तब्राह्मणातिदेशः ॥ २२ ॥ ५ [२. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्.)

द्यन्ति वा ऽएतद्यज्ञं। यदेनं तन्वते यन्वेव§

---

* ऋ० सं० ७. १. ३ (सां० सू० २, २, १५.)।
† ऋ० सं० ७. १. १८ (सां० सू० २, २, १५.)।
‡ का० श्रौ० सू० ४. १०, १४।
§ 'यन्वेव'— इति क, ग; 'यं न्वेव'— इति ख।

राजान मभिषुखन्ति तत्तं* घ्नन्ति यत् पशुꣳ सञ्ज्ञप-
यन्ति विशासति तत्तं† घ्नन्त्युलूखलमुसलाभ्यां दृष-
दुपलाभ्याꣳ हविर्यज्ञं ‡ घ्नन्ति ॥ १ ॥

स एष यज्ञो हतो न ददत्ते। तं देवा दक्षि-
णाभिरदक्षयंस्तदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा
नाम तदेवास्य यज्ञस्य हतस्य व्यथते तदेवास्यैत-
द्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्
दक्षिणा ददाति ॥ २ ॥

ता वै षड्§ दद्यात्¶। षड् वा ऽऋतवः संव्व-
त्सरस्य संव्वत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो
यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥ ३ ॥

द्वादश दद्यात्। द्वादश वै मासाः संव्वत्सरस्य
संव्वत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो याव-
त्यस्य मात्रा तावतीभिर्दक्षयति ॥ ४ ॥

चतुर्व्विꣳशतिं दद्यात्। चतुर्व्विꣳशतिर्व्वै संव्व-
त्सरस्यार्द्ध मासाः संव्वत्सरो यज्ञः प्रजापतिः यावानेव

---

*, † 'तत्तꣳ— इति क।

† 'घ्नꣳ'— इति क। "हविर्यज्ञꣳ'— इति च दृष्टो डा०-वेबरेण।

§ 'षट्'— इति क। ¶ 'दध्यात्'— इति ग।

यज्ञो यावत्यश्च मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्यात् त्वेव* यथाप्यहं भूयसीस्तद्यदक्षिणा ददाति ॥ ५ ॥

इया व्वै देवा देवाः। अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां डेधा† व्विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुषा मनूचानाना माहुतिभिरेव देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणाञ्छुश्रुषोऽनूचानांस्तु ऽएन मुभये देवाः प्रीताः सुधायां दधति ॥ ६ ॥

तद्यथा योनौ रेतो दध्यात्। एव मेवैतद्दक्षिणो यजमानं लोके दधति तद्यदेभ्य एतद् ददाति ये मेदꣳ समप्रापिपन्निति नु दक्षिणानाम् ॥ ७ ॥

देवाश्च वा ऽअसुराश्च। उभये प्राजापत्याः पस्पृधिरे तु ऽउभय ऽएवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृत

* 'दद्यात्त्वेव'— इति च ट्टो डा०-वेबरेण।

† 'देधा'— इति घ, ङ।

आस तꣳ ह स्माभयेऽमृत मुपजीवन्ति स यꣳ ह स्वेषां* घ्नन्ति तꣳ स्वैव† स भवति ॥ ८ ॥

ततो देवाः। तनीयाꣳस इव परिशिशिषिरे तेऽर्च्चन्तः श्राम्यन्तश्चेरुतासुरान्त्सपत्नान् मर्त्यानभिभवेमेति त ऽएतदमृत मग्न्याधेयं ददृशुः ॥ ९ ॥

ते होचुः। हन्तेद ममृत मन्तरात्मन्नादधामहै त ऽइद ममृत मन्तरात्मन्नाधायामृता भूत्वा स्तर्य्या भूत्वा स्तर्य्यान्त्सपत्नान्मर्त्यानभिभविष्याम इति ॥ १० ॥

ते होचुः। उभयेषु वै नोऽयु मग्निः प्रत्वेवासुरेभ्यो ब्रवामेति ॥ ११ ॥

ते होचुः। आ‡ वै व्वय मग्नौ धास्यामहेऽथ यूयं किं करिष्यथेति ॥ १२ ॥

ते होचुः। अथैनं व्वयं न्येव§ धास्यामहेऽत्र

---

* 'स्वेष' इति क, ग; डा०-वेबरेण च दृष्टः।

† 'स्व वै'— इति घ, ङ।

‡ 'होचु। रा'— इति ग। तत्पुरुषजे त्वेव मेव विच्छेदेऽपि सन्धिरूपं सर्वत्र (पूर्वत्र च परत्र च) दृश्यते।

§ 'नेव'— इति च दृष्टो डा०-वेबरेण।

तृणानि दहात्र दारूणि दहौदनं पचात्र माꣳसं पचेति स यं त मसुरा न्यदधत तेनाग्नेन मनुष्या भुञ्जते ॥ १३ ॥

अथैनं देवाः । अन्तरात्मन्नादधत तꣳ ऽइम ममृत मन्तरात्मन्नाधायामृता भूत्वाऽस्तर्य्या भूत्वा स्तर्य्यान्त्सपत्नान्मर्त्यानभ्यभवंस्तथो ऽएवैष एतदमृत मन्तरात्मन्नाधत्ते नामृतत्वꣳ शाशास्ति सर्व्व मायु-रेत्यस्तर्य्यो ह्येव भवति नु हैनꣳ सपत्नस्तुस्तूर्षमाण-श्चन स्तृणुते तस्माद् यदाहिताग्निश्चानाहिताग्निश्च स्पर्द्धते ऽआहिताग्निरेवाभिभवत्यस्तर्य्यो हि खलु स तर्हि भवत्यमृतः ॥ १४ ॥

तद्यचैन मदो मन्यन्ति । तज्जात मभि-प्राणिति प्राणो वा ऽअग्निर्जात मेवैन मेतत्सन्तं जनयति स पुनरुपानिति तदेन मन्तरात्मन्नाधत्ते सोऽस्येषोऽन्तरात्मन्नग्निराहितो भवति ॥ १५ ॥

त मुद्दीप्य समिन्धे । इह यच्य ऽइह सुकृतं करिष्यामीत्येवैन मेतत् समिन्धे योऽस्येषोऽन्तरात्म-न्नग्निराहितो भवति ॥ १६ ॥

अन्तरेणागाद् व्यवृतदिति । नु ह वा ऽअस्येतं

कश्चनान्तरेणेति यावज्जीवति योऽस्येषोऽन्तरात्मन्नग्निराहितो भवति तस्मादु तन्नाद्रियेत यदनुगच्छेन्न ह वा ऽअस्येषोऽनुगच्छति यावज्जीवति योऽस्येषोऽन्तरात्मन्नग्निराहितो भवति ॥ १७ ॥

ते वा ऽएते प्राणा एव यदग्नयः। प्राणोदानावेवाहवनीयश्च गार्हपत्यश्च व्यानोऽन्वाहार्य्यपचनः ॥ १८ ॥

तस्य वा ऽएतस्याग्न्याधेयस्य। सत्य मेवोपचारः स यः सत्यं वदति यथाग्निꣳ समिद्धं तं घृतेनाभिषिञ्चेदेवꣳ हैनꣳ स उद्दीपयति तस्य भूयो भूय एव तेजो भवति श्रेयः-श्रेयान् भवत्यथ योऽनृतं वदति यथाग्निꣳ समिद्धं तꣳ सुदकेनाभिषिञ्चेदेवꣳ स जासयति तस्य कनीयः-कनीय एव तेजो भवति पापीयः-पापीयान् भवति तस्मादु सत्य मेव वदेत् ॥ १९ ॥

तदु* ह्याप्यरुण† मौपवेशिꣳ‡ ज्ञातय ऊचुः।

---

* 'तदु'— इति घ, ङ।

† 'ह्याप्यरुण'— इति घ, ङ।

‡ 'मौपवेशिं'— इति ग; क-ख-ग-पुस्तकेष्वित उत्तर मेव छेदः (।)।

स्थविरो* वा ऽअस्यग्नी ऽआधत्स्वेति मु होवाच ते मैतद् ब्रूथ व्वाचंयम एवैधि न वा ऽआहिताग्निनानृतं व्वदितव्यं न वदञ्जातु† नानृतं व्वै त्तावत् सत्य मेवो-पचार इति ॥ २० ॥ ६ ॥

॥ इति प्रथमप्रपाठके षष्ठं ब्राह्मणम् [२. २.] ॥

षड्द्वादशादिदक्षिणा आधानस्य विधास्यन् तन्नाम निर्वक्तुं प्रस्तौति — "घ्नन्तीति। "यदेनं तन्वत इति। समान्येनोक्तं विभजति — "यज्ञ्वेवेति। यज्ञे सोमाभिषवपशुसञ्ज्ञपनावहननादिकरणात् तद्द्वारा तत्सम्बन्धो यज्ञ एव हतो भवतीत्यर्थः ॥ १ ॥

"स एष यज्ञ इति। "न ददच्च इति। फलं जनयितुं न शक्नोतीत्यर्थः। 'अदक्षयन्' दक्षं समर्थं मकुर्वन्। "तद्येन मित्यादि, दक्षिणानामनिर्वचनम्। एवं पुराकृत्त मुपन्यस्य प्रकृते योजयति — "तद्यदिति ॥ २ ॥

"ता वा इति, दक्षिणादानविधिः। द्वादशचतुर्विंशतिपक्षावत्र वैकल्पिकौ द्रष्टव्यौ। अतएवोक्तं सूत्रकृता— "षट् दक्षिणाः प्रविभज्य ददाति, द्वादश, चतुर्विंशतिं वा"— इति ‡। आपस्तम्बोऽप्याह स्म — "षड् देया द्वादश देया-

---

* 'ऊचु स्थविरो'— इति क, ख, ग।

† 'वदन् जातु'— इति घ, ङ।

‡ का० श्रौ० सू० ४, १०. १२।

चतुर्विंशतिर्देया इति ता विकल्प्यन्ते"—इति *। "एषा मात्रेति। एतद् दक्षिणानां परिमाण मित्यर्थः। इतोऽधिक मपि यथाविभव मिच्छानुसारेण देय मिति विधत्ते— "दद्यात् त्वेवेति †॥ ३, ४, ५॥

"हया वा इति। हैविध्य मेव दर्शयति – "देवा अहे-वेति। अग्न्यादिदेवरूपा एव देवाः केचित्, अपरे तु ब्राह्मण-रूपाः। देवा विशिष्यन्ते— "शुश्रुवांस इत्यादिना। "शुश्रु-वांसः' बहुश्रुताः, 'अनूचानाः' साङ्गवेदाध्ययनेन ज्ञातार्थानुष्ठान-पराः। एते मनुष्यरूपा देवाः। अत एव तैत्तिरीयकम् – "एते वै देवाः प्रत्यक्षं यद् ब्राह्मणाः"—इति ‡। यथा आहुति-भिरग्न्यादिदेवानां प्रीतिर्भवेत्, एवं मनुष्यदेवान् प्रीणयितुं दक्षिणा-दान मित्यर्थः॥ ६॥

"तद्यथा योनाविति। यथा गर्भाशये सिक्तं रेतो गर्भ-रूपेण परिणमति, न व्यर्थं भवति; एव मेवर्त्विजो यज-मानं कर्मफले स्वर्गलोके स्थापयन्तीत्यर्थः। "ये मेद मिति। 'ये' खलु ऋत्विजो 'मा' माम् 'इदं' कर्मफलं 'सम्प्रापिपन्' सम्यक् प्रापितवन्तः 'इति' अनेनाभिप्रायेणैभ्यो दक्षिणा देये-त्यर्थः॥ ७॥

अथाधानस्य भ्रातृव्यजयहेतुत्वं वक्तु माख्यायिका माह— "देवासेति। "अनात्मान आसुरिति। आत्मज्ञानरहिता अविवेकिनो जाताः। अनात्मत्वादेव 'मर्त्याः' मरणधर्माश्च

---

* आप० श्रौ० सू० ५. २०. १३, १४।

† 'भूयसीश्च यथाश्रद्धम्"— इति का० श्रौ० सू० ४. १०. १३।

‡ तै० सं० १. ७. ३. २।

सञ्जाताः । 'तेषु' भूतेषु देवासुरेषु 'मर्त्येषु' सत्सु 'अग्निरेव' अमरणशीलः 'आस' । "यं ह स्मैषा मिति । 'एषां' देवानां मध्ये 'यम्' एव असुराः 'घ्नन्ति', 'तत्' तत्र सर्वहत * एव 'भवति' ॥ ८ ॥

"ततो देवा इति । एवं क्रमेणासुरैर्हतेषु देवाः अल्पीयांस एव परिशिष्टा बभूवुः । 'ते' देवाः 'अर्चन्तः' तपस्यन्तः, 'आम्यन्त' श्रमं प्राप्नुवन्तः 'चेरुः' । त एतदित्यादि, स्पष्टम् ॥ ९ ॥

"ते होचुरिति । "अमृत मन्तरात्मन्निति । मरणरहित मग्निम् 'आत्मनि' हृदये आधाय वय मप्यमृता भूताः, अत एव 'अस्तर्याः' अहिंस्राश्च भूता इत्यर्थः ॥ १० ॥

"ते होचुरिति । "उभयेषु वा इति । देवासुरेषु 'उभयेषु' अस्मासु स्थितः, 'अय मग्निः' अतः 'असुरेभ्यः' निवेद्यैवास्माभिः स आधातव्य इति विचारितवन्त इत्यर्थः ॥ ११ ॥

"ते होचुरित्यादि, निगदसिद्धम् ॥ १२ ॥

"ते होचुरिति । "न्येव धास्यामह इति । यदि यूयं देवा अग्निं धास्यध्वम्, तर्हि वय मपि त मेवाग्निं धास्यामहे । "तृणानि दह"-इत्याद्यसुरवाक्यम् । हे अग्ने ! पृथिव्यां तृणानि दह, दारूणि दहेत्येव मग्निं प्रेषयन्तो भूमौ त मस्थापयत् ॥ १३ ॥

"अथैन मित्यादि । 'देवाः' तु 'एनम्' अग्निम् 'आत्मन्' आत्मनि, 'अन्तः' हृदयमध्ये 'आधाय' यथासङ्कल्प मक्षपतेत्यर्थः ।

आख्यायिकासिद्ध मर्थं प्रकृते योजयति — "यथो एवैष

* 'स स हत'— इति च ।

इति। "अस्तर्यो ह्येति। अमृतरूपाग्निधारणेन यस्मात् आहिताग्निरहिंस्यः, तस्माद् विवदमानोऽसावनाहिताग्निं अभिभवितुं शक्नोतीत्यर्थः ॥ १४ ॥

नन्वग्निर्गार्हपत्यायतने बहिराधीयते, कथं तस्यान्तर्धारणमिति, तत्राह — "तद्यत्रेति। "अभिप्राणितीति। मन्थनात् 'जातं' 'तम्' अग्निम् 'अभि' उपरि प्राणनं करोति। "स पुनरपानितीति। अग्नेर्हीपरि श्वास मुत्सृज्य, त मेव श्वासं पुनरन्तर्नयेत्। तेन सार्द्धं मग्निरपि अन्तः प्रविशन् यजमानस्य हृदये आहितो भवतीत्यर्थः ॥ १५ ॥

नियतस्यावाह्यस्याग्नेरुद्दीपनं समिन्धनं विधत्ते — "त मिति। उद्दीपनं काष्ठप्रक्षेपः, समिन्धनं सम्यक् प्रज्वलनम्, तदुभय मन्तरग्नौ * दर्शयति — "इहेति। 'इह' अस्मिन् बाह्येग्नौ 'यज्ञे' यागं करिष्ये, तत्फलञ्च सम्पादयिष्यामीति यो मनोव्यापारो सङ्कल्पो, ते एवान्तराहितस्याग्नेरुद्दीपनसमिन्धने इत्यर्थः। "योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवतीत्युपसंहारः ॥ १६ ॥

एव मन्तरग्नि मादधानस्य व्यवायादिदोषोऽपि नास्तीति प्रतिपादयति — "अन्तरेणेत्यादिना। अग्नियजमानयोर्मध्ये देवदत्तादेरागतेन च व्यवायादिभिः 'व्यहतत्' व्याहत्तो विमुखोऽभूदिति यो दोषः, सोऽप्यत्र नास्ति। तत्र हेतु माह — "न ह वा इति। न खलु हृदयमध्ये स्थापितस्य अग्नेर्यजमानस्य च मध्ये कोऽपि गच्छति यावज्जीवम्; अतो तथा शङ्का न कार्येति। एवंविदुषोऽन्यनुगमनशङ्कापि न कार्येत्याह — "तस्मादिति। न ह वा अस्येति बाह्यस्याग्नेरनुगमेऽपि अन्तराहित-

* 'मान्तराग्नौ'— इति च।

स्याग्नेर्यावज्जीव मवक्षानात्, न खल्वस्य यजमानस्येषोऽग्नि-रनुगच्छत्युपशाम्यति ॥ १७ ॥

नन्वन्तर्गार्हपत्याद्यग्नयो न सन्ति, कथं तेषा मनुगम इत्यत आह — "ते वा इति। गार्हपत्यादीनां प्राणोदानव्यानात्मना-वस्थितत्वात् नोक्तदोष इत्यर्थः ॥ १८ ॥

आहिताग्निना सत्य मेव वदितव्यम्, न कदाचिदप्यनृत मित्युभयं प्रतिपादयति — "तस्य वेत्यादिना * ॥ १९ ॥

एतत्सत्यवदनस्याग्निसमिन्धनहेतुत्व मृषिवाक्यसम्बन्धेन द्रढ-यति — "तदु हेति। 'तत्' तत्रोक्तविषयेऽपि खल्वेवं पूर्व-वृत्तान्तः सञ्जातः। उपवेशो नाम कश्चित्, तस्य पुत्रम् 'अरु-णम्' तदीयाः 'ज्ञातयः' उक्तवन्तः। किमिति— हे अरुण! 'स्थविरः' वृद्धः 'असि' अत आमुष्मिक-सिद्धये अग्न्याधानं कुर्विति। स चैवं प्रत्युक्तवान्। कथ मिति— "मैतद् ब्रूथेति तद्वचनम्। 'वाचंयम एवैषि' वाग्यत एव भवति। कुत एवं प्रार्थ्यते? तत्राह— 'न वा इति। आहिताग्निना हि अनृतं न वदितव्यम्। वाग्व्यवहारं कुर्वतस्तु अनृतवदननिषेधा

---

* एतस्याः कण्डिकाया व्याख्यान मेव मकारि हरिस्वामिना— "तस्य वा एतस्येति। बाह्याभ्यन्तरस्याग्न्याधेयस्य; तेषा माहितानां मग्नीनां बाह्या-भ्यन्तराणा मित्यर्थः। 'सत्य मेव' नानृतम्, उपधायाचरण मुपचारः; सत्येनैव पूतवचनेन ते अग्नी यज्ञे आधीयन्तेत्यर्थः। कथम्? यः सत्यं वदति आहि-ताग्निः, स एव मग्नि माहित मन्तर्वेदिञ्च घृतेनाभिषिञ्चति; अनृतवादी तूदकेनाभिषिञ्चन् 'जासयति'। "जासु हिंसायाम्"। हिनस्ति क्षययति। तस्य चाधातुरनेन कारणेनैव तेजसो वृद्धिहानी भवतः। तस्मादाहिताग्निः रक्षणाय सत्यविधिः"— इति।

न सम्भवति । यस्मादेव ऋषिणोक्तम् — "न वदन् जातु"-इत्यादि, तस्मात् सत्यवचन मेवाभ्याधेयस्याङ्ग मित्यर्थः*॥ २० ॥ ६ [२. २.]॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥

॥ इति द्वितीयकाण्डे प्रथमः प्रपाठकः † ॥

---

* "अनृतातिथ्यापनोदपूतिदार्वाधानवौंसपक्वनाद्युदकानि वर्जयेत्"—इति का० श्रौ० सू० ४. १०. १५। "यजमानः आधानानन्तर मेतानि यावज्जीवं वर्जयेत्"— इत्यादि च तत्र या० दे०।

† "कण्डिकासङ्ख्या ११४"— इति क, ख, घ, ङ। "काण्डी ११४"— इति ग। तत्र १ ब्रा० १४ क०, २ ब्रा० १६ क०, ३ ब्रा० ६ क०, ४ ब्रा० ३० क० ५ ब्रा० २२ क०, ६ ब्रा० २० क०; सङ्कलनया ११४ इति सिद्धम्॥

अथ

द्वितीयप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

द्वितीयाध्याये तृतीयं ब्राह्मणम् ।

॥ हरिः ॐ ॥

व्वरुणो हैनद्राज्यकाम आदधे । स राज्य मगच्छत्तस्मादाश्च व्वेद यश्च न व्वरुणो राजेत्येवाहुः सोमो यशस्कामः स यशोऽभवत्तस्मादाश्च सोमे लभते यश्च नोभावेवागच्छतो यश एवैतद् द्रष्टु मागच्छन्ति यशो ह भवति राज्यं गच्छति य एवं व्विद्वानाधत्ते* ॥ १ ॥

अग्नौ ह वै देवाः† । सर्व्वाणि रूपाणि निद-

* 'धत्ते'—इति घ, ङ । † 'वाः'—इति घ, ङ ।

धिरे यानि च ग्राम्याणि यानि चारण्यानि व्विजयं वोपप्रैष्यन्तः कामचारञ्च वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥ २ ॥

तान्यु हाग्निर्निचक्रमे। तैः सङ्गृह्याऽर्त्तून् प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं तेषाꣳ हेयसेवास किमिह कर्त्तव्यं क्वेह प्रज्ञेति वा * ॥ ३ ॥

तत एतत् त्वष्टा पुनराधेयं ददर्श। तदादधे तेनाग्नेः प्रियं धामोपजगाम सोऽस्मा ऽउभयानि रूपाणि प्रतिनिःससर्ज यानि च ग्राम्याणि यानि चारण्यानि तस्मादाहुस्त्वाष्ट्राणि वै रूपाणीति त्वष्टुर्ह्येव सर्व्वꣳ रूप मुप ह त्वेवान्याः प्रजा यावत्यो यावत्य† इव तिष्ठन्ते‡ ॥ ४ ॥

तस्मै कं पुनराधेय मादधीत। एवꣳ हैवाग्नेः प्रियं धामोपगच्छति सोऽस्मा ऽउभयानि रूपाणि प्रतिनिःसृजति यानि च ग्राम्याणि यानि चार-

---

* 'प्रज्ञेतीव'— इति क, ख, ग।

† 'यावच्छो यावच्छ'— इति क, ख, ग; डा०-वेबरेण च दृष्टः।

‡ 'उपतिष्ठन्ते'— इति सा०-सम्मत इति डा०-वेबरः।

ख्यानि तस्मिन्नेतान्युभयानि रूपाणि दृश्यन्ते परमता वै सा स्पृहयत्यु हास्मै तथा पुष्यति लोक्यस्वेवापि ॥ ५ ॥

आग्नेयोऽयं यज्ञः* । ज्योतिरग्निः पाप्मनो दग्धा सोऽस्य पाप्मानं दहति स इह ज्योतिरेव श्रिया यशसा भवति ज्योतिरमुत्र पुण्यलोकत्वैतन्नु तद्यस्मादादधीत ॥ ६ ॥

स वै व्वर्षास्वादधीत । व्वर्षा वै सर्व्वऽऋतवो व्वर्षा हि वै सर्व्वऽऋतवोऽथादो व्वर्षमकुर्मादो† व्वर्षमकुर्मति संवत्सरान्त्सम्पश्यन्ति व्वर्षा हु‡ त्वेव सर्व्वेषा मृतूनाꣳ रूपमुत हि तद्वर्षासु भवति यदाहुर्ग्रीष्म ऽइव वा ऽअद्योत्युतो तद्वर्षासु भवति यदाहुः शिशिर ऽइव वा ऽअद्योति व्वर्षादिद्वर्षाः § ॥ ७ ॥

अथैतदेव परोऽक्षꣳ रूपम्¶ । यदेव पुरस्ताद्वाति

---

* 'यज्ञः'— इति घ, ङ ।

† 'थो'— इति ग ।

‡ 'हि'— इति च टथो डा०-वेबरेण ।

§ 'र्षा'— इति घ, ङ ।

¶ 'पम्'— इति घ, ङ ।

तद्वसन्तस्य रूपं यत् स्तनयति तद् ग्रीष्मस्य यद्वर्षति तद् व्वर्षाणां यद् विद्योतते तच्छरदो यद् वृष्ट्वोद्-गर्ज्जति तद्धेमन्तस्य व्वर्षाः सर्व्व ऽऋतव ऋतून् प्राविशद्दतुभ्य एवैन मेतन्निर्म्मिमीते ॥ ८ ॥

आदित्यस्त्वेव सर्व्व ऽऋतवः। यदैवोदेत्यथ व्वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ व्वर्षा यदापराह्णोऽथ शरद्यदैवास्त मेत्यथ हेमन्त-स्तस्मादु मध्यन्दिन ऽएवादधीत तर्हि ह्येषोऽस्य लोकस्य नेदिष्ठं भवति तन्नेदिष्ठादेवैन मेतन्मध्या-न्निर्म्मिमीते ॥ ९ ॥

क्षाययेव वा ऽअयं पुरुषः। पाप्मनानुषक्तः सोऽस्यात्र कनिष्ठो भवत्यधस्पद् मिवेयस्यते तत् कनिष्ठ मेवैतत्पाप्मान मवबाधते तस्मादु मध्यन्दिन ऽएवा-दधीत ॥ १० ॥

तं वै दर्भैरुद्धरति। दारुभिर्व्वै पूर्व्व मुद्धरति दारुभिः पूर्व्वं दारुभिरपरं जामि कुर्य्यात्समदं कुर्य्यादापो दर्भा आपो व्वर्षा ऋतून् प्राविशदद्भि-रेवैन मेतदग्रो निर्म्मिमीते तस्माद्दर्भैरुद्धरति ॥ ११ ॥

अर्कपलाशाभ्याम्। व्रीहिमय मपूपं कृत्वा यत्र

गार्हपत्य माधास्यन् भवति तन्निदधाति तद्-गार्हपत्य मादधाति ॥ १२ ॥

अर्कपलाशाभ्याम् । यत्रमय मपूपं कृत्वा युन्ना-हवनीय माधास्यन् भवति तन्निदधाति तदाहवनीय मादधाति पूर्व्वाभ्या मेवैनावेतदग्निभ्या मन्तर्दधा इति व्वदन्तस्तदु तथा न कुर्य्याद्रात्रिभिर्ह्येवान्तर्हितौ भवतः ॥ १३ ॥

आग्नेय मेव पञ्चकपालं पुरोडाशं निर्व्वपति । तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति पञ्च वा ऽऋतव ऋतून् प्रविशतुभ्य एवैन मेतन्निर्म-मीते ॥ १४ ॥

सर्व्व आग्नेयो भवति । एवꣳ हि त्वष्टाग्नेः प्रियं धामोपागच्छत् तस्मात् सर्व्व आग्नेयो भवति ॥ १५ ॥

तेनोपाꣳशु चरन्ति । यद्वै ज्ञातये वा सख्ये वा निष्केवल्यं चिकीर्षति तिरइव वैतेन* बोभवद्वैश्वदेवो-ऽन्यो यज्ञोऽथैष निष्केवल्य आग्नेयो यद्वै तिरइव तदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥ १६ ॥

* 'इवैतेन'— इति घ, ङ ।

उच्चैरुत्तम मनुयाजं यजति। कृतकर्मैव हि स तर्हि भवति सर्व्वो हि कृत मनुबुध्यते ॥ १७ ॥

स आश्राव्याह। समिधो यजेति तदाग्नेयꣳ रूपं परोऽक्षं त्वग्नीन्यजेति त्वेव ब्रूयात्तदेव प्रत्यक्ष माग्नेयꣳ रूपम् * ॥ १८ ॥

स यजति। अग्न ऽआज्यस्य व्यन्तु व्वौभ-गग्निमाज्यस्य व्वेतु व्वौभगग्निनाज्यस्य व्यन्तु व्वौभ-गग्निराज्यस्य व्वेतु व्वौभगिति ॥ १९ ॥

अथ स्वाहाग्नि मित्याह। आग्नेय माज्यभागꣳ स्वाहाग्निं प्रवमान मिति यदि प्रवमानाय धियेरन्त्स्वाहाग्नि मिन्दुमन्त मिति यद्यग्नय ऽइन्दुमते धियेरन्त्स्वाहाग्निꣳ स्वाहाग्नीनाज्यपाञ्जुषाणो † ऽग्निराज्यस्य व्वेत्विति यजति ॥ २० ॥

अथाहाग्नयेऽनुब्रूहीति। आग्नेय माज्य-भागꣳ सोऽन्वाहाग्निꣳ स्तोमेन बोधय समिधानो ऽमर्त्यम्। हव्या देवेषु नो दधदिति सुप्तिवेव खलु वा ऽएतद्यदुद्वासितो भवति सम्प्रबोधयत्येवैन

---

* 'रूपꣳ'— इति क, घ, ङ ॥

† 'पान् जुषाणो'— इति घ, ङ।

मेतत्समुदीर्यति* जुषाणो ऽअग्निराज्यस्य व्वेत्विति यजति ॥ २१ ॥

अथ यदाग्नये पवमानाय ध्रियेरन्। अग्नये पवमानायानुब्रूहीति ब्रूयात्सोऽन्वाहाग्न ऽआयूंषि पवस ऽआसुवोर्ज्जं मिषं च नः। आरे बाधस्व दुच्छुना मिति तथाहाग्नेयो भवति सोमो वै पवमानस्तदु सौम्यादाज्यभागान्नयन्ति जुषाणो ऽअग्निः पवमान आज्यस्य व्वेत्विति यजति ॥ २२ ॥

अथ यदाग्नय ऽइन्दुमते ध्रियेरन्। अग्नय ऽइन्दुमतेऽनुब्रूहीति ब्रूयात्सोऽन्वाहेह्यू षु ब्रवाणि तेऽग्न ऽइत्येतरा गिरः। एभिर्व्वर्द्धास† ऽइन्दुभिरिति तथा हाग्नेयो भवति सोमो वा ऽइन्दुस्तदु सौम्यादाज्यभागान्नयन्ति जुषाणो ऽअग्निरिन्दुमानाज्यस्य व्वेत्विति यजत्येव मु सर्व्वं माग्नेयं करोति ॥ २३ ॥

अथाहाग्नयेऽनुब्रूहीति हविषः। अग्निं यजाग्नये स्विष्टकृतेऽनुब्रूह्यग्निꣳ स्विष्टकृतं यजेत्यथ यद् देवान् यजेत्यग्नीन् यजेत्येवैतदाह ॥ २४ ॥

---

* 'दीर्ण्यति'— इति क; 'दीर्यति'— इति ख, ग।

† 'व्वर्द्धास'— इति घ, ङ।

सु यजति। अग्नेर्व्वसुवने व्वसुधेयस्य व्वेतु व्वौभगम्ना ऽउ व्वसुवने* व्वसुधेयस्य व्वेतु व्वौभग् देवो ऽअग्निः स्विष्टकृदिति स्वय मामनेयस्तृतीय एव स्वाग्नेयाननुयाजान् करोति ॥ २५ ॥

ता वा ऽएताः†। षड् विभक्तीर्य्यजति चतस्रः प्रयाजेषु द्वे ऽअनुयाजेषु षड् वा ऽऋतव ऋतून् प्राविशद्दतुभ्य एवैन मेतन्निर्म्मिमीते ॥ २६ ॥

द्वादश वा त्रयोदश व्वाक्षराणि भवन्ति। द्वादश वा वै त्रयोदश वा संव्वत्सरस्य मासाः संव्वत्सर मृतून् प्राविशद्दतुभ्य एवैन मेतत् संव्वत्सरान्निर्म्मिमीते न द्वे चन सहाजामितायै जामि ह कुर्य्याद्यद् द्वे चित् सह स्यातां व्यन्तु व्वेत्त्येव प्रयाजानाए रूपं वसुव्वने व्वसुधेयस्येत्यनुयाजानाम् ॥ २७ ॥

तस्य हिरण्यं दक्षिणा। आग्नेयो वा ऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि व्वहेनाग्नेयोऽग्निदग्ध मिव ह्यस्य व्वहं भवति देवानाए हव्यवाहनोऽग्निरिति

---

* 'व्वसुव्वने'— इति ख।

† 'ताः'— इति घ, ङ।

व्वहति वा ऽएषु मनुष्येभ्यस्तस्मादनड्वान् दुहिणा ॥ २८ ॥ १ ॥

॥ कृति द्वितीयप्रपाठके प्रथमं ब्राह्मणम् [२.३.] ॥

अथ पुनराधेयं * विधित्सुः स्वपत्नातिभूत मुक्त मग्न्याधेयं प्रकृतिरूपार्थवादेन † राज्ययशोहेतुत्वेन प्रशंसति— "वरुण इति। "सोमो यशस्काम इति। आदध इत्यनुषङ्गः। उक्त मर्थं प्रकृते योजयति— "यशो हेति। 'यशः' यशस्वी भवतीत्यर्थः ‡ ॥ १ ॥

पुनराधेयं विधातु माख्यायिकया प्रस्तौति— "अग्नी हेति। निधाने कारणानि वैकल्पिकानि त्रीण्युपन्यस्यति— "विजयं वेति। असुरान् विजेतु मुपगमनसमये पूर्वसिद्धाग्न्याधानस्यार्थं मर्थनिधान मित्येकः पक्षः। 'कामचारस्य' कामाय यथेच्छं क्रीडितुं सञ्चरणस्य यः कामः, तदर्थं वा तन्निधान मिति द्वितीयः। गृहे एव स्थितानां 'नः' अस्माकं देवानां मध्ये अय मग्निः 'गोपिष्ठः' गोपायितृतमो रक्षणकुशलोऽस्मदीयं धनं गोपायितुं § रक्षितुं शक्नोतीत्यनेनाभिप्रायेण वा तन्निधान मिति तृतीयः पक्षः ॥ २ ॥

---

* "पुनराधेय माधानाप्रतिज्ञातस्य"— इति का० श्रौ० सू० ४. १०. १।

† 'परकृतिरूपार्थवादेन'— इति क्व।

‡ "राज्ययशस्कामस्य वा"— इति का० श्रौ० सू० ४. १०. २।

§ 'गोपायतृ'— इति च।

"तान्यु हेत्यादि। 'तानि' देवैर्निहितानि 'ग्राम्यारण्यानि' रूपाणि सः 'अग्निः' नितरां कामितवान्, अह मेवैतत् सर्वं सुपभोक्ष्ये इति। 'तैः' निक्षेपैः सह विद्यमानं सर्वं सङ्गृह्य वसन्तादयान् 'ऋतून्' चोरादिः पर्वत मिव प्रविष्टवान् (अन्तर्दधे*) देवा अपि अस्मदीयं स्थानं 'पुनः' आगच्छामः 'इति' अनेनाभिप्रायेण तं 'तिरोभूतम्' 'अग्निम्' आगच्छन्। पूर्वं यस्मिन् स्थाने सोऽग्निः स्थितः, तत्र त मपश्यतां 'तेषां' देवानां 'इयसा इव आस' विहीनावस्थां प्राप †। अग्निरस्मदीयं सर्वं धन मपहृत्य गतः, 'इह' अस्मिन् विषये 'किम्' अस्माभिः 'कर्त्तव्यम्', 'का वा' बुद्धिः ? 'इति' ॥ ३ ॥

"तत एतदिति। एवं विचारयतां मध्ये 'ततः' अनन्तर मेव 'त्वष्टा' 'एतद्' वक्ष्यमाणं 'पुनराधेयं' 'ददर्श'। "तदादध इत्यादि, निगदसिद्धम्। "उप ह त्वेवेति। 'उप ह तु एव'। 'यावच्छः' ‡ यावत्प्रकारविशिष्टं त्वाष्ट्रं रूपम् 'अन्याः प्रजाः' 'उपतिष्ठन्ते', तावत्यो जायन्ते इत्यर्थः। वीप्सा तु सर्वसङ्ग्रहार्था ॥ ४ ॥

"तस्मा, इति, पुनराधेयविधिः। यदाख्यायिकया प्रति-

---

* नास्तोऽतत् पदं च-पुस्तकादन्यत्र।

† इयसा=चिन्ता, इत्याह हरिस्वामी। प्रथमकाण्डेऽप्युक्तं तेन—'इयस्'-शब्दोऽवसानवचनः कण्ड्वादिषु पठ्यत इति (१भा० ६१० पृ०)। तत्त्वतस्तु इयस्यते, इयसा, इयसित मिति चीरूपि रूपाख्येकधातुजानि समानार्थानि। इहैवोत्तरत्र (१० क०) 'इयस्यते'— इति च विवेच्यम्।

‡ "यावच्छो यावच्छ इव। यावच्छब्दोऽल्पवचनः, अल्प मल्प मित्यर्थः"— इति हरिस्वामी।

पत्नं प्रयोजनम्, अग्निप्रियधामोपगमनादिलक्षणम्, तदर्थं पुनराधानं कुर्यादित्यर्थः। प्रथमाहितस्याग्नेः * विधानान्तरेण पुनस्तेष्वायतनेषु स्थापनं पुनराधेयम्। "एवं हेत्यादि, निगदसिद्धम्। "परमता वै सेति। येयं ग्रामारण्योभयप्राप्तिः 'सा' 'परमता' परमत्वं सर्वोत्कृष्टत्वम्। किञ्च 'अस्मै' पुनराधेयं कृतवते सर्वे जनाः 'स्पृहयन्ति' आद्रियन्ते। "स्पृहेरीप्सितः"—इति † सम्प्रदानसञ्ज्ञा ‡। तथा अयमपि 'लोक्यम्' लोकनीयम् उत्कर्षं प्राप्य 'पुण्यति' प्रवृद्धो भवति ॥ ५ ॥

विहितं पुनराधेयमग्निसम्बन्धोपजीवनेन प्रशंसति—"आग्नेयोऽयं यज्ञ इति। ज्योतिरात्मको ह्यग्निः 'पाप्मनः' 'दग्धा' दाहकः। अतः 'सः' अग्निः स्वसम्बन्धि-यज्ञं कुर्वतः 'अस्य' पापं निर्दहति। "एतद्वु तदिति। यस्मै फलाय आदधीत, 'एतत्' उक्तविधिफलं खलु 'तत्' इत्यर्थः ॥ ६ ॥

तस्य पुनराधेयस्य त्रैवर्णिकसाधारण्येन ऋतुविशेषं विधत्ते—"स वा इति। ऋत्वन्तरं परित्यज्य वर्षर्त्तुविधाने कारणमाह—"वर्षा वा इति §। एतदुपपादयति—"वर्षा हि वा इत्यादिना। यस्मादेवं वर्षर्त्तुः सर्वात्मकः, तस्मात् समुदायात्मकं संवत्सरं वर्षशब्देन लोको व्यवहरतीति दर्शयति—"अथेति। सर्वर्त्तुरूपा वर्षा इति प्रतिपादयितुं प्रतिजानीते—"वर्षा ह त्वेवेति। एतदुपपादयति—"तदिति। ग्रीष्म-

---

* "प्रथम माहितस्याग्नेः"—इति च।

† पा० सू० १. ४. ३६।

‡ 'स्पृहेरीप्सिततम मिति सम्प्रदानसञ्ज्ञा'—इति च।

§ का० श्रौ० सू० ४. ११. ६ क।

शिशिरधर्मयोः प्रकाशग्रैत्ययोः वर्षासु सद्भावात्, वर्षयोगाच्च * वर्षर्त्तोस्तावदुभयात्मकत्वम्। तत्र † ग्रीष्मे वसन्तस्य, वर्षासु शरदः, शिशिरे हेमन्तस्य, समानधर्मतयान्तर्भावात् सर्वर्त्तुरूपत्वं सिद्ध मित्यर्थः ॥ ७ ॥

एवं प्रत्यक्षविषयं प्रकाशादिधर्मयोगेन सर्वत्व मभिधाय परोक्षधर्मवशादपि तत् प्रतिपादयति— "अथैतदिति। पुरोवातादयो ‡ हि वसन्तादीनां परोक्षभूता धर्माः। तेषां च सर्वेषां वर्षासु सद्भावात् सर्वर्त्तुरूपतेत्यर्थः। "ऋतून् प्राविशदित्यादि। यस्मादग्निः प्रागुक्तरीत्या ऋतून् प्राविशत्, तस्मादेनं वर्षास्वादधानस्तेभ्य एवर्त्तुभ्यः पुनरुत्पादयतीत्यर्थः ॥ ८ ॥

तच्च पुनराधान महनि मध्यन्दिने कार्य मिति § विधित्सुस्तदर्थ मादित्यस्य सर्वर्त्तुरूपता माह— "आदित्यस्त्वेवेति। प्रातःसङ्गव-मध्याह्न-पराह्ण-सायङ्कालात्मकाः अह्नोऽवयवाः सूर्यसम्बन्धिनः पञ्चर्त्तवः; तत्र वर्षास्वाधानस्य विहितत्वात् तदात्मके मध्यन्दिने एव तत् कुर्यादित्यर्थः। तदेतन्मध्यन्दिनाधानं प्रशंसति— "तर्हीति। 'तर्हि' तस्मिन् मध्यन्दिने समये 'एषः' आदित्यः 'अस्य लोकस्य' 'नेदिष्ठम्' अन्तिकतमो 'भवति'। सिद्ध मन्यत् ॥ ९ ॥

प्रकारान्तरेण तन्मध्यन्दिनाधानं प्रशंसति— "छाययेवेति। "सोऽस्येति। 'अस्य' पुरुषस्य छायारूपः 'सः' पाप्मा 'अत्र'

---

* 'मृधियोगाच्च (?)'— इति च।

† 'ततः'— इति च।

‡ 'पुरोवात इत्यादयो'— इति च।

§ का० श्रौ० सू० ४, ११, ६ ख।

अस्मिन् मध्यन्दिने 'कनिष्ठः' अल्पतमः 'भवति'। स च (पाप्मा *) पुरुषस्य † पादयोरधस्तादिव 'इयस्यते' प्राप्नोति ‡। "इण् गतौ"—इति धातुः §। "तत् कनिष्ठ मित्यादि सुगमम् ॥ १० ॥

तस्य पुनराधित्सितस्याग्नेर्दर्भैरेवोद्धरणं कार्यमिति¶ विधत्ते—"तं वा इति। आधानवत् पुनराधानेऽपि दारुभिरुद्धरणे दोषमाह—"दारुभिः पूर्वं मिति ‖। उभयोरैकरूप्ये जामितादोषः स्यात्। तथा 'समदं' दारुविषयं परस्परं तयोः कलहमपि जनयेदित्यर्थः। विहितं दर्भैरुद्धरणं प्रशंसति—'आप इति। दर्भाणां मध्विकारत्वं प्रथमकाण्डे प्रतिपादितम्—"ता उपर्य्युपर्य्यतिपुप्लुविरेऽत इमे दर्भाः"—इति ** ॥ ११ ॥

व्रीहियवमययोरपूपयोरर्कपर्णेध्यसङ्घृहोतयोर्गार्हपत्याहवनीययतनयोर्निधानं विधत्ते—"अर्कपलाशाभ्या मित्यादिना। अतएवोक्तं कात्यायनेन—"वर्षासु मध्यन्दिने वा कुर्यैराधानं

---

* नास्त्येतत् पदं च-पुस्तकादन्यत्र।

† 'पुरुषरूपस्य'—इति च।

‡ 'प्रद्यौति—इति च।

§ अदा० प० १४ धा०। हरिस्वामिमते तु कण्ड्वादेरियङ्गुग्भ्रज्जधातोर्मेवेदं रूपम्; अतएवेह 'इयस्यते = अवसीदति'—इति आख्यातं तेन। १ भा० ६१० पृ० ५ पं० "इयमितं" द्रष्टव्यम्, द्रष्टव्यश्चेहापि पुरस्तात् द्वितीयकाण्डाम् (८४पृ०) 'इयसा'-पदव्याख्यानम्।

¶ का० श्रौ० सू० ४. ११. ७।

‖ का० श्रौ० सू० ४. ६, १०; "नेर्भ्रेन"—इति च तत्र ४. ६. ११।

** १ भा० ६०, ६५ पृ० (१ प्र० ३ ब्रा० ५ क०) द्रष्टव्यम्।

व्रीह्यपूप मर्कपलाशयोः पक्वं गार्हपत्यस्य स्थाने निदधात्येव माहवनीयस्य याव मिति * ॥

अपूपनिधानस्य प्रयोजन माह — "पूर्वाभ्या मिति। पूर्व माहितौ यौ गार्हपत्याहवनीयौ ताभ्या मित्यर्थः। तदेतन्निषेधति— "तदु तथेति। "रात्रिभिर्ह्येवेति। अनुगतयोः रात्रिभिरेव व्यवधानात् नापूपव्यवधानेन प्रयोजन मित्यर्थः ॥ १२, १३ ॥

'आग्नेय मेवेति। यदाग्न्याधेयपवमानेष्टिकार्यम् †, तदाग्नेय एवकपालः करोतीति न पृथक्तया कर्त्तव्या इत्येवकारार्थः ॥ १४ ॥

"सर्वं आग्नेयो भवतीति। अस्यां पञ्चकपालेष्टौ आज्यभागादिः सर्वोऽपि यागोऽग्निदेवत्यः कार्य इत्यर्थः ‡ ॥ १५ ॥

"तेनोपांशु चरन्तीति § । विहित मुपांशुत्व मुपपादयति— "ज्ञातये वेति। 'यद्' हुतं 'निष्केवल्यम्' इतरेभ्यो निष्कृष्य केवलम्, तदेकभागं 'चिकीर्षति' कर्त्तुं मिच्छति, 'एतेन' 'तिर इव' 'बोभवद्' भवति, तिरोहितं परोक्ष मेव तत् प्रदीयत इत्यर्थः। "यद्वै तिर इवेति। 'यत्' खलु तिरोहितवत् 'उपांशु' भवति, उपांशूच्चार्यमाणस्यापि परश्रोत्रग्राह्यत्वाभावेन तिरोहितत्वादित्यर्थः ॥ १६ ॥

"उच्चैरुत्तम मनुयाजं करोतीति ¶। यावत् 'उत्तमः'

---

* का० श्रौ० सू० ४. ११. ६–८। "सद्यश्चेत्"—इति सूत्रशेषः। 'चेद्यदि सद्योऽस्य उत्सृष्टास्तदायं विशेषः'— इति तट्टीकायां या० दे०।

† 'यदग्न्याधेये पवमानादि कार्यम्'— इति ग०।

‡ का० श्रौ० सू० ४. ११. ६ क।

§ का० श्रौ० सू० ४. ११. ६ ख। ¶ का० श्रौ० सू० ४. ११. ६ ग।

तृतीयः अनुयाजः, तावत्पर्यन्त मुपांशुस्वरः, तत ऊर्ध्व मुच्चै-रेव मत्र प्रयोग इत्यर्थः *। तत्र कारण माह— "कृतकर्मे-वेति ॥ १७ ॥

प्रयाजादिषु सर्वाग्नेयकरणं प्रतिपादयति— "स आग्नाव्ये-त्यादिना। प्रथमप्रयाजे यत् "समिधो यज"—इति प्राकृतं वचनम् †, 'तत् आग्नेयं रूपम्'; समिन्धनप्रत्यभिज्ञानात्; किन्तु तत् 'परोक्षम्'। अतः समिध इत्येतस्य स्थाने "अग्नीन् यज"—'इत्येव' 'ब्रूयात्' ॥ १८ ॥

प्रयाजयाज्यास्वपि क्रमेणाग्निविभक्तिं योजयति ‡— "स यजतीति। प्रकृतिषु याज्यासु आज्यशब्दात् पूर्वं यथाक्रमम् 'अग्ने', 'अग्निम्', 'अग्निना', 'अग्नि:'— एताश्चतस्रो विभक्ती: विहिताः §; एताभिर्यजेदित्यर्थः ¶ ॥ १९ ॥

पञ्चमप्रयाजानुयाजयो ‖ विशेष माह— "अथ स्वाहेति। प्रकृतिवत् प्रथमाज्यभागदेवतां सङ्कीर्त्य द्वितीयाज्यभागदेवतायाः सोमस्य स्थाने अग्निः पवमानोऽग्निरिन्दुमान् वा अध्वर्युप्रयो-गानुसारेण विकल्पेन निर्देष्टव्य इत्यर्थः। स्वाहा देवानाज्य-

---

* यावदित्यादीनां स्थाने "उत्तमं तृतीयम्"—इत्येतन्मात्र मेव च-पुस्तके।

† 'बन्धनम्'— इति च।

‡ '०विभक्तियोजनं प्रतिपादयति'— इति च।

§ का० श्रौ० सू० ४. ११. ११, १२।

¶ अत्र मूले यद् बौभगित्यसकृदाम्नातम्, तस्य व्याख्यान मिह नाकारि भाष्यकारेण कथ मिति चिन्तनीय मेव; पूर्वन्तु बौगित्यस्य व्याख्यानं कृत मेवेति तद् द्रष्टव्यम् (१भा० ४६० पृ० ३पं०)।

‖ 'पञ्चमप्रयाजानुयाज्यायां'— इति च।

पानिति * प्रयाजदेवतानिर्देशेऽपि "स्वाहाग्नीनाज्यपान्"-इति प्रयोक्तव्यम् ॥ २० ॥

"अथाहाग्नय इति। प्रथमाज्यभागस्य "अग्निं स्तोमेन बोधय"-इति † बुधिधातुयुक्ता मनुवाक्यां दर्शयित्वा तस्याः पुनराधेयानुकल्प माह— "स्रपितीवेति। 'समुद्दीर्यते' समुद्गमयतीत्यर्थः ॥ २१ ॥

द्वितीयाज्यभागस्य प्रागुक्तपक्षद्वयेऽपि ‡ याज्यानुवाक्ये दर्शयति— "अथ यदीत्यादिना। निगदसिद्धोऽर्थः ॥ २२ ॥

"अथ यद्यग्नय इति। "एव मु सर्व मिति। उक्तरीत्या प्रयाजाना माज्यभागयोश्चाग्निसम्बन्धकरणात् तत् सर्व माग्नेयं भवतीत्यर्थः ॥ २३ ॥

आधानस्विष्टकृतोस्त्वग्निसम्बन्ध § इति दर्शयति— "अथाहाग्नय इति। प्रथमप्रयाजवत् प्रथमानुयाजेऽपि "देवान् यज"-इत्यस्य स्थाने "अग्नीन् यज"-इत्यग्निविभक्तिः कार्या ¶ ॥ २४ ॥

तथा द्वितीयेऽप्यनुयाजे "अग्नाउ"-इति विभक्तिः प्रयोक्तव्येति प्रतिपादयति— "स यजतीत्यादिना। "स्वय माग्नेय इति। 'तृतीयः' त्वनुयाजः 'स्वय माग्नेयः' स्वय मेवाग्निशब्दवानिति न पृथक् तत्राग्निविभक्तिः प्रक्षेप्तव्येत्यर्थः ॥ २५ ॥

एवं प्रयाजानुयाजेषु प्रक्षिप्ताः सम्भूयानूद्य प्रशंसति— "ता वा इति ॥ २६ ॥

---

* 'देवां आज्यपानिति'— इति च। † ऋ० सं० ५. १४. १।

‡ 'प्रागुक्तपक्षदार्ढ्याय'— इति च।

§ 'अधुना स्विष्टकृतोऽप्यग्निसम्बन्ध'—इति च।

¶ का० श्रौ० सू० ४. ११. ११।

तासां विभक्तीना मक्षरसङ्ज्ञा मुपजीव्य प्रशंसति — "द्वादश वेति। 'अनाड'–इत्यत्रान्तिमाक्षरत्यागे सति द्वावशाक्षराणि भवन्ति, तेन सह त्रयोदश भवन्तीत्यर्थः। "न ह्वे चनेति। चनशब्दोऽप्यर्थः *। 'ह्वे' अपि वक्ष्यमाणे 'न' 'सह' प्रयुञ्जीत, किमर्थम्? 'अजामितायै' जामितादोषराहित्याय। व्यतिरेकं तत्सद्भाव माह — "जामि ह्वेति। के पुनस्ते ह्वे? इति, ते विभज्य दर्शयति — "व्यन्तु वेत्यित्यादिना ॥ २७ ॥

पुनराधेयस्य दक्षिणां विधत्ते — "तस्येति। "स हि वहेनेति। 'सः' खलु अनड्वान् 'वहेन' स्कन्धेन अग्निसम्बन्धो भवति †। तस्योपपातम्— "अग्निदग्ध मिवेति ‡। अनड्वहश्च साम्य माह— "देवाना मिति। अतो वहनं स्यात्। पुनराधीयमानस्याग्नेः 'अनड्वान् दक्षिणा' § उत्कृष्टतरा इत्यर्थः ॥ २८ ॥ १ [२. ३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥

---

* "असाकल्ये तु चिच्चन"— इति अम० को० ३. ४. ३।

†, ‡ पूर्वस्मिन् काण्डे १प्र० २ब्रा० ६ कण्डीम्, तद् व्याख्यानञ्च पश्यतु

§ का० औ० सू० ३. ११. १३।

(अथ चतुर्थं ब्राह्मणम्.)

प्रजापतिर्ह वा ऽइद मग्र ऽएक एवास। स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत सोऽग्नि मेव मुखाज्जनयाञ्चक्रे तद्यदेनं मुखाद्-जनयत तस्मादन्नादोऽग्निः स यो हैव मेत मग्नि मन्नादं व्वेदान्नादो हैव भवति ॥ १ ॥

तद्वा ऽएन मेतद्ग्रे देवाना मजनयत। तस्मा-दग्निरग्रिर्ह वै नामैतद्यदग्निरिति स जातः पूर्व्वः प्रेयाय यो वै पूर्व्व एत्यग्र ऽएतीति वै त माहुः सो ऽएवास्याग्निता ॥ २ ॥

स ऐक्षत प्रजापतिः। अन्नादं वा ऽइम मात्म-नोऽजीजने यदग्निं न वा ऽइह मदन्यदन्न मस्ति यं वा ऽअयं नाद्यादिति काल्वालीकृता हैव तर्हि पृथिव्यास्न नौषधय आसुर्न व्वनस्पतयस्तदेवास्य मनस्यास ॥ ३ ॥

अथैन मग्निर्व्याप्तेनोपपर्य्यावर्त्त। तस्य भीतस्य स्वो महिमापचक्राम व्वाग्वा ऽअस्य स्वो महिमा व्वागस्यापचक्राम स आत्मन्येवाहुति* मीषे स उदसृष्ट

* 'आत्मन्नेवाहुति'— इति घ, ङ।

तद्यदुदमृष्ट तस्मादिदं चालोमक मिदं च तत्र व्विवेद घृताहुतिं वैव पयआहुतिं वोभयꣳ ह त्वेव तत्पय एव * ॥ ४ ॥

सा हैनं नाभिराधयाञ्चकार । केशमिश्चेव हास तां वौच्चद्दोषं धयेति तत ओषधयः समभवंस्तस्मादोषधयो नाम स द्वितीय मुदमृष्ट तत्रापरा माहुतिं विवेद घृताहुतिं वैव पयआहुतिं वोभयꣳ ह त्वेव तत्पय एव † ॥ ५ ॥

सा हैन मभिराधयाञ्चकार । स व्यचिकित्सज्जुहवानी३ मा हौषा३ मिति तꣳ स्वो महिमाभ्यवाद जुहुधीति स प्रजापतिर्व्विदाञ्चकार स्वो वै मा महिमाहेति स स्वाहेत्येवाजुहोत् तस्मादु स्वाहेत्येव हूयते तत एष उदियाय य एष तपति ततोऽयं प्रबभूव योऽयं पवते‡ तत एवाग्निः पराङ् पर्य्यावर्त्त§ ॥ ६ ॥

स हुत्वा प्रजापतिः । प्र चाजायताथ्य तश्चा-

---

*, † 'एव'— इति घ, ङ ।

‡ 'पवते'— इति च इष्टो डा० वेबरेण ।

§ 'पर्य्यावर्त्तत'— इति ग ।

ग्नेर्मृत्योरात्मान मत्रायत स यो हैवं विद्वानग्नि-
होत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यः प्रजा-
पतिः प्राजायतैव मु हैवात्मतोऽग्नेर्मृत्योरात्मानं
त्रायते ॥ ७ ॥

स यत्र म्रियते। यत्रैन मग्नावभ्यादधति
तदेषो*ऽग्नेरधिजायतेऽथास्य शरीर मेवाग्निर्दहति
तद्यथा पितुर्वा मातुर्वा जायतैव मेषोऽग्नेरधिजायते
शग्वद्व वा ऽएष न सम्भवति योऽग्निहोत्रं न
जुहोति तस्माद् वा ऽअग्निहोत्रꣳ होतव्यम् ॥ ८ ॥

तद्वा एतत्। एव व्विचिकित्सायै जन्म यत्
प्रजापतिर्व्यचिकित्सत्स व्विचिकित्सञ्छ्रयस्रधियत यः
प्र चाजायतात्मतश्चाग्नेर्मृत्योरात्मान मत्रायत स
यो हैव मेतद्विचिकित्सायै जन्म व्वेद यद्व किञ्च
व्विचिकित्सति श्रेयसि हैव म्रियते ॥ ९ ॥

स हुत्वा न्यमृष्ट। ततो व्विकङ्कतः समभव-
त्तस्मादेष यज्ञियो यज्ञपात्रीयो ह्यत्तस्तत एते देवानां
वीरा ऽजायन्ताग्नियोंऽयं पवते सुर्य्यः स यो हैव

---

* 'तदेषो'— इति च दृष्टौ डा०-वेबरेण।

मेतान् देवानां वीरान् वेदाहास्य व्वीरो जायते ॥ १० ॥

त ऽउ हैत ऽऊचुः । व्वयं वै प्रजापतिं पितर मनु स्मो हन्त व्वयं तत् सृजामहै यदस्मानन्वसदिति ते परिश्रित्य गायत्रेणापहिङ्कारेण तुष्टुविरे तद्यत्पर्य्यश्रयन्त्स समुद्रोऽथेय मेव पृथिव्या स्राव: * ॥ ११ ॥

ते स्तुत्वा प्राञ्च उच्चक्रमुः । पुनरेम इति देवा एङ्गाए सम्भूताए सा हैनानुदीच्य हिङ्चकार ते देवा व्विदाञ्चक्रुरेष सामो हिङ्कार इत्यपहिङ्कारए हैव पुरा ततः सामास स एष गवि सामो हिङ्कारस्तस्मादेषोपजीवनीयोपजीवनीयो ह वै† भवति य एव मेतं गवि सामो हिङ्कारं वेद ॥ १२ ॥

ते होचुः । भद्रं वा ऽइद मजीजनामहि ये गा मजीजनामहि यज्ञो ह्येवेयं नो ह्यृते गोर्यज्ञस्तायतेऽन्नए ह्येवेयं यद्वि किञ्चान्नं गौरेव तदिति ॥ १३ ॥

---

७ 'पृथिव्यास्राव:'— इति घ, ङ।

† 'ह्येव'— इति ग।

तद्वा ऽएतदेवैतासां नाम। एतद्यज्ञस्य तस्मादेतत्परिहरेत्साधु पुण्य मिति ब्रह्मणो ह वा अस्यैता भवन्त्युपनामुक एनं यज्ञो भवति य एवं विद्वानेतत्परिहरति साधु पुण्य मिति ॥ १४ ॥

ता मु हाग्निरभिदध्यौ। मिथुन्यनया स्या मिति ताꣳ सम्बभूव तस्याꣳ रेतः प्रासिञ्चत्तत्प्रयोऽभवत्तस्मादेतदामायां गवि सस्याꣳ शृत मग्नेर्हि रेतस्तस्माद्यदि कृष्णायां यदि रोहिण्याꣳ शुक्र मेव भवत्यग्निसङ्काश मग्नेर्हि रेतस्तस्मात् प्रथमदुग्ध मुष्णं भवत्यग्नेर्हि रेतः ॥ १५ ॥

ते होचुः। हन्तेदं जुहवामहा ऽइति कस्मै न इदं प्रथमाय होष्यन्तीति मह्य मिति हैवाग्निरुवाच मह्य मिति योऽयं पवते मह्य मिति सूर्य्यस्ते न सम्पादयाञ्चक्रुस्ते हासम्पाद्योचुः प्रजापति मेव पितरं प्रत्ययाम स यस्मै न इदं प्रथमाय होतव्य वक्ष्यति तस्मै न इदं प्रथमाय होष्यन्तीति ते प्रजापतिं पितरं प्रतीत्योचुः कस्मै न इदं प्रथमाय होष्यन्तीति ॥ १६ ॥

स होवाच। अग्नयेऽग्निरनुष्ठा। स्वꣳ रेतः

	Rs.	A.	P.
Padumawati, Fasc. 1–4 @ 2/		8	0
Paricişţa Parvan, (Text) Fasc. 1–5 @ /4/ each...		1	14
Prāk ta-Paingalam, Fasc. 1–7 @ / / each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ / / each		1	14
Ditto (English) Part II, Fasc. 1			12
Prāk ta Lakşaṇam, (Text) Fasc. 1		1	8
Parācara Smriti, (Text) Vol. I, Fasc. 1–8 Vol. II, Fasc. 1–6 ; Vol. III, Fasc. 1–6 @ / / each		7	8
Parācara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10 ; II, 1–6 ; III, 1–7 ; IV, 1–6 ; V, 1-8 @ / / each Fasc....		12	6
Sānkhya Sūtra V tti, (Text) Fasc. 1-4 @ / /		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Sraddha Kriya Kaumudi, Fasc. 1-6		2	4
Sucruta Saṁhitā, (Eng.) Fasc. 1 @ /12/		0	12
Suddhi Kaumudi, Fasc. 1 3		1	2
*Taittereya Saṁhitā, (Text) Fasc. 22-45 @ / / each		9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ / / each		7	2
Tantra Vartika (English) Fasc. 1-4 @ /12/		3	0
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1 9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ / / each		14	4
Tattvarthadhigama Sutrom, Fasc. 1-3		1	2
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ / /		1	2
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1 8 @ / / each ...		3	0
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Vallala Carita, Fasc. 1		0	6
Varsa K yā Kaumudi, Fasc. 1-6@ / /		2	4
*Vāyu Puṛāṇa, (Text) Vol. I, Fasc. 2-6 ; Vol. II, Fasc. 1-7 , @ / / each		4	8
Vidhano Parigata, Fasc. 1-7		2	10
Vivādaratnākara, (Text) Fasc. 1-7 @ / / each		2	10
Vrhat Sayambhū Purāṇa, Fasc. 1-6		2	4

Tibetan Series.

Pag-Sam Jhi Śiñ, Fasc. 1-4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6 @ 1/ each		14	0
Rtogs brjod dpag bkhari Śiñ (Tib. & Sans.) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ / / each		4	14
Al-Muquaddasi (English) Vol. I, Fasc. 1-3 @ /12/		2	4
Ain-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each		37	0
Ditto (English) Vol. I, Fasc. 1-8 ; Vol. II, Fasc. @ 1/ each ...		9	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ / / each		7	2
Catalogue of Arabic Books and Manuscripts 1-2		2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Ţūsī, or, Ţūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1 9 @ / / each		3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ / / each		1	8
Haft Āsmān, History of the Persian Masnawi. (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ / / each		1	2
Isābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Masīr-ul-Umarā, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1 9 ; Vol. III, Fasc. 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 ; @ /6/ each		13	2
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each		1	14

The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /1/ each ...	Rs	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /1/ each		7	2
Ma'āṣir-i-Ā'lamgīrī, (Text) Fasc. 1-6 @ /1/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each ...		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1-5 @ /1/ each		1	14
Ditto Ditto (English) Fasc. 1-5		3	12
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /1/ each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /1/ each ...		2	10
Tārīkh-i-Fīrūshāhi, of Shams-i-Sirāj Alif. (Text) Fasc. 1-5 @ /1/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Tuzuk-i-Jahāngīrī, (English) Fasc. 1		0	12
Wis o Rāmin, (Text) Fasc. 1-5 @ /1/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /1/ each ...		6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each	20	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /1/ per No. ; and from 1870 to date @ /2/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.			
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N. S., Vol. 1, No. 1, 1905, @ 1-8 per No. to members and Rs. 2/ per No. to Non-members.		
5.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
6.	Anīs-ul-Musharrahīn	3	0
7.	Catatogue of Fossil Vertebrata	3	0
8.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each ...	32	0
10.	Jawāmlu-l-'ilm ir-riyāẓī, 108 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III, with 8 colored plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar ,, ,, ...	8	0
17.	Kacmīracabdām ta, parts I and II @ 1/8/	3	0
18.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
19.	Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each		29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

7-9-'05.

BOOKS ARE SUPPLIED BY V.-P.-P.

BIBLIOTHECA INDICA:

A

Collection of Oriental Works

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1132.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE CATAPATHA BRÂHMANA
OF THE WHITE YAJURVEDA,
WITH THE
COMMENTARY OF SÂYANA ÂCÂRYA.

EDITED BY

ÂCÂRYA SATYAVRATA SÂMAS'RAMÎ.

VOL. II, FASCICULUS II.

CALCUTTA:
PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS.
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1905.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs. 1	8
Advaitachinta Kaustubhe, Fasc. 1-2	0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /8/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-5 @ /8/	7	8
Aphorisms of Sāṇdilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...	2	4
Acvavaidyaka, (Text) Fasc. 1-5 @ /8/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2-5; Vol. II. Fasc. 1-5 @ 1/ each	9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1-2	0	12
Baudhayana Srauta Sutra, Fasc. 1-3 @ /5/ each	1	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5	1	14
Bṛhaddēvatā, (Text) Fasc. 1-4 @ /8/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /3/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-3	1	2
Catadusani, Fasc. 1-2	0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Catapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-3, Vol III Fasc 1-7, ...	6	6
Catasahasrika-prajñāpāramitā, (Text) Part I, Fasc. 1-10 @ /6/ each ...	3	12
*Caturvarga Chintāmani, (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18 Part II, Fasc. 1-10 @ /6/ each; Vol. IV, Fasc. 1-4	21	6
Clokavartika, (English) Fasc. 1-5	3	12
*Crauta Sūtra of Āpastamba, (Text) Fasc. 6-17 @ /6/ each ...	4	8
Ditto Cānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /6/ each; Vol 4, Fasc. 1	6	0
Cri Bhāshyam, (Text) Fasc. 1-3 @ /5/ each	1	2
Dan Kriya Kaumundi, Fasc. 1-2	0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7	2	10
Ditto Ācārasāra, Vol II, Fasc. 1.	0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each	1	8
Kāla Viveka, (Text) Fasc. 1-6	2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyota, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-3, @ /6/ each	9	0
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ /1/ each	1	2
Mārkaṇdeya Purāṇa, (English) Fasc. 1-9 @ /12/ each	6	12
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-19 @ /6/ each	4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /8/	2	4
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /6/ each	3	9
Nityacarapaddhati Fasc. 1-7 (Text) @ /3/	2	10
Nityacarapradiph, Fasc. 1-6	2	4
Nyāyabinduṭīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6, Vol. II, Fasc. 1-3 @ /1/ each	3	6

प्रजनयिष्यते तथा प्रजनिष्यध्व ऽइत्यथ तुभ्य मिति सूर्य्य मथ यदेव ह्रूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवत ऽइति तदेभ्य इद मप्येतर्हि तथैव जुह्वत्य-ग्नय ऽएव सायꣳ सूर्य्याय प्रातरथ यदेव ह्रूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवते ॥ १७ ॥

ते हुत्वा देवाः । इमां प्रजातिं प्राजायन्त येषा मियं प्रजातिरिमां विजितिं व्यजयन्त येषु मेषां विजितिरिम मेव लोक मग्निरजयदन्तरिक्षं वायु-र्दिव मेव सूर्यः स यो हैवं विद्वानग्निहोत्रं जुहोत्ये-ताꣳ हैव प्रजातिं प्रजायते या मेत ऽएतत् प्राजा-यन्तैतां विजितिं विजयते या मेत ऽएतद्व्युजयन्तैतैरु हैव सलोको भवति य एवं विद्वानग्निहोत्रं जुहोति तस्माद् वा ऽअग्निहोत्रꣳ होतव्यम् ॥ १८ ॥ २ ॥

॥ इति द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् [२.४.] ॥

एव माधानपुनराधाने विधाय तन्निष्पन्नाना मग्नीनां फलवत्कर्मार्थत्वात् तत्साध्यं सायम्प्रातरनुष्ठेय मग्निहोत्राख्यं * कर्म विधित्सुस्तदर्थ माख्यायिका माह—"प्रजापतिर्ह वा इत्यादिना ॥ १ ॥

* 'तत्साधनचतुष्टय मग्निहोत्राख्यं'—इति च ।

"तद्वा इति। अग्रे जातत्वात् अग्निः; स एवाग्निरिति पारोक्ष्येणोच्यत इति नामनिर्वचनं कृत्वा प्रकारान्तरेणापि निर्ब्रूयात्। "स जात इति। 'अग्रे' 'एति' गच्छतीति अग्निः। 'अस्य' अग्नेः साधिका 'अग्नित्वा' इत्यर्थः ॥ २ ॥

एवं साय मग्निहोत्रदेवताया अग्नेरुत्पत्ति मभिधाय, होम इत्यस्योत्पत्तिं प्रतिपादयति – "स ऐच्छतेत्यादिना। "अजीजन इति। अजनय मित्यर्थः। मया सृष्टोऽग्निरियन्नादः, तस्य चाग्नेर्न भवितव्यम्। न च मत्तोऽन्यदत्र मिह विद्यते, यदत्र मसावद्यादित्यर्थः। ननु भूम्या मोषधयो विद्यन्ते, तदेव तस्यान्नं भविष्यतीत्यत आह – "काल्वालीकृतेति *। 'तर्हि' तस्मिन् समये, यदहन्येव पृथिवी बभूव, तत ओषधिवनस्पतयः। एवं सति 'तत्' वक्ष्यमाण मन्नम् 'एव' 'अस्य' प्रजापतेः 'मनसि' बभूव ॥ ३ ॥

"अथेन मिति। 'अथ' अस्मिन्नवसरे 'अग्निः' 'एनम्' 'व्यात्तेन' प्रजापतिविवृतेन † मुखेन भक्षयितुं पर्यावृत्तो बभूव। तस्माद् 'भीतस्य' प्रजापतेः। "सो महिमेत्यादि, स्पष्टम्। "स आत्मन्येवेति। 'सः' प्रजापतिः 'आत्मनि' स्वशरीरे 'एव' आहुतिद्रव्यं सम्पादयितु मिच्छां कृतवान्। कृत्वा च 'सः' 'उदमृष्ट' हस्ताभ्यां स्वाङ्गस्योन्मार्जनं कृतवान्। (यस्मादेवं ‡) तस्मादेव कारणात् 'इदञ्च इदञ्च' उभय मपि पाणितलम् 'अलो-

---

* "अपनीतवालाः काल्वालाः" – इत्यादि हरिस्वामी। तदेवं खल्वालाः खल्वाटाः काल्वाला इति समानार्थाः।

† 'व्यात्तेन=विवृतेन'—इति च।

‡ नास्त्येतत् पदद्वयं च-पुस्तके।

मक्षं' रोमरहितं दृश्यते । उन्मार्जनेन 'तत्राहुतिं' 'विवेद' लेभे । तां विशिनष्टि — "घृताहुति मिति । "उभयं हेति । यदेतत् षष्ठीघृतसाध्य माहुतिद्वयम् 'तत् उभयम्' अपि 'पय एव'; घृतस्य पयोविकारत्वादित्यर्थः ॥ ४ ॥

"सा हैन मित्यादि । 'नाभिराधयाञ्चकार' अभिराद्धं तर्पं न चकारेत्यर्थः । तत्र दृष्टान्तः—"वेश्म मिवेति । कीटादि-दूषिता आहुतिर्न तर्पयेत्, प्रत्युत बीभत्सा मेव जनयति । एवं प्रजापतिशरीरजं द्रव्य माहुतियोग्यं नासीदित्यर्थः । 'तां' चाहुतिं तस्मिन्नग्नौ 'व्यौच्चत्' अत्यजत् । इदं माहुतिद्रव्यम् 'ओषं' पक्वं कृत्वा 'धय' पिब 'इति' । एवं मग्नौ प्रक्षिप्तात् तस्मात् 'ओषधयः' पृथिव्यां समभवन् । एव मोषधिरूपस्य हव्यस्योत्पत्तिं सुरुक्का प्रातराहुतिदेवताया सूर्यस्योत्पत्तिं माह — "स द्वितीय मिति । पूर्ववद् योज्यम् ॥ ५ ॥

"सा हैन मित्यादि । "स व्यचिकित्सदिति । अस्यां द्वितीयस्या माहुत्यां स प्रजापतिः विचिकित्सां कृतवान्, — किं मिदं मदङ्गाज्जातं द्रव्यं जुहवानि, किं वा नेति । एवं संशयापन्ने अग्निमयात् प्राङ् निर्गतो वायूयः स्वकीयां 'महिमा' 'अभ्युवाद' अभिलक्ष्योक्तवान्, — 'संशयं मा कार्षीः होमं कुरु' इति । "स्वो वा इति । यस्मात् 'स्वो महिमा आह', तस्मात् सः' प्रजापतिः 'स्वाहेत्येव' 'तत्' द्रव्यम् 'अजुहोत्' । "तत एष इति । तस्मा-द्धोमात् 'एषः' सूर्यः उदितः, उत्पन्नो बभूव । पवमानो वायुरपि तत एवोत्पन्नः । एव मनयोरुत्पन्नयोः सतोः रः 'अग्निः' अपि *)

---

*) नास्येतत् पदं च पुस्तके ।

प्रजापतिसकाशात् भक्षणात् उपरतः पराङ्मुखः पर्याहुत्तो बभूवेत्यर्थः ॥ ६ ॥

"स हुत्वेत्यादि। यस्मादेवं प्रजापतिराहुत्या सूर्यादिलक्षणां प्रजा मुत्पादयत् 'अक्षयतः' भक्षणं करिष्यतः 'अग्नेः' 'आत्मानम्' 'अत्रायत'। तस्माद् विदुषोऽप्येवं भवतीत्याह—"स य इति ॥ ७

"स यत्र म्रियत इति। अग्निहोत्रहोमं कुर्वन्, देहावसाने 'अग्नौ' प्रक्षिप्तः मातापितृशरीरादिवत् तस्मादग्नेः सकाशात् दिव्यशरीरोऽभिनव उत्पद्यते। यस्त्वग्निहोत्रं न जुहोति, स त्वेवं नोत्पद्यत इत्यर्थः ॥ ८ ॥

"तद्धा एतदित्यादि। विचिकित्सापुरस्सर माहुत्यनुष्ठानेन प्रजापतेः श्रेयःप्राप्तिर्जाता, 'एवच्चिद्' इदानीन्तनोऽपि यजमानो विमर्शपूर्वकानुष्ठानेन श्रेयः प्राप्नोतीत्यर्थः ॥ ९ ॥

अग्निहोत्रहवणी स्रुक् विकङ्कतवृक्षेण निर्मातव्येत्यभिप्रेत्य * तस्योत्पत्तिं माह — "स हुत्वेति। प्रागुक्तमग्निवायुसूर्याणां जन्म अनूद्य, तद्देवनफलं माह — "तत एत इति। 'देवानां' मध्ये 'वीराः' प्रबला इत्यर्थः ॥ १० ॥

अथ होमद्रव्यस्य पयस उत्पत्तिं वक्तुं प्रथमतो गौरुत्पत्तिं माह — "त उ हेति। यथास्मदीयः पिता प्रजापतिः अस्मान् सृष्टवान् 'वयं' तम् 'अनु' 'स्मः' भवामः। 'यत्' यत्र 'अस्मान्' 'अनु' अनन्तरम् 'अमद्' भवेत्, जायेत, 'तद् वयं सृजामहै'। एवं प्रतिज्ञाय गां संसृजन्तः हिङ्कारवर्जितेन गायत्रसाम्ना बहिष्पव-

---

* १ भा० १० पृ० २२ क०, ५६ पृ० १ टीप्पनी च द्रष्टव्या। ततः का० श्रौ० ४. १४. ७ सू० द्रष्टव्यम्।

† 'वक्ष्यन्' – इति च।

मानेन 'तुष्टुविरे' स्तुवन्तः। 'तस्य' स्तोत्रदेशस्य 'यत्' परिश्रयणं 'स समुद्रः' अभवत्। यश्च 'स्तावः' स्तोत्रदेशः, सा 'पृथिवी' जातेत्यर्थः ॥ ११ ॥

["ते सुत्वेति।] "पुनरेम इति। पुनरागच्छाम इति। स्तोत्रदेशात् प्रागुत्क्रम्य * तस्मात् स्तोत्रात् 'सम्भृतां' 'गां' 'ते' 'देवाः' प्राप्नुवन्नित्यर्थः। "सा हैनानित्यादि। निगदसिद्धम् ॥ १२ ॥

"ते होचुरित्यादि। 'भद्रम्' उत्कृष्टं खलु 'इदम्' 'अजीजनामहि' अजनयाम। तदेतद् भद्रत्व माह— "यज्ञो हीति। यस्माद् गोर्व्यतिरेके सा शरद्दृतादिहविषोऽभावात् यज्ञो न विस्तीर्यते, तत इयं गौः यज्ञात्मिका। अन्नरूपत्वेनापि स्तौति — "अन्नं हीति ॥ १३ ॥

तासां गवां यज्ञस्य च साधारण मेकं नामोपदिश्य प्रशंसति- "तद्वा इति। गां यज्ञं च एतदुभय मुत्कृष्टं पुण्यरूप मिति अनेनाभिप्रायेण 'परिहरेत्' रक्षेत्। तस्य परिहरणस्य फल माह — "बह्वो हेति। 'उपनामुकाः' उपनमनशीलाः, यज्ञ एव मुपगतो भवतीत्यर्थः ॥ १४ ॥

पयस उत्पत्ति माह — "ता मु हेति। 'अभिदध्यौ' अभिध्यानं कृतवान्। कथ मिति — 'एतया' गवा 'मिथुनौ' भवानीति। "तां सम्बभूवेत्यादि, स्पष्टम् ॥ १५ ॥

एवं पयोरूपस्य हविष उत्पत्ति मभिधाय, अग्निसूर्यवायूनां मध्ये कस्मै प्रथमं देयं कस्मै चानन्तर मित्येतद् विभजति — "ते होचुरिति। 'ते' देवाः 'ऊचुः' अस्मदीयः पिता प्रजापतिः यथा अजुहोत्, एव मिदं वयं 'जुहवामहै'। किञ्चैमे यजमानाः 'नः'

* 'प्रागुक्तात्' इति ङ।

अस्माकं मध्ये 'कस्मै' 'प्रथमाय' 'होष्यन्ति ?' 'इति' उक्तवन्तः। "मह्य मित्यादि, निगदसिद्धम्। "तेन सम्पादयाञ्चक्रुरिति। 'ते' देवाः परस्परं सम्पन्नाः ऐकमत्यं गता न बभूवुरित्यर्थः ॥ १६

"स होवाचेति। "अग्निरनुष्ठेति। एवं विवदमानेषु आगतेषु स प्रजापतिरेव मुक्तवान्—'अग्नेः प्रथमं होतव्यम्'। 'अग्निर्हि' 'अनुष्ठा' अनुष्ठानेन प्रयत्नेन स्वकीयं 'रेतः' गवि पयोरूपेण निवर्त्तयन् * ; 'तथा' यूयमपि। तस्मादग्नेरनन्तर मेव 'प्रजनिष्यध्वे' प्रजाता भवथ। तस्मादग्नय एव प्रथमं होतव्य मित्युक्त्वा, प्रजापतिः 'अथ' अनन्तरं 'तुभ्यं' होतव्यम् 'इति' 'सूर्यम्' प्रति उक्तवान्। ह्रियमाणस्य च पयसः 'यद्' 'व्यशुते' विशुङ्ग मार्प्नोति †, स एव वायोर्भाग इति वायुं प्रत्यब्रवीत्। "तदेभ्य इत्यादि। यस्मादेवं प्रजापतिनोक्तम्, तस्मादेव कारणात् तत् पय एव ‡ 'अग्नये सायं जुह्वति', 'प्रातः सूर्याय' इति विभागः सम्पन्नः ॥ १७ ॥

* 'निवर्त्तयति'—इति च।

† 'मेति'—इति च।

‡ तदुक्तं कात्यायनेन "क्षीरहोमी"—इति श्रौ० सू० ४. १०. १६। 'वाग्यतो दोहप्रभृत्या होमात् क्षीरहोता चेत्"—इति च तत्रैव ४. १४. ६१ सूत्रम्। दोहप्रकारस्त्वेतत्पूर्वं मेवोपदिष्टः (१ सू०)। "पयसा स्वर्ग-कामः पशुकामो वा, यवाग्वा ग्रामकामः, तण्डुलैर्बलकामः, दर्भैरिन्द्रियकामः, अधिश्रयणं च श्रुतिसामर्थ्याभ्याम्, घृतेन तेजस्कामः, संवत्सरं जुहुयादेतेषा मेकैकेन कामसंयोगे"—इति च तत्रैव काम्यकर्मसु द्रव्य-विधायक सूत्राणि (४. १५. २१—२७.)।

"ते हुत्वा देवा इति । 'ते' च 'देवाः' एवं 'हुत्वा' प्रजात्यादि फलं प्राप्नुवन् । एतत् ज्ञात्वा इदानीन्तनोऽपि यजमानो 'यः' 'अग्निहोत्रं जुहोति', सः 'एषाम्' अग्निसूर्यादिभिः प्राप्तां प्रजातिम् । इतः क्रममम् ॥

एतावता अग्निहोत्राख्यस्य कर्मणः पथो द्रव्यम्, तच्च सायम्प्रातःकालयोरनुष्ठेयम् * । तत्र सायङ्कालीनस्य अग्निर्देवता † , प्रातःकालीनस्य सूर्यः ‡ , इत्येतत् प्रतिपादितं भवति ॥ १८ ॥ ३ [२. ४.] ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरीःखिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नोस्रां रुक्मराजिद्विपसहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥

---

* तच्चोक्तम् का० श्रौ० सू० ४. १३. २ द्रष्टव्यम् । काम्यकालविधयस्तु उपरिष्टात् पञ्चमकाण्डी-टीप्पन्यां द्रष्टव्याः ।

† का० श्रौ० सू० ४. १४. १४ ।

‡ का० श्रौ० सू० ४. १५. ६ ।

धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरिमकृत मुदा पात्रसात्सिङ्गणार्यः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

---

* इदमर्धपाठभेदात्तु पुरस्ताद् दृश्यम् ।

[अथ तृतीयाध्याये प्रथमं ब्राह्मणम्.]

सूर्यो ह वा ऽग्निहोत्रम् *। तदुदेतस्या अग्य ऽआहुतेरदैत्तस्मात्सूर्योऽग्निहोत्रम् † ॥ १ ॥

स यत्सायं मस्तमिते जुहोति। य इदं तस्मिन्निह सति जुहवानीत्यथ यत् प्रातरनुदिते जुहोति य इदं तस्मिन्निह सति जुहवानीति तस्माद्वै सूर्यो ऽग्निहोत्र मित्याहुः ॥ २ ॥

अथ यदस्तमेति। तदग्नावेव योनौ गर्भो भूत्वा प्रविशति तं गर्भं भवन्त मिमाः सर्व्वाः प्रजा अनु गर्भा भवन्तीलिता हि शेरे सञ्जानाना अथ यद्व्युत्तिष्ठत एवैतत्करोति तिर इव हि गर्भाः ॥ ३ ॥

स यत्सायं मस्तमिते जुहोति। गर्भ मेवैत् सन्त मभिजुहोति गर्भ ए सन्त मभिकरोति स यद्गर्भ ए सन्त मभिजुहोति तस्मादिमे गर्भा अनश्नन्तो जीवन्ति ॥ ४ ॥

अथ यत् प्रातरनुदिते जुहोति। प्रजनयत्येवैन मेतत्सोऽयं तेजो भूत्वा व्यिभ्राजमान उदेति शप्रवद्व वै

---

* 'चम्'—इति ग, घ। † 'तम्'—इति ग, घ।

नीदियाद्यदस्मिन्नेता माहुतिं न जुहुयात्तस्माद्वा ऽएता माहुतिं जुहोति ॥ ५ ॥

स यथाहिस्त्वचो निर्मुच्येत । एवꣳ रात्रेः पाप्मनो निर्मुच्यते यथा ह वा ऽअहिस्त्वचो निर्मुच्येतैवꣳ सर्व्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति तदेतस्यैवानु प्रजाति मिमाः सर्व्वाः प्रजा अनु प्रजायन्ते वि वा हि सृज्यन्ते यथार्थम् * ॥६॥

स यः पुरादित्यस्यास्तमयात् । आहवनीय मुद्धरत्येते वै विश्वे देवा रश्मयोयोऽथ यत्परं भाः प्रजापतिर्व्वा स इन्द्रो वैतदु ह वै विश्वे देवा अग्निहोत्रं जुह्वतो गृहानागच्छन्ति स यस्यानुहुत मागच्छन्ति तस्माद् देवा अपप्रयन्ति तद्वा ऽअस्मै तद् व्यृध्यते यस्माद् देवा अपप्रयन्ति तस्यानु व्यृद्धिं यश्च वेद यश्च नानुहुत मभ्यस्त मगादित्याहुः ॥ ७ ॥

अथ यः पुरादित्यस्यास्तमयात् । आहवनीय मुद्धरति यथा श्रेयस्यागमिष्यत्यावसथेनोपकृप्तेनोपासीतैवं तत्स यस्योहुत मागच्छन्ति तस्याहवनीयं प्रविशन्ति तस्याहवनीये निविशन्ते ॥ ८ ॥

---

* 'यथार्थ२'—इति क, घ, ङ ।

स यत्सायमस्तमिते जुहोति। अग्नावेवैष्य एतत्प्रविष्टेभ्यो जुहोत्यथ यत्प्रातरनुदिते जुहोत्यमेतेष्य एवैष्य एतज्जुहोति तस्मादुदितहोमिनां ष्विक्किञ्न मग्निहोत्रं मन्यामह ऽइति ह स्माहासुरिर्यथा शून्य मावसथ माहरेदेवं तदिति ॥ ९ ॥

इयं वा ऽइदं जीवनम्। मूलि चैवामूलं च तदुभयं देवानाए सन्मनुष्या उपजीवन्ति पशवो मूला ओषधयो मूलिन्यस्ते पशवो मूला ओषधीर्मूलिनीर्जरध्वापः पीत्वा तत एष रसः सम्भवति ॥ १० ॥

स यत्सायमस्तमिते जुहोति। अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषा मिदए सदुपजीवाम इति स यत्ततो रात्रामश्नाति हुतोक्किष्ट मेव तन्निरवत्तबल्यश्नाति हुतोक्किष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता * ॥ ११ ॥

अथ यत् प्रातरनुदिते जुहोति। अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषा मिदए सदुपजीवाम इति स यत्ततोऽङ्क्ताश्नाति हुतोक्किष्ट मेव तन्निर-

---

* 'ता'—इति घ, ङ।

वत्तवत्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता * ॥ १२ ॥

तदाहुः । स मेवान्ये यज्ञास्तिष्ठन्तेऽग्निहोत्र मेव न सन्तिष्ठतेऽपि द्वादशसंवत्सर मन्तवदेवायैतदेवानन्तꣳ मायꣳ हि हुत्वा व्वेद प्रातर्हीष्यामीति प्रातर्हुत्वा वेद पुनः मायꣳ होष्यामीति तदेतदनुपस्थित मग्निहोत्रं तस्यानुपस्थिति मन्वनुपस्थिता इमाः प्रजाः प्रजायन्तेऽनुपस्थितौ ह वै श्रिया प्रजया प्रजायते य एव मेतदनुपस्थित मग्निहोत्रं व्वेद ॥ १३ ॥

तद्दुग्ध्वाधिश्रयति । शृत मसदिति तदाहुर्यद्धुदन्तं तर्हि जुहुयादिति तद्वै नोदन्तं कुर्यादुप ह दह्येयदुदन्तं कुर्यादप्रजस्त्वं वै रेत उपदग्धं तस्मान्नोदन्तं कुर्यात् ॥ १४ ॥

अधिश्रित्यैव जुहुयात् । यन्वै † वैतदग्ने रेतस्तेन न्वेव शृतं यदेनदग्नावधिश्रयन्ति तेनो ऽएव शृतं तस्मादधिश्रित्यैव जुहुयात् ॥ १५ ॥

तदभ्योतयति । शृतं व्वेदानीत्यथापः प्रत्या-

---

* 'ता'—इति ग, घ ।

† 'यन्वै'—इति क, ग ; ङ०-वैवरेऽपि दृश्यते ।

नयति प्राण्यै न्वेव रसस्यो चैव सर्व्वत्वायेदꣳ हि यदा व्वर्षत्यथौषधयो जायन्त ऽओषधीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति तस्मादु रसस्यो चैव सर्व्वत्वाय तस्माद्यद्येनं क्षीरं केवलं प्रानेऽभ्याभवेदुद स्तोक माश्वोतयितवै ब्रूयाच्छान्त्यै न्वेव रसस्यो चैव सर्व्वत्वाय * ॥ १६ ॥

अथ चतुरुन्नयति । चतुर्ब्बाव्विहितꣳ होदं पयो-ऽथ समिध मादायोदाद्रवति समिद्धोमायैव सोऽनुप-साद्य पूर्व्वा माहुतिं जुहोति स यदुपसाद्येद्यथा यस्मा ऽअशन माहरिष्यन्त्स्यात्तदन्तरा निदध्यादेवं तदथ यदनुपसाद्य यथा यस्मा ऽअशन माहरेत्तस्मा ऽआहृत्यैवोपनिदध्यादेवं तदुपसाद्योत्तर नानाव्वीर्य ऽएवैने ऽएतत् करोति मनश्च ह वै व्वाक् चैते ऽआहुती तन्मनश्चैवैतद्वाचं च व्यावर्तयति तस्मादिदं मनश्च व्वाक् च समान मेव सन्नानेव ॥ १७ ॥

स वै द्विरग्नी जुहोति । द्विरुपमार्ष्टि द्विः प्रा प्राति चतुरुन्नयति तद्दश दशाक्षरा वै व्विराड् विराड्

* 'त्वाय' इति घ, ङ ।

वै यज्ञस्तद्विराज मेवैतद्यज्ञ मभि सम्पादयति ॥ १८ ॥

स यदग्नौ जुहोति । तद्देवेषु जुहोति तस्मा-द्देवाः सन्त्यथ यदुपमार्ष्टि तत्पितृषु चौषधीषु च जुहोति तस्मात्पितरश्चौषधयश्च सन्त्यथ यद्हुत्वा प्राश्नाति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्ति ॥ १९ ॥

या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपराभूतास्ता यज्ञमुख ऽआभजति तेनो ह पशवोऽन्वाभक्ता यन्मनुष्यानु पशवः ॥ २० ॥

तदु होवाच याज्ञवल्क्यः । न वै यज्ञ इव मन्तवै पाकयज्ञ इव वा ऽइतीदꣳ हि यदन्यस्मिन्यज्ञे स्रुच्यव-द्यति सर्व्वं तदग्नौ जुहोत्यथैतदग्नौ हुत्वोल्मृयाचामति निर्लेढि तदस्य पाकयज्ञस्येवेति तदस्य तत्पशव्यꣳ रूपं पशव्यो हि पाकयज्ञः * ॥ २१ ॥

सैषैकाहुतिरेवाग्ये । या मेवामूं प्रजापतिरजुहो-दथ यदेतऽएतत्पश्चेवाधियन्त्यग्निर्योऽयं पवते सूर्य स-स्मादेषा द्वितीयाहुतिर्हूयते ॥ २२ ॥

---

* 'यज्ञः'—इति घ, ङ ।

सा या पूर्व्वाहुतिः। साग्निहोत्रस्य देवता तस्मात्तस्यै जुहोत्यथ योत्तरा स्विष्टकृद्राजन मेव सा तस्मात्ता मुत्तरार्द्धे जुहोत्येषा हि दिक् स्विष्टकृत-स्तन्मिथुनायैवैषा द्वितीयाहुतिर्हूयते दून्द्वं हि मिथुनं प्रजननम् ॥ २३ ॥

तद् इयमेवैते ऽआहुती। भूतं चेव भविष्यच्च जातं च जनिष्यमाणं चागतं चाशाद् चाद्य च श्वश्च तद्इय मेवानु * ॥ २४ ॥

आत्मैव भूतम्। अद्धा हि तद्यद्भूत मद्धो तद्यदात्मा प्रजेव भविष्यदनद्धा हि तद्यद्भविष्यदनद्धो तद्यत् प्रजा † ॥ २५ ॥

आत्मैव जातम्। अद्धा हि तद्यज्जात मद्धो तद्यदात्मा प्रजेव जनिष्यमाण मनद्धा हि तद्यज्जनिष्यमाण मनद्धो तद्यत् प्रजा ‡ ॥ २६ ॥

आत्मैवागतम्। अद्धा हि तद्यदागत मद्धो तद्यदात्मा प्रजैवाशानद्धा हि तद्यदाशानद्धो तद्यत् प्रजा § ॥ २७ ॥

आत्मैवाद्य। अद्धा हि तद्यदद्याद्धो तद्यदात्मा

---

* 'मेवानु'—इति घ, ङ। †, ‡, § 'प्रजा'—इति घ, ङ।

प्रजैव प्रवोऽनड्वा हि तद्यच्छोऽनड्वो तद्यत् प्रजा *॥ २८ ॥

सा या पूर्वाहुतिः। सात्मानमाधे हूयते तां मन्त्रेण जुहोत्यनड्वा हि तद्यन्मन्त्रोऽड्वो तद्यदात्मा-ऽथ योत्तरा सा प्रजा मभि हूयते तां तूष्णीं जुहोत्यनड्वा हि तद्यत्तूष्णी मनड्वो तद्यत् प्रजाः † ॥ २९ ॥

स जुहोति। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्सत्येनैव हूयते यदा ह्येव सूर्याऽस्त मेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो ज्योतिर्यद्वै सत्येन हुयते तद्देवान् गच्छति ॥ ३० ॥

तदु हैतदेवारुणये ब्रह्मवर्चसकामाय तत्तानूवाचाग्निर्व्वर्ची ज्योतिर्व्वर्चः सूर्यो व्वर्ची ज्योतिर्व्वर्च इति ब्रह्मवर्चसी हैव भवति य एवं विद्वानग्निहोत्रं जुहोति ॥ ३१ ॥

तदस्त्येव प्रजननस्येव रूपम्। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तदुभयतो ज्योती रेतो देवतया परिगृह्णात्युभयतः परिगृहीतं वै रेतः

*, †. 'प्रजा'—इति घ, ङ।

प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति ॥ ३२ ॥

अथः प्रातः। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तदुभयतो ज्योति रेतो देवतया परिगृह्णात्युभयतः परिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति तत् प्रजननस्य रूपम् * ॥ ३३ ॥

तदु होवाच जीवलश्चैलकिः। गर्भ मेवारुणिः करोति न प्रजनयतीति स एतेनैव सायं जुहुयात् ॥ ३४ ॥

अथ प्रातः। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति तद् बहिर्द्धा † ज्योती रेतो देवतया करोति बहिर्द्धा ‡ वै रेतः प्रजातं भवति तदेनत् प्रजनयति ॥ ३५ ॥

तदाहुः। अग्नावेवैतत्सायꣳ सूर्यं जुहोति § सूर्ये प्रातरग्नि मिति तद्वै तदुदितहोमिना मेव यदा ह्येव सूर्योऽस्त मेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो ज्योतिर्नाम्ना सा परिचक्षय मेव परिचक्षा यत्तद्वै नाम्ना देवतायै हूयते याग्नि-

---

* 'रूपम्'—इति घ, ङ। †, ‡ 'बहिर्द्धा'—इति घ, ङ।

§ 'जुहोति'—इति घ, ङ।

होत्रस्य देवताग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तत्र नाग्नये स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्र न सूर्याय स्वाहेति ॥ ३६ ॥

अनेनैव जुहुयात् । सजूर्देवेन सवित्रेति तत्सवितृमत्यृसवाय सजू राचेन्द्रवत्येति तद्रात्र्या मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणो ऽग्निर्व्वेतु स्वाहेति तदग्नये प्रत्यक्षं जुहोति ॥ ३७ ॥

अथ प्रातः । सजूर्देवेन सवित्रेति तत्सवितृमत्यृसवाय सजूरुषसेन्द्रवत्येत्यृहेति वा तदह्ना वोषसा * वा मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणः सूर्यो व्वेतु स्वाहेति तत्सूर्याय प्रत्यक्षं जुहोति तस्मादेव मेव जुहुयात् ॥ ३८ ॥

ते होचुः । को न इदꣳ होष्यतीति ब्राह्मण एवेति ब्राह्मणेदं नो जुहुधीति किं मे ततो भविष्यतीत्यग्निहोत्रोच्छिष्ट मेवेति स यत् स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्ट मथ यत् स्थाल्यां यथा परीणहो निर्व्वपेदेवं तत् तस्मात्तद्य एव कश्च विद्वेत्

* 'तदह्ना वोषसा'—इति घ, ङ ।

तद्वै नाब्राह्मणः पिवेदग्नी ह्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिवेत् ॥ ३९ ॥ ३ ॥

॥ इति द्वितीयप्रपाठके तृतीयं ब्राह्मणम् [३.१.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तं महं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

सायम्प्रातर्होमयोः * कालविशेषं विधित्सुरग्निहोत्रम् सूर्यात्मना प्रशंसति— "सूर्यो हेति । तदुपपादयति — "एतस्या इति । प्रजापतिना प्रथमं हुतायां इत्यर्थः ॥ १ ॥

प्रकारान्तरेण सूर्यात्मकतां ब्रुवन् सायम्प्रातर्होमयोः कालविशेषं विधत्ते— "स यदिति । 'यः' यजमानः 'इहं' अग्नौ 'तस्मिन्' सूर्ये 'सति' 'इदं' हविः 'जुहवानि इति' मन्यते, सः साय मग्निहोत्र मस्तमिते † कुर्यात्, प्रातर्होमञ्चानुदिते ‡ । अनुदितो हि सूर्योऽग्निनैकीभूतो वर्त्तते ; "अग्निर्वादित्यः सायम् प्रविशति"-इति § श्रुतेः । यस्मादेवं अग्निहोत्रं सूर्यसम्बद्धम्, तस्मात् तादात्म्येन स्तुतिः ॥ २ ॥

रात्रौ सूर्यस्याग्न्यवस्थानं प्रतिपादयति— "अथ यदिति । सूर्यस्य गर्भभाव मनु गत्वा 'सर्वाः प्रजाः' 'गर्भाः' एव 'भवन्ति' ।

---

* "उद्धरेति यजमानो ब्रूयात् सायम्प्रातयोरग्निहोत्रे"—इति का० श्रौ० सू० ४.१३.१ ।

† "अस्तमिते जुहोति"—इति का० श्रौ० सू० ४.१४.६ ।

‡ "प्रातर्जुहोत्यनुदिते"—इति का० श्रौ० सू० ४.१५.१ ।

§ तै० ब्रा० २.१.३.६ ।

तासां गर्भसाम्य माह—"ईलिता ह्रीति। रात्रौ हि सर्वाः प्रजाः 'सञ्ज्ञानानाः' समान मेकविधं ज्ञानं प्राप्ताः 'ईलिताः' स्तुता हृष्टाः 'शेरते'। "लोपस्त आत्मनेपदेषु"—इति * त-लोपः। पुनरपि गर्भसाम्य माह—"अथ यदिति। गर्भरूपेणाग्नाववस्थितं सूर्यं 'रात्रिः' 'तिर एव' तिरोहित माच्छादितं करोति। यस्मादेवं तस्मात् अमी 'गर्भः' 'तिर इव हि'। लौकिकगर्भस्य प्रसिद्धिर्हि-शब्देनोक्ता ॥ ३ ॥

एवं गर्भरूपत्वं प्रतिपाद्य अस्तमिते होम मुपपादयति—"स यत्साय मिति। "गर्भं सन्त मिति। अस्तमयात् पूर्वं हि सूर्यस्याकाशेऽवस्थानात् गर्भभावो नास्ति, तदूर्ध्वन्तु अग्नौ गर्भरूपेण प्रविशन्तम् 'अभि' होमं कुर्वन् परस्मिन् दिवसे पुनर्जनयितुं वर्धयति। "यद् गर्भ मित्यादि। यस्माद् गर्भभूतस्य सूर्यस्य रात्रावग्निहोत्रहविषा वर्धनम्, तस्मादेवज्ञातीया इतरे गर्भाः 'अनग्नयः' अग्नि मकुर्वन्तोऽपि 'जीवन्ति' वर्धन्ते ॥ ४ ॥

एवं सायं-होमस्य गर्भवृद्धिहेतुना मभिधाय, प्रातर्होमस्य तज्जननहेतुत्व मुपपादयन्, तस्य ततः प्रागेवानुदिते कर्त्तव्यता माह—"अथ यत् प्रातरिति। अन्वयव्यतिरेकाभ्यां प्रातराहुते-र्जननहेतुता मुपपादयति—"सोऽय मिति। "तेजो भूत्वेति। आहुत्या वर्धितंतेजस्वी भूत्वेत्यर्थः। "शश्वद्व इति। नित्य मेवेत्यर्थः †॥ ५ ॥

---

* पा० सू० ७. १. ४१.।

† सन्ति चात्र बहवः काम्यकालविधयः। तद्यथा—"प्रथमास्तमिते पर्युदेयं च स्वर्गकामस्य, तमोऽस्तये सायं जुहुयाद् वियति प्रातरायुष्कामस्य, अन्तःपशौ पशुकामस्य सायस्नातः, प्रयाने श्रीकामस्य प्रातः"—इति का० श्रौ० सू० ४. १५. १२—१५। "प्रयाने, सुप्ते एव, समस्तलोकेऽपजृद्भे"—

उद्यतः सूर्यस्य तेजःप्राप्तिं दृष्टान्तेनोपपादयति— "स यथे-ति। "रात्रेः पाप्मन इति। रात्रिरूपात् तेजःप्रतिबन्धकात् पापादित्यर्थः। एवं सूर्यस्याग्निहोत्रहोमात्ययनिर्मोकं प्रतिपाद्य विदुषोऽपि प्रतिपादयति— "यथा ह वा इति। "वि ह सृज्यन्त इति। अनुदितहोमान्ते सूर्यस्योदये सति 'यथार्थं' यथाप्रयोजनं 'सर्वाः प्रजाः' 'वि सृज्यन्ते' प्रवर्त्तन्त इत्यर्थः ॥ ६ ॥

सायमग्निहोत्रस्याहवनीयविहरणं मस्तमयात् प्रागेव कर्त्तव्य मिति विधिमभिप्रेत्य सिद्धवदनुवदति— "स यः पुरेति। आहव-नीय मुद्धरन्तीति। गार्हपत्यादाहवनीयं प्रणयेदित्यर्थः *। एत-दुपपादयितुं यजमानगृहं प्रति देवानामागमनमाह— "एते वा इत्यादिना। 'एते' खलु सूर्यस्य 'रश्मयः' 'विश्वे देवाः', 'अथ' 'यत्' 'परं भाः' रश्मीनां सुपर्यवस्थितं सूर्याख्यं ज्योतिः 'स प्रजा-पतिर्वा इन्द्रो वा' तत् ज्योतिः प्रजापत्यात्मकमिन्द्रात्मकं च विकल्पेन भवतीत्यर्थः। तेऽस्तमयात् प्रागवस्थिताः 'विश्वे देवाः' अग्निहोत्रिणो यजमानस्य 'गृहान् आगच्छन्ति'। ते चागताः आहवनीयानुद्धरणे सत्याश्रयाभावात् निवर्त्तन्ते, उद्धृते त्वाहवनीयं तं प्रविश्य निविशन्त इत्याह— "स यस्यानुद्धृत मित्यादिना †।

इति तत्र या० दे०। तत्रैव तत उत्तरं होमायाग्यवस्था अपि बहुविधा उक्ताः— "प्रथममग्निर्हि धूप्यमाने प्रजासु निहत्यैव सहसान्न मत्तातः, भूयिष्ठार्चिषि गृहीत्वैव सहसा, प्रदीप्ततमे श्रीयशस्कामस्य, अर्चिःप्रत्यवाये मैत्रेणान्न मत्तातः, अङ्गारेषु चाकाश्यमानेषु ब्रह्मवर्चसकामस्य" इति (४. १५. १६—२०)।

* 'गार्हपत्यादाहवनीयं प्रणीयोद्धरन्ति'— इति च।

† "गार्हपत्यादाहवनीयस्योद्धरण मनस्तमितानुदितयोः" इति का० श्रौ० सू० ४. १३. ३।

"तद्वा अस्मा इति। आगतानां देवानां यदगमनम्, तेन 'अस्मै' यजमानाय 'तद्' अग्निहोत्रं 'हुतम्' विगतदैवं भवतीत्यर्थः। "तस्यानुयुक्ति मिति। 'तस्य' अग्निहोत्रस्य 'हुतिम्' 'अनु'-लक्ष्य, 'यश्च' एवं 'वेद', 'यश्च' 'न' वेद, ते सर्वे अनुहुत माहवनीय मभिलक्ष्य सूर्योऽस्त मगादिति सर्वे * निर्दहतीत्यर्थः ॥ ७ ॥

"अथ यः पुरेति। "आवसथेनोपक्लृप्तेनेति। आवस्थ्य-स्मिन्निति 'आवसथम्' आसनम्, तेनोपक्लृप्तेन आयास्यन्तं येयांसं यथोपासीत, 'एवं' 'तत्' अस्तमयात् प्राक् आहवनीयोद्धरण मित्यर्थः। "निविशत इति। "नेर्विशः"-इत्यात्मने-पदम् † ॥ ८ ॥

"स यत् साय मित्यादि। निगदसिद्धम्। तस्मादुदितहो-मिना मित्यादि। यस्मात् सूर्यरश्मिरूपा विश्वे देवा उदयात् प्राक् अग्नौ आसते, उदिते च सूर्ये ततोऽपगच्छन्ति, तस्मात् उदयात् परं प्रातर्होमं कुर्वताम् 'अग्निहोत्रं' 'विच्छिन्नम्' एव भवति। कथं विच्छिन्न मित्यत ऊर्ध्वं दर्शयति—"यथा शून्य मिति। 'यथा' आगतेऽतिथौ गृहादपगते सति 'शून्यं' तदावास-स्थानं प्रतिपन्न मिति न तर्पणीयान्नपानादिकम् ‡ 'आहरेत्', 'एवम्' आहवनीयाद्रश्मिरूपेषु देवेषु 'तत्' उदितं सूर्यं प्रति गतेषु तदुद्देशेनाहवनीयहोम इत्यर्थः ॥ ९ ॥

एतावेवास्तमितानुदितहोमौ प्रकारान्तरेण प्रशंसति—"इयं वा इद मित्यादिना। "देवानां सदिति। 'देवानां स्वभूतं

---

* 'सर्वत्र'—इति क्व।

† पा० सू० १. ३. १७।

‡ 'प्रतिपंतर्पणीयान्नपानादिकम् (?)"—इति च।

सदित्यर्थः। किं तत्? मूलं किं वा मूलयुक्तम्?। "एष रस इति। क्षीरात्मको रस इत्यर्थः॥ १०॥

"स यत् साय मस्तमित इति। "अस्य रसस्य जीवनस्येति। मूल्यमूलोभयनिष्पन्नस्य सर्वप्राणिजीवनहेतोः क्षीरात्मकस्य * रसस्य भागं प्रथमं 'देवेभ्यः' तस्वामिभ्यः 'जुहवानि' पश्चात् तदुपभुक्तशेषैः सर्वैः वयम् 'उपजीवामः' 'इति' अनेनाभिप्रायेण पयसा 'अग्निहोत्रं' जुहुयादित्यर्थः। तस्य प्रयोजनमाह—"स यदिति। 'ततः' अतो होमानन्तरं रात्र्याः' काले 'यत्' † अग्नितं भवति, 'तत्' सर्वं 'हुतोच्छिष्ट मेव' भुक्तं ‡ भवति। "निरवत्तबलीति। निष्क्रान्तावत्तो बलिर्देवभागो यस्मात्, तन्निरवत्तबलि। एवम् 'अग्निहोत्रं जुह्वत्' पुरुषः हुतोच्छिष्टस्येव रात्रौ 'अशिता' भोक्ता भवति॥ ११॥

प्रातर्होमेऽप्येव माह—"अथ यदिति॥ १२॥

अग्निहोत्रहोमस्येतरयज्ञवैलक्षण्येनासंस्थितत्वं प्रतिपादयति—"तदाहुरिति। 'अन्ये' ज्योतिष्टोमादयो 'यज्ञाः' 'सन्तिष्ठन्ते' समाप्यन्त एव। यत्तु द्वादशसंवत्सरसाध्यं सत्रम्, तदप्यवसानवदेव; अग्निहोत्रं तु 'अनन्तम्'। तदेवानन्त्यं दर्शयति—"सायं होति। अस्त्येव मग्निहोत्रस्यासंस्थितयज्ञत्वम्, किं तत इत्याह—"तस्यानुपस्थिति मन्विति। अनुपस्थिताः परिसमाप्तिरहिताः। 'श्रिया' 'अनुपस्थितः' अपरिसमाप्तः, सर्वदा तद्युक्त इत्यर्थः॥ १३॥

---

* 'क्षीरात्मकस्य (?)'—इति च।

† 'तत्'—इति च।

‡ 'तत्सर्वं हुतशिष्ट मेव भुक्तं'—इति च।

"तद्वा अस्मा इति। आगतानां देवानां यदगमनम्, तेन 'अस्मै' यजमानाय 'तद्' अग्निहोत्रं 'दृंहते' विगतर्द्धिकं भवतीत्यर्थः। "तस्यानुवृत्तिमिति। 'तस्य' अग्निहोत्रस्य 'वृत्तिम्' 'अनु'-लक्ष्य, 'यश्च' एवं 'वेद', 'यश्च' 'न' वेद, ते सर्वे अनुद्गत माहवनीय मभिलक्ष्य सूर्योऽस्त मगादिति सर्वं * निर्दहतीत्यर्थः ॥ ७ ॥

"अथ यः पुरेति। "आवसथेनोपक्लृप्तेनेति। आवसथ्य-मित्यर्थं 'आवसथम्' आसनम्, तेनोपक्लृप्तेन आयास्यन्तं श्रेयांसं यथोपासीत, 'एवं' 'तत्' अस्तमयात् प्राक् आहवनीयोद्धरण मित्यर्थः। "निविशत इति। "नेर्विशः"-इत्यात्मने-पदम् † ॥ ८ ॥

"स यत् सायमित्यादि। निगदसिद्धम्। तस्मादुदितहो-मिना मित्यादि। यस्मात् सूर्यरश्मिरूपा विश्वे देवा उदयात् प्राक् अग्नौ आसते, उदिते च सूर्ये ततोऽपगच्छन्ति, तस्मात् उदयात् परं प्रातर्होमं कुर्वताम् 'अग्निहोत्रं' 'विच्छिन्नम्' एव भवति। कथं विच्छिन्न मित्यत आह दर्शयति—"यथा शून्य मिति। 'यथा' आगतेऽतिथौ गृहादपगते सति 'शून्यं' तदावास-स्थानं प्रतिपन्न मिति न तर्पणीयान्नपानादिकम् ‡ 'आहरेत्', 'एवम्' आहवनीयाद्रश्मिरूपेषु देवेषु 'तत्' उदितं सूर्यं प्रति गतेषु तद्धेतुनाहवनीयहोम इत्यर्थः ॥ ९ ॥

एतावेवास्तमितानुदितहोमौ प्रकारान्तरेण प्रशंसति—"इयं वा इद मित्यादिना। "देवानां सदिति। 'देवानां' स्वभूतं

---

* 'सर्वत्र'—इति क्व।

† पा० सू० १. ३. १७।

‡ 'प्रतिपंतर्ष्णीयान्नपानादिकम् (?)"—इति च।

सदित्यर्थः। किं तत्? मूलं किं वा मूलयुक्तम्?। "एव रस इति। क्षीरात्मको रस इत्यर्थः॥ १०॥

"स यत् साय मस्तमित इति। "अस्य रसस्य जीवनस्येति। मूल्यमूलोभयनिष्पन्नस्य सर्वप्राणिजीवनहेतोः क्षीरात्मकस्य * रसस्य भागं प्रथमं 'देवेभ्यः' तस्वामिभ्यः 'जुहवानि' पश्चात् तदुपभुक्तशेषैः सर्वे वयम् 'उपजीवामः' 'इति' अनेनाभिप्रायेण पयसा 'अग्निहोत्रं' जुहुयादित्यर्थः। तस्य प्रयोजनमाह—"स यदिति। 'ततः' अतो होमानन्तरं रात्र्याः' काले 'यत्' † अशितं भवति, 'तत्' सर्वं 'हुतोच्छिष्ट मेव' भुक्तं ‡ भवति। "निरवत्तबलीति। निष्क्रान्तावत्तो बलिर्देवभागो यस्मात्, तन्निरवत्तबलि। एवम् 'अग्निहोत्रं जुह्वत्' पुरुषः हुतोच्छिष्टस्येव रात्री 'अशिता' भोक्ता भवति॥ ११॥

प्रातर्होमेऽप्येव माह—"अथ यदिति॥ १२॥

अग्निहोत्रहोमस्येतरयज्ञवैलक्षण्येनावस्थितत्वं प्रतिपादयति—"तदाहुरिति। 'अन्ये' ज्योतिष्टोमादयो 'यज्ञाः' 'सन्तिष्ठन्ते' समाप्यन्त एव। यत्तु द्वादशसंवत्सरसाध्यं सत्रम्, तदप्यवसानवदेव; अग्निहोत्रं तु 'अनन्तम्'। तदेवानन्त्यं दर्शयति—"सायं होति। अस्त्येव मग्निहोत्रस्यावस्थितयज्ञत्वम्, किं तत इत्याह—"तस्यानुपस्थिति मन्विति। अनुपस्थिताः परिसमाप्तिरहिताः। 'श्रिया' 'अनुपस्थितः' अपरिसमाप्तः, सर्वदा तद्युक्त इत्यर्थः॥ १३॥

---

* 'क्षीरात्मकस्य (?)'—इति च।

† 'सत्'—इति च।

‡ 'तत्सर्वं हुतशिष्ट मेव भुक्तं'—इति च।

एवं पयसो होमसाधनत्वं विधाय तस्य दोहनानन्तर मग्नावधिश्रयणं विधत्ते—"तद् दुग्ध्वाधिश्रयतीति *। 'श्रृत मसत्' पक्वं भवेदित्यनेनाभिप्रायेणेत्यर्थः। "श्रृतं पाके"—इति † निपात्यते। कियदवधिकः ‡ पाक इत्याशङ्क्य तत्रैकं मत मुपन्यस्यति—"तदाहुरिति। 'यर्हि' यस्मिन् काले तत् पयः 'उदस्तं' पाकवशादुद्गतास्तं बुद्बुदवद् भवति, 'तर्हि' तस्मिन् काले तच्छृतं भवति। तदवस्थापन्नेन पयसा 'जुहुयात्' इत्यर्थः। तदेतन्निषिध्यते; पक्षान्तर माह—"तदा इति। 'उप ह दहेत्' एव। को दोष इति, तमाह—"अप्रजस्त्वमिति। 'रेतः' संस्तुतं § ह्येतत् पयः, तच्च 'उपदग्धम्', 'अप्रजस्त्वं' अप्रजननशीलम्, प्रजोत्पादकं न भवतीत्यर्थः ॥ १४ ॥

कथन्तर्हि दातव्य ‖ मित्याह—"अधिश्रित्येवेति ¶। अधि-श्रयणानन्तर मेव 'जुहुयात्'; न तु पाकेनोदस्तं कुर्यात्। नन्वश्रृतस्य होमयोग्यत्वं नास्तीति चेत्, तत्राह—"यज्ञ्येवेति। पयसोऽग्निरेतस्त्वं प्रागाम्नातम्—"तस्याग्ं रेतः प्रासिच्यत्, तत् पयोऽभवत्"—इति **। तथा चाग्निरेतस्त्वादेव पयः श्रृत मेव सर्वदा। अतस्त्वाग्नावधिश्रयणमात्रादेव तच्छृतं भवतीति तदवस्थेनैव जुहुयादित्यर्थः ॥ १५ ॥

"तदवद्योतयतीति। ज्वालायुक्तेन दर्भाग्रेण †† अवाङ्मुखं प्रकाशयतीत्यर्थः। "अथापः प्रत्यानयतीत्यादि, स्पष्टम्। "उद-

---

* का० औ० सू० ४. १४. १, २।
† पा० सू० ३. १. २७।
‡ 'कियदवधिः'—इति च।
§ 'रेतःसंस्तुतं'—इति च।
‖ 'दग्धव्य'—इति च।
¶ का० औ० सू० ४. १४. ५।
** २प्र० २ब्रा० १५क० ६ष्ट०, ६पं०।
†† 'मार्गेण'—इति च.

श्रोत्रं मार्जीतयितव्या इति। उदकस्य बिन्दुरार्जीतयितव्य आदेशव्य इति ब्रूयादित्यर्थः ॥ १६ ॥

"अथ चतुर्हवयतीति *। "चतुर्धा विहितं होति। चतुर्भ्यः स्रुवेभ्यो दुग्धत्वात् चतुर्धा विहितत्वम्। "समिद्वहोमार्थमिति। समिदाज्यौ होमार्थं स्रुवीतपयस्कायां † वैकङ्कत्वां स्रुचि एवां समिधं स्रुपरि निधाय गार्हपत्यदेशादाहवनीयं प्रति गच्छेदित्यर्थः। गत्वा च तस्मिन्नाहवनीयापरभागे होमद्रव्यम् 'अनुपसाद्य' अभिधाय, हस्ते धृत्वैव 'पूर्वां माहुतिं' जुहुयात् ‡।

"होष्यनुपसादयति"—इति § यदुपसादनं तैत्तिरीयके समाम्नातम्, तदनुद्य तस्यायुक्ततां दृष्टान्तेनोपपादयति—"स यदुपसादयेदिति। "अन्तरा निदध्यादिति। भोक्तु सुपविष्टस्य पुरःस्थितं पात्रं सम्प्राप्य मध्ये मार्गे अयनम् अवदिकं निदध्यात् ॥ 'एवं' 'तत्' उपसादनमित्यर्थः। अनुपसादनस्यानुगुण्यं माह—"यदनुपसाद्येति।

एवं प्रथमाहुतिं हुत्वा उपसादनपुरस्सरमेव द्वितीयां माहुतिं जुहुयादिति विधत्ते—"उपसद्योत्तरा मिति। जुहोतीत्यनुषङ्गः। एवमनुपसादनोपसादनलक्षणधर्मभेदादेते आहुती 'नानावीर्ये' नानासामर्थ्ये एव करोतीत्यर्थः ॥

---

* का० श्रौ० सू० ४. १४. १०।

† 'सुस्रोतपयस्काया'—इति, च।

‡ 'गार्हपत्यदेशादाहवनीयं प्रतिरुद्यैव पूर्वां माहुतिं जुहुयात्' च।

§ तै० ब्रा० ३. २. ५. ८। "उन्नीयोपसादयति, पृथिवी मेव प्रीणाति। होष्यनुपसादयति, अन्तरिक्ष मेव प्रीणाति। हुत्वोपसादयति, दिव मेव प्रीणाति"—इति।

॥ 'मध्ये मार्गे दक्षिण मवदानं च निदध्यात्'—इति क्व।

एते अनुपसादनोपसादने प्रकारान्तरेण प्रशंसति—"मनश्च ह वा इति। 'व्यावर्त्तयति' धर्मभेदेन पृथक् करोतीत्यर्थः ॥ १७ ॥

होमोपमार्जनप्राशनोन्नयनानां सङ्ख्यां समुच्चित्य प्रशंसति—"स वै हिरिति। "विराड् वै यज्ञ इति। सर्वप्रकृतिभूतस्याग्निष्टोमस्य शतस्तोत्रियायोगेन विराट्सम्पत्तेर्यज्ञस्य विराट्त्व मित्यर्थः। अनयोः स्तुत्योपमार्जनप्राशनयोरविहितयोः स्तोतु मयोग्यत्वात् तयोर्विधित्सयेतच्चा ॥ १८ ॥

तेषां होमोपमार्जनप्राशनाना मुपयोग माह—"स यदिति। "देवाः सन्तीति। अग्नौ प्रक्षिप्तेनाग्निहोत्रहविषोपचितावयवाः सन्तः सर्वदा विद्यन्त इत्यर्थः। "पितृषु चौषधीषु चेति। तत्र प्रथमोपमार्जनेन ओषधीनां तृप्तिः, द्वितीयेन पितृणा मिति द्रष्टव्यम्। "ओषधयश्च सन्तीति। सर्वदा विद्यन्त इत्यर्थः ॥ १९ ॥

"या वै प्रजा इति। 'अनन्वाभक्ताः' भागरहिताः, 'ताः पराभूताः' खलु। अत एव प्राशने सति 'या इमाः' सर्वाः प्रजाः 'यज्ञमुखे' यज्ञानां मुखभूतेऽग्निहोत्रे यजमान आहुतिभागयुक्ताः करोतीत्यर्थः। कस्तर्हि पशूनां भाग इति, तत्राह—"तेनो हेति। 'मनुष्यान् अनु' मनुष्याधीनतया यतो गवाद्याः 'पशवः तिष्ठन्ति, तेनैव कारणेन मनुष्यद्वारा तेऽपि भागयुक्ता इत्यर्थः ॥ २० ॥

अस्याग्निहोत्रस्य याज्ञवल्क्याभिमतं पाकयज्ञत्व मुपन्यस्यति—"तदु होवाचेति। न खल्वग्निहोत्रहोमो दर्शपूर्णमासादियज्ञवत् * केवलयज्ञत्वेन मन्तव्यः, अयं खलु पाकयज्ञ इव

* 'वत्'-शब्दो नास्ति च-क्ष-पुस्तकयोः।

भवति। 'इति'-शब्दो वाक्यसमाप्तौ। एतदुपपादयति—"इदं ह्येति *। इदं खल्वग्निहोत्रं वक्ष्यमाणरूपम्। तत्र पशव्याव-दानादिकं (कर्म) केवलो यज्ञधर्मः; अग्नौ किञ्चिदुत्वा, किञ्चिदवशेष मुत्सृज्य † वह्निर्निगम्य, आचमननिर्लेहनादिकः पाकयज्ञधर्मः; तस्याग्निहोत्रस्य पाकयज्ञस्य सतो रूपम्। अस्त्येवम्, किं तत इत्याह—"तदस्येति। 'तत्' पाकयज्ञियम् 'अस्य' अग्निहोत्रस्य 'रूपं' 'पशव्यम्' पशुभ्यो हितम्, पशुप्राप्तिसाधन मित्यर्थः॥ २१॥

"सैषेत्यादि। 'अमूं' विप्रकृष्टां 'याम्' आहुतिं 'प्रजापतिः' सृष्टिकाले प्रथमम् 'अजुहोत्', 'सैषा' 'एका' अग्निहोत्रस्य पूर्वाहुतिः। अनन्तरञ्च 'यदेतं' ‡ अग्निवायुसूर्याः 'पश्चा' पश्चात् 'इव' 'आधियन्त' अवस्थिताः॥ २२॥

"सा येति। द्वितीया तु स्विष्टकृत्स्थानीयेत्याह—"अथ येति। "एषा हि दिगिति। 'स्विष्टकृतः' स्विष्टकृदाहुतेः 'उत्तरार्द्धे' यथाक्रमेण "भूतञ्चैव भविष्यच्च"-इत्यादिवक्ष्यमाण-द्वयात्मके इत्यर्थः॥ २३॥

"तद् द्वय मेवेति। "भूत मित्यादि। 'भूतम्' अतीत-कालावच्छिन्नम्। 'भविष्यत्' आगामिकालावच्छिन्नम्। एवं जातादिषु योज्यम्। "आशा चेति। आशागोचरं प्राप्तव्य मित्यर्थः। "अद्य च श्वश्चेति। वर्त्तमानानागतकालौ। एवं

---

* का० श्रौ० सू० ४. १४. २७।

† 'मुत्सृज्य'—इति क्व. 'सृष्ट्वा'—इति च दृष्टौ डा० वेबरेण। 'उत्सृज्य, वह्निर्निगम्येति माधवः'—इति या० दे०।

‡ 'यदेतो'—इति च। 'यदेतो'—इति च दृष्टौ डा० वेबरेण।

बह्वविधं 'तद् इय मेवास्तु' तन्नागरूपे यथाक्रमे ते आहुती भवत इत्यर्थः ॥ २४ ॥

अथ तयोराहुत्योः समन्त्रकामन्त्रकत्वे विधास्यन् भूतभविष्यदादिहन्द्वस्यात्मप्रजारूपत्वम्, अन्नानन्नारूपत्वं च दर्शयति— "आत्मैव भूत मित्यादिना। 'आत्मा' स्वयं पिता 'एव', 'भूतम्' यच्च भूतम्, तत् 'अन्ना' ; अनुभूतत्वात् प्रत्यक्षम्। एव मात्मनो भूतस्य च अन्नात्वसाम्यात् आत्मभूत मिति तादात्म्य मित्यर्थः। "प्रजैव भविष्यदिति, प्रतिज्ञा। तदुपपादनम्— "अनन्ना ह्यित्यादि। 'अनन्ना' अप्रत्यक्षम् ; प्रजाभविष्यतोरप्रत्यक्षत्व-साम्यात् तादात्म्य मित्यर्थः ॥ २५ ॥

एवम् "आत्मैव जात मित्यादिषु द्वन्द्वान्तरेषु योजना ॥ २६ ॥

"आत्मैवागत मिति। आत्मप्रजारूपेण अन्नानन्नारूपेण चाहुती स्तुत्वा ह्रियते, स चान्नारूपः ; मन्त्रोऽपि देवताप्रकाशकत्वात् तथा ॥ २७ ॥

"आत्मैवाद्येति। अद्येति वर्त्तमानकालः, अस्त्यागामिकालः ॥२८॥

"सा या पूर्वाहुतिरिति। 'सा' पूर्वाहुतिं मन्त्रेण जुहुया-दित्यर्थः। उत्तराहुतिस्तु भविष्यज्जनिष्यमाणा अनागताद्यात्मक-प्रजास्थानीया, सा चानन्नारूपा ; अमन्त्रकत्व मपि तथेति। तूष्णीं तु भविष्यज्जनिष्यमाणानागताद्यात्मकप्रजास्थानीया, सा चानन्नारूपा ; अमन्त्रक मपि तथेति तूष्णी मेव सा होतव्येत्यर्थः * ॥ २८ ॥

कालद्वयेऽपि पूर्वस्या आहुतेः क्रमेण मन्त्रो दर्शयति— "स

---

* "तूष्णीं द्वितीयाम्"— इति का० श्रौ० सू० ४. १४. २४

जुहोतीति *। मन्त्रयोः सत्यरूपत्व मुपपादयितु मर्थसद्भाव माह—"यदा हीत्यादिना। अस्तङ्गतः सूर्योऽग्नि मेवातु प्रविशतीति रात्रावग्निर्ज्योतीरूपो भवति। यदेतन्मन्त्रवाक्यदर्थं तत् समवेतार्थत्वात् सत्यम् ॥ ३० ॥

अनयोः सामम्रातर्हौमयोर्ब्रह्मवर्चसकामस्य कर्त्तव्यतोपन्यास-पुरस्सरं मन्त्रविशेषौ दर्शयति—"तदु हैतदिति। अग्निर्ज्योतिः सूर्यो ज्योति रिति चत्वारो वर्चश्शब्दाभिधेयस्य तेजसः प्रतिपादकाः। अत एवाभ्यां मन्त्राभ्यां जुह्वतः पुरुषस्य ब्रह्म-तेज. सम्पद्यत इत्यर्थः। तदुक्तं कात्यायनेन—"अग्निर्वर्च इति ब्रह्मवर्चसकामस्य"—इति † ॥ ३१ ॥

"तद्रूपेवेत्यादि। तस्मिन् होममन्त्रे 'प्रजननस्य' रूप मिव 'रूपम्' विद्यते। ज्योतिश्शब्दाभिधेयं मध्येऽवस्थितं 'रेतः' 'उभयतः' 'देवतया' देवतावाचिपदाभ्यां 'परिगृह्णाति'। उभयतः परिगृहीतत्वं रेतसः प्रजननरूपम्। अतः "अग्निर्ज्योतिः"—"सूर्यो ज्योतिः"—इति मन्त्रयोः ‡ प्रजननरूपसद्भावात् ताभ्यां होमे प्रजासम्पत्तिर्भवतीत्यर्थः ॥ ३२ ॥ ॥ ३३ ॥

"तदु होवाचेत्यादि। एलकस्य पुत्रः 'ऐलकिः', 'जीवलः' इति तस्य नाम। "गर्भ मेवेति। कालदयेऽपि ज्योतिश्-शब्दस्य देवतावाचिपदगृहीतत्वात् रेतः परिगृहीत मन्त्रवस्थितं गर्भावस्थ मेव भवति; न तु प्रजारूपेणोत्पद्यत इत्यादिः तद्दोषोपन्यासः, "स एतेनेत्यादिः, तत्परिहारः ॥

"अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा"—इत्येतेनैव § सायं जुहु-

---

* का० श्रौ० सू० ४. १४. १४। † का० श्रौ० सू० ४. १४. १५।
‡ वा० सं० ३. ६. १, २। § वा० सं० ३. ६. १।

यात्, तेन गर्भो धृतो भवति। प्रातःकाले तु "ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा"-इत्यनेन * मन्त्रेण होमे सति रेतोरूपस्य ज्योतिश्शब्दस्य हिङ्करणात् अन्तर्गतो गर्भो बहिः प्रजोत्पत्तिर्भवति † ॥ ३४ ॥

"अथ प्रातरिति। स्पष्टम् ॥ ३५ ॥

"तदाहुरिति। "अग्नावेवैतदिति। अग्निर्ज्योतिरिति-मन्त्रेण जुह्वत् 'अग्नावेव' सन्तं 'सूर्यं' 'जुहोति'; अतः सूर्यो ज्योतिरिति ज्योतिश्शब्दोऽग्निवचनः। अतो यथापठिताभ्यामेव मन्त्राभ्यां होम इत्यभिप्रायः।

"तदुदितहोमिना मित्यादि। 'तत्' उक्तविधानाम् 'उदित-होमिना मेव', नानुदितहोमिनां सम्भवति। कथ मिति चेत्, उच्यते— सूर्ये ह्यस्तङ्गते 'अग्निः ज्योतिः' प्रकाशमानो भवति, उदिते त्वाग्नेयतेजस्सङ्गात् सूर्यश्च प्रकाशवान् भवति। तस्मात् "अग्निर्ज्योतिः— सूर्यो ज्योतिः"-इतिमन्त्रनिष्पाद्यस्याग्निहोत्र-होमस्य अग्नौ पूर्वोक्तरूपं ‡ "गर्भ मेव करोति, न प्रजनयतीति एवंरूपा निन्दा नास्तीत्यर्थः।

तर्ह्युदितहोमपक्ष एवाश्रयणीय इत्याशङ्क्य § तत्र दोषान्तर माह— "इय मेव परिचक्षेति। 'यद्' यस्मात् 'अग्नये स्वाहा', 'सूर्याय स्वाहा' इति 'तस्मै' देवतायै प्रत्यक्षं न श्रूयते, किन्तु "अग्निर्ज्योतिः – सूर्योज्योतिः"-इति प्रथमान्तत्वेन सम्प्रदान-

---

* वा० सं० ३. ६. ५।

† का० श्रौ० सू० ४. १५. ११।

‡ पुरस्तादिहैव ११३ पृ० ६ पं द्रष्टव्यम्।

§ "प्रातर्जुहोत्यनुदिते" इत्येव विधिः का० श्रौ० सू० ४. १५.।

विभक्तेरभावात् देवतात्वस्य परोक्ष मेवास्य पक्षस्य निर्देत्यर्थः ॥ ३६ ॥

एवं निन्द्यनिन्दां प्रदर्श्य, अनिन्द्यं पक्षान्तर माह— अनेनैवेति। तदुक्तं सूत्रकृता— "प्रदीप्ता * मभिजुहोति अग्निर्ज्योतिरिति † सजूरिति ‡ वा"-इति §। "तत् सवितुमदित्यादि, सुगमम्। "प्रत्यक्षं जुहोतीति। 'जुषाणः' हविः सेवमानः 'अग्निः' 'वेतु' कामयता मिति प्रतिपादनात् अग्नेर्होमः प्रत्यक्ष इति प्रागुक्तात् पक्षात् वैलक्षण्य मित्यर्थः। प्रातःकालीनमन्त्रेऽप्येवं द्रष्टव्यम् ॥ ३७, ३८ ॥

हुतशिष्टस्य स्थालीमध्यस्य पयसो ब्राह्मणानां पानं विधित्सुः ततोऽन्य एव ब्राह्मणोऽग्निहोत्रहोमस्याध्वर्युरिति प्रतिपादयति— "ते होचुरित्यादिना। "अथ यत् स्थाल्या मिति। अग्निहोत्रहोममाधनभूतायां सुचि यत् हुतशिष्टम्, तस्यैव हिः प्राश्नातीति प्राशनं विहितम्; यत्तु स्थाल्या मवशिष्यते, तत्तु नाग्निहोत्रोच्छिष्टम्। तत्र दृष्टान्तः— "यथा परिगृह इति। परितो गृहं परिश्रितं ‖ धान्यपूर्णं शकटस्योपरि स्थापितम्; यथा तस्माद्धविषो निर्वापयितुं तद्गतं धान्यं न शेष्यते, किन्तु पुनरपि यागान्तरयोग्य मेव। 'एवं तत्' स्थाल्यां पय इत्यर्थः। तथा चाध्वर्योरेव तत्

---

* 'प्रदीप्तायां मिति क्व।

† वा० सं० ३. ६. १, २।

‡ वा० सं० ३. १०. १, २।

§ का० श्रौ० सू० ४. १४. १४।

‖ 'परिवीतं'—इति च। 'परिश्रितं'— इति च हस्तो डा०-वेबरेण।

यान मिति नियमाभावात् यः कोऽपि ब्राह्मणस्तत् पिबेदित्यर्थः * ॥ ३८ ॥ ३ [३. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे तृतीयाध्यायस्य प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्.)

एता ह वै देवता योऽस्ति । तस्मिन्वसन्नी-न्द्रो यमो राजा नडो नैषिधो ऽनश्नन्त्साङ्गमनो-ऽसन् पाऽसवः † ॥ १ ॥

तद्वा ऽएष एवेन्द्रः । यदाहवनीयो ऽथैष एव गार्हपत्यो यमो राजाथैष एव नडो नैषिधो यदन्वाहार्यपचनस्तद्यदेतमहरहर्दक्षिणत आहरन्ति तस्मादाहुरहरहर्व्वै नडो नैषिधो यमऽ राजानं दक्षिणत उपनयतीति ‡ ॥ २ ॥

---

* "स्यात्यां परिग्निनष्टि तद् ब्राह्मणः पिबेत्"—इति का० औ० सू० ४. १४. ११ । "नायं ब्राह्मणस्य पाने नियमः, किं तर्ह्यब्राह्मणस्य प्रतिषेधोऽयम्"—इति च तद्वीकायां या० दे० ।

† 'पाऽसवः'—इति घ, ङ । ‡ 'नीति'—इति घ, ङ ।

अथ य एष सभाया मग्निः । एष एवान-
श्न त्सङ्गमन* स्तदुहैत मनशित्वेवोपमङ्क्ष्यन्ते तस्मा-
देषो ऽनश्नन्नथ यदेतद् भस्मोङ्कृत्य परावपन्त्येष एवा-
सन् पाऽसवः स यो हैव मेतदेवं मय्येता देवता
व्यसन्तीति सर्व्वान्हैवैतांलोकान् जयति सर्व्वांलोका-
ननुसञ्चरति ॥ ३ ॥

तेषा मुपस्थानम् । यदेव सायं प्रातराहवनीय
मुप च तिष्ठत ऽउप चास्ते तदेव तस्योपस्थान मथ
यदेव प्रतिपरेत्य गार्हपत्य मास्ते वा शेते वा तदेव
तस्योपस्थान मथ यचैव संव्रजन्नन्वाहार्यपचन मुपस्मरेत्
तदेव तं मनसोपतिष्ठत तदेव तस्योपस्था-
नम् ॥ ४ ॥

अथ प्रातः † । अनशित्वा मुहूर्तऽ सभाया
मासित्वापि कामं पल्ययेत तदेव तस्योपस्थान मथ
यचैव भस्मोङ्कृत मुपनिगच्छेत्तदेव तस्योपस्थान मेव मु
हास्यैता देवता उपस्थिता भवन्ति ॥ ५ ॥

यजमानदेवत्यो वै गार्हपत्यः । अथैष भ्रातृव्य-
देवत्यो यदन्वाहार्यपचनस्तस्मादेतं नाहरहराहरेयुर्न

* 'अनसाङ्गमन'—इति घ, ङ । † 'प्रातः'—इति घ, ङ ।

ह वा ऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एतं नाहरहराहरत्यन्वाहार्यपचनो वा ऽएषः ॥ ६ ॥

उपवसथ ऽएवैन माहरेयुः । यचैवास्मिन्यच्यन्तो भवन्ति तथो हास्यैषो ऽमोघायाहुतो भवति ॥ ७ ॥

नवावसिते * वैन माहरेयुः । तस्मिन् पचेयुस्तद् ब्राह्मणा अश्नीयुर्यद्यु तन्न विन्देयुत्पचेदपि गोरेव दुग्ध मधिश्रयितवै ब्रूयात्तस्मिन् ब्राह्मणान्पाययितवै ब्रूयात्पापीयाएसो ह वा ऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एवं कुर्व्वन्ति तस्मादेव मेव चिकीर्षेत् ॥ ८ ॥

तद्यदेतत्प्रथमए समिद्धो भवति । धूयुत † ऽइव तर्हि हैष भवति रुद्रः स यः कामयेत यथेमा रुद्रः प्रजा अथद्वयेव त्वत्महसेव त्वन्निघात मिव त्वत्सचत ऽएव मन्न मद्या मिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ‡ ॥ ९ ॥

अथ यचैतत्प्रदीप्ततरो भवति । तर्हि हैष

---

* "नवावसथे"—इति स्यात् सायणसम्मतः ।

† 'धूयुत'—इति च ङा०-वेवरेण दृष्टः ।

‡ 'जुहोति'—इति ग, 'जुहोति'—इति घ, ङ। इहोपरिष्टाच्चैवम्

भवति व्वरुणः स यः कामयेत यथेमा व्वरुणः प्रजा एवमेव त्वत्सहसेव त्वन्निघात मिव त्वत्सचत एव मन्न मद्या मिति तर्हि ह स जुहुयात् प्राप्नोति हैवैतदन्नाद्यं य एवं व्विद्वांस्तर्हि जुहोति ॥ १० ॥

अथ यत्रैतत्प्रदीप्तो भवति । उच्चैर्धूमः परमया जूत्या बल्बलीति * तर्हि हैष भवतीन्द्रः स यः कामयेतेन्द्र इव श्रिया यशसा स्या मिति तर्हि ह स जुहुयात् प्राप्नोति हैवैतदन्नाद्यं य एवं व्विद्वांस्तर्हि जुहोति ॥ ११ ॥

अथ यत्रैतत्प्रतितरा मिव । तिरश्चीवार्चिः सꣳ शाम्यतो † भवति तर्हि हैष भवति मित्रः स यः कामयेत मैवमेतद मन्न मद्या मिति य माहुः सर्व्वस्य वा एषोऽयं ब्राह्मणो मित्रं न वा एषोऽयं कं चन हिनस्तीति तर्हि ह स जुहुयात् प्राप्नोति हैवैतदन्नाद्यं य एवं व्विद्वांस्तर्हि जुहोति ॥ १२ ॥

अथ यत्रैतदङ्गाराश्चाकाशयन्त इव । तर्हि हैष भवति ब्रह्म स यः कामयेत ब्रह्मवर्चसी स्या मिति

---

* 'बल्खलीति—इति च इष्टौ डा०-वेवरेण ।

† 'संशाम्यतो'—इति घ, ङ ।

तर्हि ह स जूहुयात् प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १३ ॥

एतेषा मेकꣳ संवत्सर मुपेत्यैत्। स्वयं जुह्वदि वाख्यान्यो जुहुयादथ यो ऽन्यथान्यथा जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यꣳ स सामि निवर्तैतैवं तदथ यः सार्धं जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यं तत् त्रिप्रे ऽभित्तन्यादेवं तत् * ॥ १४ ॥

अभ्रयो ह वा ऽएता अन्नाद्यस्य यदाहुतयः। अभि हैवैतदन्नाद्यं तृणत्ति य एवं विद्वानग्निहोत्रं जुहोति ॥ १५ ॥

सा या पूर्व्वाहुतिः। ते देवा अथ योत्तरा ते मनुष्या अथ यत् स्रुचि परिशिनष्टि ते पशवः ॥ १६ ॥

स वै कनीय इव पूर्व्वा माहुतिं जुहोति। भूय इवोत्तरां भूय इव स्रुचि परिशिनष्टि ॥ १७ ॥

स यत् कनीय इव पूर्व्वा माहुतिं जुहोति। कनीयाꣳसो हि देवा मनुष्येभ्यो ऽथ यद् भूय ऽइवोत्तरां भूयाꣳसो हि मनुष्या देवेभ्यो ऽथ यद् भूय इव

* 'तत्'—इति क, 'तत्'—इति घ, ङ।

स्रुचि परिशिनष्टि भूयाꣳसो हि पशवो मनुष्येभ्यः कनीयाꣳसो ह वा ऽअस्य भार्या भवन्ति भूयाꣳसः पशवो य एवं विद्वानग्निहोत्रं जुहोति तदै समृद्धं यस्य कनीयाꣳसो भार्या असन् भूयाꣳसः पशवः ॥ १८ ॥ ४ ॥

॥ श्रुति द्वितीयप्रपाठके चतुर्थं ब्राह्मणम् ॥ [३. २.]

अथाग्न्युपस्थानं विधित्सुस्तेषा मग्नीनाञ्च दैवतरूपता माह—"एता ह वा इति। 'योऽस्ति' यो यजमानो विद्यते, तस्मिन् 'एता.' वक्ष्यमाणा देवता निवसन्ति। ताश्च "इन्द्रः, यमः, नडः, नैषिधः इति *। निषधदेशाधिपतिर्नलः प्रसिद्धो राजा। 'अनश्नन्नन्यङ्गमनः' इति सभ्योऽग्निरुच्यते, 'असन् पांसव.'-इत्यावसथ्यः ॥ १ ॥

एवं तच्छिष्टानां स्वरूपप्रतिपादनं "तद्वा इत्यादिना क्रियते। 'अन्वाहार्यपचनः' अग्निः, 'एष एव' ('नडः') नलः, 'नैषिधः'-इति निर्दिष्टः। निषिधराजस्य च नलस्य, दक्षिणानेश्च साम्य माह—"तद्यदिति। अग्निहोत्रहोमकाले एव † मन्वाहार्यपचनं 'यद्' यस्मात् 'दक्षिणतः अहरहः आहरन्ति', तस्मादेव 'नैषिध' नलोऽपि यमस्य राज्ञः 'दक्षिणतः' उपगच्छतीति लोकप्रसिद्धिरित्यर्थः ॥ २ ॥

"अथ य एष सभाया मग्निः, 'एष एवानश्नन्निति ‡।

---

* 'नलो (।) नैषध (।) इति'—इति च।

† 'एत'—इति च। ‡ का० श्रौ० सू० ४, १५, २३।

'एषः' सभ्योऽग्निः, अनग्निरेव प्रातः सभ्यः सङ्गम्यत इति व्युत्पत्त्या अनग्नन्तसङ्गमन इति पदद्वयेन प्रतिपाद्यत इत्यर्थः। "भस्मोद्धृत्येति *। गार्हपत्याहवनीयादिगतं भस्म उद्धृत्य 'यत्' प्रातरेव आवसथे 'परावपन्ति'। "एष एवासन्निति। भस्मनः पांसुतुल्यत्वात् 'पांसवः' भस्मरूपाः पांसुसम्बन्धिनश्च। एवं पञ्चाना मग्नीनां देवतात्मकत्वं प्रतिपाद्य एतद्देवतुः फल माह— "स य इति ॥ ३ ॥

"तेषा मुपस्थान मिति। वक्ष्यत इति शेषः। आहवनीयस्य समीपेऽवस्थान † मासनं शयनं वा क्रियते; 'तदेव तस्योपस्थानम्' ‡। 'प्रतिपरेत्य' आहवनीयागारात् प्रतिनिवर्त्य गार्हपत्यसमीपे वासं वा शयनं वा क्रियते, 'तदेव तस्योपस्थानम्' §; "संव्रजन्निति। तत्रैव 'तं मनसोपतिष्ठते', 'तदेव तस्योपस्थानम्' ‖; अग्निहोत्रं स्वाङ्गस्यापि तस्य सम्पद्यत इत्यर्थः ॥ ४ ॥

"अथ प्रातरिति। "सभाया मासित्वेति। भोजनात् प्रागेव 'मुहूर्तं' 'सभायाम्' उपविश्य, पश्चात् यथेच्छं 'पल्ययेत' परिगमनं 'कुर्वीत' ¶, 'तत्' आसनं 'तस्य' सभ्याग्नेः 'उपस्थानम्'। उद्धृतभस्मोपगमन मेव आवसथ्योपस्थानम् ** ॥ ५ ॥

यदेतदन्वाहार्यस्याहरहर्दक्षिणत आहरणम्, तदुपवसथ एवाहनि कर्त्तव्यं नान्यत्रेति विधित्सुराह— "यजमानदेवत्यो वा इति †† अहरहराहरणे यजमानस्य शवुदेहसम्बन्धिता भवती-

---

* का० श्रौ० सू० ४, १५, ३४। † 'समीपे यत् स्थान'—इति च।
‡ का० श्रौ० सू० ४, १५, ३०। § का० श्रौ० सू० ४, १५, ३१।
‖ का० श्रौ० सू० ४, १५, ३२। ¶ 'करोति'—इति च।
** का० श्रौ० सू० ४, १५, ३३। †† का० श्रौ० सू० ४, १५, ३

त्यर्थः। "अन्वाहार्यपचनः"—इति यौगिकी सञ्ज्ञा, तस्मात् सोऽन्वाहार्यः ॥ ६ ॥

"उपवसथ इति *। ओदनो यस्मिन्नहनि श्वभ्रौ पक्तव्यः, तत्रैवोपवसथेऽहनि तस्याहरणं कर्त्तव्य मित्यर्थः। "अमोघायेति। सप्रयोजनायेत्यर्थः ॥ ७ ॥

"नवावसिते वेति †। नव आवसथो नवावसथः; नूतनं स्थानम् प्राप्य 'एनम्' अन्वाहार्यपचनम् 'आहरेयुः'। आहरण-प्रयोजन माह— "तस्मिन्निति ‡। "यद्यु तत्र विन्देदिति। पक्तव्यालाभे गोर्दुग्धा पय एव तस्मिन्नग्नौ 'अधिश्रयितवै' अधि-श्रयितुं 'ब्रूयात्' §। तुमर्थे तवै-प्रत्ययः ‖। एवञ्चान्वाहार्य-पचनस्याहरहर्दीक्षणत आहरण मित्येकः पक्षः, यत्तु देशान्तरे प्रवसन् यजमानः अहरहः पाकसमये तत्साधनभूतं स्वकीय मन्वाहार्यपचनं स्मरेत् उपवसथ एवेति द्वितीयः, नवावसथे वेति तृतीयः। सूत्रकृताप्युक्तम्— "आहरण मेकेषा मुपवसथे नवावसथे वा तस्मिन् पचेयुरमांसम्, पाक्याभावे गोः पयोऽधिश्रयितवै ब्रूयात्"—इति ¶।

एव मन्वाहार्यपचनस्य न प्रतिदिवस माहरणं किन्तूपवसथे नवावसथे वेति यदुक्तम्, तस्य फल माह—"पापीयांस इति। अन्वाहार्यपचनस्य भ्रातृव्यस्थानीयत्वात् तस्य प्रतिदिवस माहरणा-भावात् शत्रुत्वयो भवतीत्यर्थः ॥ ८ ॥

अथाहवनीयाग्नेरवस्थाविशेष मुपजीव्य रुद्रवरुणेन्द्रादिदेवता-

---

* का० औ० सू० ४, १३, ७।
† का० औ० सू० ४, १३, ८।
‡ का० औ० सू० ४, १३, ९।
§ का० औ० सू० ४, १३, १०।
‖ पा० सू० ३, ४, ९।
¶ का० औ० सू० ४, १३, ९—१०।

रूपान् प्रकल्प्य काम्यान् होमकालानाह—"तद्यत्रैतदिति *। काष्ठैः समिद्धोऽग्निर्यदा प्रथमं धूमायमानो भवति †, तस्मिन् समये एष रुद्रात्मको भवति। "यथेमा रुद्र इति। 'यथा' खलु 'रुद्रः' 'इमाः' सर्वाः 'प्रजाः' 'अप्रत्तयेव त्वत्' अप्रियेणेव एकवारम्, 'सहसेव त्वत्' बलात्कारेणेव एकवारम्, तथा 'निघात मिव त्वत्' प्रजानां हनन मिव एकवारम्, 'सचते' समवेति; 'एवम्' एवाहं सर्वम् 'अत्रम्' उपसंहृत्य 'अद्याम्' भक्षयेयम् 'इति' 'यः कामयेत', 'सः' यजमानः 'तर्हि' तस्मिन् रुद्रावस्थेऽग्नौ 'जुहुयात्'। एव मुत्तरत्रापि योज्यम् ॥ ९ ॥

"अथ यत्रैतत् प्रदीप्ततरो भवतीति ‡। प्रदीप्तावस्थ आहवनीयो वरुणात्मकः। "रुक्मइव त्वदिति। वरुणो हि पापीयसीः प्रजाः आत्मीयैः पाशैः 'रुक्मइव' भवति, तदुदय मपि सर्वं मन्नाद्य मुत्पादयन्त इत्यर्थः ॥ १० ॥

"अथ यत्रैतत् प्रदीप्तो भवतीति §। "उच्चैर्धूम इति। यस्या मवस्थाया माहवनीयः प्रदीप्तः सन्नुन्नतधूमो भूत्वा महता वेगेन 'बल्बलि'–'इति' एवं शब्दायते, तदवस्थोऽग्निरिन्द्रात्मक इत्यर्थः ॥ ११ ॥

"अथ यत्रैतत् प्रतितरा मिवेति ‖। काष्ठेषु दग्धेषु 'संशाम्यतः' 'अग्नेः अर्चिः' 'प्रतितरां' निकृष्टतराम् 'इव',

---

* का० श्रौ० ४. १५. १६ सूत्रं द्रष्टव्यम्।

† "'धूप्यत इव' धूमायमान इव भवति"—इति च।

‡ का० श्रौ० ४. १५. १७ सूत्रं द्रष्टव्यम्।

§ का० श्रौ० ४. १५. १८ सूत्रं द्रष्टव्यम्।

‖ का० श्रौ० ४. १५. १९ सूत्रं द्रष्टव्यम्।

ऊर्ध्वाधोगमनाभावे 'तिरश्चीव' भवति *। "य माहुरिति। ब्राह्मणस्य यजमानस्य होमकाले इत्यर्थः ॥ १२ ॥

"अथ यदेतदङ्गारा अवाकाशयत इवेति †। सर्वासु ज्वालासु निहतासु केवल मङ्गारा अत्यर्थं दीप्यन्ते; तस्या मवस्थायाम् 'एषः' अग्निः 'ब्रह्म' परब्रह्मात्मको 'भवति' ॥ १३ ॥

"एतेषा मेक मित्यादि। 'एतेषां' ब्रह्माद्यवस्थाविशेषाणां मध्ये 'एकं' 'संवत्सरं' संवत्सरपर्यन्तं निरन्तर मनुतिष्ठेत्। 'यदि' यजमानः 'स्वयम्' एवाग्निहोत्रं 'जुहुयात्' भवति, 'अन्यो वा' अध्वर्युः 'जुहुयात्', उभयोरप्येव संवत्सरनियमः ‡ ॥

यस्तु संवत्सरमध्ये उक्तनियमं परित्यज्य 'अन्यथा' प्रतिदिवसं प्रकारान्तरेण 'जुहोति', तस्य दोषं दृष्टान्तपुरस्सर माह— "यथेति। 'अपः' 'अभि'-लक्ष्य वापीकूपादिकं 'खनन्', 'अन्यद्' व्रीहियवादिकम् 'अन्नाद्यं वा' सम्पादयन्, 'सामि' अर्धक्षते 'यथा' 'निवर्त्तेत' 'एवम्' एव 'तत्' अन्यथाग्निहोत्रहवन मित्यर्थः ॥

संवत्सरपर्यन्तं निरन्तर मेकं पक्षं कुर्वतो यजमानस्योद्दिष्टफलप्राप्ति माह— "अथ य इति। 'सार्द्धं' सह. नैरन्तर्येण 'यः' संवत्सरं 'जुहोति', सिद्ध मन्यत्। 'अन्नाद्यम्' 'अभिदधत्ति' स उत्पादयतीत्यर्थ §॥ १४. १५ ॥

पूर्वोत्तराहुतिद्वयोरवशिष्टस्य चोत्तरोत्तरं भूयस्त्वं विधाय प्रतिपादयति— 'सा येत्यादिना ॥ १६ ॥ ॥ १७ ॥

---

* 'ऊर्ध्वाधोगमनरहित इव भवति'—इति च।

† का० श्रौ० ४. १५. २० सू० द्रष्टव्यम्।

‡ का० श्रौ० सू० ४. १५. २७ क। § का० श्रौ० सू० ४. १५. २७ ख।

"स यत् कनीय इति। "भार्या भवन्तीति। भर्त्तव्याः प्रजा भवन्तीत्यर्थः ॥

"तद्वै सम्भव मिति। यत्र खलु भोक्तृणां भक्षीयस्त्वम्, भोग्यसम्पत्तिर्भूयसी, तत् खलु सम्भव मित्यर्थः * ॥ १८ ॥ ४ [२. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे तृतीयाध्यायस्य द्वितीयं ब्राह्मणम् ॥

॥ इति द्वितीयकाण्डे द्वितीयः प्रपाठकः† ॥

---

* "स्वयं वा जुहुयात्, उपवसथे नियमः"—इति का० श्रौ० ४. १५. ३१ ३६ सूत्रे। "सर्वदा स्वय मेव वाग्निहोत्रं जुहुयात्, अन्यो वा"—इति, उपवसथग्रहणेन पौर्णमास्यमावास्ये उच्येते। तत्र स्वय मेव एते रात्रौ अग्निहोत्रं जुहुयादित्ययं नियमः। सूतके मृतकेऽपि तत्काल मेव स्नात्वा स्वय मेव होमः कार्यः"—इति च तयोर्याज्ञिकदेवज्ञते आख्याने।

† "कण्डिकासङ्ख्या १०३"—इति क, ख-पुस्तके नास्ति, "काण्डी १०४" इति—ग, घ-ङयोः कवत्। तत्र १ ब्रा० २८ क०, २ ब्रा० १८ क०, ३ ब्रा० ३६ क०, ४ ब्रा० १८ क०; सङ्कलनया १०३ सिद्धम् ॥

अथ

द्वितीयप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

द्वितीयाध्याये द्वितीयं ब्राह्मणम्।

॥ हरिः ॐ ॥

यत्र वै प्रजापतिः प्रजाः ससृजे *। स यत्रान्नंꣳ ससृजे सु इदं जातः सर्व्वं मेव दृꣳधं दध्र ऽइत्येवाविल मेव ता यासुर्हि प्रजा आमुष्टा हैनꣳ सम्पेष्टुं दध्रिरे सो ऽतितिक्षमाणः पुरुष मेवाभ्येयाय ॥ १ ॥

स होवाच। न वा ऽअहꣳ मिदं तितिक्षे इन्त त्वा प्रविशानि तं मा जनयित्वा बिभृहि स यथैव मां त्वं मस्मिंल्लोके † जनयित्वा भरिष्यस्येव मेवाहं त्वा ममुष्मिंल्लोके जनयित्वा भरिष्यामीति तथेति तं जनयित्वाबिभः ॥ २ ॥

---

* 'सस्रजे'— इति क, ग; 'सस्रजे'— इति घ, ङ।

† 'मस्मिन् लोके'— इति क; 'मस्मिंलोके'— इति घ, ङ। इयं मिश्रीसरचापि सर्वत्र।

स यदग्नौ ऽआधत्ते * । तदेनं जनयति तं जनयित्वा बिभर्त्ति स यथा हैवैष एतमस्मिंल्लोके जनयित्वा बिभर्त्त्येव मु हैवैष एतममुष्मिंल्लोके जनयित्वा बिभर्त्ति ॥ ३ ॥

तन्न साम्युद्दासयेत । सामि ह्याऽस्मै सु ग्लायति स यथा हैवैष एतस्मा ऽअस्मिंल्लोके सामि म्लायत्येव मु हैवैष एतस्मा ऽअमुष्मिंल्लोके सामि ग्लायति तस्मान्न साम्युद्दासयेत ॥ ४ ॥

स यत्र म्रियते । यत्रैन मग्नावभ्यादधति तदेषो ऽग्नेरधिजायते स एष पुत्रः सन् पिता भवति ॥ ५ ॥

तस्मादेतदृषिणाभ्यनूक्तम् † । शत मिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरिति पुत्रो ह्येष सन्त्स ‡ पुनः पिता भवत्येतन्नु तद्यस्मादग्नौ ऽआदधीत ॥ ६ ॥

तद्वा ऽएष एव मृत्युः । य एष तपति

---

* 'त्ते'— इति क, ग; 'त्ते'— इति घ, ङ ।

† 'ऋ५'— इति घ, ङ । ‡ 'सन्त्स'— इति च इदो डा० वेबरेण ।

तद्यदेष एव मृत्युस्तस्माद् या एतस्मादर्व्याच्यः प्रजास्ता म्रियन्त्ऽथ याः पराच्यस्ते देवास्तस्मादु ते ऽमृतास्तस्येमाः सर्व्वाः प्रजा रश्मिभिः प्राणेष्वभिहिता यथाश्वो ऽश्वाभिधान्या वाभीशुभिर्व्वैव मस्येमाः सर्व्वाः प्रजा रश्मिभिः प्राणेष्वभिहिता स्तस्मादु रश्मयः प्राणानभ्यवतायन्ते ॥ ७ ॥

स यस्य कामयते । तस्य प्राण मादायोदेति स म्रियते * स यो हैतं मृत्यु मनतिमुच्यामुं लोक मेति यथा हैवाष्मिंल्लोके न संयत माद्रियते यदा यदैव† कामयते ऽथ मारयत्येव मु हैवामुष्मिंल्लोके पुनः-पुनरेव प्रमारयति ॥ ८ ॥

स यत् साय मस्तमिते ह ऽआहुती जुहोति । तदेताभ्यां पूर्व्वाभ्यां पशूना मेतस्मिन् मृत्यौ प्रतितिष्ठत्यथ यत् प्रातरनुदिते ह ऽआहुती जुहोति तदेताभ्या मपराभ्यां पशूना मेतस्मिन्मृत्यौ प्रतितिष्ठति स एन मेष उद्यन्नेवादायोदेति तदेतं‡

---

* 'संम्रियते'— इति क ग ; इष्टौ डा०-वेबरेण च।

† 'यदैव'— इति घ, ङ ; 'यदेव'— इति च डा०-वेबरेण दृष्टः।

‡ 'तदेतम्'— इति क।

मृत्यु मतिमुच्यते सैषाग्निहोत्रे मृत्योरतिमुक्तिरति ह वै पुनर्मृत्युं मुच्यते य एवं मेतां मग्निहोत्रे मृत्योरति-मुक्तिं व्वेद ॥ ९ ॥

यथा वा ऽऽषोरनीकम्। एवं यज्ञाना मग्नि-होत्रं येन वा ऽऽषोरनीक मेति सर्व्वा वै तेनेषु-रेत्येतेनो ह्यस्य सर्व्वे यज्ञक्रतव एतं मृत्यु मति-मुक्ताः ॥ १० ॥

अहोराचे ह वा ऽअमुष्मिंल्लोके परिप्लवमाने। पुरुषस्य सुकृतं क्षिणुतो ऽर्व्वाचीनं वा ऽएतो ऽहोराचे तयो ह्यस्याहोराचे सुकृतं न क्षिणुतः ॥ ११ ॥

स यथा रथोपस्थे तिष्ठन्। उपरिष्टाद्रथचक्रे पर्य्यङ्क्रमाने ऽउपावेक्षेतैवं परस्तादर्वाचीनो ऽहोराचे ऽउपावेक्षते न ह वा ऽअस्याहोराचे सुकृतं क्षिणुतो य एवं मेतां महोरात्रयोरतिमुक्तिं व्वेद ॥ १२ ॥

पूर्व्वेणाहवनीयं परीत्य *। अन्तरेव गार्हपत्यं चैति न वै देवा मनुष्यं व्विदुस्त ऽएन मेतदन्त-रेणातियन्तं व्विदुरयं वै न इदं जुहोतीत्यग्निर्व्वै

* 'परीत्य'— इति क, च, ङ।

पाप्मनो ऽपहन्ता तावन्नाहवनीयश्च गार्हपत्यश्चान्तरे-
वातिवतः पाप्मान मपहतः सोऽपहतपाप्मा ज्योति-
रेव श्रिया यशसा भवति ॥ १३ ॥

उत्तरतो वा ऽग्निहोत्रस्य द्वारम् *। स यथा
द्वारा प्रपद्येतैवं तदथ यो दक्षिणत एत्यास्ते
यथा बहिर्धा चरेदेवं तत् † ॥ १४ ॥

नौर्ह वा ऽएषा स्वर्ग्या। यदग्निहोत्रं तस्या
ऽएतस्यै नावः स्वर्ग्याया आहवनीयश्चैव गार्हपत्यश्च
नौमण्डे ऽअथैष एव नावाजो यत् क्षीर-
होता ॥ १५ ॥

स यत् प्राङुपोहेति। तदेनां प्राची मभ्यजति
स्वर्गं लोक मभि तया स्वर्गं लोकए समश्नुते तस्या
ऽउत्तरत ऽआरोहणए सेनए स्वर्गं लोकए
समापयत्यथ यो दक्षिणत एत्यास्ते यथा
प्रतीर्णाया मागच्छेत् स व्यहीयेते स तत एव
बहिर्धा स्यादेवं तत् ‡ ॥ १६ ॥

अथ या मेताए समिध मभ्यादधाति सेष्टका

---

* 'द्वारम्'— इति क, ग, घ, ङ।

†, ‡ 'तत्'— इति घ, ङ।

येन मन्त्रेण जुहोति तद्यजुर्येनैता मिष्टका मुप-दधाति यदा वा ऽइष्टकोपधीयतेऽथाहुतिर्हूयते तदस्योपहिताखेवेष्टकाखेता आहुतयो हूय ते या एता अग्निहोत्राहुतयः ॥ १७ ॥

प्रजापतिर्वा ऽअग्निः । संवत्सरो वै प्रजापतिः संवत्सरे-संवत्सरे ह वा ऽअस्याग्निहोत्रं चित्येना-ग्निना सन्तिष्ठते संवत्सरे-संवत्सरे चित्य मग्नि माप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतदु हास्या-ग्निहोत्रं चित्येनाग्निना सन्तिष्ठते चित्य मग्नि माप्नोति ॥ १८ ॥

सप्त च वै शतान्यशीतीना मृचः । त्रिंशतिश्च स यत् सायं प्रातरग्निहोत्रं जुहोति ते द्वे ऽआहुती ता अस्य संवत्सर ऽआहुतयः सम्पद्यन्ते ॥ १९ ॥

सप्त चैव शतानि त्रिंशतिश्च । संवत्सरे-संवत्सरे ह वा ऽअस्याग्निहोत्रं महतोक्थेन सम्पद्यते संवत्सरे-संवत्सरे महदुक्थ माप्नोति य एवं विद्वा-नग्निहोत्रं जुहोत्येतदु हास्याग्निहोत्रं महतोक्थेन सम्पद्यते महदुक्थ माप्नोति ॥ २० ॥ १ [३.३.] ॥

॥ इति तृतीयप्रपाठके प्रथमं ब्राह्मणम् ॥

अथैतयोर्गार्हपत्याहवनीययोरन्योरुपस्थानं विधित्सुः प्राग्विहिते आधाय्याग्निहोत्रे समुच्चित्य क्रमेण स्तौति— "यद्व वा इत्यादिना। यदा खलु प्रजापतिः प्रजाः सृष्टवान्, तदा 'अग्निम्' इम मपि ससर्ज। 'सः' च 'जातः' अग्निः 'सर्वम्' 'इदं' जगत् 'दग्धुम्' 'दध्रे' उद्युक्तो बभूव, 'इति' इदं सर्वं जगद् व्याकुल मभूत्। "ता हैन मिति। 'एनम्' अग्निम्। "सोऽतितिक्षमाण इत्यादि। 'अतितिक्षमाणः' प्रजाभिश्चिकीर्षितं पेषण मसहमानः कर्माधिकारिणं 'पुरुषम्' अभिजगामेत्यर्थः॥ १॥

"स होवाचेति। अभिगम्य किमुक्तवानिति, तदाह— "न वा अह मिति। 'तितिक्षे' सोढुं शक्नोमि। निगदसिद्ध मन्यत्॥ २॥

एव मग्निना प्रार्थितः, 'तथा' 'इति' अङ्गीकृत्य पुरुषेण तथैवानुष्ठित मिति दर्शयति— "स यदग्नीत्यादिना॥ ३॥

एव मग्न्याधानेन जनितस्याग्नेर्भरणं विधाय, तस्य भरणात् प्राक् उद्वासनं निषेधति— "तन्नेति। 'सामि' मध्ये यद्यग्निम् 'उद्वासयेत्' विस्रजेत्, तर्हि 'अस्मै' यजमानाय 'सः' अग्निः 'सामि' अङ्गानियुक्तो भवति। "स यथेत्यादि। इह लोके येय मग्निस्थानिः, सा आमुष्मिकयजमानस्थानेहेंतुर्भवतीत्यर्थः। तस्मादामरणान्तम् अग्निर्धार्य इति निगमयति— "तस्मादिति॥ ४॥

"स यत्रेति। "यत्रैन मग्नाविति। 'एनं' मृतं यजमानं पैत्रमेधिकविधिना अग्नौ प्रक्षिपन्तीत्यर्थः। 'सः' 'एषः' अग्निः। "पुत्रः सन् पिता भवतीति। यजमानस्य जीवना-

वस्याया माधानेनोत्पादितत्वादग्निस्तस्य पुत्रः, मरणादूर्ध्वन्तु तस्मादग्नेर्यजमानस्य जननात् पुत्र एव तस्य पिता भवति इत्यर्थः ॥ ५ ॥

ननु पुत्रस्य सतः पितृत्वं विरुद्धमित्याशङ्क्य काञ्चिदृचं संवादयति— "तस्मादिति। 'ऋषिणा' मन्त्रेण। सा च "शतमिन्नु शरद इत्यादिका: *। तस्य चाय मर्थः। हे 'देवाः!' 'अन्ति' अन्तिके, मनुष्याणां समीपे आयुष्टेन परिकल्पिताः 'शतं' शतसङ्ख्याका एव 'शरदः' संवत्सराः खलु 'यत्र' यस्मिन् आयुषि शतसंवत्सरे 'तनूनां' शरीराणां 'जरसं' जरां 'चक्रुः' कृतवन्तः, 'यत्र' च 'पुत्रासः' सन्तोऽपि अपत्योत्पादनेन पितरो भवन्ति, 'नः' अस्माकं तत् 'आयुः' 'गन्तोः' ममनात् पूर्वं 'मध्या' मध्ये 'मा रीरिषत' हिंसनं मा कृषत इति †। "पुत्रो ह्येष सन्निति। मानुषस्य यजमानस्य 'एषः' अग्निः आधानादुत्पन्नतया 'पुत्रः सन्' देवशरीरापन्नस्य तस्योत्पादनेन 'पुनः पिता भवति' 'इति' 'एतत्' खलु 'ऋषिणा 'अभ्यनूक्तम्' इत्यर्थः ॥ ६ ॥

अग्निहोत्रहोमस्यामृतत्वप्राप्तिसाधनत्वं वक्तुं सूर्यस्य मृत्युरूपतां प्रतिपादयति— "तदा एष एवेति। "रश्मिभिरिति। सूर्यस्य किरणैः प्राणेषु बद्धा इत्यर्थः। तत्र दृष्टान्तः—"यथेति। अश्वोऽभिधीयते बध्यतेऽनयेत्यश्वाभिधानी, तया; अभीशवोऽश्वा रज्जवस्तदाभिर्वेत्यर्थः। "तस्मादु रश्मय इति। यस्मात् सूर्यरश्मिभिः प्राणेषु प्रजा बद्धाः, तस्मादेव कारणात् ते

* ऋ० सं० १, ८९, ६।

† 'हिंसतं प्राणेषु मिति'— इति च, छ, ञ।

'रश्मयः' प्रजानां 'प्राणान्' 'अभि'-लक्ष्य 'अवतायन्ते' अवसार्य्यन्ते ॥ ७ ॥

"स यस्येत्यादि। निगदसिद्धम्। "स यो हैत मिति। 'एतं' सूर्यात्मकं मृत्युम् 'अनतिमुच्य' अनतिक्रम्य 'यः' स्वर्गं प्राप्नोति, 'स.' भूलोक इव तत्रापि 'पुनरेव' मार्यते, न त्वमृतत्वप्राप्तिस्तस्येत्यर्थः ॥ ८ ॥

कथन्तर्हि तस्य मृत्योरतिमोक इति, तत्राह— "स यदिति। सायम्प्रातरग्निहोत्रे हे हे आहुती हूयेते, अतस्ताभिश्चतसृभिराहुतिभिः तस्मिन् सूर्यात्मके 'मृत्यौ' विषयभूते सति यजमानः 'प्रतितिष्ठति'। 'स. एषः' सूर्यः 'एनं' यजमानं रश्मिभिः 'आदाय' एव 'उदेति', स च 'एतं' मृत्युम् अतीत्य 'मुच्यते' इत्यर्थः ॥

एव मग्निहोत्रे मृत्योरतिमुक्तिं प्रतिपाद्य, तद्धेतुः फल माह— "अति हेति ॥ ९ ॥

एव मग्निहोत्रद्वारा इतरयज्ञेष्वतिमुक्तिः सिद्धेति दर्शयति— "यथा वा इत्यादिना। 'यथा' खलु 'इषोः' बाणस्य 'अनीकम्' मुखम्, प्रधानम्, 'एवम्' एव 'यज्ञाना मग्निहोत्रम्'। 'येन' खलु लक्षणेन 'इषोरनीकं' शल्यरूपम् 'एति' प्राप्नोति, 'तेन' 'सर्वेषुः' प्राप्नोति, एवम् अग्निहोत्रसम्बद्धाः 'सर्वे' दर्शपूर्णमासादयः 'यज्ञक्रतवः' तद्द्वारा सूर्यात्मकं 'मृत्युम्' 'अतिक्रान्ताः' इत्यर्थः ॥ १० ॥

एवं मृत्योरतिमुक्तेरहोरात्राभ्या मपि यजमानेन ज्ञातव्येति प्रतिपादयति— "अहोरात्रे हेति। 'परिप्लवमाने' पर्य्यावर्त्तमाने 'अहोरात्रे' आमुष्मिकं स्वर्गादिसुखहेतुभूतं 'सुकृतं' कर्म्म 'क्षियुतः' क्षपयतः। यदा तु विद्वान् उदीरितरीत्या सूर्य मतिक्रम्य वर्त्तते,

तदा 'अहोरात्रे' एवाधीने * भवतः; तथाचाहोरात्रानाक्रान्तत्वाद् विदुषः सुकृतं न क्षीयत इत्यर्थः ॥ ११ ॥

एतदेव दृष्टान्तेनोपपादयति— "स यथेति। 'रथोपस्थे' रथस्योत्सङ्गे 'उपरिष्टात्' 'तिष्ठन्' 'पर्यावर्त्तमाने' पर्यावर्त्तमाने 'रथचक्रे' 'अर्वाचीनः' अवाङ्मुखः 'अवेक्षेत'। "न ह वेत्यादयुक्तार्थम् ॥ १२ ॥

होमार्थं मन्त्ररागमनं विधाय प्रशंसति— "पूर्वेणेति। आहवनीयस्य पुरस्तात् परिक्रम्य गार्हपत्याहवनीययोर्मध्ये गच्छेदित्यर्थः। तथा च सूत्रितम्— "अन्तरेणापरान्नी गत्वा दक्षिणेन वाप्रदक्षिण † माहवनीयं परीत्योपविशति यजमानः"—इति ‡ "न वै देवा इत्यादि, सुगमम् ॥ १३ ॥

"उत्तरतो वा इति। यदेतद् दक्षिणेन वेति कात्यायनेन विकल्पेनोक्तम्, तद् दूषयति— "अथ य इति। अग्निहोत्रहोमार्थं मन्त्ररस्यां दिशि द्वारःप्रवेशोगायः। तथा च उत्तरतः प्रवेशं विहाय गार्हपत्याहवनीययोर्मध्य मनतिक्रम्यैव 'यः' यजमानः दक्षिणस्यां दिशि एवागत्य आहवनीयसमीपे 'आस्ते', सोऽग्निहोत्रं प्रवेष्टु मशक्तो बहिरेवावतिष्ठते; यथा प्राकारपरिवृतस्याश्रमादेर्द्वारदेशं समप्राप्य प्रवेष्टु मशक्तो बहिरवस्थितो भवति, तद्वदित्यर्थः ॥ १४ ॥

अथैतदग्निहोत्रं नौरूपेण स्तुवन्नुत्तरतः प्रवेशं प्रतिपादयति—

---

* 'एवातोऽर्वाचीने'— इति च।

† 'वाप्रदक्षिण'—इति डा० वेबर-मुद्रित-का० सू० पाठः। तत्र तदीय-पाठभेदादि-टीप्पनी च द्रष्टव्या।

‡ का० श्रौ० सू० ४. १३. १२।

"नौर्वेत्यादिना। "नौमण्डे इति। 'स्वर्ग्यायाः' स्वर्गप्राप्ति-हेतुभूतायास्तस्या अग्निहोत्ररूपायाः 'नावः' 'आहवनीयगार्हपत्यौ 'नौमण्डे' उभे पार्श्वे, भित्ती इत्यर्थः। "नावाज इति। नाव मजति क्षिपति प्रेरयतीति नावाजो (नाविकः *) ॥ १५ ॥

"स यत् प्राङ्क्षित्यादि। प्राङ्मुखः सन् गार्हपत्यादाहवनीयं प्रति होमायोपगच्छन्, ताम् 'एनां' नावं प्राच्यां दिशि अवस्थितं 'स्वर्गम्' 'अभ्यजति' अभिप्रेरयति। "उत्तरत आरोहण मिति। आरुह्यतेऽनेनेत्यारोहणम् प्रवेशद्वारम्। ततश्च उत्तरत आरुह्यमाणा सा अग्निहोत्ररूपा नौः 'एनं' यजमानं 'स्वर्गं लोकं' सम्यङ् प्रापयति। दक्षिणतः प्रवेशने दोष माह— "अथ य इति। नावि 'प्रतीर्णायां' सत्यां यः तरीतुम् 'आगच्छेत्', 'सः' तत्रैव 'विहीयेत' त्यज्येत, ततश्च 'बहिर्धाः' बाह्यो भवेत्; 'एव मेव' 'तत्' दक्षिणतः प्रवेशन मित्यर्थः ॥ १६ ॥

अथैतदग्निहोत्रं चित्वाग्निसम्पत्त्या स्तौति— 'अथ या मिति। होमार्थं या समिदग्नौ आधीयते, 'सा' च 'इष्टका'; 'येन' च मन्त्रेण अग्निहोत्रं 'जुहोति', 'तत्' एव इष्टकोपधानार्थं 'यजुः'। "यदा वा इत्यादि। सायम्प्रातःकालेषु समिदाधान मेवेष्टकोपधानम्। तथा चयनसंस्कृते एवाग्नौ सायम्प्रातराहुतयः कार्त्स्न्येन हुता भवन्तीत्यर्थः ॥ १७ ॥

अथ चित्यस्याग्नेः संवत्सररूपतां ब्रुवन्, तावत्कालसाध्य-

---

* एषोऽर्थः क्वचित्सुचिलिख्य; स्फुटं प्रतीयते; न तु कस्मिंश्चिदप्यादर्शपुस्तके विद्यते। 'नावोपजीवनः'— इति डा० रोथ्-गोल्डस्टूकरौ।

स्याग्निहोत्रहोमस्य तत्सम्पत्ति मुपपादयति— "प्रजापतिर्वा इति। चित्योऽग्निः प्रजापतिना सृष्टत्वात् तदात्मकः, प्रजापतिश्च संवत्सरकालात्मकः; अतः संवत्सरपर्यन्त मभितिष्ठन्ती * मग्निहोत्रं चित्येनाग्निना समानं सत् 'सम्तिष्ठते' समाप्तं भवति। तथा च एकैकसंवत्सराग्निहोत्रानुष्ठानेन चित्याग्न्यनुष्ठानं कृतं भवतीत्यर्थः॥ १८॥

अथैतदग्निहोत्रं महदुक्थसम्पादनेन स्तौति— "सप्त वेति। चित्योऽग्निः, महाव्रतं साम, बृहतीसहस्रात्मकं महदुक्थं † चैतानि त्रीणि सहचराणि। तत्र चित्याग्निसम्पत्तिरुक्ता, महदुक्थसम्पत्तिरुक्तैव ‡ मवगन्तव्या;— तत्र हि गायत्री ऽचाशीतिः, त्रिष्टुबिति ऽचाशीतिः, बार्हती ऽचाशीतिरिति तिस्रस्त्र्यशीतयो विहिताः §; तासां तिसृणां ऽचाशीतीनां सम्भूय परिगणिता ऋचो विंशत्युत्तरसप्तशतसङ्ख्यका भवन्ति ‖। प्रतिदिवस मग्निहोत्रे सायमाहुतिरेका, प्रातराहुतिश्चैकेति द्वे आहुती; संवत्सरस्य षष्ट्युत्तरत्रिशतसङ्ख्यका अहोरात्राः, तेषु च क्रियमाणास्ता अग्निहोत्राहुतयो विंशत्युत्तरसप्तशतसङ्ख्यका भवन्ति। अतश्चैकस्मिन् 'संवत्सरे' 'अस्य' यजमानस्य 'अग्निहोत्रं' ऽचाशीतित्रयात्मक-महदुक्थेन 'सम्पद्यते' सम्पन्नं भवतीत्यर्थः॥

---

* 'मनुतिष्ठन्त'— इति च।

† 'बृहदुक्थं'— इति क्व।

‡ 'बृहदुक्थसम्पत्तिरुक्तैव'— इति क्व।

§ ऐ० ५ आर० २ अ० ३-४-५ खण्डानि द्रष्टव्यानि।

‖ तासां ऋचां प्रतीकग्रहणेन स्वरूपप्रतिपत्तिश्च तत्रैवारण्यके द्रष्टव्या।

एतज्ज्ञानपूर्वकानुष्ठानं प्रशंसति— "संवत्सरे संवत्सर इति ॥ १९, २० ॥ १ [३.३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे तृतीयाध्यायस्य तृतीयं ब्राह्मणम् ॥

(अथ चतुर्थं ब्राह्मणम्.)

अग्नौ ह वै देवाः*। सर्व्वान् पशून्विदधिरे ये च ग्राम्या ये चारण्या व्विजयं व्वोपप्रेष्यन्तः कामचारꣳ वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥ १ ॥

तानु हाग्निर्निचक्रमे। तैः सङ्गच्छ राचिं प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं ते ह व्विदाञ्चक्रुरिह वै प्राविक्षद्राचिं वै प्राविक्षदिति तु मेतत् प्रत्यायत्याꣳ रात्रौ साय मुपातिष्ठन्त देहि नः पशून् पुनर्नः पशून् देहीति तेभ्योऽग्निः पशून् पुनरददात् ॥ २ ॥

---

* 'देवाः'— इति घ, ङ।

तस्मै क अग्नी ऽउपतिष्ठेत । अग्नी वै दातारौ तावेवैतद्याचते साय मुपतिष्ठेत सायꣳ हि देवा उपातिष्ठन्त दत्तो * हैवास्मा ऽएतौ पशून् य एवं विद्वानुपतिष्ठते ॥ ३ ॥

अथ यस्मान्नोपतिष्ठेत । उभये ह वा ऽइद मग्रे सहासुरैश्च मनुष्याश्च तद्ध स्म मनुष्याणां न भवति तद्ध स्म देवान् याचन्त ऽइदं वै नो नास्तीदं नोऽस्त्विति ते तस्मा ऽएव याच्ञायै द्वेषेण देवास्तिरोभूता नेद्विनसानि नेद् द्वेष्योऽसानीति तस्मान्नोपतिष्ठेत ॥ ४ ॥

अथ यस्मादुपैव तिष्ठेत । यज्ञो वै देवाना माशीर्यजमानस्य तद्वा ऽएष एव यज्ञो यदाहुति-राशीरेव यजमानस्य तद्देवास्यात्र तदेवैतदुपतिष्ठ-मानः कुरुते तस्मादुपैव तिष्ठेत ॥ ५ ॥

अथ यस्मान्नोपतिष्ठेत । यो वै ब्राह्मणं वा शुꣳसमानोऽनुचरति क्षत्रियं व्वायं मे दास्यत्ययं मे गृहान् करिष्यतीति यो वै तं व्वाद्येन वा कर्म्मणा व्वाभिरिराधयिषति तस्मै वै स देयं मन्यतेऽथ य

* 'दत्तो'— इति ग ।

आह किं नु त्वं ममासि यो मे न ददासीतीश्वरः एनं द्वेष्टीश्वरो निर्व्वेदं गन्तोस्तस्मान्नोपतिष्ठेतैतद्वित्त्वैवैष एतं याचते यद्दिन्धे* यज्जुहोति तस्मान्नोपतिष्ठेत ॥ ६ ॥

अथ यस्मादुपैव तिष्ठेत। उत वै यावन्दातारं लभत ऽएवोतो भर्त्ता भार्य्यां नानुवुध्यते स यदेवाह भार्य्यो वै तेऽस्मि बिभृहि मेत्यथैनं व्वेदाथैनं भार्य्यं मन्यते तस्मादुपैव तिष्ठेतेद मित्तु समस्तं यस्मादुपतिष्ठेत ॥ ७ ॥

प्रजापतिर्व्वा ऽएष भूत्वा †। यावत ईष्टे यावदेन मनु तस्य रेतः सिञ्चति यदग्निहोत्रं जुहोतीदꣳ सर्व्वमेवैतत् सर्व्व मुपतिष्ठमानोऽनुविकरोतीदꣳ सर्व्वं मनुप्रजनयति ॥ ८ ॥

स वा ऽउपवत्या प्रतिपद्यते। इयं वा ऽउप इयेनेय मुप यद्वीदं किञ्च जायतेऽस्यां तदुपजायतेऽथ यन् न्यृच्छत्यस्या ‡ मेव तदुपोप्यते तदुक्ता रात्रा

---

* 'यदिन्धे'— इति च डा०-वेबरेण द्रष्टः।

† 'भूत्वा'— इति घ, ङ।

‡ 'यन्नृच्छत्यस्या'— इति च डा०-वेबरेण द्रष्टः।

भूयो-भूय एवाद्यं भवति तदद्यय्येवैवैतद् भूमा प्रतिपद्यते ॥ ९ ॥

स आह। उपप्रयन्तो ऽध्वर मित्यध्वरो वै यज्ञ उपप्रयन्तो यज्ञ मित्येवैतदाह मन्त्रं व्योवे-माम्नय ऽइति मन्त्र मु ह्यस्मा ऽएतदध्यन् भवत्यारे ऽअस्मे च शृण्वत ऽइति यद्यप्यस्मदारकादस्य न एतच्छृण्वेवैव * मेवैतन्मन्यस्येत्येवैतदाह ॥ १० ॥

अग्निर्मूर्धा दिवः। ककुत् पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वतीत्यन्वेव धावति तद्यथा याचन् कल्याणं व्वरेदामुष्यायणो वै त्व मस्यर्ल वै त्व मेतस्मा ऽअसीत्येव मेषा † ॥ ११ ॥

अथैन्द्राग्नो। उभा वा मिन्द्राग्नी ऽआहु-वध्या ऽउभा राधसः सह मादयध्यै। उभा दाता-राविषाꣳ रयीणा मुभा व्वाजस्य सातये हुवे वा मित्येष वा ऽइन्द्रो य एष तपति‡ स यदस्त मेति तदाहवनीयं प्रविशति तदुभावेवैतत् सह सन्ता

---

* 'एतच्छृण्वेवैव'— इति म, घ, ङ।

† 'मेषा'— इति घ, ङ।

‡ 'एष तपति'— इति च छो डा०-वेबरेण।

ऽउपतिष्ठत ऽउभौ मे सह सन्तौ दत्ता मिति तस्मा-दैन्द्राग्नी * ॥ १२ ॥

अयं ते योनिर्ऋत्वियः । यतो जातो ऽअरो-चथाः । तं जानन्नग्न ऽआरोहाथा नो वर्द्धया रयि-मिति पुष्टं वै रयिर्भूयो भूय एव न इदं पुष्टं कुर्व्वि-त्येवैतदाह ॥ १३ ॥

अयु मिह प्रथमः । धायि धातृभिर्होता यजिष्ठो ऽअध्वरेष्वीडाः । य मप्रवानो भृगवो विरु-रुचुर्व्वनेषु चित्रं विभ्वं विशे-विश ऽइत्यन्वेव धावति तद्यथा याचन् कल्याणं व्वदेदामुष्यायणो वै त्व मसित्वं वै त्व मेतस्मा ऽअसीत्येव मेषा यथो ऽएवैष तथो ऽएवैन मेतदाह यदाह विभ्वं विशे-विश ऽइति विभुर्ह्येष विशे-विशे ॥ १४ ॥

अस्य प्रत्नाम् † । अनु द्युतꣳ शुक्रं दुदुक्षे ऽअक्रयः । पयः सहस्रसा मृषि मिति परमा वा ऽएषा सनीनां यत् सहस्रसनिस्तदेतस्येवावरुद्ध्या तस्मादाह पयः सहस्रसा मृषि मिति ॥ १५ ॥

---

* 'दैन्द्राग्नी'— इति घ, ङ ।

† 'प्रत्नाम्'— इति घ, ङ ।

तदेतत् समाहार्य्यꣳ षड्ढचम्*। तस्योपवती प्रथमा प्रत्नवत्युत्तमावोचाम तदुस्रादुपवत्यथाद् एव प्रत्नं यावन्तो ह्येव सनाग्रे देवास्तावन्त एव देवास्तस्मादृः प्रत्नं तदिमे ऽन्वान्तरेण सर्व्वे कामास्ते ऽस्मा ऽइमे सञ्जानाने सर्व्वान् कामान्त्सन्नमतः ॥ १६ ॥

स वै त्रिः प्रथमां जपति। त्रिरुत्तमां त्रिवृत्-प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात् त्रिः प्रथमां जपति त्रिरुत्तमाम् † ॥ १७ ॥

यद्व वा ऽअत्राग्निहोत्रं जुह्वत्। व्वाद्येन वा कर्म्मणा वा मिथ्या करोत्यात्मनस्तदुवद्यत्यायुषो वा व्वर्चसो वा प्रजायै वा॥ १८ ॥

तदु खलु तनूपा अग्नेऽसि। तन्वं मे पाह्या-युर्दा अग्नेऽस्यायुर्मे देहि व्वर्चोदा अग्नेऽसि व्वर्चो मे देहि। अग्ने यन्मे तन्वा ऊनं तन्म ऽआपृ-णेति ॥ १९ ॥

यद्व वा ऽअत्राग्निहोत्रं जुह्वत्। व्वाद्येन वा कर्म्मणा वा मिथ्या करोत्यात्मनस्तदुवद्यत्यायुषो

---

* 'त्वं'— इति घ, ङ।

† 'माम्'— इति घ, ङ।

वा व्वर्चसो वा प्रजायै वा तन्मे पुनराप्याययेत्येवैतदाह तथो ह्यैतत् पुनराप्यायते ॥ २० ॥

द्रुह्यानास्त्वा। शतꣳ हिमा द्युमन्तꣳ समिधीमहीति शतं व्वर्षाणि जीव्यास्मेत्येवैतदाह तावत् त्वा* महान्तꣳ समिधीमहीति यदाह द्युमन्तꣳ समिधीमहीति व्वयस्वन्तो व्वयस्कृतꣳ सहस्वन्तः सहस्कृतमिति व्वयस्वन्तो व्वयं भूयास्म व्वयस्कृत् त्वं† भूया इत्येवैतदाह सहस्वन्तो व्वयं भूयास्म सहस्कृत् त्वं ‡ भूया इत्येवैतदाहाग्ने सपत्नदम्भन मदब्धासो ऽदाभ्यमिति त्वया व्वयꣳ सपत्नान् पापीयसः क्रियास्मेत्येवैतदाह ॥ २१ ॥

चित्रावसो स्वस्ति ते पारमशीयेति। चिरेतज्जपति रात्रिर्व्वै चित्रावसुः सा ह्येयꣳ सर्व्वाण्येव चित्राणि व्वसति तस्मान्नारकाच्चित्रं दृश्ये ॥ २२ ॥

एतेन ह स्म वा ऽऋषयः। रात्रेः स्वस्ति पारꣳ समश्नुवत ऽएतेनो ह स्मैनान् रात्रेर्नाष्ट्रा रक्षाꣳसि न व्विन्दन्त्येतेनो § ऽएवैष एतद् रात्रेः

---

*, †, ‡ 'तावत्वा', 'व्वयस्कृत्वं', 'सहस्कृत्वं'— इति क-पाठाः।

§ 'नाविन्दन्नेतेनो'— इति सा०-सम्मतः पाठ इति उ०-वेबरः।

ऋक्षि पारयु समश्नुत एतेनो एनयु राधेनाष्ट्रा रक्षाएसि नु विन्दन्त्येतावन्नु* तिष्ठन् जपति ॥ २३ ॥

अथासीनः। सं त्व मग्ने सूर्य्यस्य व्वर्चसा गथा इति तदुदस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह समृषीणाए स्तुतेनेति तदुपतिष्ठते तेनैतदाह सं प्रियेण धाम्नेत्याहुतयो वा अस्य प्रियं धामाहुतिभिरेव तदाह सु मह † मायुषा संव्वर्चसा सं प्रजया सयु रायस्पोषेण गमेयेति यथा त्व मेतैः स मगथा एव मह मायुषा व्वर्चसा प्रजया रायस्पोषेणेति यद् भूम्नेति तदेव मह मेतैः सङ्कल्पा ऽइत्येवैतदाह ॥ २४ ॥

अथ गा मभ्येति। अभ स्याम्बो वो भक्षीय मह स्य महो वो भक्षीयेति यानि वो व्वीर्य्याणि यानि वो महाएसि तानि वो भक्षीयेत्येवैतदाहोर्ज्जस्वोर्ज्जं वो भक्षीयेति रस स्य रसं वो भक्षीयेत्येवैतदाह रायस्पोष स्य रायस्पोषं वो भक्षीयेति भूमा स्य भूमानं वो भक्षीयेत्येवैतदाह ॥ २५ ॥

---

* 'गाविन्दन्नेतावन्नु'— इति सा०-सम्मतः पाठ इति डा० वेबरः.

† 'स मह'— इति घ, ङ।

रेवती रमध्व मिति रेवन्तो हि पशवस्तस्मादाह रेवती रमध्व मित्यस्मिन्योनावस्मिन् गोष्ठेऽस्मिंल्लोकेऽस्मिन् क्षये। इहैव स्त मापगातेत्यात्मन एवैतदाह मदेव मापगातेति ॥ २६ ॥

अथ गा मभिमृशति। सꣳहितासि विश्वरूपीति विश्वरूपा इव हि पशवस्तस्मादाह विश्वरूपीत्यूर्जा माविश गौपत्येनेत्यूर्जेति यदाह रसेनेति तदाह गौपत्येनेति यदाह भूम्नेति तदाह ॥ २७ ॥

अथ गार्हपत्य मभ्येति। स गार्हपत्य मुपतिष्ठत ऽउप त्वाग्ने दिवे-दिवे दोषावस्तर्धिया व्वयम्। नमो भरन्त एमसीति नम एवास्मा ऽएतत् करोति यथैनं नु * हिꣳस्यात् † ॥ २८ ॥

राजन्त मध्वराणाम्। गोपामृतस्य दीदिविम्। व्वर्द्धमानꣳ स्वे दम ऽइति स्वं वै त ऽइदं यन्मम तन्नो भूयो-भूय एव कुर्व्विलेवैतदाह ॥ २९ ॥

स नः पितेव सूनवे ‡। अग्ने सूपायनो भव। सचस्वा नः स्वस्तय ऽइति यथा पिता पुत्राय सूप-

---

* 'यथैनं न'— इति च ट्ठो डा०-वेबरेण।

† 'हिꣳस्यात्'— इति घ, ङ। ‡ 'सूनवे'— इति घ, ङ।

चरो नैवैनं केन चन हिनस्त्येवं नः सूपचर एधि मैव त्वा केन चन हिंसिषमित्येवैतदाह ॥ ३० ॥

अथ द्विपदाः । अग्ने त्वं नो ऽअन्तम उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय * नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी † हव मुरु ष्या णो ऽअघायतः समस्मादिति ॥ ३१ ॥

यद्वा ऽआहवनीय मुपतिष्ठते । पशूंस्तद्याचते तस्मात्त मुच्चावचैश्छन्दोभिरुपतिष्ठत ऽउच्चावचा इव हि पशवोऽथ यद् गार्हपत्यं पुरुषांस्तद्याचते तद् गायत्रं प्रथमं त्रिचं गायत्रं वा ऽअग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसोपपरैति ॥ ३२ ॥

अथ द्विपदाः । पुरुषच्छन्दसं वै द्विपदा द्विपाद्वा ऽअयं पुरुषः पुरुषानेवैतद्याचते पुरुषान् हि याचते तस्माद् द्विपदाः पशुमान् ह वै पुरुषवान् भवति य एवं विद्वानुपतिष्ठते ॥ ३३ ॥

---

* 'सुम्नाय'— इति संहिता-पाठ इति डा० वेबरः ।

† 'श्रुधि'— इति च पाठो दृश्यो डा०-वेबरेण ।

अथ गा मभ्येति*। दुड एवाद्दित एवैतीडा हि गौरदितिर्हि गौस्ता मभिमृशति काम्या एतेति मनुष्याणाꣳ ह्येतासु कामाः प्रविष्टास्तस्मादाह काम्या एतेति मयि वः कामधरणं भूयादित्यहं वः प्रियो भूयास मित्येवैतदाह ॥ ३४ ॥

अथान्तरेणाहवनीयं च गार्हपत्यं च। प्राङ् तिष्ठन्नग्नि मीक्षमाणो जपति सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः † ॥ यो रेवान्यो ऽमीवहा व्यसुवित्पुष्टिवर्द्धनः। स नः सिषक्तु यस्तुरः ॥ मा नः शꣳसो ऽअरुषो धूर्त्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पत ऽइति ॥ ३५ ॥

यद्वा आहवनीय मुपतिष्ठते। दिवं तदुपतिष्ठतेऽथ यद् गार्हपत्यं पृथिवीं तद्यदेतदन्तरिक्ष मेषा हि दिग् बहुरूपतरेताꣳ ह्येतद्दिश मुपतिष्ठते तस्माद् गार्हपत्यं जपति ॥ ३६ ॥

कृधि चीना मवोऽस्तु। द्युत्तं मित्रस्यार्य्यम्णः। दुराधर्षं व्रुरुक्षस्य॥ न हि तेषा ममाचन नाध्वसु व्वारणेषु। ईशे रिपुरघशꣳसः॥ ते हि पुत्रासो

* 'मभ्येति'— घ, ङ। † 'जः'— इति घ, ङ।

अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रमिति तन्नास्ति नाध्वसु ध्वारणेष्वित्येते ह वा अध्वानो ध्वारणा य इमेऽन्तरेण द्यावापृथिवी एतान् ह्येतदुपतिष्ठते तस्मादाह नाध्वसु ध्वारणेष्विति * ॥ ३७ ॥

अथैन्द्री। इन्द्रो वै यज्ञस्य देवता सेन्द्र मेवैतदग्नुपस्थानं कुरुते कदा चन स्तरीरसि मेन्द्र सश्चसि दाशुष इति यजमानो वै दाश्वान्न यजमानाय ब्रूत्सीत्येवैतदाहोपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यत इति भूयो-भूय एव न इदं पुष्टं कुर्व्वित्येवैतदाह ॥ ३८ ॥

अथ सावित्री। सविता वै देवानां प्रसविता तथो ह्यस्मा एते सवितृप्रसूता एव सर्व्वे कामाः समृध्यन्ते तत् सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयादिति † ॥ ३९ ॥

अथाग्नेयी ‡। तदग्नय एवैतदात्मान मन्नतः परिददाति गुप्त्यै परि ते दूडभो रथो-

---

* 'ध्वित्ति'— इति घ, ङ।

† 'दिति'— इति ग, घ, ङ। ‡ 'धी'— इति घ, ङ।

ऽस्माँ२॥ * ऽअग्नीतु व्विग्घ्रुतः। येन रक्षसि दाशुष इति यजमाना वै दाघ्वाꣳसो योऽह वा ऽअस्यानाधृष्यतमो रथस्तेनैष यजमानानभिरक्षति स यस्तेऽनाधृष्यतमो रथो येन यजमानानभिरक्षसि तेन नः सर्व्वतोऽभिगोपायेत्येवैतदाह चिरेतज्ज-पति ॥ ४० ॥

अथ पुत्रस्य नाम गृह्णाति। इदं मेऽयं व्वीर्य्यं पुत्रोऽनुसन्तनवदिति यदि पुत्रो न स्यादात्मन एव नाम गृह्णीयात्॥ ४१ ॥ २ ॥

॥ इति तृतीयप्रपाठके द्वितीयं ब्राह्मणम् [३. ४.] ॥

अथ सायङ्कालीन मन्युपस्थानं विधित्सुस्तदर्थं माख्यायिका माह— "अग्नी रेति। एतच्च पुनराधानब्राह्मणे † व्याख्यातम्। तत्र हि 'ऋतून् प्रविवेश', अत्र तु 'रात्रिं प्रविवेश' इत्येतावान् विशेषः। "त मेतदित्यादि। 'प्रत्यायत्याम्' आगामिन्यां 'रात्रौ' 'सायं' काले 'तम्' अग्निं देवम् उपतिष्ठन्ते ‡। उपस्थानप्रकार माह— "देहि न इति ॥ १, २ ॥

यस्मादेव मन्युपस्थानात् पशवो देवैर्लब्धाः, तस्माद् यज-मानोऽपि तदुपस्थानं कुर्यादिति विधत्ते— "तस्मा इति। तस्मै

---

* 'ऽस्माइ'— इति क, 'ऽस्माऽइ॥'— इति घ, 'ऽस्माऽइ॥'— इति ङ।

† अत्रैव पुरस्तात् (२अ० ३ब्रा० २, ३ क०) द्रष्टव्यम्।

‡ का० श्रौ० सू० ३. १२. १।

पशुप्राप्तिलक्षणाय फलाय। 'काम्'-इति वाक्यपूरणे *। अन्यत् निगदसिद्धम्। "दत्तो ह्येवेति। य एवं साय मग्नी उपतिष्ठेतेव तस्मै यजमानाय तावग्नी अभिमतं फलं प्रयच्छत इत्यर्थः। एव मुपस्थानविधिः ॥ ३ ॥

(अथोपस्थानदोषपरो †) पूर्वपक्षी सिद्धान्तत्वेन प्रतिपादयति— "अथ यस्मादिति। यस्मात् अग्न्युपस्थानं न कर्त्तव्यम्, तत्कारण मुच्यते। देवाः खलु पुरा मनुष्यैः सार्द्ध मिह लोके निवसन्तः तद्याचनेन पीड़िताः सन्तस्तिरोभूताः, अतोऽग्निरपि उपस्थानेन याच्यमानस्तिरो भवति, याचितफलस्या प्रदानेन नैव यजमानं 'हिनसानि', अत एव द्वेष्योऽपि न भवानीत्यनेनाभिप्रायेणेत्यर्थः। यस्मादेवं तस्मात् नोपस्थेयोऽग्निरिति पूर्वपक्षः ‡ ॥ ४ ॥

"अथ यस्मादित्यादि। यस्मात् कारणादग्न्युपस्थानं कर्त्तव्यम्, तदुच्यते— 'देवानां' सम्बन्धी यो 'यज्ञः', स हि 'यजमानस्य' 'आशीः' फलप्रार्थनरूपः; 'तत्' तथा सति येषा मग्निहोत्राहुतिः 'एष एव यज्ञः' सैव यजमानस्याशीः। "तद्यदेवेत्यादि, यजमानस्य यत्, तदाशीरूपं फलम्; तदेवाग्न्यग्निहोत्रेऽग्नि मुपतिष्ठमानः कुरुत इत्यर्थः ॥ ५ ॥

पुनरप्यनुपस्थानपक्षं प्रकारान्तरेण प्रतिपादयति— "अथ यस्मादित्यादिना। "यो वै ब्राह्मण मित्यादि। ब्राह्मणक्षत्रिययोरन्यतर माशंसमानः फलाभिलाषी पुरुषः 'अनुचरति' अनु-

---

* 'वाक्यप्रतिपूरणे'—इति च।

† एषोऽग्नौ बहुषु पुस्तकेषु न दृश्यते।

‡ का० श्रौ० सू० ४. १२. २।

वर्त्तते, तत्राभिप्राय माह— "अर्थ मं इति। यश्चैव मनुचरति पुरुषः, तं ब्राह्मणादिं 'वाचेन' वदनीयेन स्तुतिशब्देन, 'कर्मणा वा' परिचरणलक्षणेन 'अभिराधयिषति' अभिराधयितुं सेवितुमिच्छति, 'तस्मै' पुरुषायैव 'सः' ब्राह्मणादिः प्रभुः धनं 'देयं' दातव्यं 'मन्यते'। यस्त्वेवं निष्ठुरं भाषते, सः 'एनं' ब्राह्मणादिं प्रभुं 'द्वेष्टोः' * विद्वेषणं कर्त्तुं नीश्वरः समर्थः स्यात्, तथा 'निर्वेदं' मनस्तापं 'गन्तोः' † गन्तु नीश्वरः स्यात्। निष्ठुरभाषणप्रकार माह— "किं न्विति। हे देवदत्त! यस्त्वं मह्यं न ददासि, स त्वं मम किं वासि? न किञ्चिदपि भवसि, त्वया किं प्रयोजन मित्यर्थः। एवं समन्वक्षोमेनाग्नेराराधन मेव कार्यम्, तदुपस्थानन्तु फलप्रार्थनरूपत्वेन निष्ठुरभाषणवदपराधहेतुरिति न कर्त्तव्य मित्याह— "एतदिति। होमसमिन्धनाभ्यामग्निं प्राप्य पुनरुपस्थानेनैव याचते, याचनं चायुक्त मित्यनुपस्थानपक्षो ज्यायानित्यर्थः ‡ ॥ ६ ॥

"अथ यस्मादित्यादि। लोके हि 'यावत्' पुरुषो 'दातारं' प्राप्नोति, स च 'भर्त्ता' पोषकः प्रभुः 'भार्यं' पोष्यं याचकं स्वतो 'नानुबुध्यते', 'सः' चैव याचकः एवम् 'आह' विज्ञापयति,— हे स्वामिन्! अहं 'ते' त्वया 'भार्यः' पोष्यः 'अस्मि', 'मा' मां

---

*, † "ईश्वरे तोसुन्कसुनौ"— इति पा० सू० ३. ३. १३।

‡ उपस्थानानुपस्थानपक्षौ तैत्तिरीयैरपि विचार्योपस्थानं कर्त्तव्य मित्येव सिद्धान्तितम्। तथाहि— "उपस्थेयोऽग्नीर्नोपस्थेयाइत्याहुर्मनुष्या येनु वै योऽचरचराद्यत्यधैनं याचति स इनु वै त सुपार्च्छत्यथ को देवानचरचर्यार्चिष्यतीति, तस्मान्नोपस्थेयोऽथो खल्वाहुरग्निधे वै कं यजमानो यजत इत्येषा खलु वै व्याहितस्यैराग्नीर्यदिति सुपतिष्ठते, तस्मादुपस्थेयः"— इति तै० सं० १. ५, ६, ६, ७।

'बिभृहि' पोषय 'इति'। एवं विज्ञापनानन्तर मेव 'एनं' याचकं पुरुषं 'वेद' जानाति। अनन्तरञ्च 'एनं' 'भार्यं' पोष्यं 'मन्यते'। तस्मात् ऋग्विधानरूपं स्वाभिभूतस्याग्नेरुपस्थानं न दोषाय किञ्चित्। 'इद मित्' इद मेव 'समस्तं सम्पूर्णं मित्यर्थः * ॥ ७ ॥

यस्माच्चान्यस्मात् कारणात् अन्युपस्थान मवश्यं कर्त्तव्यं तदुच्यते— "प्रजापतिर्वा इति। अग्निहोत्रहोमो हि रेतस्सेकस्थानीयः, गर्भाशये निषिक्तस्य रेतसः हस्तपादादिमत्त्वेन यद् विशिष्टरूपकरणम्, तदन्युपस्थानसाध्यम्, अतोऽग्नि मुपतिष्ठमानो यजमानः सर्व मिदं निषिक्तं विशिष्टरूपं कुर्वन् 'अनुप्रजनयति' अनुक्रमेणोत्पादयति। तस्मादवश्य मन्युपस्थानं कर्त्तव्य मित्यर्थः ॥ ८ ॥

तत्र, प्रथमाया ऋचो लिङ्गविशेष मुपन्यस्य प्रशंसति— "स वा इति। 'उपवत्या' उपशब्दयुक्तया ऋचा †। "इयं वा इत्यादि। 'इयं वा उप' योऽय मुपेत्युपसर्गः, इयं भूमिरेव सः, 'इयेन' द्विप्रकारेण 'इयं' भूमिः उपशब्दवाच्या। तत्प्रकार-इयं दर्शयति— "यद्वीय मिति। 'यत् किञ्च' जायमानं, 'तत्' सर्वम् 'अस्याम्' 'उपजायते'। 'तत्' 'न्यञ्चति' नितरा मार्त्तिं प्राप्नोति, 'तत्' अपि 'अस्याम्' एव 'उपोप्यते' निलीयते। अतो जायमान एव अहोरात्राभ्याम् 'अक्षय्यं भवति' तत्सम्बन्धोपशब्द-

---

* एतदेवोपस्थानं वात्सप्रीयस्थान मुच्यते। 'उपप्रयन्तोऽध्वर मित्यत आरभ्य परि ते दूडभ इत्यन्तं वात्सप्रीयस्थानम्'— इत्युक्तेः (या० दी०)। तच्च च वत्सप्रीनामर्षिणा दृष्टं; तत्कर्तृकं वात्सप्रम्, तदीयत्वं एवास्योपस्थानस्य मन्त्रा इति बीजम्।

† "उपप्रयन्तो अध्वरम्"— इत्येषा ऋक् उपवती। वा० सं ३. ११।

युक्तः प्रतिपद्यमानः चयरहितेनैव मूक्ता 'प्रतिपद्यते' उपस्थानं प्रारभ्यत * इत्यर्थः ॥ ८ ॥

अग्नेरुपस्थानमन्त्रान् विधित्सुस्तावदुपवती मृचं विधाय प्रशंसति— "स आहेति। "अध्वरो वै यज्ञ इत्यादि, सुगमम्। द्वितीयपाद मनूद्य तत्र मन्त्रशब्दो वक्ष्यमाणमन्त्रपर इति व्याचष्टे— "मन्त्र मु श्लक्ष्ण इति। "आरे अस्मे चेति। अस्मच्छब्दात् पञ्चम्यर्थे शे-आदेश इति व्याचष्टे— "अस्मदारक्षादिति ॥ १० ॥

अथ द्वितीया मृच मन्युपस्थाने वक्तव्यत्वेन सिद्धवदनूद्य तात्पर्यं माह— "अग्निर्मूर्द्धेति †। "अन्वेव धावतीति। अनुधावति अनुसृत्य ‡ प्रशंसतीति यावत्। एतत् सदृष्टान्त मुपपादयति— "तद्यथेति ॥ ११ ॥

"अथेन्द्राग्नीति। अग्निर्मूर्द्धेत्यनन्तरम् "उभा वाम्"—इतीन्द्राग्नीदेवताका ऋक् § मन्युपस्थाने प्रयोक्तव्येत्यर्थः। अस्या मृचि 'इन्द्राग्नी'-शब्दस्य विवक्षित मर्थ माह— "एष वा इन्द्र इति ॥ १२ ॥

चतुर्थी मृचं पठित्वा स्तौति— "अयन्त इति ‖। "पुष्ट' वा इति। यदत्र रयिशब्दवाच्यम्, तत् पुष्टिहेतुभूतं धनम्। "भूय एवेत्यादि, मन्त्रगत-'वर्धय'-पदाभिप्रायकथनम् ॥ १३ ॥

अथ तस्मिन्नुपस्थाने पञ्चमी मृचं विधाय तात्पर्यं कथयति— "अय मिन्द्रेति ¶। "विभू श्लेष इति। 'विशे-विशे' सर्वस्मै

---

* 'प्रारभत'— इति च।
† वा० सं० ३. १२।
‡ 'अनुसरति'— इति च।
§ वा० सं० ३. १३।
‖ वा० सं० ३. १४।
¶ वा० सं० ३. १५।

प्रजार्थं 'एषः' अग्निः 'विभूः' तदभीष्टप्रदाने समर्थ इत्यर्थः ॥ १४ ॥

षष्ठीं ऋचं विधाय प्रशंसति—"अस्येति*। "परमा वा एषा इति। 'सनीनां' दानानां मध्ये 'यत्' 'सहस्रसनिः' सहस्र रूप्यकस्य धनस्य दानम्, 'एषा' 'परमा' सर्वोत्कृष्टा सनिः ॥

एतावत षड्ऋचो मन्त्रकाण्डे एव व्याख्याता इति नात्र पुनर्व्याख्यायन्ते † ॥ १५ ॥

अथैता ऋचः समूहीकृत्य प्रथमोत्तमयोर्लिङ्गविशेषोपजीवनेन स्तौति— "तदेतदिति। 'समाहार्यम्' एकैका ऋचं प्रदेशान्तरे पठितां समाहृत्य समुदायीकृतं गेतत् 'षड्ऋचं' सूक्तम्। 'तस्य' 'प्रथमा' 'उपवती', 'उत्तमा' तु 'प्रव्रवती'। तत्रोपवती भूम्यालिकेत्येतत् प्रागेव 'अवोचाम', अतः परम् तत् प्रतिपाद्यमित्यर्थः। "अथाद एवेति। 'अदः' द्युलोक एव 'प्रव्रम्'। तस्य प्रव्रशब्दाभिधेयता ‡ मुपपादयति— "यावन्त इति। 'सना'-इति निपातः पुरेत्यस्यार्थे। 'यावन्त एव' हि 'अग्रे' 'सना' सनातनाः 'देवाः', 'तावन्त एव देवाः' इदानीमपि; 'तस्मात्' तदाश्रयभूता द्यौः पुरातनवाचिना प्रव्रशब्देनोच्यत इत्यर्थः। "तदिमे एवेति। 'इमे' द्यावापृथिव्यौ 'अन्तरेण' "अग्निर्मूर्धा"-इत्यादि-मन्त्रप्रतिपाद्याः 'सर्वे कामाः' अवस्थिताः। "ते अस्मा इत्यादि, स्पष्टम् ॥ १६ ॥

---

* वा० सं ३. १६।

† यजुर्वेदस्य वाजसनेय-काण्व-मन्त्रकाण्डन्तु सायणाचार्येण व्याख्यातमपि शतपथव्याख्यानादुत्तरम्; तस्मादिह मन्त्रकाण्डं तैत्तिरीयस्य बोध्यम् तै० सं० १. ५. ५ द्रष्टव्यम्।

‡ 'प्रव्रशब्दनामधेयता'— इति च।

प्रथमोत्तमयोस्त्रिर्जपं विधाय प्रशंसति— "स वै त्रिः प्रथमां जपतीति। अस्य षड्वत्सस्य सूक्तस्य "उपप्रयन्त"–इतीयं प्रथमा, "अस्य प्रज्ञाम्'–इतीय मुत्तमा ; उपस्थानकाले तयोस्त्रिर्जपः कार्यः *। यतः 'यज्ञाः' 'चित्तप्रायणाः' चित्तप्रारम्भाः ; निर्वापप्रोक्षणसामिधेन्यनुवचनादिषु त्रिरावृत्तिदर्शनादित्यर्थः ॥१७॥

"तनूपा अग्नेऽसि"–इत्यादिमन्त्रेराहवनीयोपस्थानं विधित्सुस्त्रिवर्त्तं दोष मुपन्यसति— "यद्व वा इति। अग्निहोत्रहोमं कुर्वन् 'वाचेन वा' व्यवहारसाध्येन मन्त्रोच्चारणेन, शरीरसाध्येन 'कर्म्मणा वा', 'यत्' 'मिथ्याकरोति' अन्यथानुतिष्ठति, 'तत्' तेन 'आत्मन.' यजमानस्य 'आयुषः' जीवनस्य, 'वर्चसः' तेजसः, 'प्रजायै' प्रजायाश्च 'अवद्यति' खण्डयति। 'वा'-शब्दस्यार्थे ॥ १८ ॥

अथैतद्दोषपरिहाराय तदुचितमन्त्रकरणकोपस्थान माह— "तदु खल्विति †। तत् खलु दोषे सतीत्यर्थः ॥ १९ ॥

"यद्व वा इत्याद्युक्तार्थम् ‡। "तत्र इत्यादि। यदेतन्मिथ्याकरणेनायुरित्यादि खण्डितम्, हे अग्ने! 'तत्' तत्र 'पुनः' 'आप्यायय' वर्द्धयेति "तत्र आ पृण"–इतिमन्त्रभागस्य व्याख्यानम् ॥ २० ॥

"इन्धानास्त्वेत्यादि §। "शतञ्च हिमाः"–इत्यस्य तात्पर्य माह— "शतं वर्षाणीति। शतसंवत्सरजीवनवन्तो भूयास्मेत्यर्थः। तैत्तिरीयकेऽप्येतद् विशदीकृतम्— "शतञ्च हिमा

---

* का० श्रौ० सू० ४. १२. ३ क, ख।

† वा० सं० ३. १७।

‡ एतत्पूर्वपूर्वकण्डीयाख्या द्रष्टव्या। § वा० सं० ३. १८. १।

इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाहेति *। "द्युमन्त मिति मन्त्रभागस्यार्थं माह— "तावत्त्वेति। 'तावत्' शत-संवत्सरजीवनावधि, हे अग्ने! त्वां 'द्युमन्तं' दीप्तिमन्तं 'महान्तं' 'समिधीमहि, सन्दीपयेमेत्यर्थः। "वयस्वन्तो वयस्कृत मित्यादि। वय इत्यन्ननाम †। प्रभूतान्नयुक्ता भूत्वा वयसोऽन्नस्य कर्त्तारं त्वा मुपतिष्ठेमहि। एवं 'सहस्वन्तः'—इत्यत्रापि योजना। उभ-यत्र विशेषणद्वय मपि विधेयाभिप्राय मिति व्याचष्टे— "वयस्वन्तो वय मिति। वयः अन्नं करोतीति वयस्कृत्, सहः शत्रूना मभि-भवनं तद्वन्तः सहस्वन्तः, तादृशं सहः शत्रुविषयक मभिभवनं करोतीति सहस्कृत्। "अग्ने सपत्नदम्भन मित्यादि। सपत्नो दभ्यते हिंस्यतेऽनेनेति सपत्नदम्भनोऽग्निः। तथा च 'त्वया' 'वयं' 'सपत्नान्' 'पापीयसः' अतिशयेन निकृष्टान् 'क्रियास्म' करवामेति विशेषेण तात्पर्यकथनम् ॥ २१ ॥

"चित्रावसो"-इत्यादिमन्त्रस्य त्रिर्जपं ‡ विधत्ते— "चि-त्रेति §। "रात्रिर्वा इत्यादि। 'हि' यस्मात् 'सा इयं रात्रिः' ग्रहनक्षत्रादीनि 'चित्राणि' 'सङ्कृष्ट इव वसति', 'तस्मात्' 'चित्रा-वसुः' रात्रेर्नामधेयम्। अत एव इदानी मपि रात्रौ नभसि 'तारका'-लक्षणं 'चित्रं' 'दृष्टिगे' दृश्यते ॥ २२ ॥

अस्य मन्त्रजपस्य प्रयोजनं वक्तुं पुरावृत्त मुदाहरति— "एते-

---

* तै० सं० १. ५. ८. १४। एतच्च ब्राह्मणम् "अग्ने ग्रहपते"—इति तै० सं० १. ५. ६. ११, मन्त्रपदव्याख्यानपरम्; "इत्यानाख्या शतꣳ हिमाः"—इत्ये-तन्मन्त्रव्याख्यानब्राह्मणे ख्यातम्— "शतꣳ हिमा इत्याह शतायुः पुरुषः" —इत्यादि। तै० सं० १. ५. ७. १४.।

† निघ० २. ७. ७।

‡ का० श्रौ० सू० ४. १२. ३ घ। § मन्त्रस्तु वा० सं० ३. १८. २।

नेति। 'एतेन' "चित्रावसो"-इति मन्त्रेण 'रात्रेः' 'पारम्' अवसानं 'स्वस्ति' क्षेमेण 'समशूवते' सम्प्राप्नुवन्। तथा 'एनान्' ऋषीन् एतन्मन्त्रजपेनैव रात्रेः प्रीणनात् तत्सम्बन्धिनो रात्रसादयो ('न विन्दन्ति') नाविन्दन्, नालभन्त इदानीन्तनस्यापि॥

इमं मन्त्रं मन्युपस्थाने जपतो यजमानस्य तत्फलं माह— "एतेनो एवेति। "एतावन्विति। "उपप्रयन्त"-इत्यारभ्य "चित्रावसो"-इत्येतावत्पर्यन्तं माहवनीयस्य समीपे 'तिष्ठन्' जपेत्* ॥ २३ ॥

"अथासीन इति†। वक्ष्यमाणान् "सं त्वं मन्ने"-इत्यादिकान्‡ मन्त्रान् तत्रैवासीनो जपेदित्यर्थः। हे 'अग्ने!' त्वं 'सूर्यस्य' 'वर्चसा' तेजसा 'समगथाः' सङ्गतवानसि 'इति' प्रतीयमानं मिमं मन्त्रार्थं मुपपादयति— "तद् यदस्तं यन्निति। 'अस्तं यन्' अस्तं गच्छन्नित्यर्थः। सूर्यस्य रात्रावाहवनीयप्रवेशः "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा"-इति होममन्त्रार्थकथनप्रस्तावे प्रतिपादितः §। "समृषीणा मित्यादि। 'ऋषीणां' सम्बन्धि यत् 'स्तुतं' स्तोत्रं तेन सङ्गतवानसीति मन्त्रवाक्यार्थः।

एतर्हि प्रकृताग्न्युपस्थानाभिप्राय माह— "तद्यदिति। "आहुतयो वा अस्येति। 'अस्य' अग्नेः आज्यदधिचीरादिद्रव्यसाध्याः 'आहुतयो वा' आहुतय एव 'प्रियं धाम' तज्ज्योतिर्मयं

---

* का० औ० सू० ४, १२, ३ क, ख, घ।

† का० औ० सू० ४, १२, ४। ‡ वा० सं० ३ १६।

§ एतस्यैवाध्यायस्य द्वितीयब्राह्मणं तद्भाष्यञ्च द्रष्टव्यम्।

शरीरम्। तथा चाहुतिभिरेव सङ्गतवानसीत्यर्थः। "समह मायुषेत्यादि। हे अग्ने! यथा त्वमेतैरायुरादिभिः 'समगथाः' सङ्गतवानसि। गमेर्लुङि "गातिस्था"–इति * च्लेर्लुक्, "अनुदात्तोपदेश"–इत्यनुनासिकलोपः †। एवम् 'अहम्' अपि एतैः सङ्गच्छेयेत्यर्थः। "यद् भूम्नेति, "रायस्पोषेण"–इत्यस्य व्याख्यानम्। 'भूम्ना' धनकनकादिबहुत्वेनेत्युक्ते यावानर्थो भवति, रायस्पोषेणेत्यनेन तावानर्थः प्रतिपद्यत इत्यर्थः॥ २४॥

"अथ गा मभ्यैतीति ‡। अग्निहोत्रहोमार्थस्य पयसो दोग्ध्री या गौः, ताम् "अन्ध स्थान्धो वो भक्षीयम्"–इति मन्त्रेण § अभिगच्छेदित्यर्थः। 'अन्धः'-शब्दोऽन्नवाची ‖, तेन च तज्जनितं वीर्यं लक्ष्यत इति व्याचष्टे— "यानि वो वीर्याणीति। हे गावः! यूयम् 'अन्धः स्थ' क्षीरान्नरूपा भवथ, अतस्तदुपभोगजनितानि 'वः' युष्मत्सम्बन्धीनि 'वीर्याणि', 'महाꣳसि' तेजांसि, 'तानि' 'भक्षीय' सम्भजेयेत्यर्थः। "रस स्थेति। "ऊर्ज्ज बलप्राणनयोः"–इत्यस्मात् ¶ धातोर्निष्पन्न 'ऊर्क्'-शब्दो बलकरं समाचष्ट इत्यभिप्रायः। "भूमा स्थेति। 'रायस्पोष'-शब्दस्य भूमार्थत्वं प्रागाख्यातम्— "रायस्पोषेणेति यद् भूम्नेतीति **॥ २५॥

"रेवती रमध्व मितीति ††। "रेवन्तो हीत्यादि। 'रेवन्तः' रयिमन्तः, पुत्रपौत्राद्यभिवृद्ध्या धनयुक्ताः पशवो रयिमन्तः। "रयेर्मतौ बहुलम्"–इति ‡‡ सम्प्रसारणम्। "आत्मन एवेति।

---

* पा० सू० २. ४. ७७। † पा० सू० ६. ४. ३७।
‡ का० औ० सू० ४. १२. ५। § वा० सं० ३. २०।
‖ निघ० २. ७. १; निरु० ५. १. १। ¶ चु० प० १५ धा०।
** एतत्पूर्वकण्डिकायाम् (१५८ पृ०)।
†† वा० सं० ३. २१। ‡‡ पा० ६. १. ३७ सू० ५ वा०।

अग्निरिति मन्त्रगतेदंशब्देन सन्निहितवाचिना स्वसम्बद्धगृह-गोष्ठानि विशेषेण 'आत्मन: एव' स्वस्येव एतत् फल माशास्यत इत्यर्थ: । हे गाव: ! यूयम् 'इहैव' मदीये गोष्ठादौ 'स्त' भवत, 'मापगात' मा अपगच्छतेति मन्त्रभागस्यार्थ: । तत्रापगमना-वधेरनुपादनात् त मुपन्यस्य योजयति— "मदेवेति । मत्सका-शादेव मापगतेत्यर्थ: ॥ २६ ॥

समन्त्रकं गोस्थानं विधाय प्रशंसति— "अथ गा मिति * । 'विश्वानि' सर्वाणि, शुक्लकृष्णादीनि रूपाणि यस्या:, सा 'विश्व-रूपीति' व्यक्ति मभिप्रेत्य व्याचष्टे— "विश्वरूपा इव हीति ॥ २७ ॥

एव माहवनीयस्य समन्त्रक मुपस्थानं सप्रपञ्चं † विधाय, गार्हपत्यस्य ‡ तद् विधत्ते— "अथ गार्हपत्य मभ्येतीति § । "नम एवास्मा इति । "नमो भरन्त:"–इति नमस्कारस्य सम्राद्यत्वावगमात् अतिक्रमजनितापराधनिहत्तयेऽग्नै गार्हपत्याय नमस्कार मेव करोतीत्यर्थ: । इतरथा हि प्रथमाग्निं गार्ह-पत्य मतिक्रम्य आहवनीयस्योपस्थानकरणात् स गार्हपत्य: क्रुद्ध: सन् 'यथैनं न हिंस्यात्, तथा नमस्कार: क्रियत इत्यर्थ: ‖ ॥ २८ ॥

एवं प्रथमाया ऋचस्तात्पर्य मभिधाय द्वितीया मृचं पठित्वा तात्पर्यविशेष माह— "राजन्त मध्वराणा मिति ¶ । "त्वं वा इत्यादि । दम इति गृहनाम ** । यस्मादीयं गृहं हे अग्ने ! 'ते' तव स्वभूतम्, अतस्तथाविधं गृहं 'न:' अस्माकं पुन:-पुन:

---

* का० श्रौ० सू० ४.१२.६ । मन्त्रस्तु वा० सं० ३.२२.१ ।
† 'सप्रपञ्चं' इति च । ‡ 'गार्हपत्ये'— इति च ।
§ का० श्रौ० सू० ४.१२.७ । ‖ वा० सं० ३.२२ ।
¶ वा० सं० ३.२३ । ** निघ० ३.४.१२ ।

कुर्विति "स्वे दमे"–इतिमन्त्रपदयोर्विवक्षितोऽर्थः इति भावः ॥२८॥

"स नः पितेवेति *। गार्हपत्योपस्थाने द्वतीया। तत्र "पितेव सूनवे"–इति दृष्टान्तसिद्धमर्थं निष्कृष्यानुवदति— "यथा पितेति। 'सूपचरः' सुष्ठु उपचरितुं नमस्कारादिभिरुपचारैः पुत्रस्य सेवितुं योग्य एव भवति। स च पुत्रः 'एनं' पितरं केनचिदपि साधनेन 'नैव' 'हिनस्ति' बाधते। एवं गार्हपत्याग्ने! त्वं 'नः' अस्माकं 'सूपचरः एधि' सुष्ठूपचरितुं योग्यो भव; वयमपि त्वां केनचिदपि साधनेन 'नैव हिंसिष्म', इति योजना ॥

एते चोप त्वाग्ने इत्यादिका मन्त्राः, वक्ष्यमाणाश्चाग्ने त्व मित्यादिकाः, सर्व एव संहितायां व्याख्यातत्वात् ग्रन्थविस्तरभयादत्र पुनर्न व्याख्यायन्ते † ॥ ३० ॥

अथ चतसृभिर्द्विपदाभिर्गार्हपत्यस्योपस्थान माह—"अथ द्विपदा इत्यादि। 'अथ' "उप त्वाग्ने"–इत्यादि-गायत्रीणां ‡ मनन्तरं गार्हपत्योपस्थाने 'द्विपदाः' प्रयोक्तव्याः। तत्र,"अग्ने त्वम्"–इति § प्रथमा, "वसुरग्निः"–इति ‖ द्वितीया, "तं त्वा शोचिष्ठ"–इति ¶ द्वतीया, "स नो बोधि"–इति ** चतुर्थी ॥ ३१ ॥

द्विपदाभिर्गार्हपत्योपस्थानस्य पुरुषप्राप्तिहेतुतां वक्तु माहवनीयोपस्थानस्य पशुप्राप्तिहेतुता माह— "यदा आहवनीय मिति। "उच्चावचैरिति। न्यूनाधिकपरिमाणयुक्तैः "उप

---

* वा० सं० ३. २४।

† द्रष्टव्यमत्र मुक्तं पुरस्तात् ; १६८ पृ० '†' द्रष्टव्यम्।

‡ वा० सं० ३, २२, २३, २४।

§, ‖, ¶, ** वा० सं० ३, २५, १, २ ; २६, १, २।

प्रयन्त"-इत्यादिमन्त्रैर्गायत्रादिच्छन्दोभिरित्यर्थः। "अथ यद् गार्हपत्य मित्यादि। "उप त्वाग्ने"-इत्यादिभिः 'यद्' 'गार्हपत्यम्' उपतिष्ठते, तेनोपस्थानेन 'पुरुषान्' पुत्रपौत्रादीनेव 'याचते' प्रार्थत इत्यर्थः। तच्च पुरुषप्रार्थनं द्विपदाभिरेवेति वक्तुमुप त्वाग्न इति गायत्रत्वस्य प्रयोजन माह— "गायत्रं वा अग्नेश्छन्द इति। प्रजापतिमुखात् सम्भोत्पन्नत्वादित्यर्थः *। 'उपपरैति' उपप्राप्नोति ॥ ३२ ॥

"अथ द्विपदा इति। "पुरुषच्छन्दसं वा इति। पुरुषवत्पादद्वयोपेतत्वात् 'द्विपदाः पुरुषच्छन्दसम्' पुरुषसमानाकृतिकं छन्दः। छन्दश्शब्दादकारः समासान्तः †। "पशुमान् ह वै पुरुषवानिति आहवनीय-गार्हपत्योपस्थानयोः समुच्चित्य प्रशंसा; गार्हपत्योपस्थानस्यापि पुरुषवत्पादद्वयोपेतत्वात् ॥ ३३ ॥

गोसमीपगमनं तदुपस्थानञ्च समन्त्रकं विधत्ते— "अथ गा मभ्येतीति ‡। "इड एहीति §। इड़ादितिशब्दौ गोनामत्वेन प्रसिद्धावित्यर्थः। "कामाः प्रविष्टा इति। 'मनुष्याणां' क्षीरदध्यादिविषयाः 'कामाः', 'हि' यस्मात् 'एतासु' गोषु 'प्रविष्टाः', 'तस्मात्' एताः कामनाविषयत्वात् 'काम्याः' इत्यर्थः ॥ ३४ ॥

"अथान्तरेणेत्यादि, निगदसिद्धम् ॥ ३५ ॥

सोमान मित्यस्य त्वचस्य च प्रयोजन माह— "यद्वा इति। आहवनीयगार्हपत्योपस्थानाभ्यां द्यावापृथिव्योरुपस्थानं कृतं

---

* तै० सं० ७. १. १. ४ द्रष्टव्यम्।

† "अनसन्तान्नपुंसकाच्छन्दसि"— इति पा० सू० ५. ४. १०३।

‡ का० श्रौ० सू० ४. १२. ८, ९। § वा० सं० ३. २७. १, २।

भवति। अनेन सोमान मिति ऋचस्य * जपेन द्यावापृथिव्योः मध्यवर्त्तिनोऽन्तरिक्षस्योपस्थानं कृतं भवतीत्यर्थः †। तस्य देवताविशेषसम्बन्धं प्रशंसति-- "एषा ह्येति। द्यावापृथिव्योर्मध्ये वर्त्तमाना येयं मूर्द्धा 'दिक्', 'एषा' 'बृहस्पतेः' स्वभूता। अतएव तैत्तिरीयके समाम्नातम्-- "ऊर्द्धा दिग् बृहस्पतिर्देवता"-इति ‡। नन्वेतत् ऋचं ब्राह्मणस्यत्यम्, कथं बार्हस्पत्यम्? इति। नैष दोषः; तयोर्भेदाभावात्। अत एव दाशतय्यां 'गणानां त्वा'-इत्यादिषु ब्राह्मणस्पत्यसूक्तेषु § तत्र बृहस्पतिः स्तूयते ॥ २६ ॥

"मह्निवीणा मित्यादि ॥। एतदपि सूक्त मन्तराग्नी तिष्ठन् जपेदित्यनुषङ्गेण वाक्यममाप्तिः। अस्य ऋचस्य प्रयोजन माह-- "तत्रास्तीति। 'तत्र' तस्मिंस्तृचे 'न अध्वसु वारणेषु'-'इति' 'अस्ति', तस्याभिप्रायो वर्ण्यत इति शेषः। "एते ह वा इत्यादि। द्यावापृथिव्योर्मध्ये 'य इमे' 'अध्वानः' विततः, 'एते' खलु पुरुषस्य फलप्राप्तिवारणाय भवन्ति, अतो द्यावापृथिवीसंस्तुतयोर्गार्हपत्याहवनीययोर्मध्ये स्थित्वा इमं ऋचं जपन् 'एतान्' एव मार्गान् 'उपतिष्ठते' इत्यर्थः। एव मध्यना सुपस्थितत्वात् तं वारयितुं न कोऽपि ईश्वर इति "नाध्वसु वारणेषु"-इति मन्त्रपादस्यार्थः ¶ ॥ ३० ॥

"अथैन्द्रीत्यादि। 'ऐन्द्री' इन्द्रदेवताका "कदाचनस्तरी-

---

* वा० सं० ३, २८, २९, ३०।

† "सोमान मित्यनुरकं व्रतोपायनवत्"-इति का० श्रौ० सू० ४, १२, १०।

‡ तै० ब्रा० ३, ११, ५, ६।

§ ऋ० सं० २, २३, १। ‖ वा० सं० ३, ३१, ३२, ३३।

¶ वा० सं० ३, ३२, २ पा०।

रसि"–इत्यादिका * अग्न्युपस्थाने प्रयोक्तव्या। तथा च तदग्न्युपस्थान मिन्द्रसहितं सत् यज्ञात्मना निष्पद्यत इत्यर्थः। तत्र पूर्वार्द्धं मनूद्य तात्पर्यं माह— "कदाचनेति। "यजमानो वै दाश्वानिति। "दाशृ दाने"–इत्यस्मात् † "दाश्वान् साह्वान्"–इति ‡ निपातनात् हविषां दाता यजमानो दाश्वानित्युच्यते। तथा च 'दाशुषे' यजमानाय कदाचिदपि 'स्तरीः' हिंसकः 'न असि' न दुह्यसीति तात्पर्यार्थकथनम्। उत्तरार्द्धं व्याचष्टे— "उपोपेदिति। हे 'मघवन्!' अस्मभ्यं दीयमानं त्वदीयं धनं 'भूयो भूय एव' 'उपपृच्यते' समीपं प्राप्नोति; तदिद मान्नातम्— "भूयो भूय एवेति ॥ ३८ ॥

अथ सवितृदेवताका मृचं विधाय प्रशंसति— "अथ सावित्रीति। का पुनरसौ सावित्री? इति, तां माह— "तत्सवितुरिति § ॥ ३९ ॥

अग्निदेवताका मृचं विधत्ते— "अथाग्नेयीति। 'परि ददाति' परिदानं रक्षणार्थं दानम्। तात्पर्यं मेव विवियते— "गुप्त्या इति। "यजमाना वा इत्यादि। धर्षितु मशक्यः, परेरप्रधृष्यो यो रथो विद्यते, 'तेन' रथेन 'एवः' अग्निः 'यजमानान् अभिरक्षति' ॥

एव मग्नेः स्वभाव मभिधाय मन्त्रे योजयति—"स य इति। हे अग्ने 'सः' प्रसिद्धः 'यः' 'रथः' 'ते' त्वदीयः, शत्रुभिरप्रधृष्यो विद्यते, 'येन' च 'यजमानान्' 'अभितः' सर्वतः 'रक्षसि', 'तेन' 'रथेन' 'नः' अस्मान् 'अभिगोपाय' इत्यर्थः ॥।

---

* वा० सं० ३, ३४। † भा० उ० ८८२ धा०।
‡ पा० सू० ६, १, १२। § वा० सं० ३, ३५। ॥ वा० सं० ३, ३६।

अस्या ऋचस्त्रिर्जपं विधत्ते— "त्रिरेतदिति ॥ ४० ॥

दर्शपूर्णमासयोरिवात्रापि पुत्रनामग्रहणं विधत्ते— "अथ पुत्रस्येति *। 'अयं' मदीयः 'पुत्रः' 'इह' यज्ञानुष्ठानलक्षणं 'वीर्यम्' 'अनुसन्तनवत्' अनुक्रमेण सन्तनुयात्, सन्तत मनवच्छिन्नं कुर्यात्, 'इति' अनेनाभिप्रायेण नामग्रहणम्। पुत्राभावे तु यजमानः स्वस्यैव 'नाम' 'गृह्णीयात्' † ॥ ४१ ॥ २ [३.४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे तृतीयाध्यायस्य चतुर्थं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरीःखिदशतरुलताधेनुसौवर्णभूमीः।
रत्नोस्रां रुक्मवाजिद्विपसहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटश्च ॥

---

* "पौर्णमासवत् पुत्रनामग्रहणम्"—इति का० श्रौ० सू० ४. १२. ११। "पौर्णमासवत् ततोऽसौत्यादि (३. ८. २५ सू०)। पुत्रस्य नाम गृह्णाति, पुत्रयोः पुत्राणां वा। प्रियतमस्येति लौगाक्षिः; ज्येष्ठपुत्रस्य 'नामाभिव्याहृत्य यावन्तो वा भवन्ति'—इति ग्राह्यायनः (२. १२. ११.)"— इति तत्र वृत्तिर्याज्ञिकदेवस्य।

† प्रथमे काण्डे सप्तमप्रपाठकीय मेकविंशं ब्राह्मणं (१भा० ६२२पृ०), हरिस्वामिनिर्मितं तद्भाष्यं (६३३पृ० ४पं), तत्रत्यस्तृतीयटीप्पन्यश्च मत्कृताः, सर्व एवैते ग्रन्था इह समालोच्याः॥

धान्याद्रिं धन्यजन्मा तिलभव मतुलः खर्जजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
माध्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पात्रसाल्लिङ्गणार्यः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

---

* एतदीयपाठभेदाः पूर्वपूर्वत्र द्रष्टव्याः ।

(अथ चतुर्थाध्याये प्रथमं ब्राह्मणम्)

अथ हुतेऽग्निहोत्र ऽउपतिष्ठते । भूर्भुवः स्वरिति तत्स्तुत्येनैवैतद्वाचꣳ समर्द्धयति यदाह भूर्भुवः स्वरिति तया समृद्धयाशिष माशास्ते सुप्रजाः प्रजाभि स्या मिति तत् प्रजा माशास्ते सुवीरो व्वीरैरिति तद् वीरानाशास्ते सुपोषः पोषैरिति तत् पुष्टि माशास्ते ॥ १ ॥

यद्वा ऽअदो दीर्घ मग्न्युपस्थानम् । आशीरेव साशीरियं तदेतावतैवैतत् सर्व्व माप्नोति तस्मादेते-नैवोपतिष्ठेतैतेन न्वेव व्वय मुपचराम इति ह स्माहा-सुरिः ॥ २ ॥

अथ प्रवत्स्यन् * । गार्हपत्य मेवाग्र ऽउपतिष्ठने-ऽथाहवनीयम् † ॥ ३ ॥

स गार्हपत्य मुपतिष्ठते । नर्य्य प्रजा मे पाहीति प्रजाया वैष ईष्टे तत् प्रजा मेवास्मा ऽएतत् परि-ददाति गुप्त्यै ॥ ४ ॥

अथाहवनीय मुपतिष्ठते । गुꣳस्य पशून् मे

---

* 'त्स्यन्'— इति घ ।

† 'यꣳ'— इति घ, ङ ।

पाहीति पशूनाꣳ हैष ईष्टे तत् पशुनैवास्मा ऽएतत् परिददाति गुप्त्यै ॥ ५ ॥

अथ प्र वा व्रजति प्र वा धावयति । स यत्र व्वेलां मन्यते तत् स्थित्वा * व्वाचं व्विसृजतेऽथ प्रोक्ष्य परेत्य यत्र व्वेलां मन्यते तदाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव त मुपेयात् ॥ ६ ॥

स आहवनीय मेवाग्र ऽउपतिष्ठते । अथ गार्हपत्यं गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद् गृहेष्वेवैतत् प्रतिष्ठायां प्रतितिष्ठति ॥ ७ ॥

स आहवनीय मुपतिष्ठते । आगन्म व्विश्ववेदस मस्मभ्यं व्वसुवित्तमम् । अग्ने सम्राडभि द्युम्न मभि सह आयच्छस्वेत्यथोपविश्य तृणान्युपलुम्पति ॥ ८ ॥

अथ गार्हपत्य मुपतिष्ठते । अय मग्निर्गृहपतिर्गार्हपत्यः प्रजाया व्वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्न मभि सह आयच्छस्वेत्यथोपविश्य तृणान्युपलुम्पत्येतन्नु जपेनैतेन न्वेव भूयिष्ठा इवोपतिष्ठन्ते ॥ ९ ॥

---

* 'स्थित्वा'— इति क, ग ; डा०-वेबरसंमतश्च ।

स वै खलु तूष्णीं मेवोपतिष्ठते। इदं वै यस्मिन् वसति ब्राह्मणो वा राजा वा श्रेयान् मनुष्यो न्वेव तु मेव नार्हति ब्रूतु मिदं मे त्वं गोपाय प्राहं ब्रवाणीत्यथास्मिन्नेते श्रेयाꣳसो वसन्ति देवा अग्नयः कु उ तानर्हति ब्रूतु मिदं मे यूयं गोपायत प्राहं ब्रवाणीति ॥ १० ॥

मनो ह वै देवा मनुष्यस्याजानन्ति। स वेद गार्हपत्यः परिदां मेद मुपागादिति तूष्णीं मेवाहवनीय मुपतिष्ठते स वेदाहवनीयः परिदां मेद मुपागादिति * ॥ ११ ॥

अथ प्र वा व्रजति प्र वा धावयति। स यत्र श्वेलां मन्यते तत् खन्वा† व्याचं विसृजतेऽथ प्रोष्य परीत्य यत्र श्वेलां मन्यते तदाचं यच्छति स यद्यपि राजान्तरेण स्याच्चैव त मुपेयात् ॥ १२ ॥

स आहवनीय मेवाय ऽउपतिष्ठते। अथ गार्हपत्यं तूष्णीं मेवाहवनीय मुपतिष्ठते तूष्णीं मुपविश्य

---

* 'दिति'— इति ग, 'दिति'— इति घ, ङ।

† 'खन्वा'— इति क, ग; डा०-वेबर इदृश।

तृणान्युपलुम्पति तूष्णी मेव गार्हपत्य मुपतिष्ठते तूष्णी मुपविश्य तृणान्युपलुम्पति ॥ १३ ॥

अथातो गृहाणा मेवोपचारः । एतद्ध वै गृहपतेः प्रोषुष आगताद् गृहाः समुत्तस्ता इव भवन्ति किं मय मिह व्वदिष्यति किं वा करिष्यतीति स यो ह तत्र किञ्चिदृति वा करोति वा तस्माद् गृहाः प्रत्रसन्ति तस्येश्वरः कुलं व्विक्षोध्योरथ यो ह तत्र न व्वदति न किञ्चन करोति तं गृहा उपसंश्रयन्ते न वा ऽमय मिहावादीन्न किञ्चनाकरदिति स यदिहापि मुक्रुद्ध इव स्याच्छ एव ततस्तत् कुर्याद् यद् वदिष्यन्वा करिष्यन्वा स्यादेष उ गृहाणा मुपचारः ॥ १४ ॥ ३ ॥

॥ इति तृतीयप्रपाठके तृतीयं ब्राह्मणम् [४. १.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे, त मइं वन्दे विद्यातीर्थ महेश्वरम् ॥ ४ ॥

एव मग्निहोत्रहोमोपस्थानं विधाय लघूपस्थानमन्त्रानपि दर्शयति— "अथ हुत इति । अग्निहोत्रहोमानन्तरं "भूर्भुवः

स्वः, सुप्रजाः"-'इति' * अनेनैव मन्त्रेण आहवनीयम् 'उपतिष्ठते' †। पूर्वोक्तादुपस्थानमन्त्रजातादस्य ‡ मन्त्रस्यातिशयं माह— "तत् सत्येनेति। सत्यरूपा ह्येता व्याहृतयः; त्रयीसारत्वात्। तथा चाम्नातम्— "भूरित्यृग्वेदाद्, भुव इति यजुर्वेदात्, स्वरिति सामवेदात्"-इति §। एवं व्याहृतिरूपेण ‖ 'सत्येनैव' इमां मन्त्ररूपां 'वाचं' 'समर्द्धयति'। 'तया' च 'समृद्धया' वाचा ¶ागुक्तां सर्वा मपि 'आशिषम्' 'आशास्ते' प्रार्थयत इत्यर्थः। तदाशासनप्रकारं दर्शयति— "सुप्रजा इति। 'प्रजाभिः' पुत्रपौत्रादिरूपाभिः 'सुप्रजाः' शोभनप्रजोपेतः 'स्याम्'। एकः प्रजाशब्दोऽनुवादः। एवं "सुवीरो वीरैरिति। वीर्यवतः पुत्राः वीराः; तेषां प्रजाशब्देन परिगृहीतत्वेऽपि पुनः प्राधान्यख्यापनार्थं पृथगाशासन मिति द्रष्टव्यम् ॥ १ ॥

प्रागुक्तोपस्थानेनास्य समानकार्यकरणत्वात् विकल्प माह— "यदिति। 'अदः' पूर्वोक्तं 'दीर्घं' बहुकर्त्तव्योपेतं बहुमन्त्रसाध्यं यदनुपस्थानम्, तत् ¶ 'आशीः' फलप्रार्थनम् 'एव'। तथा "भूर्भुवः स्वः"-इतिमन्त्रसाध्य मुपस्थान मपि ** तादृगाशीर्युक्तम्। 'तत्' ततः 'एतावतैव उपस्थानेन 'एतत्' प्रागुक्तं 'सर्वं' फलम् 'आप्नोति'। अस्मिन्नुपस्थाने ऋषिवचनं संवादयति— "एतेन ह्येवेति। 'एतेनैव' लघूपस्थानेनैव 'वयम्' अग्निम् 'उपचरामः' 'इति'। यस्मादेवम् 'आसुरिः' महर्षिः 'आह स्म' उक्तवान्,

---

* वा० सं० ३. ३७. १। † का० श्रौ० सू० ४. १२. १२।
‡ 'मन्त्रगणादस्य'— इति च। § ऐ० ब्रा० ५. ५. ७।
‖ 'व्याहृत्याहुतिरूपेण'— इति ङ। ¶ 'सा'— इति च।
** 'मिति'— इति च।

'तस्मात्' इद मेवोपस्थानं कर्त्तव्य मित्यर्थः। अत एव सूत्रान्ते— "भूर्भुवः स्वरिति वोभौ"–इति * ॥ २ ॥

अथ प्रवासं करिष्यता यजमानेन कर्त्तव्य मुपस्थानं दर्शयति— "अथ प्रवत्स्यन्निति †। 'प्रवत्स्यन्' प्रवासं करिष्यन् विहिते गार्हपत्याहवनीयोपस्थाने ॥ ३ ॥

तत्र गार्हपत्योपस्थान मनूद्य मन्त्रं विधत्ते— "स गार्हपत्य मिति ‡। मन्त्रस्य तात्पर्य माह— "प्रजाया इति। एष हि गार्हपत्यः 'प्रजाया ईष्टे'; तस्माग्नियोनिभूतत्वात्। अतः 'अग्ने' गार्हपत्याय प्रजाया रक्षणार्थं परिदानं क्रियत इत्यर्थः ॥ ४ ॥

प्रवत्स्यतो यदाहवनीयोपस्थानं विहितम्, तदनूद्य मन्त्रं विधत्ते— "अथाहवनीय मिति §। "पशूनां हेत्यादि, निगदसिद्धम् ॥ ५ ॥

"अथ प्र वा व्रजतीति ‖। एवं गार्हपत्याहवनीययोः समन्त्रक मुपस्थानं कृत्वा, वाहनरहितश्चेत् स्वयं 'प्रव्रजति' गच्छति; वाहनसहितश्चेत् अश्वरथादीन् 'धावयति' प्रगमयति। 'स' च गच्छन् 'यत्र' यस्मिन् देशे 'वेला' स्वनिवासग्राममर्यादां 'मन्यते', तत्स्थानप्राप्तिपर्यन्तं वाचंयमो गत्वा, तदनन्तरं 'वाचं विसृजेत्'; न तु ततः प्रागित्यर्थः ¶।

---

* का० श्रौ० सू० ४. १२. १२। 'समिदाधानानन्तरं पूर्वं माहवनीयं ततो गार्हपत्यम्'— इति तत्र या० दे०।

† का० श्रौ० सू० ४. १२. १३। ‡ वा० सं० ३. ३७. २।

§ वा० सं० ३. ३७. ३। ‖ का० श्रौ० सू० ४. १२. १४।

¶ का० श्रौ० सू० ४. १२. १५।

पुनरागमनसमयेऽपि तत्स्थान इति अग्निसमीपगमन-पर्यन्तं वाग्यमनं विधत्ते— "अथ प्रोष्येति *। 'प्रोष्य' प्रवासं कृत्वा पुनरागत्य यत्र ग्राममर्यादां मन्यते, तत्र वाचंयमो भवेत्। एवं वाग्यतस्य यजमानस्य अग्न्यागारस्य च मध्ये यदि राजा आगच्छेत्, 'तम्' अग्निं नैव 'उपेयात्' उपगच्छेत्। वाग्यमनानन्तरं राजादि-पूज्यजनसन्निधानेऽपि तदनादरेण अग्निगतमनस्क एव तत्समीपं गच्छेदित्यर्थः †।

तदेतद् विस्पष्टं आपस्तम्बेन सूत्रितम्— "आरादग्निभ्यो वाचं यच्छति, यद्येनं राजा पिताचार्यो वान्तरेणाग्नीन् स्याच्छदिर्दर्शनेन मात्रियेत"— इति ‡ ॥ ६ ॥

प्रवत्स्यन्नुपस्थानवैपरीत्य मागतोपस्थानस्य विधत्ते— "स इति। आहवनीयस्यैव प्रथम मुपस्थानं पश्चात् गार्हपत्यस्येत्यर्थः §। गार्हपत्योपस्थानस्य पश्चाद्भावं प्रतिपादयति— "गृहा वा इति। सर्वान्नीनां योनित्वात् गृहपतिना संयुक्तत्वाच्च गार्हपत्यस्य गृहशब्दाभिधेयत्वम् ॥ ७ ॥

तत्र प्रथमकर्त्तव्य माहवनीयोपस्थानं समन्त्रकं दर्शयति— "स आहवनीय इति। मन्त्रस्य ‖ चाय मर्थः।— हे 'सम्राट्' सम्यग्राजमान! 'अग्ने!' 'विश्ववेदसं' सर्वधनोपेतम्, 'अस्मभ्यं' अस्मदर्थं 'वसुवित्तमं' वसुनः धनस्य लम्भयितृतमं त्वाम् 'अगन्म'

---

* का० श्रौ० सू० ४. १२. १७।
† का० श्रौ० सू० ४. १२. १८ क।
‡ आप० श्रौ० सू० ६. २५. ५, ६।
§ का० श्रौ० सू० ४. १२. १८ ख।
‖ वा० सं ३. ३८. १।

अगमाम। त्वं च 'द्युम्नं' धनं, 'सहः' पराभिभवहेतुभूतं बलं च 'अभ्यायच्छस्व' अभिगमयेत्यर्थः ॥

समिदाधानं विधत्ते— "अथेति *। उपस्थानानन्तर माहवनीयसमीपे उपविश्य 'तृणानि' तृणोपलक्षितानि समिदादीनि 'अपलुम्पति' प्रच्छिद्य तस्मिन्नग्नौ प्रक्षिपेत्। "लुप्ल छेदने †"—इति धातुः ॥ ८ ॥

आगतस्य यजमानस्य गार्हपत्योपस्थानं समन्त्रकं विधत्ते— "अथेति। मन्त्रार्थस्तु ‡,— 'गृहपतिः' गृहाणां पालयिता, गृहपतिना संयुक्तः 'अयं मन्निः' अस्मदीयायाः प्रजायाः 'वसुवित्तमः' वसुनो धनस्य लम्भयितृतम इति। परोक्षकृतः पूर्वोऽर्धः, उत्तरस्तु प्रत्यक्षकृतः। हे 'अग्ने गृहपते!'। "अभिद्युम्न मित्यादि पूर्ववद् योज्यम् ॥ ९ ॥

इत्थं प्रवत्स्यदुपस्थान मागतोपस्थानं च समन्त्रकं विधाय, तयोरमन्त्रकपक्ष मप्याह— "स वा इति §। "इदं वा इत्यादि। इदं खलु लोके दृश्यते,— ब्राह्मणादीना मन्यतमः 'श्रेयान्' श्रेष्ठः पुरुषो 'यस्मिन्' जने 'वसति', सः 'मनुष्यः' 'तं' श्रेयांसम् अनुसृत्य वर्त्तमानः, मदीयम् 'इदं' गृहादिकं 'त्वं गोपाय', 'अहं' प्रवासं करिष्यामीति एवं नियोगतो 'वक्तुं' 'नार्हति'; यद्येवं लोके, तथा 'अस्मिन्' यजमाने 'एते श्रेयांसो वसन्ति'; के पुनस्ते? इति, उच्यते— यजमाने निवसन्तस्ते श्रेयांसः 'अग्नयः' गार्हपत्याद्याः;

---

* का० श्रौ० सू० ४. १२. १६।

† तु० उ० १५१ धा०।

‡ वा० सं० ३. ३६. १।

§ का० श्रौ० सू० ४. १२. २०।

'क उ' नाम 'तान्' 'इदं मे यूयं गोपायत' इत्येवं नियोगेन 'वक्तु मर्हति'। अतः प्रजां मे सख्यं मे पशून् मे पाहीत्येवं नियोगरूपतया मन्त्रो न प्रयोक्तव्य इत्यर्थः ॥ १० ॥

मन्त्रप्रयोगाभावेऽपि प्रजापालनादिविषया बुद्धिस्तेषां स्वय मेव भवतीत्याह— "मनो ह वै देवा इति। 'मनुष्यस्य' 'मनः' यद्विषयं तत् सर्वं 'देवा.' स्वय मेव सर्वतो 'जानन्ति'; अतः 'सः' 'गार्हपत्यः' अपि यजमानस्य मनोगतं स्वय मेव 'वेद' जानाति। किमिति, 'परिदां' परिदानं रक्षणम् उद्दिश्य 'मा' माम् 'इदम्' इदानीम् 'उपागात्' उपगतोऽयं यजमान 'इति'। यस्मादेवं जानाति, तस्मात् स गार्हपत्यस्तूष्णी मेवोपस्थेयः। आहवनीयोपस्थानस्यापि तूष्णीं कर्त्तव्यता माह— "तूष्णी मेवाहवनीय मित्यादिना। योजना तु पूर्ववत् ॥ ११ ॥ ॥ १२ ॥ ॥ १३ ॥

एवं प्रवासादागतस्य यजमानस्याग्निविषयं कर्त्तव्य मुपदिश्य गृहविषय मपि तद् वक्तुं प्रतिजानीते— "अथात इति *। उपचरण मुपाचारस्तं वक्ष्यत इति शेषः। "गृहा मा बिभीतेति † मन्त्रेणोपस्थानं विधित्सुस्तेषां भयसम्भावना माह — "एतद्ध वा इति। 'प्रोषुष.' प्रवासं कृतवतो यजमानात् 'गृहाः' 'समुत्रस्ता भीताः' 'इव' 'भवन्ति'। भीतिकारण माह— "किं मय मिति। 'अयं' यजमानोऽस्मद्विषयं 'किं वदिष्यति?' किं वा करिष्यति?' 'इति' अनेनाभिप्रायेण तेषां भयशङ्का। "स यो ह्येत्यादि। 'सः' खलु यजमान आगत्य तत्र "गृहा मा बिभीतेत्येतन्मन्त्रेण उपस्थानं विना किञ्चिद् वदन् कुर्वन् वा भवति,

---

* का० श्रौ० सू० ४. १२. २१।

† वा० सं० ३. ४१. १।

अस्मद्विषये क्रुद्ध एवासौ वर्त्तत इति। 'तस्मात्' यजमानाद् 'गृहाः' प्रत्रसन्ति' प्रकर्षेणोद्विजन्ते।

अस्तु; गृहाणां त्रासे को दोष इत्यत आह— "तस्येश्वर इति। 'तस्य' यजमानस्य 'कुलं' वंशं 'विच्योढ्योः' विनष्टं कर्त्तुम् 'ईश्वरः'। ईश्वर इति व्यत्ययेनैकवचनम् *। ईश्वराः, गृहाः समर्था भवन्ति।

"अथ यो ह्येत्यादि। यस्तु गृहानुपगत्य किमपि न वदति, न करोति च, मौन मेव केवलं भजते, "गृहा मा बिभीत"—इति मन्त्रेणोपस्थानं वा करोति, 'तं' यजमानं गृहाः 'उपसंश्रयन्ते' उपगच्छन्ति। उपसंश्रयतां तेषा मभिप्राय माह— "न वा इति। 'न' खल्वयं यजमानः 'इह' अस्मिन् समये 'किम्' अपि 'न' 'अवादीत्', 'किम्' अपि च 'न' 'अकरत्' अकार्षीत्; यदि अस्मदपराधः स्यात्, तदा तद्विषयं वदिष्यति, यत् किञ्च करिष्यति च; तस्मात् अस्य यजमानस्य अस्मद्विषयः क्रोधो नास्तीत्यनेनाभिप्रायेण त मुपसंश्रयन्त इत्यर्थः।

"स यदिहापीत्यादि। 'इह' अस्मिन् गृहविषये यद्यपि 'सः' आगतो यजमानोऽपराधश्रवणात् 'क्रुद्धः' 'इव' एव 'स्यात्', 'ततः' तस्मादागमनदिवसात् 'ध्रुवः' अनन्तरदिवसे 'एव' 'तत्' वक्तव्यं कर्त्तव्यं वोपचारनिवृत्तये प्रयुञ्जीत; न त्वागमनदिवसे इत्यर्थः॥

तदुक्तं सूत्रकृता— "गृहा मा बिभीतेति (वा० सं० ३.४१.) गृहानुपतिष्ठते †, क्षेमाय व इति (वा० सं० ३. ४३. २.)

---

* पा० ३. १. ८५ सू० श्रो० वा०।

† 'गृहानुपैति'— इति सुद्रितसूत्रग्रन्थपाठः।

प्रविशति, न हिंस्यात् यज्ञान् कामए ग्वः"—इति * ॥ १४ ॥ ३ [४. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थाध्यायस्य प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्.)

प्रजापतिं वै भूतान्युपासीदन् । प्रजा वै भूतानि व्वि नो धेहि यथा जीवामेति ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद् यज्ञो व्वोऽन्न ममृतत्वं व ऊर्व्वः सुर्य्यो वो ज्योतिरिति * ॥ १ ॥

अथेनं पितरः । प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि-मासि व्वोऽशनए स्वधा वो मनोजवो वश्चन्द्रमा वो ज्योतिरिति † ॥ २ ॥

---

* "तस्मिन् यज्ञागमनदिवसे 'यज्ञान्' यज्ञे भवान् भार्यापुत्रभृत्यादीन् अपराधे सत्यपि 'न हिंस्यात्' अनिष्टविरूपभाषणताडनादिना नोच्चाटयेत्"—इति तत्र या० दे० ।

†, ‡ 'रिति'— इति क, घ, ङ ।

अथैनं मनुष्याः। प्रावृता उपस्थं कृत्वोपासीदंस्तानब्रवीत् सायम्प्रातर्व्वोऽशनं प्रजा वो मृत्युर्व्वोऽग्निर्व्वो ज्योतिरिति * ॥ ३ ॥

अथैनं पशव उपासीदन्। तेभ्यः स्वेष मेव चकार यदैव यूयं कदा च लभाध्वै यदि काले यद्यनाकालेऽथैवाश्नाथेति † तस्मादेते यदैव कदा च लभन्ते यदि काले यद्यनाकालेऽथैवाश्नन्ति ॥ ४ ॥

अथ हैनꣳ शश्वदप्यसुरा उपसेदुरित्याहुः। तेभ्यस्तमश्च मायां च प्रददावस्यहैवासुरमायेतीव पराभूता ह त्वेव ताः प्रजास्ता इमाः प्रजास्तथैवोपजीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात् ॥ ५ ॥

नैव देवा अतिक्रामन्ति। न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद्यो मनुष्याणां मेद्यत्यशुभे मेद्यति व्विद्रुर्च्छति हि न ह्यनाय चन भवत्यनृतꣳ हि कृत्वा मेद्यति तस्मादु सायम्प्रातराश्येव स्यात् स यो हैवं व्विद्वान्त्सायम्प्रातराशी भवति सर्व्वꣳ हैवायुरेति यदु ह किञ्च व्वाचा व्याहरति तदु

---

* 'रिति'— इति क, घ, ङ।

† 'ऽथैवाश्नीतेति'— इति सा०-सम्मत इति डा० वेबरः।

हैव भवत्येतद्वि देवसत्यं गोपायति तद्वैतत्तेजो नाम ब्राह्मणं य एतस्य व्रतꣳ शक्नोति चरितुम् ॥ ६ ॥

तद्वा ऽएतत्। मासि-मास्येव पितृभ्यो ददतो यदैवैष न पुरस्तान्न पश्चाद्दर्शेऽथैभ्यो ददात्येष वै सोमो राजा देवाना मन्नं यच्चन्द्रमाः स एताꣳ रात्रिं क्षीयते तस्मिन् क्षीणे ददाति तथैभ्योऽसमदं करोत्यथ यत्क्षीणे दद्यात् समदꣳ ह कुर्य्यादेवेभ्यश्च पितृभ्यश्च तस्माद् यदैवैष न पुरस्तान्न पश्चाद्दर्शेऽथैभ्यो ददाति ॥ ७ ॥

स वा ऽअपराह्णे ददाति। पूर्व्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणा मपराह्णः पितॄणां तस्मादपराह्णे ददाति ॥ ८ ॥

स जघनेन गार्हपत्यम् *। प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्य्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत् फलीकरोति सकृदु क्षीव पराञ्चः पितरस्तस्मात् सकृत् फलीकरोति ॥ ९ ॥

तꣳ श्रपयति। तस्मिन्नधिश्रित ऽआज्यं प्रत्यान-

---

* 'पत्यं'— इति क, ग, घ, ङ।

	Rs.		
Padumawati, Face. 1–4 @ 2/			
Paricişta Parvan, (Text) Fasc. 1–5 @ /5/ each...	...	1	14
Prāk ta-Paingalam, Fasc. 1–7 @ / / each	...	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ / / each ...	...	1	14
Ditto (English) Part II, Fasc. 1 ...	...		12
Prāk ta Lakşaṇam, (Text) Fasc. 1	...	1	8
Parāśara Smriti, (Text) Vol. I, Fasc. 1–8 Vol. II, Fasc. 1–6 ; Vol. III, Fasc. 1–6 @ /3/ each	...	7	8
Parāśara, Institutes of (English)	...	0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each ...	...	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10 ; II, 1–6 ; III, 1–7 ; IV, 1–6 ; V, 1–8 @ / / each Fasc.... ...	...	12	6
Sānkhya Sūtra V tti, (Text) Fasc. 1–4 @ / / ...	...	1	8
Ditto (English) Fasc. 1–3 @ /12/ each ...	...	2	4
Sraddha Kriya Kaumudi, Fasc. 1–6	...	2	4
Sucruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	...	0	12
Suddhi Kaumudi, Fasc. 1–3	...	1	2
*Taittereya Saṁhitā, (Text) Fasc. 22–45 @ / / each ...	...	9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ / / each ...	...	7	2
Tantra Vartika (English) Fasc. 1–4 @ /12/	...	3	0
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ / / each	...	14	4
Tattvarthadhigama Sutrom, Fasc. 1–3	...	1	2
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1–3 @ / /	...	1	2
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1–8 @ / / each	...	3	0
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/ ...	...	4	8
Vallala Carita, Fasc. 1	...	0	6
Varsa K yā Kaumudi, Fasc. 1–6@ / /	...	2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6 ; Vol. II, Fasc. 1–7 , @ / / each		4	8
Vidhano Parigata, Fasc. 1–7	...	2	10
Vivādaratnākara, (Text) Fasc. 1–7 @ /3/ each	...	2	10
Vrhat Sayambhū Purāṇa, Fasc. 1–6	...	2	4

Tibetan Series.

Dag-Sam Thi Śiñ, Fasc. 1–4 @ 1/ each	...	4	0
Sher-Phyin, Vol. I, Fasc. 1–5 ; Vol. II, Fasc. 1–3 ; Vol. III, Fasc. 1–6 @ 1/ each	...	14	0
Rtogs brjod dpag bkhari Śiñ (Tib. & Sans.) Vol. I, Fasc. 1–5 ; Vol. II. Fasc. 1–5 @ 1/ each	...	10	0

Arabic and Persian Series.

†Álamgírnámah, with Index, (Text) Fasc. 1–13 @ / / each ...	...	4	14
Ál-Muquaddasi (English) Vol. I, Fasc. 1–3 @ /12/ ...	...	2	4
Ain-i-Akbarí, (Text) Fasc. 1–22 @ 1/ each	...	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	...	29	12
Akbarnámah, with Index, (Text) Fasc. 1–37 @ 1/ each ...	...	37	0
Ditto (English) Vol. I, Fasc. 1–8 ; Vol. II, Fasc. @ 1/ each ...		9	0
Arabic Bibliography, by Dr. A. Sprenger	...	0	6
Bádshāhnāmah, with Index, (Text) Fasc. 1–19 @ / / each ...	...	7	2
Catalogue of Arabic Books and Manuscripts 1–2 ...	...	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each ...	...	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	...	21	0
Farhang-i-Rashidí, (Text) Fasc. 1–14 @ 1/ each ...	...	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	...	3	0
Futúh-ush-Shám of Wáqidí, (Text) Fasc. 1–9 @ / / each ...	...	3	6
Ditto of Ázádí, (Text) Fasc. 1–4 @ / / each ...	...	1	8
Haft Ásmán, History of the Persian Masnawi. (Text) Fasc. 1	...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each ...	...	4	8
Iqbálnámah-i-Jahángírí, (Text) Fasc. 1–3 @ / / each ...	...	1	2
Isábah, with Supplement, (Text) 51 Fasc. @ /12/ each ...	...	38	4
Maşír-ul-Umará, Vol. I, Fasc. 1–9 ; Vol. II, Fasc. 1–9 ; Vol. III, Fasc. 1–10 ; Index to Vol. I, Fasc. 10–11 ; Index to Vol. II, Fasc. 10–12 ; Index to Vol. III, Fasc. 11–12 ; @ /6/ each ...	...	13	2
Maghází of Wáqidí, (Text) Fasc. 1–5 @ /6/ each ...	...	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /1/ each ...	Rs	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /1/ each		7	2
Ma'āgir-i-'Ālamgīrī, (Text) Fasc. 1-6 @ /1/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Nigāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each ...		1	8
Riyāzu-s-Salātīn, (Text) Fasc. 1-5 @ /1/ each		1	14
Ditto Ditto (English) Fasc. 1-5		3	12
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /1/ each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /1/ each ...		2	10
Tārīkh-i-Fīrūshāhi, of Shams-i-Sirāj Alif, (Text) Fasc. 1-5 @ /2/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Tuzuk-i-Jahāngīrī, (English) Fasc. 1		0	12
Wis o Rāmīn, (Text) Fasc. 1-5 @ /1/ each		1	14
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /1/ each ...		6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each	20	
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /1/ per No. ; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1845 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N. S., Vol. I, No. 1, 1905, @ 1-8 per No. to members and Rs. 2/ per No. to Non-members.		
5.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
6.	Ajis-ul-Musharrahīn	3	0
7.	Catalogue of Fossil Vertebrata	3	0
8.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each ...	32	0
10.	Jawāmlu-l'ilm ir-riyyāzī, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III, with 8 colored plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar ,, ,, ...	8	0
17.	Kacmīracabdāmṛita, parts I and II @ 1/8/	3	0
18.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
19.	Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

7-9-'05.

BOOKS ARE SUPPLIED BY V.-P.-P.

BIBLIOTHECA INDICA :

A

Collection of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1133.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE CATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. II, FASCICULUS III.

CALCUTTA :

PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1905.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-5 @ /6/		7	8
Aphorisms of Sāṇdilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Acvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2-5; Vol. II. Fasc. 1-5 @ 1/ each		9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1-2		0	12
Baudhayana Srauta Sutra, Fasc. 1-3 @ /6/ each		1	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5		1	14
Bṛhaddēvatā, (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-3		1	2
Çatadusani, Fasc. 1-2		0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-3, Vol III Fasc 1-7,...		6	6
Çatasahasrika prajñāpāramitā, (Text) Part I, Fasc. 1-10 @ /6/ each ...		3	12
*Caturvarga Chintāmaṇi, (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18 Part II, Fasc. 1-10 @ /6/ each; Vol. IV, Fasc. 1-4		21	6
Çlokavartika, (English) Fasc. 1-5		3	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 6-17 @ /6/ each ...		4	8
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /6/ each; Vol 4, Fasc. 1		6	0
*Çri Bhāshyam, (Text) Fasc. 1-3 @ /6/ each		1	2
Dan Kriya Kaumundi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7...		2	10
Ditto Āchārasāra, Vol II, Fasc. 1.		0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kārma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradipodyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-3, @ /6/ each		9	0
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ / / each		1	2
Mārkaṇdeya Purāṇa, (English) Fasc. 1-9 @ /12/ each		6	12
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-19 @ /6/ each		4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ / /		2	4
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /6/ each		3	0
Nityacarapaddhati Fasc. 1-7 (Text) @ /6/		2	10
Nityacarapradiph, Fasc. 1-6		2	4
Nyāyabinduṭikā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6, Vol. II, Fasc. 1-3 @ /./ each		3	6

यत्यग्नौ वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैव पितॄणां तस्मादधिश्रित ऽआज्यं प्रत्यानयति ॥ १० ॥

स उद्धास्याग्नौ हे ऽआहुती जुहोति देवेभ्यः । देवान् वा ऽएष उपावर्त्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत् पितृयज्ञेनेवाचारीत्तदु देवेभ्यो निह्नुते स देवैः प्रमृतोऽथैतत् पितृभ्यो ददाति तस्मादुद्धास्याग्नौ हे ऽआहुती जुहोति देवेभ्यः ॥ ११ ॥

स वा ऽअग्नये च सोमाय च जुहोति । स यदग्नये जुहोति सर्व्वत्र ह्येवाग्निरन्वाभक्तोऽथ यत् सोमाय जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति ॥ १२ ॥

स जुहोति । अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यग्नौ मेक्षण मभ्यादधाति तत् स्विष्टकृद्भाजन मथ दक्षिणेनान्वाहार्य्यपचनꣳ सकृदुल्लिखति तदेदिभाजनꣳ सकृदु ह्येव पराञ्चः पितरस्तस्मात् सकृदुल्लिखति ॥ १३ ॥

अथ परस्तादुल्मुकं निदधाति । स यदुनिधायोल्मुक मथैतत् पितृभ्यो दद्यादसुररक्षसानि हैषा

मेतद्दिमथ्नीरंस्तथो हैतत् पितृणा मसुररक्षसानि न व्विमथ्नते तस्मात् परस्तादुल्मुकं निदधाति ॥ १४ ॥

स निदधाति । ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । पराञ्चो निपुरो ये भरन्त्यग्निष्टांल्लोकात् प्रणुदात्यस्मादित्यग्निर्हि रक्षसा मपहन्ता तस्मादेवं निदधाति ॥ १५ ॥

अथोदपात्र मादायावनेजयति । अमावव्वनेनिक्ष्वेत्येव यजमानस्य पितर मसावव्वनेनिक्ष्वेति पितामह मसावव्वनेनिक्ष्वेति प्रपितामहं तद्यथा-ऽऽशिष्यतेऽभिषिञ्चेदेवं तत् * ॥ १६ ॥

अथ सक्तदाच्छिन्नान्युपमूलं दिनाति भवन्ति । अग्र मिव वै देवानां मध्य मिव मनुष्याणां मूल मिव पितृणां तस्मादुपमूलं दिनानि भवन्ति सक्तदाच्छिन्नानि भवन्ति सक्तु ह्येव पराञ्चः पितरस्तस्मात् सक्तदाच्छिन्नानि भवन्ति ॥ १७ ॥

तानि दक्षिणोपस्तृणाति । तत्र ददाति स वा ऽइति ददातीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्यो-ऽथैवं पितृणां तस्मादिति ददाति ॥ १८ ॥

* 'तत्' – इति घ, ङ ।

सु ददाति। असावेतत्त ऽइत्येव यजमानस्य पित्रे ये च त्वा मन्वित्थ यै क ऽआहुस्तदु तथा न ब्रूयात् स्वयं वै तेषाए सह येषाए सह तस्मादु ब्रूयादसावेतत्त ऽइत्येव यजमानस्य पित्रेऽसावेतत्त ऽइति पितामहायासावेतत्त ऽइति प्रपितामहाय तदुदितः पराग् ददाति सकृदु ह्येव पराञ्चः पितरः ॥ १९ ॥

तत्र जपति। अत्र पितरो मादयध्वं यथाभाग मावृषायध्व मिति यथाभाग मश्नीतेत्येवैतदाह ॥ २० ॥

अथ पराङ् पर्य्यावर्त्तते। तिर-इव वै पितरो मनुष्येभ्यस्तिर इवैतद् भवति स वा ऽआ तृमितीरासीतेत्याहुरेतावान् ह्यसुरिति * स वै मुहूर्त्त मेवासित्वा † ॥ २१ ॥

अथोपपल्यध्य जपति। अमी मदन्त पितरो यथाभाग मावृषायिषतेति यथाभाग माशिषुरित्येवैतदाह ॥ २२ ॥

अथोदपात्र मादायावनेजयति। असाववनेनिक्ष्वेत्येव यजमानस्य पितर मसाववनेनिक्ष्वेति

---

* 'वांह्यसुरिति'— इति क।

† 'त्वा' इति घ, ङ।

पितामह मसावव नेनिक्ष्वेति प्रपितामहं तद्यथा जक्षुषे-ऽभिषिञ्चेदेवं तत् * ॥ २३ ॥

अथ नीवि मुद्वृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीवि मुद्वृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत् करोति षट् कृत्वो नमस्करोति षड् वा ऽऋतव ऋतवः पितरस्तस्मात् षट् कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणाꣳ ह पितर ईशत ऽएषो ऽएतस्याशीः कर्म्मणोऽथावजिघ्रति प्रत्यवधाय पिण्डान्त्स्व यजमानभागोऽग्नौ सकृदाच्छिन्नान्यभ्यादधाति पुनरूल्मुक मपि सृजति ॥ २४ ॥ ४ ॥

॥ इति तृतीयप्रपाठके चतुर्थं ब्राह्मणम् [४. २.] ॥

अथामावास्यायां पिण्डपितृयज्ञस्य † मासि मासि कर्त्तव्यतां विधित्सुस्तदर्थं माख्यायिका माह— "प्रजापतिं वा इति । भवन्ति सङ्गावं प्रतिपद्यन्त इति 'भूतानि' । 'प्रजाः' देवपितृमनुष्याद्या वक्ष्यमाणाः । तासा मभिप्राय माह— "वि न इति । 'नः' अस्मान् 'वि देहि' त्वा मित्थं कुरु — त्वा मित्थं कुरु इत्याज्ञापय ।

---

* 'तत्'— इति घ, ङ ।

† 'प्रथमं पौर्णमास मनुविहितम्, अधुना दर्शस्यानुविधानं करिष्यन् ततः प्राक्कालीनं पिण्डपितृयज्ञ मनुविदधाति"— इति या० दे० (सू० ४. १. १.) ।

'यथा' येन प्रकारेण वयं 'जीवाम' जीवनवन्तो भवेम 'इति' अनेनाभिप्रायेणेत्यर्थः।

"ततो देवा इत्यादि। प्रजापतेरुपासनहेतुत्वेनोपसदनसमये देवादिभिर्व्यक्तलिङ्गं भूतम्, तत्तल्लिङ्गानुसारेण तेषां देवादीनां यज्ञादिविशेषभाक्त्वं प्रजापतिर्जीवनहेतुत्वेनोपदिष्टवानिति प्रवृत्तकार्थः। "यज्ञो वोऽन्न मिति। हे देवाः! 'वः' युष्माकं 'यज्ञः' 'अन्नम्', अतो युष्माक मेव 'अमृतत्वम्'; 'ऊर्क्' बलं च 'वः' युष्माक मेव; 'सूर्यः' एव 'वः' युष्माकं 'ज्योतिः' 'इति'।

एवं यज्ञोपवीतित्वादिलिङ्गयुक्तान् देवान् प्रेष्य, यज्ञादिचतुष्टयं प्रजापतिः तेषां जीवनहेतुत्वेनोपदिष्टवान् ॥ १ ॥

"अथैनं पितर इत्यादि। अत्राप्येवं योज्यम्। "मासिमासीति। प्रतिमासं दर्शेऽनुष्ठीयमानं यत् पिण्डपित्र्ययज्ञाख्यं हविः, तद् 'वः' युष्माकम् 'अशनम्'; 'स्वधा'-कारोऽपि 'वः' युष्माक मसाधारणम्; मनस इव जवः 'मनोजवः', सोऽपि युष्माक मेव। सोमलोकवर्त्तिनां युष्माकं 'चन्द्रमाः' एव ज्योतिः भवत्विति ॥ २ ॥

"अथैनं मनुष्या इत्यादि। 'प्राहुताः' उत्तरवाससा संहताः, कण्ठलम्बितवाससः *, निवीतिन इत्यर्थः। अतएव तैत्तिरीयकम्— "निवीतं मनुष्याणाम्, प्राचीनावीतं पितॄणाम्, उपवीतं देवानाम्"-इति †। "उपस्थं कृत्वेति। यतः प्रजापतेरुपसदनसमये मनुष्यैरुपस्थप्रावरणं मनुष्ठितम्, अतएवेदानीं भुक्त्यादिसमये उपस्थप्रावरणेनोपसीदन्ति। "प्रजा व इति। प्रजायन्त इति 'प्रजाः' पुत्रपौत्रादिरूपाः। "उपसर्गे च सञ्ज्ञायाम्"—

* 'केवलवीतवाससः'— इति च। † तै० सं० २. ५. ११. १।

इति * ङ-प्रत्ययः। "मृत्युर्व इति। देहारम्भकर्मोपजनितं मरणं 'वः' युष्माक मसाधारणो धर्म इत्यर्थः ॥ ३ ॥

गवादिपशूना मपि प्रजापत्युपसदनं, तत्कृतजीवनक्षयजनितं मरणं. तदशनकृप्तिमाह— "अथेनं पशव इत्यादिना। "स्वेष मेवेति। यथा देवपितृमनुष्याणां यज्ञादिरूपां तत्कृप्तिं चकार, तथैव गवादिपशूना मपि तदुचिताहारकृप्तिं कृतवानित्यर्थः। तत्प्रकारं दर्शयति— "यदेवेति। गवाद्याः पशवो यूयं 'यदा कदा च' काले अकाले वा तृणादिरूप माहारजातं 'लभाध्वै', 'अथ' अनन्तर मेव तत् लब्धं तृणाद्याहारजातम् 'अश्नाथ'। 'इति'-शब्दः प्रजापतिवाक्यपरिसमाप्तौ। "तस्मादेत इत्यादि। यस्मादेवं प्रजापतेः सकाशात् लब्धवराः, 'तस्मात्' 'एते' गवाद्याः पशवः तृणाद्याहारं 'यदा एव कदा च लभन्ते', 'काले' वा 'अकाले' वा, 'अथ' अनन्तर मेव तद् भक्षयन्ति ; न त्वस्मदादिवत् सायम्प्रातरादिकालविशेष मपेक्षन्त इत्यर्थः ॥ ४ ॥

अथासुरकृतं प्रजापतावुपसदनं परोक्षेण निर्दिशति— "अथ हैन मिति। 'शश्वद्' बहुकृत्वः 'असुरा अपि' 'उपसेदुः' उपसदनं चक्रुरित्यभिज्ञाः कथयन्ति।

एवं पितृमनुष्यादीना मुपसदन मिव असुरकृत मुपसदनं जिज्ञासिषन्नाह— "तेभ्यस्तमश्च मायाञ्चेति। परेषां दृष्ट्याच्छादकं † तमः, अघटितघटनशक्तिर्माया ‡। तदुभयं यस्मात् प्रजापतिरसुरेभ्यो दत्तवान्, तस्मात् इदानी मपि 'असुरमाया' असुरस्य स्वभूता मायेत्यस्तिव्यवहारः। अत एव ते मायाविन

* पा० सू० ३. २. ६६। † 'दृष्ट्याच्छादकसामर्थ्यं'— इति च।
‡ 'अघटितघटनशक्तिर्माया'— इति च।

इत्याख्यायन्ते। "पराभूता ह त्वेवेति। 'ताः' असुर्याः 'प्रजाः' देवादिवदन्नादीनां जीवनहेतूनां प्रजापतिसकाशादलाभात् केवलं तमोमायाभ्यां ग्रस्ताः सत्यः पराभवं प्राप्ता इत्यर्थः। इत्थं प्रजापतिना देवादिभ्यः कल्पितां वृत्तिं प्रदर्श्य, तदनतिक्रमेण तेषां जीवनं प्रतिपादयति— "ता इति। 'प्रजाः' प्रागनुक्रान्ताः 'इमाः' देवपितृमनुष्याद्याः, 'यथा' येन प्रकारेण "यज्ञो वोऽवतम्" —इत्यादिना वृत्तिं प्रजापतिः कल्पितवान्, 'तथैव' व्यवस्थितां वृत्तिं नियमेन देवाद्या उपजीवन्ति ॥ ५ ॥

"नैव देवा इति। न तु ते प्रजापतेराज्ञां मतिक्रामन्ति। अथ मनुष्याणां मरणे नियमं विधित्सुरनियमप्रमक्तिं दर्शयितुं प्रजापतिकृतेरतिक्रम मुपन्यस्यति— "मनुष्या एवेति। 'एके' च नाम 'मनुष्याः' अज्ञानवशात् प्रजापतिना कल्पितां प्रागुदाहृतां वृत्तिम् 'अतिक्रामन्ति'। यस्मादेवं 'तस्मात्' मनुष्याणां मध्ये 'यः' 'मेद्यति', स्निह्यति, पुष्यतीति यावत्। "ञि मिदा स्नेहने"—इति * धातुः। स च मेद्यन्नु मनुष्यो धनादिजनितमदवशेन 'अशुभे' नरकपाताद्यनर्थहेतुभूते पापे 'मेद्यति' स्निह्यति, तात्पर्येण वर्त्तते। तस्मात् पापात् सः 'विहृर्च्छति' अधः पतति। "हुर्च्छा कौटिल्ये"—इति † धातुः। "अयनाय चनेति। 'चन'-शब्दोऽप्यर्थे। पुण्यलोकगमनायापि 'न हि भवति'। कुत इत्यत आह— "अनृतं हीति। यस्मात् 'अनृतम्' असत्यम्, प्रतिषिद्धं 'कृत्वा' 'मेद्यति' प्रसन्नो भवति। इत्थं प्रजापत्याज्ञातिक्रमेणानियमदर्शनात् मनुष्येषु नियमापेक्षा विद्यत इति तात्पर्यार्थः।

औपेद्धातिकं नियमविधिं दर्शयति— "तस्मादिति। साय-

* भ्वा० आ० ७४३ धा०। † भ्वा० प० २४१ धा०।

म्मातरश्नितं शीलमस्येति 'मायम्मातराशी'। "सुप्यजातौ णिनिस्ताच्छील्ये"-इति * णिनिः। 'एव'-कारेण अन्तरा भोजनं निवार्यते। विहित मनूद्य प्रशंसति— "स यो ह्येव मिति। "यदु ह किञ्चेति उक्तभोजनकालनियमवान् यदपि किञ्चिद् 'वाचः' 'व्याहरति' भाषते, तथैव यथार्थं भवति। 'हि' यस्माद्, असौ 'एतत्' 'देवसत्यं' देवेन प्रजापतिना कल्पितं सत्यं 'गोपायति' रक्षति। "गुपू रक्षणे"-इति † धातुः। "गुपूधूपविच्छि"-इत्यायः प्रत्ययः ‡। 'तद्' तदेव सत्यं 'तेजो नाम' 'तेजः'-शब्दवाच्यतया प्रसिद्धम्। 'ब्राह्मणम्' ब्राह्मणसम्बन्धिरूपम्। कः पुनरसावीदृग्विधं देवसत्यं गोपायतीति तं माह— "य एतस्येति। 'एतस्य' प्रजापतिरूपचरितरूपं 'व्रतं' 'चरितुं' 'यः' यजमानः 'शक्नोति', स देवसत्यं गोपायतीति सम्बन्धः॥ ६॥

इत्थं पिण्डपितृयज्ञस्य मासि मासि कर्त्तव्यतां "मासि मासि वोऽन्नं स्वधा वः"-इत्यादिना प्रजापतिवाक्येन प्रतिपाद्येदानीं तं विधत्ते— "तद्वा एतदिति। 'मासि मासि' प्रतिमासम्। "नित्यवीप्सयोः"-इति § द्विर्वचनम्। जीवतां हि मनुष्याणां सायम्प्रातरशनं विहितम्, मरणादूर्द्धं वस्वादिरूपेभ्यः पितृभावं ‖ प्राप्तेभ्यस्तेभ्यो मासि मास्येव पितृयज्ञरूप मशनं दातव्य मित्यभिप्रायः ¶। स च पितृयज्ञोऽमावास्याया मेव कर्त्तव्यो नान्यस्यां तिथाविति प्रतिपादयति— "यदैवैष इति। 'यदा' यस्मिन्नेव काले

---

* पा० सू० ३. २. ७८। † भा० प० ३६५ धा०।
‡ पा० सू० ३. १. २८। § पा० सू० ८. १. ४।
‖ 'वस्वादिरूपपितृभावं'— इति च।
¶ "वसून् वदन्ति वै पितॄन् रुद्रांश्चैव पितामहान्। प्रपितामहांस्त्वादित्यान् श्रुतिरेषा सनातनी"— इति म० सं० २. २८४।

'एषः' इन्दुः 'न' 'पुरस्तात्' पूर्वस्यां दिशि, 'पश्चात्' पश्चिमायां मपि 'न' 'दृश्यते', 'अथ' अनन्तर मेव 'एभ्यः' पितृभ्यः पिण्डान् दद्यात्।

पुरस्तात् पश्चात् न दृष्टे इत्येतदुपपादयति— "एष वा इति। 'यत्' यः 'चन्द्रमाः' नभसि दृश्यते, 'एषः' खलु 'राजा' राजमानः 'सोमः' 'देवाना मन्नम्' इति; "य मादित्या अण्शु मप्यायय॰ति"—इति मन्त्रवर्णात् *। 'सः' वरुणः 'एताम्' अमावस्यादिवसमस्बन्धिनीं 'रात्रिं' प्राप्य जीर्णः उदेति। तस्मिन् जीर्णे सति यः पितृभ्यो हविर्दद्यात्, तथा च सति एभ्यः पितृभ्यो देवैः साकम् 'असमदं' कलहं न 'करोति'। 'अथ' 'यद्' यदि 'अक्षीणे' दृश्यमाने तस्मिन् सोमे चतुर्दश्यां प्रतिपदि वा पितृभ्यो हविर्दद्यात्, तदा देवेभ्यः पितृभ्यश्च कलहं कुर्यात्; सोमस्य देवाना मन्नत्वेन भोक्तुं देवैरपि सन्निधानात् दीयमानहविर्विषयः कलहो भवेदित्यर्थः। "तस्मादिति, निगमनम् ॥ ७ ॥

अपराह्णकालं विधायोपपादयति— "स वा इति। अह्नः पञ्चधाविभक्तस्य चतुर्थो भागोऽपराह्णः, तस्मिन् पिण्डपितृयज्ञो ऽनुष्ठेयः। अत एव सूत्रयते कात्यायनेन— "अपराह्णे पिण्डपितृयज्ञः, चन्द्रादर्शनेऽमावास्याया मिति † ॥ ८ ॥

तत्प्रकार माह— "स जघनेन गार्हपत्य मिति। गार्हपत्यस्य पश्चिमदेशे व्रीहिपूर्णस्य निर्वापार्थस्य शकटस्य दक्षिणतः आसीनः

* तै० सं० २. ४. १४. २।

† का० श्रौ० सू० ४. १. १। 'पिण्डपितृयज्ञ इति वक्ष्यमाणस्य कर्मणः सञ्ज्ञा; सा च पिण्डदानपदार्थस्यैवार्थानुगमात् पिण्डैः पितृणां यज्ञः पिण्डपितृयज्ञ इति, अतश्च होमजपादयस्तद्बहिरङ्गम्"— इत्यादि (या० दे०) व्याख्यानञ्च तत्र द्रष्टव्यम्। आश्व० श्रौ० सू० २. ६. १; गृ० सू० २. ५; शाङ्ख० श्रौ० सू० ४. ३. १; ५. १३।

प्राचीनावीती एवं * पितृयज्ञार्थं हविर्गृह्णीयात्। मन्त्रस्याविहितत्वात् तूष्णी मेवैतद् ग्रहणम्। अत एव सूचितञ्च— "अपरेण गार्हपत्यं चरु मपूर्णं स्रुचं वा तूष्णीं गृहीत्वा"—इति †।

चतुर्थं गृहीतानां व्रीहीणा मवहननं विधाय प्रशंसति— "स तत एवेत्यादिना ‡। 'ततः' तस्मात् हविर्ग्रहणस्थानात्। "उत्तरेणेति। दक्षिणाग्नेरदूरेण उत्तरत इत्यर्थः। "एनबन्यतरस्याम्"—इत्येनप् §। "एनपा द्वितीया"—इति ‖ द्वितीया। "दक्षिणा तिष्ठन्निति। दक्षिणतस्तिष्ठन्। "दक्षिणादाच्"—इति ¶ आच् प्रत्ययः।

ऐष्टिकहविष इव फलीकरणस्य त्वित्वं प्रसक्त मपवदितुं सकृत्त्वं विधत्ते— "सकृदिति **। एकवार मेव फलीकुर्यात्, न तु त्रिः। तत्र हेतु माह— "सकृदु ह्येवेति। 'हि' यस्मादु 'सकृत्' एकवार मेव 'पराञ्चः' पराञ्चो गताः प्रेताः 'पितरः' अभवन्, न तेषां पुनरावृत्तिरस्ति, अतस्तेषां सकृत्त्व ममाधारणो धर्मः ॥ ८ ॥

अपरं विधत्ते— "त मिति ††। सकृत्फलीकृतांस्तण्डुलान् स्थाल्यां प्रक्षिप्य, तं चरुं दक्षिणाग्नौ अपयेदित्यर्थः। उदासनात् प्रागेव तस्मिंश्चरौ अभिघारणं विधत्ते— "तस्मिन्निति। 'अधिश्रिते' अग्नेरुपरि स्थापिते 'तस्मिन्' (एतस्मिन् ‡‡) चरौ पक्के सति 'आज्यं' 'प्रत्यानयति' प्रतिक्षिपति। तदेतदुपपादयति—"अग्नौ वा

---

* 'एतं'— इति च। † का० श्रौ० सू० ४. १. ५ क।
‡ का० श्रौ० सू० ४. १. ५ ख। § पा० सू० ५. ३. ३५।
‖ पा० सू० २. ३. ३१। ¶ पा० सू० ५. ३. ३६।
** का० श्रौ० सू० ४. १. ६। †† का० श्रौ० सू० ४. १. ७ क।
‡‡ नास्त्येतत् पदं च-पुस्तकादन्यत्र।

इति । देवार्थं यदाज्यम्, तत् 'अग्नौ' 'जुह्वति' यजमानाः । देवेभ्यो यदाज्यं देयं तत् होमेनैव दीयत इत्यर्थः । "उद्धरन्तीति । 'मनुष्येभ्यः' देयं यत् (आज्यम्*), तत् तेषां पुरस्तात् भोजनपात्रेषु 'उद्धरन्ति' उद्धृत्य पुरतः स्थापयन्तीत्यर्थः । "अथैव मिति । 'अथ'-शब्द उत्तरवैलक्षण्ये । पितॄणां तु एव मधिश्रितावस्थाया मेव चरावाज्य मवनेय मिति यथोक्तम्, एव मेव पितृभ्य आज्यं देयम्, न त्वग्नौ होमेनापि पुरस्तादुद्धरणेनापि । "तस्मादिति, प्रतिज्ञातनिगमनम् ॥ १० ॥

अथ तस्य चोरुदासनपूर्वकं होमं विधत्ते— "स उदास्येति । उदासनानन्तरं 'देवेभ्यः' देवार्थम् 'अग्नौ' 'हे आहुती' जुहुयात् । यद्यपि 'अग्नये', 'सोमाय' इति द्वयोरेवाज्य होमः, तथापि देवेभ्य इति सामान्याभिप्रायेण बहुवचनम्। अत एव सूत्रयते— "अपयित्वाग्निचार्यादाय मेक्षणेन जुहोति अग्नय इति सोमायेति च"—इति † ॥

ननु पित्रर्थेन हविषा देवेभ्यो होमोऽनुपपन्न इत्याशङ्क्योपपादयति—"देवान् वा इत्यादिना । 'यः आहिताग्निः', 'यः' च दर्शपूर्णमासयाजी 'एषः' यजमानो 'देवान्' उपावर्त्तते' उपाकृतः, अतस्तेभ्यो देवेभ्यो हविरवश्यं देय मिति भावः । "अथेतदिति । 'अथ'-शब्दोऽत्र वैपरीत्यद्योतकः । 'एतत्' एतर्हि दैविकं कर्म परित्यज्य पित्र्येण कर्मणा 'अचारीत्' पित्र्यं कृतवानित्यर्थः । तथा सत्यन्यदीयकर्मानुष्ठानेन देवानां कोपः स्यात्, अतस्तन्निवृत्तये पित्र्ये कर्मणि 'देवेभ्यः' होमेन तदपराधं 'निर्ऋते' अपनयति, प्रीणयति वा । एवं होमेन तोषितैः 'देवैः' 'प्रसृतः' अनु-

---

* नास्त्येतत् पदं ङ-पुस्तकादन्यत्र ।

† का० श्रौ० सू० ४. १. ७ क, ७ ख ।

ज्ञातः 'सः' यजमानः 'अथ' अनन्तर मेव 'एतत्' हविः 'पितृभ्यः' दद्यात्। उक्त मर्थं निगमयति— "तस्मादिति ॥ ११ ॥

देवेभ्य इति साधारण्येनोक्तं विशिनष्टि— "स वा इति। इतरान् देवान् परित्यज्य अग्नेः सोमस्य च हवने कारण माह— "स यदग्नय इति। 'सर्वत्र' देवेषु पितृषु च सर्वेषु कर्मसु 'अग्निः' 'अन्वाभक्तः' अनुप्रविष्टो भवति; न ह्यग्नि मन्तरेण दैविकं पित्र्यं वा किञ्चित् कर्म निष्पद्यते, अतोऽग्नेर्हौमो युक्त इत्यर्थः। "पितृदेवत्यो वा इत्यादि। यतः "चन्द्रमा वै ज्योतिः" - इति * प्रजापतिः पितॄणां ज्योतिश्चेन चन्द्रमसं कल्पितवान्, अतः स 'सोम.' पितृदेवत्यः। अत एव धूमादिमार्गेण पितॄणां चन्द्रलोकप्राप्तिः समाम्नाता—"चन्द्रमस मेव ते सर्वे गच्छन्ति"-इति †। यत एवं अतः पित्र्ये कर्मणि सोमाय युक्त मित्यर्थः ॥ १२ ॥

उक्तदेवतयोर्हौममन्त्रौ ‡ विधत्ते— "स जुहोतीति। 'कव्यं' पित्र्यं हविः, तद् वहति प्रापयतीति 'कव्यवाहनः'। "कव्यपुरीषपुरीष्येषु"-इति § जुट्। एतच्च पितॄणा मग्नेरसाधारणं नामधेयम्। अत एवाम्नायते— "त्रयो वा अग्नयो हव्यवाहनो देवानां, कव्यवाहनः पितॄणां, महराजा असुराणाम्"-इति ‖। 'कव्यवाहनाय अग्नये' इदं हविः 'स्वाहा' सुहुत मस्तु। पितृगणैर्युक्ताय 'सोमाय' इदं हविः 'स्वाहा' सुहुत मस्तु ॥

मेक्षणस्याग्नौ प्रक्षेपं विधत्ते— "अग्नाविति ¶। चरु मालोड्य

---

* १६० पृ० १५ पं० द्रष्टव्यम्। † छा० उप० ५. १०. ५।
‡ तौ च मन्त्रौ वा० सं० ३. २६. १, २।
§ पा० सू० ३. २. ६५। ‖ तै० सं० २. ५. ८. ११।
¶ का० श्रौ० सू० ४. १. ८ क।

येन काष्ठेन गृहीत्वा ह्रियते, तत् 'मेक्षणम्'। 'तत्' अभ्यादानं 'स्विष्टकृद्भाजनम्' अस्य होमस्य स्विष्टकृत्स्थानीयम् ॥

अथ पिण्डप्रदानाय स्थानविशेषं तत्संस्कारञ्च विधाय प्रशंसति— "अथ दक्षिणेनेति *। 'अथ' शब्दोऽत्रान्यप्रतिषेधार्थः। दक्षिणाग्नेरदूरेण स्फ्येन 'सकृदुल्लिखति' एकयत्नेन दक्षिणप्राचीं लेखां कुर्यात् †। 'तत्' उल्लिखितं स्थलं 'वेदिभाजनं' वेदिस्थानीयम्, तत्कार्यकरमित्यर्थः। "सकृदु ह्येवेत्यादि, उक्तार्थम् ॥ १३ ॥

उल्लिखितप्रदेशस्यान्ते अग्नेर्निधानं विधत्ते— "अथ परस्तादिति। 'परस्तात्' परस्मिन् विप्रकृष्टे, पर्यन्ते इत्यर्थः। विपक्षे बाधविधानपुरस्सर मेतदुलमुकनिधान मुपपादयति— "स यदिति ‡। सुरविरोधीनि रक्षांसि 'असुररक्षसानि', 'एषां' पितॄणां स्वभूतम् 'एतत्' पिण्डरूपं हविः 'विमथ्नीरन्' अपहरेयुः। "तथो हेति। तथा चोलमुकनिधाने सतीत्यर्थः। 'न विमथ्नते' नापहरन्ति। "मन्थ विलोडने"—इति § धातुः ॥ १४ ॥

विहिते उलमुकनिधाने मन्त्रं विधत्ते— "स निदधातीति। यदेतदुलमुकनिधानं विहितम्, तत् "ये रूपाणि"—इत्यनेन ॥ मन्त्रेण कर्त्तव्य मित्यर्थः। मन्त्रार्थस्तु,— 'असुराः' मायावशात् पितॄणां रूपाणि 'प्रतिमुञ्चमानाः' धारयन्तः पित्रर्थं दीयमानया 'स्वधया' सह 'चरन्ति' वर्त्तन्ते। 'ये' च पूर्वं 'परापुरः निपुरः' पूरणपिण्डदानेन युक्ताः सन्तो 'भरन्ति' हविर्हरन्ति। परापुरो

---

* का० श्रौ० सू० ४. १. ८ ख।

† तन्मन्त्रस्तु वा० सं० २. २६. ३।

‡ का० श्रौ० सू० ४. १. ६। § भ्वा० प० ४२ धा०।

॥ वा० सं० २. ३०. १; मा० म० ब्रा० २. ३. ४।

निपुर इति, परा-नि-पूर्वात् पृणोतेः सम्यदादिलक्षणे भावे क्विपि बहुव्रीहिः ; स च धातुरत्र पिण्डविषये दाने वर्त्तते । अत एवोक्तं माध्वलायनेन— "तस्यां पिण्डान् निपृणीयात् पराचीनपाणिः"—इति * । पुत्रपदनिर्वचनप्रसङ्गे यास्केनाप्युक्तम्— "पुत्रः, पुरु त्रायते ; निपरणाद्वा, पुं नरकं ततस्त्रायत इति वा"—इति † । यद्वा 'पराः' प्रभूताः 'पुरः' शरीराणि येषां ते 'परापुरः' ; 'नि' निकृष्टा अल्पाः 'पुरः' शरीराणि येषां ते 'निपुरः' ; महाकायाः अल्पकाया इत्यर्थः । एवं प्रच्छन्नवेषा असुरा ये सन्ति, 'तान्' 'अस्मात्' 'लोकात्' पिण्डपितृयज्ञस्थानात् 'अग्निः' 'प्रणुदाति' । लेट्यडागमः ‡, प्रणुदत्वित्यर्थः । रक्षोनिहन्तृत्वं मन्त्रैः प्रसिद्धमिति व्याचष्टे— "अग्निर्हीति । 'एवं निदधाति' अग्निशब्दोपेतेन मन्त्रेण निदध्यादित्यर्थः ॥ १५ ॥

पिण्डदानस्य प्राचीनावीतित्वेनावनेजनं विधत्ते— "अथोदपात्रमिति § । 'उदपात्रम्' उदकपूर्णं पात्रम् । "एकहलादौ पूरयितव्येऽन्यतरस्याम्"— इत्युदकशब्दस्योदभावः ‖ । "असाववनेनिक्ष्व"—इत्यवनेजनमन्त्रः ¶ । तत्रादशब्दस्थाने सम्बुद्ध्यन्तं पित्रादीनां यथाक्रमं नाम निर्देष्टव्यम्,— हे यज्ञशर्म्मन् ! मम पितः ! 'अवनेनिक्ष्व' दास्यमानं पिण्डं भोक्तुम् आत्मीयौ पाणी शोधयेति मन्त्रार्थः । "णिजिर् शौचपोषणयोः"—इति ** धातुः । एवं पितामहप्रपितामहविषयौ मन्त्रौ योज्यौ ।

---

* आश्व० श्रौ० सू० २. ६. १५ । † निरु० २. ३. २ ।
‡ पा० सू० ३. ४. ६४ द्रष्टव्यम् ।
§ का० श्रौ० सू० ४. १. १० । ‖ पा० सू० ६. ३. ५६ ।
¶ इदमेव ब्राह्मणे समाम्नात इति प्रैषः । ** जु० उ० ११ धा० ।

अस्यावनेजनस्य पिण्डदानात् प्राक्कर्त्तव्यतां दृष्टान्तेनोपपादयति— "तद्यथेति। 'अग्रिष्यते' भोक्ष्यमाणाय पुरुषाय यथा 'अभिषिञ्चेत्' उदकं हस्ते ददाति, 'एवम्' एव तत् पितृणा मवनेजन मित्यर्थः ॥ १६ ॥

अथ तस्मिन्नुल्लिखिते स्थाने बर्हिः स्तरितुं तत्सम्पादनं विधत्ते —"अथ सकृदाच्छिन्नानीति *। एकयत्रेन छिन्नानि। 'उपमूलं' मूलसमीपे। 'दिनानि' खण्डितानि बर्हींषि पितृयज्ञार्थानि 'भवन्ति', एवङ्गुणविशिष्टानि बर्हींष्याहर्त्तव्यानीत्यर्थः। मूलसमीपे छेदन मुपपादयति—"अग्र मिवेत्यादिना। अत एव तैत्तिरीयकेऽप्याम्नायते— "यत् पुरुषि दिनं तद् देवानां †, यदन्तरा तन्मनुष्याणां, यत् समूलं तत् पितृणाम्" इति ‡। छेदनगतं सकृत्त्व मनूद्य स्तौति—"सकृदाच्छिन्नानीति ॥ १७ ॥

बर्हिषः स्तरणं विधत्ते— "तानीति। 'दक्षिणा' दक्षिणतः, उल्लिखितप्रदेशे 'तानि' बर्हींषि 'उपस्तृणाति'। तथैव कात्यायनेन सूत्रितम्—"उपमूलं सकृदाच्छिन्नानि लेखायां कृत्वा"— इति §। पिण्डदानं विधत्ते— "तत्रेति। 'तत्र' तस्मिन् बर्हिषा मास्तीर्णे देशे पिण्डान् दद्यादित्यर्थः। तत्र प्रकारविशेष मभिनयेन विधत्ते— "स वा इतीति। 'इति' अनेन प्रकारेण अङ्गुष्ठतर्जन्योर्मध्येन पित्र्याणं तीर्थेनेत्यर्थः। देवमनुष्यसम्पदानके दाने तद्विपरीत्यमभिनयेनोपपादयति— "इतीव वै देवेभ्य इति। अनेन खलु

* का० श्रौ० सू० ४. १. १२।

† "पुरुषि पर्वसन्धौ, दिनं छिन्नम्, तादृग्बर्हिरहिंसितत्वात् देवानां प्रियम्"— इति च तै० सं० १. ६. ८. ५ सा० भा०।

‡ तै० ब्रा० १. ६. ८. ५, ६, ७। § का० श्रौ० सू० ४. १. १२ क।

प्रकारेण अङ्गुल्यग्रेण देवतीर्थेन 'देवेभ्यः' हवींषि 'जुह्वति'। 'मनुष्येभ्यः' तु यथायोगं भोक्तव्य मन्नम् 'उद्धरन्ति' उद्धृत्य पात्रान्तरे स्थापयन्ति। न तु तत्र देवपित्रादितीर्थविशेषोऽपेक्षितः। "अथैव मिति। 'अथ'-शब्द उक्तवैलक्षण्यद्योतनार्थः। देवमनुष्यवैलक्षण्येन एव मुक्तेन पित्र्येण तीर्थेन पितॄणां सम्बन्धि हविर्देय मित्यर्थः। "तस्मादिति। प्रतिपादितार्थनिगमनम्॥ १८॥

पितृपितामहप्रपितामहानां विहिते पिण्डदाने मन्त्रान् विधत्ते— "स ददातीत्यादिना। "असावेतत्ते"-इति पिण्डदानमन्त्रः *। तत्र 'असौ'-इत्यस्य स्थाने पित्रादीनां नाम सम्बुध्यन्तं निर्देष्टव्यम्। "हे यज्ञशर्मन्! 'एतत्' पिण्डरूपं हविः 'ते' तुभ्यं मया दीयत इति मन्त्रार्थः। "ये च त्वा मनु"-इति † वक्ष्यमाणशाखान्तराभिमतमन्त्रशेषनिरासार्थः 'एव'-कारः ‡। अनेन च मन्त्रेण प्रथमं यजमानस्य पित्रे पिण्डं दद्यात्; अनेनैव पितामहप्रपितामहयोरपि पिण्डदानम्। तत्रैकीयं मत मुपन्यस्य दूषयति— "ये च त्वेति। तस्य च मन्त्रशेषस्याय मर्थः;— हे पितः! 'त्वाम्' 'अनु'-सृत्य 'ये' वर्त्तन्ते, तेभ्यश्चायं पिण्डः त्वयि करोत्विति। "स्वयं वा इत्यादि। पित्रनन्तरभाविनां यच्छब्दनिर्दिष्टानां तेषां 'स्वयं' पिण्डदाता सहभावी भवति। तथा य एव एषां स्वयम् [सह] भावी, तेभ्यः पिण्डदाने स्वात्मने पिण्डं दत्तवान् भवति; अतस्तत्प्रतिपादको "ये च त्वा मनु"-इति मन्त्रभागो न वक्तव्य इत्यर्थः।

---

* का० श्रौ० सू० ४. १. ११ ख। इहैव ब्राह्मणे समाम्नातः।

† "ये च त्वा मन्विति चैके"— इति का० श्रौ० सू० ४. १. १२।

‡ "असावेतत्त इत्येव"— इदत्र द्रष्टव्यम् (१६५ पृ० १ पं०)।

प्रथमं पक्षं निगमयति— "तस्मादिति। "तद्यदित इत्यादि। अनेन हि क्रमेण ते पितृत्वं प्राप्ताः— प्रथमं प्रपितामहः, पश्चात् पितामहः, ततः पितेति; इमं क्रमं परित्यज्य पिण्डदाने 'इतः' पितृत आरभ्य प्रपितामहान्तं 'पराक्' पराचीनं पिण्डान् दद्यात्; यतस्ते पितरः सक्तुत्वपराङ्मुखधर्मयुक्ता इत्यर्थः ॥ १९ ॥

पिण्डदानानन्तरं मन्त्रजपं विधत्ते— "तत्र जपतीति *। तद्गतं किञ्चित् पदं व्याचष्टे— "अत्रेति। मन्त्रार्थस्तु,— 'अत्र' अस्मिन् देशे हे 'पितरः!' 'मादयध्वम्' तृप्ता भवत, तदर्थं च 'यथाभागं' स्वं स्वं भाग मनतिक्रम्य मया दत्तान् पिण्डान् 'आहषायध्वम्' अश्नीतेति। हषायध्व मित्यस्यैतदर्थपरतां श्रुतिः स्वयं व्याचष्टे— "यथाभाग मश्नीतेत्येवैतदाहेति † ॥ २० ॥

जपानन्तरं परागावर्त्तनं विधत्ते— "अथ पराङ् पर्यावर्त्तत इति। पराङ्मुखः सन् पिण्डाभिमुख्यं विहाय ‡ पर्यावर्त्तते-त्यर्थः। एतदुपपादयति— "तिर इवेति। पितरो हि मनुष्येभ्यः तिरोभूताः; अन्तर्धानशक्तियोगात्। अतः पितॄणां तिरोधानेन भवितव्यम्। एतर्हि पिण्डान्तरपर्यावर्त्तमाने सति तेषां 'तिर इव' तिरोधान मिव भवति। पर्यावर्त्तनकालस्य परिमाणं विधत्ते— "स वा इति §। स खलु परावर्त्तमानः 'आ तमितोः' निरुद्धश्वासगतेरात्मनो यावत् तमनं ग्लानिः भवति, तावत् 'आसीत इति' केचित् 'आहुः' प्रतिपादयन्ति। "तमु ग्लानौ"—इत्यस्मात् ॥ "भावलक्षणे स्थेण्क्रुञ्वदिचरिहृतमि-

---

* का० श्रौ० सू० ४. १. १३। † वा० सं० २. ३१. १।
‡ 'विच्छाय'— इति च। § का० श्रौ० सू० ४. १. १३।
॥ दि० प० ६५ धा०।

जनिभ्यस्तोसुन्"-इति * तोसुन् प्रत्ययः। तत्रोपपत्तिं माह— "एतावानिति। एतावत्परिमाणो भवति। तस्मादेतावन्तं काल मासीतेति। पक्षान्तरं माह—"स वा इति। 'सः' खलु 'मुहूर्त्त' द्वादशक्षणात्मको यो मुहूर्त्तसञ्ज्ञकः कालः, तावत्पर्यन्तम् 'एव' आसीतेत्यर्थः। एवकारः पूर्वोक्तपक्षव्यवच्छेदार्थः। 'आसित्वा'-इति 'क्त्वा'-प्रत्ययस्तु वक्ष्यमाणक्रियापेक्षः॥ २१ ॥

उक्तकालानन्तरं पर्यावर्त्तमानस्य मन्त्रजपं विधत्ते— "अथेति †। 'उपपल्वय्य' पिण्डसमीपं परिप्राप्य। परिपूर्वादयतेर्ल्यपि "उपसर्गस्यायतौ"-इति ‡ लत्वम्। "अमीमदन्तेति §। मन्त्रं जपेत्। अर्थस्तु,— 'पितरः' पिण्डपितृदेवताः! 'अमीमदन्त' तृप्ता अभूवन्। तृप्त्यर्थान्मदयतेर्ण्यन्तात् लुङि चङि रूपम्। ते च 'यथाभागं' स्वं स्वं भागं मनतिक्रम्य 'आह्वायिषत' अभुक्तत। तत्र 'आह्वायिषत'-इति पदस्य विवक्षितमर्थं माह—"यथेति। आङ्पूर्वो ह्वयतिरभ्यवहारे वर्त्तते, तस्मान्नुङि बहुवचनान्त मेतत् पदम्, अतः 'आशिषुः' 'इति' तस्य व्याख्यानम्। "अशू भोजने ‖"-इत्यस्मान्नुङि बहुवचने आशिषुरिति रूपम्॥ २२ ॥

पिण्डदानात् प्रागिवेदानीमपि पित्रादीना मुदकावनेजनं विधत्ते— "अथोदपात्र मिति ¶। "असाववनेनिक्ष्व"-इति ** तन्मन्त्रः। तत्र त्रिष्वपि मन्त्रेषु 'असौ'-इत्यस्य स्थाने पित्रा-

---

* पा० सू० ३. ४. १६।
† का० श्रौ० सू० ४. १. १४।
‡ पा० सू० ८. २. १६।
§ वा० सं० २, ३१. २।
‖ क्रया० प० ६० धा०।
¶ का० श्रौ० सू० ४. १. १५ क।
** एषोऽपि मन्त्र इत्थेव ब्राह्मणे आम्नातः (१६५ ए० १६ पं०)।

दीनां नामानि क्रमेण निर्दिशेत्। अर्घस्तु प्रागेव दर्शितः *। एतदवनेजनं लोकव्यवहारेणोपपादयति— तद्यथेति। 'तत्' तत्र विषये निदर्शन मभिधीयते। यथा 'जक्षुषे' भुक्तवते पुरुषाय मुखप्रक्षालनार्थं हस्ते उदकम् 'अभिषिञ्चेत्', 'एवम्' एव 'तत्' पिण्डदानानन्तरभावि जलावसेचन मित्यर्थः। 'जक्षुषे' इति, अदेर्लिटः क्वसौ "लिट्यन्यतरस्याम्"–इति † घसादेशः, पुनश्चतुर्थ्येकवचने सम्प्रसारणे च रूपम् ॥ २३ ॥

नमस्कारं विधत्ते— "अथ नीवि मिति ‡। 'नीविः' परिधानीयस्य वाससो दशा, ताम् 'उद्हृत्य' विस्रंस्य § पितॄन् 'नमस्करोति'। तत्र विस्रंसने कारण माह— "पितृदेवत्येति। यतो 'नीविः' 'पितृदेवत्या' पितृदेवतार्था, पितॄणां तृप्तिकरीति यावत्। "देवतान्तात् तादर्थ्ये यत् ‖"। 'तस्मात्' तां 'नीविम्' 'उद्हृत्य' विस्रंस्य प्रदर्श्य ते नमस्कर्त्तव्या इत्यर्थः। नीवेः पितृदेवत्वं तैत्तिरीयकेऽप्याम्नातम् ¶—"अग्नेस्तूषाधानं, वायोर्वातपानं, पितॄणां नीविः"–इत्यादि **। नमस्कारस्य प्रयोजन माह— "यज्ञो वा इति। नमस्कारेण हि पूजा गम्यते, 'यज्ञः' पूजात्मकः; "यज देवपूजा"–इति †† यजतेस्तदर्थत्वात्। असौ नमश्शब्दो यज्ञात्मकः। तेन नमस्कारेण 'एनान्' पितॄन् 'यज्ञियान्' यागार्हान् 'एव' 'करोति'। "यज्ञर्त्विग्भ्यां घखञौ"–इति ‡‡ अर्हार्थे घञ्

* २०६ पृ० १५ पं० द्रष्टव्यः।
† पा० सू० २. ४. ४०।
‡ का० श्रौ० सू० ४. १. १५।
§ 'विमुच्य'— इति क्व।
‖ पा० सू० ५. ४. २४।
¶ तै० सं० ६. १. १. ११।
** सायणीयं व्याख्यानं तस्याः श्रुतेः तै० सं० १. २. १ भाष्ये द्रष्टव्यम्।
†† भा० उ० १००२ धा०।
‡‡ पा० सू० ५. १. ७१।

प्रत्ययः। विहितश्च नमस्कारो "नमो वः"–इति * मन्त्रेण कर्त्तव्यः। उक्तं हि कात्यायनेन— "नीविं विस्रंस्य नमो व इत्यञ्जलिं करोति"–इति †। तस्मिंश्च मन्त्रे "षड्भ्यो नमः"–इति प्रयुज्यते, तत्सङ्ख्या मनूद्य स्तौति — "षट् ऋतवः"–इति ‡। "नमो वः पितरो रसाय", "नमो वः पितरः शोषाय"–इत्येवं षड्वारं नमस्कुर्यादित्यर्थः §। "ऋतवः पितर इति। वसन्ताद्यृतुषु प्रमीतस्य तत्तदनुरूपत्वप्राप्तेस्तादात्म्यव्यपदेशः। तथा चान्यत्र ‖ श्रूयते— "यस्मिन्नृतौ पुरुषः प्रमीयते, सोऽस्यामुष्मिंल्लोके भवति (यदि वसन्ते प्रमीयते, वसन्तो भवति ¶)"–इत्यादि। तस्मात् तेषा मृतूनां षट्सङ्ख्यात्वयोगात् तादात्म्यापन्नानां पितॄणां नमस्कारोऽपि षड्वारः कर्त्तव्य इति युक्त मुक्तम्— "नमो वः पितरः"–इति।

नमस्कारमन्त्रो निगदव्याख्यात इत्यभिप्रेत्य तच्छेष मुपादाय व्याचष्टे— 'गृहान्नः पितरो दत्त इति"–इति **। शेषसहितस्य तस्य मन्त्रस्याय मर्थः— हे पितरः! युष्मत्सम्बन्धिने 'रसाय' वसन्तर्तुजाताय नमोऽस्तु। हे पितरः! युष्मत्सम्बन्धिने शैशिरजन्याय 'शोषाय' शोषणाय नमोऽस्तु। एव मुत्तरत्रापि योज्यम्।

* वा० सं० २. ३२. १।

† का० श्रौ० सू० ४. १. १५ ख।

‡ 'षड्भिर्मन्त्रैः षडङ्गलीन्'— इति या० दे० (४. १. १५ सू०)।

§ ते च षट् मन्त्राः वा० सं० २. ३२. १—६।

‖ तै० ब्रा० १. ६. ८. ३। तत्र 'यस्मिन् वा ऋतौ'— इति पाठः।

¶ "यदि वसन्ते"— इत्यादिरंशस्तत्र न दृश्यते; सायणभाष्ये त्वस्यैवांशः, तै० सं० १. ८. ५ भाष्यं द्रष्टव्यम्। ** वा० सं० २. ३२. ८।

'जीवः' वर्षतो ह्यर्थक्रियमाणो वेगः *। 'स्वधा'–इति अन्ननाम †, व्रीह्यादिरूप मन्नञ्च शरदादिषु पच्यत ; अतः शरदृतुसम्बन्धिने अन्नायेत्यर्थः। हेमन्तशिशिरयोर्हिमेन सर्वेषां पीड़नात् तद्रूपौ पितृधर्मौ 'घोरमन्यू'। "नमो वः पितरः पितरो नमो वः"–इति ‡ व्यतिहारोक्तिरादरातिशयद्योतनार्था।

एवं नमस्कृतान् पितॄन् प्रार्थयते–– हे 'पितरः!' 'नः' अस्मभ्यम् 'गृहान्' पुत्रपौत्रादिरूपान् 'दत्त' प्रयच्छत §। पितॄणां दानसामर्थ्यं मन्त्रशेषस्य चाशीःपरत्वं स्पष्ट मिति व्याचष्टे–– "गृहाणा मिति। 'पितरः' खलु 'गृहाणाम्' 'ईशते' ईश्वरा भवन्ति। "अधीगर्थदयेशाम्"–इति ‖ कर्मणि षष्ठी। 'एतस्य' पिण्डपितृयज्ञाख्यस्य 'कर्मणः' 'एषा' 'आशीः' फलप्रार्थना 'उ' एवेत्यर्थः।

पिण्डशेषस्याघ्राणं विधत्ते––"अथावजिघ्रतीति। "घ्रा गन्धोपादाने ¶"–इत्यस्माल्लटि "घ्राधेट्"–इति ** जिघ्रादेशः। तथा च अवघ्राणं 'पिण्डान्' पिण्डपात्रे †† 'प्रत्यवधाय' प्रतिक्षिप्य कर्त्तव्यम्। तच्चावघ्राणं 'यजमानभागः' यजमानस्य स्वकीयोंऽश इति विधेयभागापेक्षया पुंल्लिङ्गनिर्देशः। स्रीर्ष्मस्य बर्हिषः प्रतिपत्तिं विधत्ते–– "अग्नाविति। 'अभ्यादधाति' प्रक्षिपतीत्यर्थः। उल्मुकस्यापि संसर्जनं विधत्ते–– "पुनरिति। "ये

---

* "जीवाय, जीवनहेतुभूताय जलाय वर्षत्तवे"— इति मल्लीधरः।

† निघ० २. ७. १७। ‡ वा० सं० २. ३. ७।

§ वा० सं० २. ३२. ८। ‖ पा० सू० २. ३. ५२।

¶ भ्वा० प० ६९६ धा०। ** पा० सू० ७. ३. ७८।

†† 'गार्त्ते'— इति क्व।

रूपाणि"-इति मन्त्रेण यदुल्मुकं पुरस्तात् क्षतम् *, तदिदानीं पुनः संसृजेदित्यर्थः † ॥ २४ ॥ ४ [४. २.] ॥

इति श्रीमायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम् ॥

(अथ तृतीयं ब्राह्मणम्.)

तदु होवाच कहोडः ‡ कौषीतकिः । अन्योर्व्वाऽअयं द्यावापृथिव्यो रसोऽअयं रसस्य हुत्वा देवेभ्योऽथेम मन्यामेति तस्माद्वा ऽआग्रयणेष्ट्या यजत ऽइति ॥ १ ॥

तदु होवाच याज्ञवल्क्यः । देवाश्च वा ऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे ततो ऽअसुराऽउभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च

* २०५ पृ० १५ पं० द्रष्टव्यम् ।

† तै० ब्रा० "पितृयज्ञेन सुवर्गं लोकमगमयत्"— इत्यादिः (१. ६. ८.) अस्य इह विचार्यः समन्तात्, तै० सं० १. ८. ५ अनुवाकश्चेहालोचयितव्यः ।

‡ 'कहोलः'— इति सा०-सम्मतः पाठ इति डा० वेबरः ; तत्त्वतस्तु उपान्त्यो ल एव डः पठ्यतेऽस्यां शाखायाम् ।

पशवः कृत्ययैव त्वद्विषेणैव त्वत्प्रलिलिपुरेतैवं चिद्देवानभिभवेमेति ततो न मनुष्या आशुर्न पशव आलिलिशिरे ता इमाः प्रजा अनाशकेन नोत्पराबभूवुः ॥ २ ॥

तद्वै देवाः शुश्रुवुः । अनाशकेन ह वा इमाः प्रजाः पराभवन्तीति ते होचुर्हन्तेदं मासा मपजिघाꣳसा मेति केनेति यज्ञेनेति यज्ञेन ह स्म वै तद् देवाः कल्पयन्ते यदेषां कल्पा * मासꣳर्षयश्च † ॥ ३ ॥

ते होचुः । कस्य न इदं भविष्यतीति ते मम-ममेत्येव न सम्यादयाञ्चक्रुस्ते होसम्यादयोचुराजिमेवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥ ४ ॥

ताविन्द्राग्नी ऽउदजयताम् । तस्मादिन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीन्द्राग्नी ह्यस्य भागधेय मुदजयतां तौ यदिन्द्राग्नी ऽउज्जिगीषाꣳसौ तस्मात्तस्मिन्वै देवा अन्वाजग्मुः ॥ ५ ॥

* 'कल्प'— इति घ. ङ ।

† 'मासꣳऋषयश्च'— इति क ।

चचं वा ऽइन्द्राग्नी * । विशो विश्वे देवा युच्च वै चच्च मुज्जयत्यन्वाभक्ता वै तच्च विट् तद्विश्वान् देवानन्वाभजतां तस्मादेष वैश्वदेवश्चरुर्भवति ॥ ६ ॥

तं वै पुराणानां कुर्य्यादित्याहुः । चचं वा ऽइन्द्राग्नी नेत् चच्च मध्यारोहयाणीति तौ वा ऽउभावेव नुवानाए स्यातां यद्धि पुरोडाश इतरश्चरुरित्यन्तेनैव चच्च मनध्यारूढं तस्मादुभावेव नुवानाए स्याताम् ॥ ७ ॥

तु ऽउ ह विश्वे देवा ऊचुः । अनयोर्व्वा ऽअयं द्यावापृथिव्यो रसो हन्तेमे ऽअस्मिन्नाभजामेति ताभ्या मेतं भागु मकल्पयन्नेतं द्यावापृथिव्य मेककपालं पुरोडाशं तस्माद् द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्येयु मेव कपाल मेकेव हीयं तस्मादेककपालो भवति ॥ ८ ॥

तस्य परिचत्या † । यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्व्वचैव स्विष्टकृदन्वाभक्तोऽथैतए सर्व्व मेव जुहोति नु स्विष्टकृतेऽवद्यति सा परिचत्योतो हुतः पर्य्यावर्त्तते ॥ ९ ॥

* 'त्नी'— इति घ, ङ । † 'चा'— इति घ, ङ ।

तदाहुः । पर्य्याभूद्वा अयमेककपालो मोहिष्यति राष्ट्रमिति नाग्न्य सा परिचक्षाहवनीयो वा आहुतीनां प्रतिष्ठा स यदाहवनीयं प्राप्यापि दग्ध क्त्वः पर्य्यावर्त्तेत न तदादियेत यदीत्त्वन्य * व्वदन्ति कस्तत्सम्भ मुपेयात्तस्मादाज्यस्यैव यजेदाज्यꣳ ह वा अनयोर्द्यावापृथिव्योः प्रत्यक्षꣳ रसस्तत् प्रत्यक्ष मेवैनेऽएतत् स्वेन रसेन मेधेन प्रीणाति तस्मादाज्यस्यैव यजेत् † ॥ १० ॥

एतेन वै देवाः । यज्ञेनेष्ट्वोभयीना मोषधीनां याश्च मनुष्या उपजीवन्ति याश्च पशवः क्रुत्या मिव त्वदिष मिव त्वदुपजघ्नुस्तत आघ्नन्मनुष्या आलिशन्त पशवः ॥ ११ ॥

अथ यदेष एतेन यजते । तन्नाह न्वेवैतस्य ‡ तथा कञ्चन क्रुत्ययेव त्वदिषेणेव त्वत् प्रलिम्पतीति देवा अकुर्व्वन्निति त्वेवैष एतत् करोति यꣳ चैव देवा भाग मकल्पयन्त तꣳ चैवैभ्य एष एतद्भागं

* 'यदीत्वन्य'— इति क, ग; 'यदीत्वन्ने'— इति च दृष्टं डा०-वेबरेण।

† 'यजेत'— इति क, ग।

‡ 'तन्नाहालोवैतस्य'— इति च दृष्टो डा०-वेबरेण।

करोतीमा उ चैवैतदुभयोरोषधीर्य्याश्च मनुष्या उपजीवन्ति याश्च पशवस्ता अनमीवा अकिल्बिषाः कुरुते ता अस्यानमीवा अकिल्बिषा इमाः प्रजा उपजीवन्ति तस्माद्वा ऽएष एतेन यजते ॥ १२ ॥

तस्य प्रथमजो गौर्दक्षिणा । अग्रा* मिव ह्येदꣳ स यदोजानः स्याद्दर्शपूर्णमासाभ्यां वा यजेताथैतेन यजेत यद्यु ऽअनोजानः स्याच्चातुष्प्राश्य मेवैतमोदन मन्वाहार्य्यपचने पचेयुस्तं ब्राह्मणा अश्नीयुः ॥ १३ ॥

इया वै देवा देवाः† । अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तद्यथा व्वषट्कृतꣳ‡ हुत मेव मस्यैतद् भवति तद्यो यक्ष्यमाणः स्यात्तद्दद्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुर्नाग्निहोत्रे जुहुयात्समदꣳ ह कुर्य्यादुदग्निहोत्रे जुहुयादन्यद्वा ऽआग्रयण मन्यदग्निहोत्रं तस्मान्नाग्निहोत्रे जुहुयात् ॥ १४ ॥ ५ ॥

॥ इति तृतीयप्रपाठके पञ्चमं ब्राह्मणम् [४. ३.] ॥

* 'अग्रिय'— इति सा०-सम्मतः पाठ इति डा० वेबरः ।

† 'देवाः'— इति घ, ङ ।

‡ 'वषट्कृत२' -इति घ, ङ ; 'वषट्कृत२'— इति च इष्टो डा० वेबरेण ।

अथ विधित्सिताया आग्रयणेष्टेर्मतभेदेन प्रयोजनं दर्शयंस्तावद् कहोलस्य मत मुपन्यस्यति— "तदु होवाचेति। 'तत्' तत्र, वक्ष्यमाणे आग्रयणेष्टिविषये 'उवाच' उक्तवान् 'कौषीतकिः' कुषीतकस्य पुत्रः। ता मुक्तिं दर्शयति— "अनयोरिति *। योऽयं व्रीहियवाद्योषध्यात्मको रसः, सः 'अयम्' 'अनयोः द्यावापृथिव्योः' 'रसः'; द्युसम्बन्धिन्या वृष्ट्या भूमेरुत्पन्नत्वात्। 'अस्य रसस्य'। कर्मणि षष्ठी †। इमं रसं देवेभ्यः प्रथमं 'हुत्वा' 'अथ' अनन्तरं हुतशिष्टम् 'इमम्' 'अश्नाम' भुञ्जामहे इत्यर्थः। "तस्मादिति, आग्रयणेष्टिविधिः; यस्मादेवं कहोलेनोक्तम्, 'तस्मात्' नवान्नस्य हुतशिष्टत्वमिष्टये 'आग्रयणेष्ट्या' यष्टव्य मित्यर्थः॥ १॥

अथ याज्ञवल्क्याभिमतं प्रयोजनं दर्शयितुं प्रस्तौति— "तदु होवाचेति। तत्रेतिहास माचष्टे— "देवाश्चेति। 'प्राजापत्याः' प्रजापतेः पुत्राः 'पस्पृधिरे' स्पर्द्धां कृतवन्तः। "अपस्पृधेथामानृचुः"-इति ‡ क्वचित् सम्प्रसारणेन निपातनस्यैव लक्षणार्थत्वात् लिट्यपि स्पृधेः सम्प्रसारणम्। "उभयीरोषधीरिति। उभयविधा ह्योषधयः,— मनुष्यान्नभूता व्रीहियवाद्याः, पशवन्नभूतास्तृणाद्याश्च, ताः सर्वाः 'क्रत्वर्थेव त्वत्' त्वच्छब्द एकशब्दपर्यायोऽविभक्तिकः। 'त्वत्' एकत्र 'क्रत्वर्था' व्यापादयन् 'इव', 'त्वत्' अन्यत्र 'विषेण' च 'प्रलिलिपुः' प्रकर्षेण लिप्ता अकुर्वन्। लेपनाभिप्राय माह— "उतेव मिति। 'एवम्' अपि 'देवान्' 'अभिभवेम इति' तिरस्कुर्यामेति। 'ततः' अनन्तरम् असुर-

* का० श्रौ० सू० ४. ६. १।

† पा० सू० २. ३. ६६। ‡ पा० सू० ६. १. ३६।

कृतं विषलेपं ज्ञात्वा 'मनुष्या:' 'न आशु:' न बुभुक्षिरे, 'पशवश्च' 'न' भक्षयाञ्चक्रु: । केवलम् 'अनाशकेन' अनशनेन * 'ता इमा:' सर्वा: 'प्रजा:' 'पराबभूवु:' पराभूता अभवन् ॥ २ ॥

"तद्वै देवा: शुश्रुवुरिति । देवाश्च तत्सर्वं माकर्ण्य केनोपायेन असुरक्षत मुपद्रवं परिहरामेति विचार्य, यज्ञेनेवेति निश्चित्य, 'एषां' मनुष्यादीनां 'यत्' 'कल्प्यं' कल्पनीयं सम्पाद्यम् 'आस' तत् अकल्पयन् । न केवलं देवा एव, 'ऋषय:' अप्येव मेव अकल्पयन् ॥ ३ ॥

"ते होचुरित्यादि । प्रजाना मशनकृत्सिमाधनम् 'इदं' 'न:' अस्माकं मध्ये 'कस्य भविष्यति ?' 'इति' विचारिते 'ते' सर्वे देवा: 'मम' इदं — 'मम' इदम् 'इति' 'न सम्पादयाञ्चक्रु:' सम्पादनं नामादितवन्त: । 'ते' च देवा: इत्थं परस्परं विप्रतिपत्तिं प्राप्य 'आजिम्' आजिधावनम्, तत्प्राप्तुपाय मेवाकल्पयन् । आजिर्नाम गन्तव्याऽधिभूत: पदार्थ:, तम् (अस्मिन् पदार्थे निधत्ते सति †) 'अजामहै' धावाम । "अज गतिक्षेपणयो:"—इति ‡ । तथा च 'न:' अस्माकं मध्ये 'य:' उज्जेष्यति, 'तस्य' 'इदं' 'हवि:' 'भविष्यति', 'इति' विचार्य, 'तथा' 'इति' अङ्गीकृत्य, 'तस्मिन्' विषये त आजिधावनं कृतवन्त: ॥ ४ ॥

"ताविन्द्राग्नी इति । 'तौ' प्रसिद्धौ 'इन्द्राग्नी' आजिधावनेन तद्धवि: 'उदजयताम्' । यस्मादेवं तस्मादेव कारणात् 'अन्यान्' देवान् परित्यज्य आग्नेयष्टौ प्रथमं हवि: इन्द्राग्निदेवताकम्, द्वादशसु कपालेषु संस्कृतं पुरोडाशात्मकं भवति । अनेनाभि-

---

* 'अनाशनेन' — इति च । † नास्येषोऽश: च-पुस्तके ।

‡ भा० प० २३० धा० ।

प्रायेण ऐन्द्राग्नयागः प्रथमः कर्त्तव्य इति विधिरुन्नीतो भवति ॥

वैश्वदेवचरुरूपं द्वितीयं हविर्विधातुं विश्वेषां देवाना माजिसम्बन्ध माह— "यत्रेति *। 'यत्र' यस्मिन् समये उज्जितवन्तौ 'इन्द्राग्नी' 'तस्थतुः'। जयतेर्लिटः क्वसौ "मन्लिटोर्जेः"-इति † अभ्यासादुत्तरस्य जकारस्य कुत्वम्। 'तत्' तस्मिन् समये विश्वे देवा नाम गणरूपा देवाः आगतवन्तः ॥ ५ ॥

वैश्वदेवस्य हविषः ऐन्द्राग्नानन्तर्य्ये कारणान्तर माह— "क्षत्रं वा इति। देवेषु मध्ये 'इन्द्राग्नी' 'क्षत्रं' क्षत्रियजातिः, 'विश्वे देवाः' 'विशः' वैश्यजातिः। 'यत्र' खलु 'क्षत्रं' क्षत्रियो राज्यादिकम् 'उज्जयति', 'तत्र' 'विट्' वैश्यजातिरपि 'अन्वाभक्ता' भवति; यस्मादेवं लोके, तस्मात् ताविन्द्राग्नी स्वर्विशः 'विश्वान् देवान्' 'अन्वाभजताम्' अन्वाभक्तान् कुरुताम्। "तस्मादित्यादि, वैश्वदेवयागविधिः ॥ ६ ॥

तस्य यागस्य पुराणव्रीहिनिष्पाद्यत्वं पूर्वपक्षत्वेन प्रतिपादयति— "तं वा इति। 'पुराणानां' पुरातनानां व्रीहीणां सम्बन्धिनं 'तं' वैश्वदेवं चरुं 'कुर्यात्' 'इति आहुः' अभिज्ञाः कथयन्ति ‡। "क्षत्रं वा इति। तदुपपादनम्— "नेत् क्षत्र मिति। नेव क्षत्रियजातेरुपरि वैश्यजातिं तत्समत्वेन 'आरोहयाणि' आरूढां करवाणीति; सर्वथा हि क्षत्रियवैश्ययोर्वैषम्येन भवितव्य मित्यर्थः। प्रकारान्तरेण वैषम्यं दर्शयन्नुभयोरपि हविषोर्नवधान्यप्रकृतित्व माह— "तौ वा उभावेव नवाना मिति।

---

* का० श्रौ० सू० ४. ६. २। † पा० ७. ३. ५७।

‡ "पुराणानां वा चरुः"— इति का० श्रौ० ४. ६. ७।

"यद्वीति। 'यत्' यतः तयोरन्यतरः पुरोडाशः, अन्यतरश्चरुः; 'तेनैव' वैलक्षण्येन विशा 'क्षत्रम् अनभ्यारूढम्' क्षत्रियजातिरनभ्यारूढा भवति। "तस्मादित्यादि, प्रतिज्ञापूरणार्थं निगमनम् ॥ ७ ॥

अथ तस्या मेवायवणिष्टौ तृतीयं द्यावापृथिव्यं हविर्विधातुमाह— "त उ हेति। 'विश्वे देवाः' 'ऊचुः' उक्तवन्तः। कथमिति, नवधान्यरूपं हविः 'अनयोः द्यावापृथिव्योः रसः' इति प्रागुपपादितम् *। 'हन्त'–इत्यनुकम्पायाम्। 'अस्मिन्' नवहविषि 'इमे' द्यावापृथिव्यौ वयम् 'आभजाम' प्रापयामेत्यर्थः। ते च 'ताभ्यां' द्यावापृथिवीभ्याम् 'एतं' हविर्भागम् 'अकल्पयन्', य एष द्यावापृथिव्य एककपालः पुरोडाशः, तम्। "तस्मादिति, द्यावापृथिव्ययागविधिः। तस्य द्यावापृथिव्यस्य हविषः एकस्मिन्नेव कपाले संस्कार मुपपादयति— "तस्येय मेवेति। 'तस्य' 'इयं' भूमिः 'एव' 'कपालम्' पुरोडाशश्रपणाधिष्ठानम्; 'हि' यस्मात् 'इयम्' 'एकैव' एकाकारा भवति, 'तस्मात्' तद्देवत्यः पुरोडाशोऽपि 'एककपालः' इति † ॥ ८ ॥

'आज्येनैव द्यावापृथिव्योर्यागं विधित्सुः पुरोडाशपक्षे दोष मुपन्यस्यति— "तस्य परिचक्षेति। 'तस्य' एककपालस्य पुरोडाशस्य काचित् 'परिचक्षा' निन्दा विद्यते। ता मेव दर्शयति— "यस्या इति। सर्वेषु हि यागेषु 'स्विष्टकृद्' यागः 'अन्वाभक्तः' अनुप्राप्तोऽस्ति; "शेषात् स्विष्टकृते समवद्यति"–इतीष्टशिष्टप्रतिपत्तित्वेन तस्य विहितत्वात् ‡। अथैवं सति अत्रैककपालं

* पुरस्तादिहैव २१६ पृ० ६ पं० द्रष्टव्यम्।

† का० श्रौ० सू० ४. ६. ४। ‡ १ का० ६ प्र० १ ब्रा० द्रष्टव्यम्।

पुरोडाशं 'सर्व मेव * जुहोति', हविरन्तरवत् स्विष्टकृद्यागेऽग्नेऽन्नये 'न अवद्यति'; अतोऽस्येककपालस्य स्विष्टकृद्यागाभावात् 'सा' एव 'परिचक्षा' निन्दा। दोषान्तर मप्याह— "उतो हुत इति। 'उत उ' अपि च अग्नौ 'हुतः' सन् एककपालः पुरोडाशः 'पर्य्यावर्त्तते' पर्य्यावर्त्तेत ॥ ८ ॥

"तदाहुरिति। 'तत्' तत्र विषये 'आहुः' ब्रह्मवादिनः कथयन्ति। किं मिति— 'अयम्' 'एककपालः' 'पर्याभूत्' पर्याहृत्तोऽभूत्, तेन पर्यावर्त्तनेन 'राष्ट्रम्' एव पर्याहृत्तं सत् † 'मोहिष्यति' मूढं भविष्यतीति। इत इत्यत आह— "आहवनीय इति। आहवनीयो हि सर्वाहुतीना माधारभूतः। तत्प्राप्तेः पूर्वं पर्यावर्तने दोषः, तदुत्तरकालन्तु 'अपि' 'दश कृत्वः' दशवारं 'पर्यावर्तेत'। 'तत्' तत्र आदरो नैव कर्तव्यः। देवतोद्देशेन हविषः ‡ प्रक्षिप्तत्वादित्यभिप्रायः। तस्मात् स्विष्टकृद्यागाभावकृत एव निन्दा परिशिष्यते, तत्परिहाराय पक्षान्तर माह— "यदीति। 'यदि तु' 'अन्ये' शाखिनः 'वदन्ति', 'कः' नाम 'तत्' उक्तदोषसन्धानं कर्तुम् 'उपेयात्' उपगच्छेत्? अतो दोषसहित एककपालपक्षः परित्याज्यः §। किन्तर्हि द्यावापृथिव्यस्य यागस्य द्रव्यम्?, तदाह— 'तस्मादिति। यदेतत् ध्रुवास्थ माज्यं सर्वयज्ञसाधारणम्, तस्य 'आज्यस्य एव' सकाशात् चतुरवत्त मवदाय द्यावापृथिव्योर्यजेतेत्यर्थः ‖। इम मर्थं प्रदर्श-

---

* 'सर्वहुत मेव'— इति च, छ।

† नास्त्येतत् पदं च-पुस्तके।

‡ 'हविषश्चोदितदारे'— इति च, 'हविषश्चोदितधारे'— इति छ. ज।

§ परित्यज्यः' इति च. छ. ज। ‖ का० श्रौ० सू० ४. ६. ६।

मति—"आज्यं हेति। "प्रत्यक्तं रस इति। आज्यस्य द्रवत्व-रूपयोगात् प्रत्यक्तरसत्वम्; व्रीहियवादेषु धान्यस्य काठिन्यात् परोक्षत्वम् *। "मेधेनेति। सारभूतेनेत्यर्थः।

निन्दाया उत्तरस्य प्रशंसार्थं मभिप्रेत्य कात्यायनेनेतत् पक्ष-द्वय मपि सूचितम्— "द्यावापृथिवीय एककपालः ०—० आज्यस्य वेति †। आपस्तम्बोऽपि— "अपि वैककपालेन कुर्वीत, आज्येन द्यावापृथिवी दृङेत" इत्युक्तवान् ॥ १० ॥

अस्या आग्रयणेष्टेरनाश्रितदोषनिर्हरणहेतुत्वं प्रतिपादयितुं पुरा-वृत्त मुदाहरति— "एतेनेति। 'याश्च' व्रीहियवाद्या ओषधीः 'मनुष्याः' 'उपजीवन्ति', 'याश्च' तृणाद्याः 'पशवः' 'उपजीवन्ति', तासाम् 'उभयीनाम् ओषधीनाम्' इति सम्बन्धः। "क्रुत्या मिव खादिति। ओषधीषु क्रुत्या-विषादिकं यत् असुरैः प्रलिप्तम्, तदनेन यागेन देवा अपहृतवन्त इत्यर्थः। "तत इत्यादि। ततो देवैरपहृतस्य निर्दोषकरणात् 'मनुष्याः' 'आश्नन्' अभुञ्जत, 'पशवश्च' तृणादिकम् 'आलिशन्त' अभक्षयन्। "लिश अल्पीभावे"—इत्ययं धातुः ‡, अत्र तृणादेरल्पीभवनहेतौ भक्षणे वर्तते ॥ ११ ॥

एवं पुरावृत्त मुदाहृत्य दृष्टान्तेनेदानीन्तनानुष्ठानेऽपि नवान्ना-श्रितदोषनिर्हरणहेतुत्वं प्रतिपादयति— "अथेति। 'अथ' इदानीं 'यत्' यस्मात् कारणात् 'एषः' यजमानः 'एतेन' आग्रयणेन 'यजते'। 'अह', 'नु', 'एव'—इति त्रयो निपाता अवधारणार्थाः। 'तत्' तस्मादेव कारणात् 'एतस्य' यजमानस्य 'तथा' तथैव ओष-धीषु क्रुत्यया विषेण च न कोऽपि द्वेष्टा 'प्रलिम्पति' प्रश्लेषयति।

---

* 'काठिन्यपरोक्षत्वम्'— इति च। † का० श्रौ० सू० ४. ६. ४—६।
‡ दि० आ० ७३ धा०।

"लिप उपदेहे"–इति * धातुः। "शे मुचादीनाम्"–इति † नुम्। "देवा इत्यादि। 'देवाः' खलु पुरा 'इति' एवम् 'अकुर्वन्', 'एषः' यजमानोऽपि 'इति त्वेव' एव मेव तु 'करोति'। एतदेव विवृणोति— "य मु चैवेति। "अनमीवा अकिल्बिषा इति। अमीवा रोगाः, तद्रहिताः; किल्बिषं रोगनिदानं पापम्, तद्रहिताश्च 'कुरुते'। "ता अस्येति, प्रयोजनान्वाख्यानम् ॥ १२ ॥

दक्षिणां विधत्ते— "तस्य प्रथमज इति। 'तस्य' आग्रयणस्य 'प्रथमजः' तस्मिन् संवत्सरे यजमानस्य गोष्ठे यो वत्सो जायते, सः 'गौः' अस्य यागस्य दक्षिणात्वेन देय इत्यर्थः ‡। कुत इत्यत आह— "अग्र मिवेति §। अग्रे भवम् अग्रियम्। "अग्राद् यद्, घ-क्छौ च"–इति ‖। 'इदम्' आग्रयणाख्यं 'हि' हविः 'अग्रम्', प्रथमजो वत्सश्चाग्रः; अतस्तस्याग्रयणदक्षिणात्व मुचित मिति।

ईजानानीजानयोराग्रयणविषयां व्यवस्थां दर्शयति— "स यदिति। 'यद्' यदि 'सः' यजमानः 'ईजानः' सोमयागेनेष्टवान् 'स्यात्'। यजेर्लिटः कानच्। केवलं हविर्यज्ञयाजी सन् 'दर्शपूर्णमासाभ्याम्' एव 'यजेत', 'अथ' अनन्तर मेव 'एतेन' आग्रयणेन 'यजेत', न प्रागित्यर्थः ¶। किन्तर्हि तदा कुर्यादिति,

---

* तु० उ० १५२ धा०। † पा० सू० ७. १. ५८।

‡ का० श्रौ० सू० ४. ६. ८।

§ अग्रिय मिवेति'— इति च, क्व। एष एव पाठः सायणसम्मतो गम्यते; घक्छौ चेति सूत्रस्यापीहोल्लेखदर्शनात्; परं सर्वमूलपुस्तकविरुद्धः।

‖ पा० सू० ४. ४. ११६. ११७। ¶ का० श्रौ० सू० ४. ६. १० क।

तदाह— "यद्यु इति। यदि तु दर्शपूर्णमासादिभिः 'अनीजानः' अनिष्टवान् 'स्यात्', तदा स यजमानः 'चातुष्प्राश्यं' चतुर्भिः ब्राह्मणैः प्राशितव्यं 'तम्' 'ओदनम्' अन्नं दक्षिणाग्नौ पक्त्वा, ब्राह्मणेभ्यो दद्यात् *; 'ब्राह्मणाः' च 'तम्' 'अश्नीयुः' मुञ्जीरन्॥ १२॥

ब्राह्मणभोजनस्यापि यागोत्पादकत्व मुपपादयति— "इया वा इति। "अहेवेति, हावपि निपातावधारणार्थौ। 'शुश्रुवांसः' शुश्रुवन्तः, बहुश्रुतार्था इत्यर्थः; 'अनूचानाः' अनुगतानुष्ठानपराः, य एवङ्गुणाः, 'ते' मनुष्यदेवाः' मनुष्यरूपा देवाः। 'तत्' तथा सति 'यथा' वषट्कारेण देवेभ्यो दत्तम्, स्वाहाकारेण 'हुतं' च भवति, एव मेव 'अस्य' अनीजानस्य यजमानस्य 'एतत्' ब्राह्मणभोजनं भवतीत्यर्थः †॥

यागे इव भोजनेऽपि दक्षिणादानं विधत्ते— "तत्रो इति। 'तत्र' ब्राह्मणभोजनकालेऽपि 'यत्' किञ्चित् दातुं 'शक्नुयात्', 'तत् दद्यात्'; ब्राह्मणेभ्यो दत्तं 'हविः' 'अदक्षिणं' दक्षिणारहितं 'न स्यात्' 'इति' अनेनाभिप्रायेणेत्यर्थः ‡॥

केचित्त्वाग्रयणेष्टावधिकृतस्यानीजानस्य नवधान्येनाग्निहोत्रहोम मभिधीयते। अत एव सूत्रितं कात्यायनेन— "नवैः सायम्प्रातरग्निहोत्रहोमः"—इति §। आपस्तम्बेनाप्युक्तम्— "अपि वा नवानां यवानां सायम्प्रातर्जुहुयात्"—इति। तदत्र निराकरोति— "नाग्निहोत्र इति। अग्निहोत्रकर्मणि नवं ‖

---

* 'दत्त्वा'— इति ङ। † का० श्रौ० सू० ४. ६. १० ख।
‡ का० श्रौ० सू० ४. ६. १० ग।
§ का० श्रौ० सू० ४. ६. ११। ‖ 'भवं'— इति च।

हविर्न जुहुयात्। 'यद्' यदि 'जुहुयात्', तदा इन्द्राग्न्यादीना माग्रयणदेवताना मग्निहोत्रदेवगणैः * सह 'समदं' कलहं 'कुर्यात्'। असमुच्चयहेतुभूतं पृथक्त्वं दर्शयति — "अन्यदा इति। 'आग्रयणम्' आग्रयणाख्यं कर्म, अग्निहोत्रात् 'अन्यत्'; 'अग्निहोत्रं' त्वाग्रयणात् 'अन्यत्'; इति एतत्प्रकरणभेदात् नामधेयभेदाच्चावसितम्। शब्दान्तराभ्यासस्तु गुणनामधेयानि इह कर्मभेदे प्रमाणत्वेन जैमिनिनोपन्यस्तानि † ॥ १४ ॥ ५ [४. ३.]

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थाध्यायस्य तृतीयं ब्राह्मणम् ॥

॥ इति द्वितीयकाण्डे तृतीयः प्रपाठकः ‡ ॥

---

* 'मग्निहोत्रदेवतया'— इति च।

† "शब्दान्तरे कर्मभेदः (२. २. १.)"— इत्यादीनि सूत्राणि द्रष्टव्यानि।

‡ "काण्डिकासङ्ख्या ११३"— इति क, "यजुः ११३"—इति ग, घ-ङ्योः क्वचित्। तत्र १ ब्रा० २० क०, २ ब्रा० ४१ क०, ३ ब्रा० १४ क०, ४ ब्रा० २४ क०, ५ ब्रा० १४ क०; सङ्कलनया ११३ सिद्धम्॥

अथ

चतुर्थप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

चतुर्थाध्याये चतुर्थं ब्राह्मणम्।

॥ हरिः ॐ ॥

प्रजापतिर्ह वा ऽएतेनाग्ने यज्ञेनेजे। प्रजाकामो बहुः प्रजया पशुभिः स्याꣳ श्रियं गच्छेयं यशः स्या मन्नादः स्या मिति ॥ १ ॥

स वै दक्षो नाम। तदादेनेन सोऽग्नेऽयजत तस्माद्दाक्षायणयज्ञो नामोतैन मेके व्वसिष्ठयज्ञ इत्याचक्षत ऽएष वै व्वसिष्ठ एत मेव तदन्वाचक्षते स ऽएतेन यज्ञेनेजे स ऽएतेन यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्य्या श्रोरेतद् बभूवैताꣳ ह वै प्रजातिं प्रजायत ऽएताꣳ श्रियं गच्छति य ऽएवं व्विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ २ ॥

तेनो ह तत ईजे। प्रतीदर्शः प्रवैक्तः स ये तं * प्रत्यासुस्रुषां व्विवचन मिवास व्विवचन मिव † ह वै भवति य एवं व्विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ ३ ॥

त माजगाम। सुम्ना सार्ञ्जयो ब्रह्मचर्य्यं तस्मादेतञ्च यज्ञ मनूचेऽन्य मु च सोऽनूच्य पुनः सृञ्जयान् जगाम ‡ तं ह सृञ्जया व्विदाञ्चक्रुर्य्यङ्गं वै नोऽनूच्यागन्निति ते होचुः सह वै नस्तद्देवैरागन्यो नो यज्ञ मनूच्यागन्निति स वै सहदेवः सार्ञ्जयस्तद्-ष्येतन्निवचन § मिवास्त्यन्यद्वा ऽरे सुम्ना नाम दध ऽइति स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयꣳ सृञ्जयानां प्रजातिर्य्या श्रीरेतद् बभूवैताꣳ ह वै प्रजा-तिं प्रजायत ऽएताꣳ श्रियं गच्छति य एवं व्विद्वा-नेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ ४ ॥

---

* 'स एतं'— इति मा०-सम्मतः पाठ इति डा० वेबरः। 'मु ये तं'— इति च दृष्टो डा०-वेबरेण।

† 'मेव'— इति मा०-सम्मतः पाठ इति डा० वेबरः।

‡ 'सृञ्जयाञ्जगाम'— इति क, ग।

§ 'न्निर्व्वचन'— इति पाठः मा०-सम्मत इति डा० वेबरः।

तेनो ह तत ईजे। देवभागः श्रोतर्षः सु उभयेषां कुरूणाञ्च सृञ्जयानाञ्च पुरोहित आस परमता वै सा यो न्वेवैकस्य राष्ट्रस्य पुरोहितोऽसत्सा न्वेव परमता किं सु यो द्वयोः परमता मिव ह वै गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ ५ ॥

तेनो ह तत ईजे। दक्षः पार्व्वतिस्तु ऽइमेऽप्येतर्हि दाक्षायणा राज्यमिवैव प्राप्ता राज्यमिव ह वै प्राप्नोति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत स वा ऽएकैक एवानूचीनाहं पुरोडाशो भवत्येतेनो हास्यासपत्नानुपबाधा श्रीर्भवति स वै द्वे पौर्णमास्यौ यजते द्वे ऽअमावास्ये द्वे वै मिथुनं मिथुनमेवैतत् प्रजननं क्रियते ॥ ६ ॥

अथ यत् पूर्व्वेद्युः। अग्नीषोमीयेण यजते पौर्णमास्यां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत् प्रजननं क्रियते ॥ ७ ॥

अथ प्रातः। आग्नेयः पुरोडाशो भवत्यैन्द्रश्च सान्नाय्यं ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत् प्रजननं क्रियते ॥ ८ ॥

अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां ते इ देवते इ वै मिथुनं मिथुन मेवैतत् प्रजननं क्रियते * ॥ ९ ॥

अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यच्छादयानीति न्वेवाग्नेयः पुरोडाशोऽथैतावेव मित्रावरुणौ इ देवते इ वै मिथुनं मिथुन मेवैतत् प्रजनन क्रियत ऽएतदु ह्यस्य तद्रूपं येन बह्वर्भवति येन प्रजायते ॥ १० ॥

अथ यत् पूर्व्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां य मेवानु मुपवसथेऽग्नीषोमीयं पशु मालभते स एवास्य सः † ॥ ११ ॥

अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रः सान्नाय्यं प्रातःसवन मेवास्याग्नेयः पुरोडाश आग्नेयः हि प्रातःसवन मथैन्द्रः सान्नाय्यं माध्यन्दिन मेवास्य तत्सवन मैन्द्रः हि माध्यन्दिनः सवनम् ॥ १२ ॥

अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन यजतेऽमा-

* 'क्रियते'— इति क, 'क्रियते'— इति ग ।

† 'सः'— इति घ, ङ ।

वाख्यायां तृतीयसवन मेवास्य तद्वैश्वदेवं वै तृतीय-सवन मिन्द्राग्नी वै विश्वे देवाः * ॥ १३ ॥

अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रा-वरुणी पयस्या नैयङ्गादयानीति न्वेवाग्नेयः पुरो-डाशोऽथ या मेवामूं मैत्रावरुणीं वशा मनूबन्ध्या मालभते मैवास्य मैवावरुणी पयस्या सु पौर्णमासेन चामावास्येन चेष्ट्वा यावत्सौम्येनाध्वरेणेष्ट्वा जयति तावज्जयति तदु खलु महायज्ञो भवति ॥ १४ ॥

अथ यत् पूर्व्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्या मेतेन वा ऽइन्द्रो वृत्र महन्नेनो ऽएव व्यजयत यास्येयं विजितिरस्तां तयो ऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तयो ऽएव विज-यतेऽथ यत् सन्नयत्यामावास्यं वै सान्नाय्यं दूरे तद् यदमावास्येति क्षिप्र ऽएवैतदृचं जघ्नुषे तु मेतेन रसेनाप्रोणन् क्षिप्रे ह वै पाप्मान मपहते य एवं विद्वान् पौर्णमास्याꣳ सन्नयत्येष वै सोमो राजा देवाना मन्नं यच्चन्द्रमास्त मेतत् पूर्व्वेद्युरभिषुण्वन्ति प्रातर्भक्षयिष्यन्तस्त मेतद्भक्षयन्ति यदपक्षीयते † ॥१५॥

* 'देवाः'— इति घ, ङ । † 'ते'— इति घ, ङ ।

अथ यत् पूर्व्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्या मभिषुणोत्येवैन मेतत्तस्मिन्नभिषुत ऽएतꣳ रसं दधात्येवैतेन रसेन तीव्रीकरोति स्वदयति ह वै देवेभ्यो हव्यꣳ स्वदते हास्य देवेभ्यो हव्यं य ऽएवं व्विद्वान् पौर्णमास्याꣳ सन्नयति ॥ १६ ॥

अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां दर्शपूर्णमासयोर्व्वै देवते स्त इन्द्राग्नी ऽएव ते ऽएवैतदृङ्मसा प्रत्यक्षं यजत्यृङ्मसा ह वा ऽअस्य दर्शपूर्णमासाभ्या मिष्टं भवति य ऽएवꣳ मेतद् वेद* ॥ १७ ॥

अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेदग्नादयानीति न्वेवाग्नेयः पुरोडाशोऽथैतावेवार्द्धमासौ मित्रावरुणौ य ऽएवापूर्य्यते स व्वरुणो योऽपक्षीयते स मित्रस्तावेतावꣳ रात्रि मुभौ समागच्छतस्तदुभावेवैतत् सह † सन्तौ प्रीणाति सर्व्वꣳ ह वा ऽअस्य प्रीतं भवति सर्व्वमाप्तं य ऽएवꣳ मेतद्वेद ॥ १८ ॥

---

* 'वेदꣳ'— इति ग, 'वेद'— इति घ, ङ ।

† 'वेवैतच्छह'— इति पाठश्च दृश्यो डा०-वेबरेण ।

तद्वा ऽएताꣳ रात्रिम् *। मित्रो व्वरुणे रेतः सिञ्चति तदेतेन रेतसा प्रजायते यदापूर्य्यते तदुदेषाञ्च मैत्रावरुणी पयस्यावक्रूप्तमा भवति ॥ १९ ॥

सान्नाय्यभाजना वा ऽअमावास्या। तदद्भ्यस्त्वा पौर्णमास्यां क्रियते स यद्वावापि सन्नयेज्जामि कुर्य्यात् समदं कुर्य्यात् तदेन मद्भ्य ओषधिभ्यः सम्भृत्याहुतिभ्योऽधिजनयति स एष आहुतिभ्यो जातः पश्चाद्दर्शे ॥ २० ॥

मिथुनादिद्वा ऽएन मेतत् प्रजनयति। योषा पयस्या रेतो व्वाजिनं तद्वा ऽअनुष्ठ्या † यन्मिथुनाज्जायते तदेन मेतस्मान्मिथुनात् प्रजननात् प्रजनयति तस्मादेषाञ्च पयस्या भवति ॥ २१ ॥

अथ व्वाजिभ्यो व्वाजिनं जुहोति। ऋतवो वै व्वाजिनो रेतो व्वाजिनं तदनुष्ठ्येवैतद्रेतः‡ सिच्यते तदृतवो रेतः सिक्तं मिमाः प्रजाः प्रजनयन्ति तस्माद्वाजिभ्यो व्वाजिनं जुहोति ॥ २२ ॥

---

* 'रात्रि'— इति घ-ङ्योरपि।

† 'ऽअनुष्ठ्या'— इति ग।

‡ 'तदनुष्ठ्येवैतद्रेतः'— इति क, म।

स वै पश्चादिव यज्ञस्य जुहोति। पश्चाद् वेपरीत्य व्वृषा योषा मधिद्रवति तस्माए् रेतः सिञ्चति स वै प्रागेवाग्ने जुहोत्यग्ने व्वीहीत्यनुवषट्करोति तत् खिष्टकृद्भाजनए् स वै प्रागेव जुहोति ॥ २३ ॥

अथ दिशो व्याघारयति। दिशः प्रदिश आदिशो * व्विदिश उद्दिशो दिग्भ्यः स्वाहेति पञ्च दिशः पञ्चर्त्तवस्तद्दतुभिरेवैतद्दिशो मिथुनीकरोति ॥ २४ ॥

तद्वै पञ्चैव भक्षयन्ति। होता चाध्वर्युश्च ब्रह्मा चाग्नीच्च यजमानः पञ्च वा ऽऋतवस्तद्दतूना मेवैतद् रूपं क्रियते तद्दतुष्वेवैतद् रेतः सिक्तं प्रतिष्ठापयति प्रथमो यजमानो भक्षयति प्रथमो रेतः परिगृह्णानीत्यथो ऽअप्युत्तमो मध्युत्तमे रेतः प्रतितिष्ठादित्युपह्वत उपह्वयस्वेति सोम मेवैतत् कुर्व्वन्ति ॥ २५ ॥ १ ॥

॥ इति चतुर्थप्रपाठके प्रथमं ब्राह्मणम् [४. ४.] ॥

आहुत्तिगुणविकृतो दर्शपूर्णमासयागप्रयोग एव दाक्षायणयज्ञः, तं विधित्सुराख्यायिका माह— "प्रजापतिरिति।

* 'आदित्यो'— इति च दृश्यो डा०-वेबरेण।

'एतेन' वक्ष्यमाणेन दाक्षायणनामकेन यज्ञेन * 'प्रजापतिः' अहम् अविकृत एव सन् देवमनुष्यादिरूपया 'प्रजया', गवादिभिः 'पशुभिः' च 'बहुः' बहुविधः 'स्याम्' भवेयम्, उत्पन्नानां प्रजादीना मशनार्थं 'श्रियं' सम्पदं गच्छेयं प्राप्नुयाम्, ततोऽहं 'यशः' यशस्वी 'स्याम्', 'अन्नादः' भवेयम् 'इति'। एव मेते दाक्षायणयज्ञं कृतवतः प्रजापतेः कामाः, तत इदानी मपि तादृग्विधकामनायुक्त एव दाक्षायणयज्ञेऽधिक्रियत इत्यर्थः † ॥ १ ॥

तन्नाम निर्ब्रूते— "स वा इति। 'सः' खलु प्रजापतिः 'दक्षो नाम' अभवत्, तेन प्रथम मिष्टवान्, 'तस्मात्' 'दाक्षायणयज्ञः' इत्युच्यते। नामान्तर मपि कथयति— "उतेन मिति। 'उत' अपि च 'एनम्' 'एके' शाखिनः 'वसिष्ठयज्ञ इति' व्यवहरन्ति। 'एषः' एव खलु प्रजापतिः 'वसिष्ठः' नान्यः; सर्वश्रेष्ठत्वात्। 'एत मेव' दाक्षायणयज्ञं 'तत्' तत्र वसिष्ठयज्ञ इति 'अन्वाचक्षते'। "एतेनेति। 'सः' दक्षशब्दवसिष्ठशब्दवाच्यः प्रजापतिः तच्छब्देन परामृश्यते। "एतद्वभूवेति। 'एतत्' एतर्हि 'येयं' 'प्रजापतेः' सकाशात् 'प्रजापतिः' प्रजाना मुत्पत्तिः 'बभूव', 'या' च 'श्रीः' निरतिशया प्राजापत्यपदरूपा सम्पत् 'बभूव' ‡। "एता मित्यादि। 'यः' 'विद्वान्' एतदनुष्ठानस्य फलं जानानः। 'तस्मात्' दाक्षायणयज्ञफलकामः 'एतेन' 'यजेत' ॥ २ ॥

---

* "नामफलगुणयोगात् कर्म्मान्तरम्, गुणविधानं वा सन्निधिसम्यदचनाभ्याम्"— इति का० श्रौ० सू० ४. ४. २, ३। शु० ब्रा० ११. १. २. १० दर्शनात् सान्निध्यम्, ११. १. २. १३ दर्शनाच्च सम्यदचन मवगम्यते।

† "दाक्षायणयज्ञः प्रजापत्यन्नकामस्य"— इति का० श्रौ० सू० ४. ४. १।

‡ विशेषतस्त्विहोपरिष्टाद् (११. १. २. १३.) द्रष्टव्यम्।

विहितस्य यागस्य फलान्तरहेतुत्व मपि परकृत्युपन्यासेन दर्शयति— "तेनो हेति। 'श्वेक्तः' श्वित्रक्तस्य पुत्रः, नाम्ना 'प्रतीदर्शः'। "उपसर्गस्य घञामनुष्ये बहुलम्"– इति * बहुलग्रहणात् मनुष्यवाचित्वेऽपि घञन्त उत्तरपदे उपसर्गस्य दीर्घः। "स एत † मिति। 'एतं' प्रतीदर्शम्। 'सः' इति व्यत्ययेनैकवचनम्। ते तत्रत्या जनाः 'प्रत्यासुः' केनचित्कारणेन प्रतिचिक्षिपुः। "असु क्षेपणे ‡"–इत्यस्मात्लिट्। तेन च दाक्षायणयज्ञेनेष्टे सति 'तेषां' जनानां 'विवचनं' विशिष्टवचनं पक्षपातवचनम् ('इव') एव 'आस' बभूव, अस्मिन् बहुमानं कृतवन्त इत्यर्थः। तदृष्टान्तेनेदानीं विहितानुष्ठानस्यापि तत्फल माह— "विवचन मिव ह वा इति ॥ ३ ॥

पुनरप्यस्य यज्ञस्य विशिष्टफलान्तरहेतुत्वं प्रतिपादयितु माख्यायिकया परकृति मुदाहरति— "त माजगामेति। 'तं' प्रतीदर्शं मुपदेष्टृत्वेनोपासीदन्, सृञ्जयपुत्रः 'सुप्रा' नाम 'ब्रह्मचर्यम्' 'आजगाम' प्राप्तवान्। 'तस्मात्' तदुपदेष्टुः प्रतीदर्शात् 'एतं' दाक्षायणयज्ञम् 'अन्य मु' अन्य मपि 'च' 'यज्ञम्' 'अनूचे'। 'सः' सार्ञ्जयः 'एतम् अनूच्य' 'पुनः' 'सृञ्जयान्' तदाख्यान् जनपदान् 'जगाम'; 'ते' च 'एनं' 'विदाञ्चक्रुः' ज्ञातवन्तः। "उषविदजागृभ्योऽन्यतरस्याम्"–इति § लिट्याम् प्रत्ययः। कथ मिति, तदाह— "यज्ञ मिति। 'नः' अस्मदर्थं 'यज्ञम्' 'अनूच्य'

---

* पा० सू० ६. ३. १२२।

† 'स ये त'—इत्येव पाठोऽस्मद्दृष्ट-सर्वमूलपुस्तकेषु।

‡ दि० प० १०३ धा०।

§ पा० सू० ३. १. ३८।

अधीत्य 'आगन्' आगतोऽभूत्। गमेर्लुङि "मन्त्रे घस"-इति * च्लेर्लुक्, "हल्ङ्याभ्य."-इति † ति-लोपः, "मो नो धातोः"-इति ‡ नत्वम्। 'इति' ज्ञात्वा ते सृञ्जया अब्रुवन्,— 'नः' अस्मदर्थं यः 'यज्ञम्' अधीत्यागमत्, 'सः' तत्सम्बन्धिभिः देवैः सह अगमदिति। ततः प्रभृति 'सः' 'सार्ञ्जयः' 'सहदेवः' इति सञ्ज्ञया प्रसिद्धोऽभवत्।

'तत्' तस्मात् कारणात् 'एतत्' एतर्हि, इदानीमपि ('निवचनं') निर्वचनं निरन्तरं वचनम् 'अस्ति' व्यवहारो लोके § वियते। वचनस्य स्वरूपं दर्शयति— "अन्यदा इति। पूर्वं हि सार्ञ्जयः 'सुप्रा नाम' अभवत्, अधुना तु देवैः सहागमनात् 'सहदेवः' 'इति' 'अन्यत्' नाम 'दधे' धारितवान् 'इति'। 'सः' च सार्ञ्जयः स्वजनपदेषु 'एतेन' दाक्षायणयज्ञेन 'ईजे' इष्टवान्। "स एतेन यज्ञेनेष्ट्वा"-इत्यादि, एतस्य सार्ञ्जयस्य फलप्राप्तिकथनम्।

"एताꣳ ह वै प्रजाति मिति, इदानीन्तनस्य विदुषोऽनुष्ठातुः फलम्। "तस्माद्वा एतेनेति। यस्मात् सृञ्जयसम्बन्धि प्रजात्यादिकमपि दाक्षायणयज्ञफलम्, तस्मादपि कारणादित्यर्थः॥ ४॥

इतोऽपि दाक्षायणयज्ञोऽनुष्ठेय इत्यभिप्रेत्यान्यां परकृतिमुपन्यस्यति— "तेनो हेति। 'ततः' सार्ञ्जयानुष्ठानान्तरं 'तेन' दाक्षायणयज्ञेन 'श्रौतर्षः' श्रुतर्षेः पुत्रो 'देवभागः' नाम महर्षिः 'ईजे' इष्टवान्। 'सः' च तेन यागेन 'कुरूणां च सृञ्जयानां च'

---

* पा० सू० २. ४. ८०। † पा० सू०६. १. ६८।
‡ पा० सू० ८. २. ६४। § 'व्यवहारलोके'— इति च, कृ।

राज्ञा मुभयविधाना मपि 'पुरोहितः' बभूव। पौरोहित्यस्य फलरूपता माह— "परमता वा इति। 'या' खलु 'एकस्य' अपि 'राष्ट्रस्य' 'पुरोहितः' 'असत्' भवति, 'सा' खलु 'परमता' उत्कृष्टता, तस्य सर्वश्रेष्ठं भवतीति यावत्; 'यः' तु 'द्वयोः' राष्ट्रयोः पुरोहितो भवति, सैव खल्वतिशयिता परमतेति किमु वक्तव्य मित्यर्थः। इदानीन्तनविहदनुष्ठानस्यापि तत्फल माह— "परमता मिवेति ॥ ५ ॥

फलान्तरप्रतिपादनायान्यां परकृति मुपन्यस्यति— "तिनो ह तत ईज इति। पर्वतो नाम कश्चित्, तस्य पुत्रः 'पार्वतिः', 'दत्तः', स एतेनेष्ट्वा राज्यं प्राप्नोत्। ततः 'एतर्हि' इदानी मपि 'दात्तायणाः' तत्सन्तानभूता राजानः 'राज्यं प्राप्ताः' एव भवन्ति। "राज्य मिव ह वा इति, अनुष्ठातुः फलम्।

अत्र हि दात्तायणयज्ञरूपम्भूतं हे पौर्णमास्यै हेऽमावास्यै यजेतेति दर्शपूर्णमासयोराकृतिं वक्ष्यति *। तत्र पौर्णमास्यां द्वौ पुरोडाशौ,— आग्नेयोऽग्नीषोमीयश्च; अमावास्याया मपि द्वौ,— आग्नेय ऐन्द्राग्नश्च। तयोः प्रत्यहं मेकैकशो ऽनुष्ठान माह— "स वा इति। 'अनूचीनाहं' प्रत्यहम् 'एकैक एव' 'पुरोडाशो भवति' पूर्वस्मिन् पूर्णमासप्रयोगे एक एव पुरोडाशः कर्त्तव्यः, उत्तरस्मिन् दिनेऽप्येकः पुरोडाशः प्रयोक्तव्यः। तत्राग्नीषोमीयौ द्वावप्येकस्मिन्नित्यर्थः †। एवं दर्शप्रयोगेऽपि द्रष्टव्यम्। एकैकशोऽनुष्ठानस्य फल माह— "एतेनो ह्यस्येति। 'असपत्नानुपबाधा' सपत्नैः शत्रुभिरबाधिता।

* "अत्र ह्येव सा सम्पत् सम्पद्यते, द्वे हि पौर्णमास्यौ यजते द्वे अमावास्ये, अत्रो एव खलु सा सम्पद् भवति"—इति उपरिष्टाद् ११ का० १, २, १३।

† का० श्रौ० सू० ४, ४, ६।

प्रकृतयोरेव दर्शपूर्णमासयोर्योऽय मात्तत्तिलक्षणो गुणः फलायाभिधीयत इत्यवादिष्म, त मिदानीं विधत्ते — "स वा इति। द्वित्वसङ्ख्यां प्रशंसति— "द्वे वै मिथुन मिति ॥ ६ ॥

पूर्वस्यां पौर्णमास्या मनुष्ठेयं यागं विधाय प्रशंसति— "अथ यत् पूर्वेद्युरिति। "ते द्वे देवते इति। अग्नीषोमयोर्व्यासक्तयोरेव देवताखात् अधिष्ठानद्वित्वापेक्षया देवतयोर्द्वित्वं मन्तव्यम् ॥ ७ ॥

परस्मिन्नहनि यागद्वयं विधत्ते — "अथ प्रातरिति। पूर्वेद्युरग्नीषोमीयेणेष्ट्वा परेद्युः प्रातः काले आग्नेयपुरोडाशकयागः प्रथमं कर्त्तव्यः, तत इन्द्रदेवताकं सान्नाय्यं दधि प्रयोक्तव्यम् *। एतद् यागद्वयं सम्भूय प्रशंसति — "ते द्वे इति ॥ ८ ॥

अमावास्याप्रयोगेऽपि पूर्वेद्युः कर्त्तव्य माह— "अथ यत् पूर्वेद्युरिति। प्रशंसति— "ते इति। अग्नीषोमीयवदत्रापि देवताद्वित्व मवसेयम् † ॥ ९ ॥

परेद्युरनुष्ठेयं यागद्वयं विधाय प्रशंसति— "अथ प्रातरिति। 'मैत्रावरुणी' मित्रावरुणदेवताका, पयसो विकृतिः 'पयस्या' ‡; तसं हि पयो दध्ना संस्कृतं सत् पयस्या भवति §। "नेत्यन्नादित्यादि। 'यन्नात्' प्रकृताद् यागात् 'नेत्' नैव 'अयानि' वियुक्ता गच्छानि 'इति' अनेनैवाभिप्रायेण आग्नेयः 'पुरोडाशः' क्रियते; न तु पूर्णमासप्रयोगवान् देवतयोर्द्वित्वसम्पादनाय। यतः पयस्या-

---

* "सान्नाय्यवत् प्रातः— इति का० श्रौ० सू० ४, ४, ६।

† का० श्रौ० सू० ४, ४, ५।

‡ "अमावास्यायां पयस्या मैत्रावरुणी"— इति का० श्रौ० सू० ४, ४, ७।

§ "ग्रहते वा दध्यानयति"— इति का० श्रौ० सू० ४, ४, ८।

भाजौ 'मित्रावरुणौ' स्वत एव 'ह्वे देवते' अत इत्यर्थः। गत मन्यत्। "एतद्ध स्मेति। येन रूपेणानुष्ठाता प्रजया पशुभिश्च 'बहुः' बहुविधो भवति। 'एतत्' एव मिथुनात्मकं द्वित्वम् 'अस्य' यज्ञस्य 'तद्रूपम्' इत्यर्थः ॥ १० ॥

अस्य दार्शायणयज्ञस्य सोमयागरूपतां प्रतिपादयति— "अथ यदित्यादिना। "अमुं सुपवसथ इति। सुत्यादिवसात् पूर्वं महरुपवसथः। प्रकरणान्तरे विहितत्वेन विप्रकर्षादमुं मिति विप्रकृष्टवाचिना अदश्शब्देनाग्नीषोमीयस्य पशोः परामर्शः। "स एवास्येति। 'अस्य' यज्ञस्य पूर्वेद्युरनुष्ठेयो योऽग्नीषोमीयः पुरोडाशः, 'स एव सः' अग्नीषोमीयः पशुरित्यर्थः ॥ ११ ॥

प्रातरनुष्ठेययोराग्नेयैन्द्राग्न्योर्यागयोः प्रातर्माध्यन्दिनसवनरूपतामुपपादयति— "अथ प्रातरिति। आग्नेयपुरोडाशस्य प्रातस्सवनस्य चैकदेवताधिष्ठितत्वात् तादात्म्यम्; साम्राज्यमाध्यन्दिनसवनस्य चेन्द्रदेवत्वसाम्यात् तथात्वम् ॥ १२ ॥

दर्शे पूर्वेद्युरनुष्ठेयस्यैन्द्राग्नपुरोडाशस्य तृतीयसवनरूपता माह —"अथ यदिति। "इन्द्राग्नी वै विश्वेदेवाः"–इति। इन्द्राग्न्योर्विश्वेषु देवेष्वन्तर्भावात् ऐन्द्राग्नपुरोडाशतृतीयसवनयोरनेकदेवत्वसाम्याच्च तादात्म्यम् ॥ १३ ॥

दर्शे परेद्युः प्रातरनुष्ठेयस्य पयस्यायागस्यानूबन्ध्यारूपता माह— "अथ प्रातरिति। "नैत्यज्ञादिति। आग्नेयपुरोडाशयागस्यानुष्ठानविहितायज्ञान्नैव गच्छति; प्रसंख्यंगो माभूदित्यनेनेवाभिप्रायेण; न तु तेन किञ्चिदपि सोमयागसाम्यं सम्पाद्यते। "अमुं मैत्रावरुणी मिति। सोमप्रकरणे विहितत्वेन विप्रकृष्टाया अनूबन्ध्याया अदश्शब्देन परामर्शः। "मैत्रास्येति। 'अस्य'

दाक्षायणयज्ञस्य या 'मैत्रावरुणी पयस्या', सोमेऽनुष्ठीयमाना अनूबन्ध्या एव सेत्यर्थः। इयं दाक्षायणयज्ञस्य सोमयागसाम्यं सम्पाद्य, तत एव हेतोः फलसाम्य माह— "स पौर्णमासेन चेति। 'सौम्येन' सोमद्रव्यसाध्येन यागेनेत्यर्थः। "तदु खल्विति। 'तत्' तस्मादेव 'खलु' कारणात् दाक्षायणयागो 'महायज्ञः' सोमयागो 'भवति'; स हि महायज्ञ इत्याख्यायते। अत एव तैत्तिरीयके सोमयागप्रकरणे समाम्नायते— "ते देवा एतं महायज्ञ मपश्यन्"—इति * ॥ १४ ॥

अथैतद्दाक्षायणं यज्ञं प्रकारान्तरेण प्रशंसन् पौर्णमासप्रयोगे पूर्वेद्युरनुष्ठेय मग्नीषोमीययाग मनूद्य स्तौति— "अथ यत् पूर्वेद्युरिति। "एतेन वा इत्यादि। 'एतेन' खलु अग्नीषोमीययागेन पुरा 'इन्द्रो वृत्रम् अहन्' प्राणापानरूपयोरग्नीषोमयोर्हविषा वृत्रयोर्निष्क्रमणादि वृत्रो हतः। तथा चाम्नायते— "तस्माज्जघ्नुभ्यमानादग्नीषोमौ निरक्रामताम्, प्राणापानौ वा एनं तदजहितां मिति †। 'अस्य' इन्द्रस्य 'या इयं विजितिः' प्रसिद्धा, 'तां' 'व्यजयत' इति सम्बन्धः। "विपराभ्यां जेः"—इत्यात्मनेपदम् ‡। "तथो एवेति। इन्द्रो यथा, 'तथा' एव 'एषः' यजमानोऽपि 'एतेन' अग्नीषोमीययागेन 'पाप्मानं' पापभूतं 'द्विषन्तं' द्वेष्टारं 'भ्रातृव्यं' शत्रुं 'हन्ति' ॥

पौर्णमास्यां 'यः' साऽऽग्नेययागो विहितः, त मनूद्य स्तौति —"अथ यदित्यादिना। "आमावास्यं वा इति। इन्द्रवीर्यस्य सन्नयनसाधनं दधिपयोरूपं हविः 'आमावास्यं वै' अमावास्या-

* तै० सं० ३. २. २. ४। † तै० सं० २. ५. २. ४।
‡ पा० सू० १. ३. १६।

सम्बद्ध मेव। 'अमावास्या' तिथिः 'इति' 'यत्', 'तद्' 'दूरे'; प्रतिपदादिभिश्चतुर्दशीभिर्व्यवधानात्। पुरा खलु देवाः 'क्षिप्रे एव' अल्पकाले एव क्षीघ्रम् 'एतत्' इयं 'हव्यं' 'जघ्नुषे' हन्तवे इन्द्राय। "क्रियाग्रहणं कर्त्तव्यम्"—इति * कर्मणः सम्प्रदानत्वात् चतुर्थी। 'तं' पौर्णमास्यां हव्यं हतवन्त मिन्द्रम् 'एतेन' सान्नाय्य-रूपेण 'रसेन' 'अप्रीणन्' अतर्पयन्। 'यः' यजमानः 'एवं विद्वान्' पौर्णमास्या मिन्द्र मुद्दिश्य सान्नाय्यागं करोति, स इन्द्रवत् क्षिप्र मेव रूकीयं पापरूपं शत्रुम् अपहते' क्षिनस्ति। तदेव मन्त्रगनं प्रकारान्तरेण स्तौति— "एष वा इति। योऽयं पौर्ण-मास्यां सम्पूर्णः 'चन्द्रमाः', 'एषः' खलु 'राजा सोमः' 'देवाना मन्नम्'; 'तं' सोमरूपम् 'एतत्' अन्नम् 'प्रातः भक्षयिष्यन्तः' पूर्वदिवसे 'अभिषुण्वन्ति' रसभावं प्रापयन्ति। 'तम् एतत्' अपर-पक्षे 'भक्षयन्ति'। 'यत्' यस्माद् असौ प्रत्यहं तत्र 'अपक्षीयते', अतो भक्षयन्तीति सम्बन्धः॥ १५॥

तथाविध मेवैतदनुष्ठान मित्याह— "अथ यत् पूर्वेद्युरग्नी-षोमीयेणेति। "अभिषुणोत्येवैन मिति। पूर्वेद्युः कर्त्तव्या-भिषवस्थानीयोऽय मग्नीषोमीययाग इत्यर्थः। 'अभिषुते तस्मिन्' सोमे 'एतं' सान्नाय्यरूपं 'रसं' परेद्युः 'दधाति' स्थापयति। 'एतेन' च सान्नाय्यरसेन तं सोमं 'तीव्रीकरोति' तीव्र मतिशयेन मदकरं करोति, तथा तेन सान्नाय्यरसेन 'देवेभ्यः' देवार्थं 'हव्यं' हविः 'स्वदयति' स्वादूकरोति। 'अस्य' यजमानस्य तत् 'हव्यं' हविः 'देवेभ्यः' 'स्वदते' रोचते। "रुच्यर्थानां प्रीयमाणः" इति † सम्प्रदानत्वात् देवेभ्य इति चतुर्थी॥ १६॥

* पा० १, ४, ३२ सू० १ वा०। † पा० सू० १, ४, ३३।

दर्शयागे पूर्वदिवस मनुष्ठेय मैन्द्राग्नयाग मनूद्य स्तौति— "अथ यदिति। 'इन्द्राग्नी एव' खलु 'दर्शपूर्णमासयोर्देवते'; तत्रत्यप्रथमपुरोडाशस्याग्निदेवत्यत्वात्, सान्नाय्यस्य चैन्द्रत्वात्। "त एवैतदित्यादि, निगदसिद्धम् ॥ १७ ॥

दर्शप्रयोगे परेद्युरनुष्ठेयावपि यागावनूद्य स्तौति— "अथ प्रातरिति। "अथैतावेवेत्यादि। पयस्याया देवते 'मित्रवरुणौ', 'एतावेव अर्धमासौ'। एतदेव विवृणोति— "य एवेति। 'य एव' अर्धमासः 'आ' समन्तात् 'पूर्यते' वर्धमानया चन्द्रकलया पूर्णो भवति, 'सः' अमृतरससम्बन्धाद् 'वरुणः', स हि रसाभिमानी देवः; 'यः' अर्धमासः 'अपक्षीयते' क्षीयमाणचन्द्रकालयुक्तो भवति, 'सः' अपरपक्षः 'मित्रः'; 'तौ' चन्द्रसूर्यात्मकौ मित्रावरुणौ 'उभौ' 'एतां रात्रिं' दर्शरात्रिं 'समागच्छतः' सह समाप्नुतः। 'तत्' तस्मात् कारणात् 'एतत्' एतेन मैत्रावरुणयागेन 'उभावेव' तौ 'सह सन्तौ' सह भवन्तौ युगपत् 'प्रीणाति' तर्पयति। "सर्वं ह वा अस्येति, वेदितुः फलम् ॥ १८ ॥

मित्रावरुणदेवत्यं प्रकारान्तरेण स्तौति— "तद्वा एता मिति। 'एतां रात्रिम्'। अत्यन्तसंयोगे द्वितीया *। 'मित्रः' अपरपक्षाभिमानी देवः, 'वरुणे' शुक्लपक्षाभिमानिनि देवे 'रेतः सिञ्चति'। 'तत्' तथा सति 'एतेन रेतसा' स शुक्लपक्षः 'प्रजायते' उत्पद्यते; 'यत्' यतः कारणात् अस्मिन् चन्द्रः 'आपूर्यते'। 'यत्' यस्मात् एवम्, 'तत्' तस्मात् 'एषा' मित्रावरुणदेवताका 'पयस्या' 'अवक्लृप्ततमा' अतिशयेनावक्लृप्ता, क्लृप्तसामर्थ्या भवति ॥ १९ ॥

---

* "कालाध्वनोरत्यन्तसंयोगे"— इति पा० सू० २. ३. ५।

इतोऽपि पयस्यायागो दर्शे युक्ततर इत्याह— "साम्नाय्यभाजना वा इति। 'साम्नाय्यभाजना' साम्नाय्ययागस्य स्थानभूता ह्यमावास्या; ऐन्द्रदध्नामावास्याया मिति दधिपयसोर्यागस्य प्रकृतौ तत्र विहितत्वात्। 'तत्' तथा सति ते द्वे ऐन्द्रसाम्नाय्ये 'अदः' विप्रकृष्टः 'पौर्णमास्याम्' एव 'क्रियते'। यद्यपि 'सः' पौर्णमास्यां साम्नाय्यं यजमानः 'अत्र' दर्शे 'अपि' 'सन्नयेत्', तदा कृतस्यैव पुनःकरणात् 'जामिता' दोषः स्यात्; अपि च दर्शपूर्णमासदेवतयोः परस्परं 'समदं' कलहं 'कुर्यात्'। पूर्णमासे कृतमैन्द्रं साम्नाय्यं परित्यज्य दर्शे मित्रावरुणदेवताका पयस्यैव कार्या। तस्या अपि दधिपयसोर्विकारत्वात् अमावास्यायाः साम्नाय्यभाजनत्व मपि न व्याहन्यत इत्यर्थः। "तदेन मदृभ्य इत्यादि। 'तत्' तेन दर्शेऽनुष्ठितेन साम्नाय्ययागेन अप्सु ओषधिषु च प्रविष्टम् 'एनम्' सोमं ततः 'सम्भृत्य' दधिपयोरूपेण सम्पाद्य, अग्नौ हुत्वा, तानि 'आहुतिभ्यः' सकाशात् 'अधिजनयति'। 'स एषः' चन्द्रः (साम्नाय्याहुतिभ्यः जातः *) प्रतिपदि 'पश्चाद् दृष्टे' कलारूपेण दृश्यते ॥ २० ॥

पयस्योत्पत्त्यनुनिष्पादिनो वाजिनस्यापि † होमं विधित्सुः पयस्यावाजिने सम्भूय स्तौति— "मिथुनादिति। 'एनं' चन्द्रं 'मिथुनात्' एव हि खलु 'एतत्' 'प्रजनयति' उत्पादयति। किन्तर्हि मिथुनम्? 'पयस्या' हि स्त्रीलिङ्गत्वाद् 'योषा' स्त्री, 'वाजिनं' हि 'रेतः' पुरुषस्य वीर्यस्थानीयम्; 'तत्' खलु 'अनुष्ठा'

---

* नास्येतत् पदद्वयं च-पुस्तके।

† "दधिपयसोः सारभूतं यत् कठिनं सम्पद्यते, सा पयस्या; यच्च उदकं पृथग् भवति, तद् वाजिनम्"— इति या० दे० (का० सू० ४, ४, ६,)।

अनुष्ठानात् सम्यक् 'यत्' यत्र खलु स्त्रीपुंसलक्षणात् 'मिथुनात्' 'जायते' ॥ २१ ॥

इत्थं वाजिनस्य मिथुनसम्पत्त्यर्थत्व मुक्त्वा तस्य होमं विधत्ते— "अथ वाजिभ्य इति *। विहितं वाजिनहोमं प्रजोत्पत्तिहेतुत्वेन स्तौति— "ऋतवो वा इति। 'ऋतवः' खलु वाजिशब्दाभिधेयाः, तेभ्यः। वाजिनहोमात् ऋतुभ्य एव सर्वप्रजोत्पत्तिकारणं 'रेतः' 'सिक्तं' भवति; तस्माच्च रेतसः सकाशात् ते 'ऋतवः' सर्वाः 'प्रजाः' उत्पादयन्तीत्यर्थः ॥ २२ ॥

तस्य वाजिनहोमस्य कालं विधातुं स्तौति— "स वा इति। यज्ञस्य पशुयागे प्रस्तरपरिधिप्रहरणोत्तरकालं वाजिनहोमः कर्त्तव्यः। अत एवोक्तं कात्यायनेन— "वाजिनं निषिच्योत्करे करोति, ०—० प्रहृत्य तृणं तेन चरति, विमुच्य वा स्रुचौ"— इति †। आपस्तम्बोऽप्याह स्म— "परीधीन् प्रहृत्य, संस्रवान्तं कृत्वा, वाजिनपात्र मुपस्तीर्य"—इत्यादि। होमे विशेषं विधत्ते— "स वा इति। 'सः' खलु अध्वर्युः 'अग्रे' प्रथमं 'प्रागेव' प्रागपवर्गं मध्यं वाजिनं 'जुहोति'। "अग्ने वीहि"— 'इति' ‡ यदा होता 'अनुवषट् करोति', तदा स्विष्टकृत्स्थानीयं वाजिनशेष मुत्तरपूर्वस्यां दिशि जुहोति §। "स वै प्रागेवेति, प्रधानहोमस्य निगमनम् ॥ २३ ॥

हुतशिष्टेन वाजिनेन दिग्व्याघारणं विधत्ते— "अथ दिशो व्याघारयतीति ‖। दीर्घधारयाग्नौ प्राच्यादिदिक्षु पातनम्, व्याघा-

---

* का० श्रौ० सू० ४. ४. ६। † का० श्रौ० सू० ४. ४. ६—१२।
‡ ऐ० ब्रा० १. ४. ५ द्रष्टव्यम्। § का० श्रौ० सू० ४. ४. १६ क।
‖ का० श्रौ० सू० ४. ४. १६ ख।

रणम्। तन्मन्त्रा—"दिशः प्रदिश इत्यादयः *। अनेन वाजिनेन 'दिशः' क्षमा भवन्तु। एव मुत्तरत्रापि योज्यम्। प्रधानभूताः 'दिशः', दिङ्मध्यवर्त्तिन्यः 'प्रदिशः', ईषद्दिशः 'आदिशः', 'विदिशः' आग्नेयादिकोणदिशः, 'उद्दिशः' ऊर्ध्वा दिशः। एवं पञ्चभिर्मन्त्रैः स्वाहाकारान्तैः प्राच्यादिक्रमेण पञ्चसु दिक्षु व्याघारार्थं "दिग्भ्यः स्वाहा"—इति षष्ठेन पूर्वार्द्धे जुहुयात्। तदुक्तं सूत्रकृता—"वाजिनशेषेण दिशो व्याघारयति, दिश इति प्रतिमन्त्रम्; प्रदक्षिणं पुरस्तात् प्रथम मुत्तमाभ्यां मध्ये पूर्वार्द्धे च"—इति †। तदेतद् व्याघारणं प्रशंसति—"पञ्च वा ऋतव इति ॥ २४ ॥

यजमानपञ्चमाना ऋत्विजां भक्षणं विधत्ते—"तर्हि पञ्चेवेति ‡। तद्भक्षणं प्रशंसति—"पञ्च वा ऋतव इति। "हेमन्तशिशिरयोः समासेन"—इति § ऋतूनां पञ्चत्वम्। यदेव पञ्चाना मृत्विजां भक्षणम्, एतत् पञ्चरूपाणा मृतूना मेव रूपं क्रियते। "तत्' तस्मात् 'ऋतुषु' प्राक् 'सिक्तं' रेतः' 'प्रतिष्ठापयति' प्रतिष्ठितं करोति ॥

यजमानस्य प्राथम्यं विधत्ते—"प्रथमो यजमान इति ‖। ऋत्विग्भ्यः 'प्रथमः' पूर्वभावी सन् अहं 'रेतः' 'परिगृह्णानि' स्वीकरवाणि 'इति' अनेनाभिप्रायेण यजमानस्य प्रथममक्षण मित्यर्थः ॥

पक्षान्तर माह—"अथो अप्युत्तम इति ¶। पक्षान्तरद्योतकः 'अथो'-शब्दः। ऋत्विजाम् 'उत्तमः' चरमभावी सन्

* वा० सं० ६, १६, १—५।

† का० श्रौ० सू० ४, ४, १६, १७। "स्वाहाकारः सर्वत्र साकाङ्क्षत्वात्"१८।

‡ "होत्रध्वर्युब्रह्मागीद्यजमानाः"—इति का० श्रौ० सू० ४, ४, २६।

§ ऐ० ब्रा० १, १, १ द्रष्टव्यम्।

‖, ¶ "प्रथमो वोभयतस्तु यजमानः"—इति का० श्रौ० सू० ४, ४, २७।

यजमानो भक्षयेत्। एव मपि विरोधो नास्तीति 'अपि'-शब्दस्यार्थः। 'उत्तमे' चरमभाविनि यजमाने कृत्स्नं 'रेतः' 'प्रतितिष्ठात्' प्रतितिष्ठेत्, न मा मतिवर्त्तेत, इत्यनेनाभिप्रायेण यजमानस्य चरमभक्षण मित्यर्थः * ॥

अथ मन्त्रानुज्ञापनपूर्वकं तद्भक्षणं कर्त्तव्य मिति विधत्ते— "उपह्वत इति। "उपह्वतः"—इत्यनुज्ञामन्त्रः, "उपह्वयस्व"—इत्यनुज्ञापनमन्त्रः। एतच्च द्वादशलक्षण्यां तृतीये विचारितम् †। कात्यायनेनाप्युक्तम्— "उपह्वयस्वेत्यामन्त्र्य भक्षण मुपह्वत इति प्रसूतः"—इति ‡। एवञ्च सति 'एतद्' वाजिनम् ऋत्विजः 'सोम मेव' सोमसदृश मेव 'कुर्वन्ति'; उपह्वसाधनं हि सोमधर्म्मः § ॥ २५ ॥ १ [४. ४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम् ॥

---

* "ऋतूनां त्वा वाजिनं वाजिनं भक्षयामीति"—इत्यादयश्च मन्त्रविधयः का० श्रौ० ४. ४. २३-२४-२५-सूत्रेषु द्रष्टव्याः।

† मी० जै० सू० ३. ५. १६—५३ सूत्राणि, तेषु ६—१६ अधिकरणानि च द्रष्टव्यानि। विशेषतस्त्विह "वचनादनुज्ञातभक्षणम्, यदुपह्वत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात्"—इति सूत्रद्वयं विवेच्यम् (४०, ४१ सू०; १४, १५ अधि०)।

‡ का० श्रौ० सू० ४. ४. १६। "मुक्तनामिवा"—इति तदुत्तरम् (२०)।

§ का० श्रौ० सू० ४. ४. २१। "दाक्षायणं वा दक्षिणा"—इति (का० श्रौ० सू० ४. ४. २८) चात्र दक्षिणाविधिः। 'दाक्षायणं सुवर्णं सुध्यते ०—० तच्च शतमानं रक्तिकाशतपरिमितम् (२०. १. २५ सू०)'—इत्यादि च तत्र वृत्तौ याज्ञिक देवः।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चमीरीस्त्रिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नौस्रां रुक्मराजिद्विपमहितरथौ मायणिः सिङ्गणार्यौ,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटज्ञ ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजते राजपूज्यः ।
आज्यौत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरिमकृत मुदा पात्रसाच्चिङ्गणार्यः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
मायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

---

* एतद्दीयपाठभेदाः पूर्वपूर्वत्र द्रष्टव्याः ।

(अथ पञ्चमाध्याये प्रथमं ब्राह्मणम् ।)

प्रजापतिर्ह वा ऽइद मग्र ऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत् स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि व्ययाꣳसि पुरुषो वै प्रजापतेर्नेदिष्ठं द्विपाद्ता अयं पुरुषस्तस्माद् द्विपादो व्ययाꣳसि ॥ १ ॥

स ऐक्षत प्रजापतिः । यथा न्वेव पुरैकोऽभूव मेव मु न्वेवाप्येतर्ह्येक एवास्मीति स द्वितीयाः समृजे ता अस्य परैव बभूवुस्तदिदं क्षुद्रꣳ सरीसृपं यदन्यत् सर्पेभ्यस्तृतीयाः समृज ऽइत्याहुस्ता अस्य परैव बभूवुस्त ऽइमे सर्पा एता ह न्वेव ह्ययीर्याज्ञवल्क्य उवाच त्रयीरु तु पुनर्ऋचा * ॥ २ ॥

सोऽर्चेऽश्राम्यन् प्रजापतिरीक्षाञ्चक्रे । कथं नु मे प्रजाः † सृष्टाः पराभवन्तीति स हैतदेव ददर्शानशनतया वै मे प्रजाः पराभवन्तीति स आत्मन एवाग्रे स्तनयोः पय आप्याययाञ्चक्रे स प्रजा असृजत ता

* 'चा'— इति घ, ङ ।

† 'प्रजाः'— इति घ, ङ ।

अथ प्रजाः सृष्टा स्तनावेवाभिपद्य तास्ततः सम् बभूवुस्ता इमा अपराभूताः ॥ ३ ॥

तस्मादेतदृषिणाभ्यनूक्तम् । प्रजा ह तिस्रो ऽत्यायं मीयुरिति तद्याः पराभूतास्ता एवैतदभ्यनूक्तं न्यत्या अर्कं मभितो व्विविश्र ऽइत्यग्निर्व्वा ऽअर्कस्तद्या इमाः प्रजा अपराभूतास्ता अग्निं मभितो निविष्टास्ता एवैतदभ्यनूक्तम् ॥ ४ ॥

महद्ब्रह्म * तस्थौ भुवनेष्वन्तरिति । प्रजापतिं मवैतदभ्यनूक्तं पवमानो हरित आविवेशेति दिशो वै हरितस्ता अयं व्वायुः पवमान आविष्टस्ता एवैषऽर्गभ्यनूक्ता ता इमाः प्रजास्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजतेदꣳ हि युद्वै स्त्रियै स्तनावाप्यायेते ऽऊधः पशूना मथैव यज्जायते तज्जायते तास्तत स्तनावेवाभिपद्य सम्भवन्ति ॥ ५ ॥

तद्वै पय एवान्नम् । एतद्ध्यग्रे प्रजापतिरन्न मजनयत तद्या ऽअन्न मेव प्रजा अन्नादि सम्भवन्तीदꣳ हि यासाम्पयो भवति स्तनावेवाभिपद्य तास्ततः सम्भवन्त्यथ यासाम्पयो न भवति जात मेव ता अथा-

* 'बृहद्ब्रह्म'— इति मुद्रितसंहितापाठः (८. १०२. १४.) ।

दयन्ति तदु ता अन्नादेव सम्भवन्ति तस्मादन्न मेव प्रजाः * ॥ ६ ॥

स यः प्रजाकामः । एतेन हविषा यजत आत्मान मेवैतद्यज्ञं विधत्ते प्रजापतिं भूतए † ॥ ७ ॥

स वा आग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निर्व्वै देवतानां मुखं प्रजनयिता स प्रजापतिस्तस्मादाग्नेयो भवति ॥ ८ ॥

अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तदग्नौ प्रजनयितरि सोमए रेतः सिञ्चति तत् पुरस्तान्मिथुनं प्रजननम् ॥ ९ ॥

अथ सावित्रः ‡ । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता प्रजापतिर्मध्यतः प्रजनयिता तस्मात् सावित्रो भवति ॥ १० ॥

अथ सारस्वतश्चरुर्भवति । पौष्णश्चरुर्योषा वै सरस्वती व्वृषा पूषा ततः पुनर्मिथुनं प्रजनन मेत-

---

* 'प्रजाः'— इति घ, ङ ।

† 'भूतए'— इति घ, ङ ।

‡ 'चः'— इति घ, ङ ।

स्माद्वा ऽउभयतो मिथुनात् प्रजननात् प्रजापतिः प्रजाः समृज ऽइतश्चोर्ध्वा इतश्चावाचीः। अथो ऽएवैष एतस्माद्भयत एव मिथुनात् प्रजननात् प्रजाः सृजत ऽइतश्चोर्ध्वा इतश्चावाचीः। तस्माद्वा ऽएतानि पञ्च हवींषि भवन्ति ॥ ११ ॥

अथातः पयस्याया एवायतनम्। मारुतस्तु सप्तकपालो त्र्यिशो वै मरुतो देवविशस्ता हैदं मनिषेध्रा * इव चेरुस्ताः प्रजापतिं यजमान मुपेत्योचुर्व्वि वै ते मथिष्यामहै ऽइमाः प्रजा या एतेन हविषा स्वच्यम ऽइति ॥ १२ ॥

स ऐक्षत प्रजापतिः। परा मे पूर्व्वाः प्रजा अभूवन्निमा उ चेदिमे त्र्यिमयुते न ततः किञ्चन परिशेष्यत ऽइति तेभ्य एतं भाग मकल्पयदेतं मारुतꣳ सप्तकपालं पुरोडाशꣳ स एष मारुतः सप्तकपालस्तद्यत् सप्तकपालो भवति सप्त-सप्त हि मारुतो गणस्तस्मान् मारुतः सप्तकपालः पुरोडाशो भवति ॥ १३ ॥

तं वै स्वतवीभ्य इति कुर्य्यात्। स्वयꣳ हि त

* 'मनिषेद्ध्रा'— इति घ, ङ।

ऽएतं भाग मवृव्वंतोतो स्वतवोभ्यो याज्यानुवाक्ये न विन्दन्ति स उ खलु मारुत एव स्यात् स वा ऽएष प्रजाभ्य एवाहिंसायै क्रियते तस्मान् मारुतः * ॥ १४ ॥

अथातः पयस्येव †। पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्युत एव सम्भूता यतः सम्भवन्ति तदेवाभ्य एतत् करोति तद्याः पूर्व्वैर्हविर्भिः प्रजाः सृजते ता एतस्मात् पयस एतस्यै पयस्यायै सम्भवन्ति ॥ १५ ॥

तस्यां मिथुन मस्ति। योषा पयस्या रेतो व्वाजिनं तस्मान् मिथुनादिव मसम्मित मनु प्राजायत तद्यदेतस्मान् मिथुनादिव मसम्मित मनु प्राजायत तस्माद्वैश्वदेवी भवति ॥ १६ ॥

अथ द्यावापृथिव्य एककपालः पुरोडाशो भवति। एतैर्व्वै हविर्भिः प्रजापतिः प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्य्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथो ऽएवैष एतद्या एतैर्हविर्भिः प्रजाः

---

* 'मारुतः'— इति क, घ, ङ।

† 'व'— इति घ, ङ।

सृजते ता द्यावापृथिवीभ्यां परिगृह्णाति तस्माद् द्यावापृथिव्य एककपालः पुरोडाशो भवति ॥ १७ ॥

अथात आवृदेव *। नोपक्किरन्त्युत्तरवेदिं व्विसृष्ट मसत् सर्व्व मसदैश्वदेव मसदिति चेधा बर्हिः सन्नद्धं भवति तत् पुनरेकधैतद्वि प्रजननस्य रूपं प्रजनन मु ह्येदं पिता माता यज्जायते तत् तृतीयं तस्मात् चेधा सत् पुनरेकधा प्रस्व उपसन्नद्धा भवन्ति तं प्रस्तरं गृह्णाति प्रजनन मु ह्येदं प्रजनन मु हि प्रस्वंस्तस्मात् प्रसुः प्रस्तरं गृह्णाति ॥ १८ ॥

आसाद्य हवीष्यग्निं मन्थन्ति †। अग्निर्ह वै जायमान मनु प्रजापतेः प्रजा जक्षिरे‡ तथो एवैतस्याग्नि मेव जायमान मनु प्रजा जायन्ते तस्मादासाद्य हवीष्यग्निं मन्थन्ति §॥ १९ ॥

नवप्रयाजं भवति। नवानुयाजं दशाक्षरा वै व्विराडथैता मुभयतो न्यूनां व्विराजं करोति

---

* 'व'— इति घ, ङ।

†, § 'मन्थति'— इति ग।

‡ 'जक्षिरे'— इति च दृश्यो डा०-वेबरेण।

प्रजननायैतस्माद्वा ऽउभयतो न्यूनात् प्रजननात् प्रजापतिः प्रजाः समृज ऽइतश्चोर्ध्वा इतश्चावाचीस्तथो ऽएवैष एतस्मादुभयत एव न्यूनात् प्रजननात् प्रजाः सृजत ऽइतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥ २० ॥

त्रीणि समिष्टयजूंषि भवन्ति । ज्यायं इव हीदृगु हविर्यज्ञायुत्र नवप्रयाजं नवानुयाज मथो ऽअप्येक मेव स्याद्धविर्यज्ञो हि तस्य प्रथमजो गौर्दक्षिणा ॥ २१ ॥

एतेन वै प्रजापतिः । यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद् बभूवैताꣳ ह वै प्रजातिं प्रजायत ऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ २२ ॥ २ ॥

॥ इति चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् [५. १.] ॥

अथ चातुर्मास्यानि * विधित्सुस्तत्र वैश्वदेवस्य प्रजासृष्टिहेतुता माख्यायिकया प्रतिपादयति— "प्रजापतिर्ह वा इति ।

* चातुर्मास्यशब्देन इतः क्रमाद् विधास्यमानानि वैश्वदेववरुणप्रघास साकमेधसुनासीरीयसञ्ज्ञानि चत्वारि पर्वाण्यभिधीयन्ते ।

इदं दृश्यमानं चराचरात्मकं जगत् तत्समयसृष्टेः प्राक्काले प्रजापतिरेक एव आसीत् ; कार्यस्य जगतः कारणभूते प्रजापतौ लीनत्वात् । सः असहायः एक एव आसीदित्यर्थः ।

ततः सकाशात् प्रजासृष्टिं दर्शयति—"स ऐक्षतेत्यादिना । "अश्राम्यदिति । प्रजोत्पत्तिकारणपर्यालोचनया श्रान्तः खिन्नोऽभवदित्यर्थः । "श्रमु तपसि खेदे च" * । "श्रमा मष्टानाम्"—इति † दीर्घः । स च श्रान्तः सन् प्रजोत्पत्तिकारणं तपस्तप्तवान् । "स प्रजा इत्यादि , निगदसिद्धम् ।

"तानीमानीति । या खलु सृष्टेः पराभूताः , 'तानि इमानि' 'वयांसि' जातानि , पक्षिरूपेणाभवन्नित्यर्थः । एतदुपपादयति— "पुरुषो वा इति । 'पुरुषः' मनुष्यः खलु सृष्टानां प्रजानां मध्ये 'प्रजापतेः' 'नेदिष्ठम्' अन्तिकतमं कार्यम् । स च पादद्वयोपेतः , तत्परिणामरूपत्वात् पक्षिणोऽपि पादद्वयोपेता दृश्यन्ते । तस्माद् वयमां पुरुषसाधर्म्यात् तेषां तत्परिणामरूपत्वमवसेय मित्यर्थः ॥ १ ॥

पुनरन्यथा प्रजासृष्टिं माह— "स ऐक्षतेति । "यथा न्वेवेति । 'यथा' खलु 'पुरा' प्रजासृष्टेः पूर्वम् 'एकः' असहायः 'अभूवम्', 'अप्येतर्हि' इदानीं प्रजासृष्ट्युत्तरकालमपि तथैव 'एकः एव अस्मि इति' । एवमीक्षित्वा 'सः' पुनः अन्याः प्रजाः 'ससृजे', पूर्वसृष्टप्रजापेक्षया आसां द्वितीयत्वम् । "परेवेति । 'अस्य' 'ताः' अपि प्रजाः पराभूताः 'एव' अभवन् । 'तत्'—इति विधेयापेक्षं नपुंसकत्वम् ; ताः पराभूताः द्वितीयसृष्ट्युत्पन्नाः प्रजाः ,

* दि० प० ६८ धा० ।

† पा० सू० ७. ३. ७४ ।

यत् 'इदं' 'क्षुद्रम्' अल्पशरीरं 'सरीसृपं' सर्पणशीलं सर्पव्यतिरिक्तं प्राणिजातं दृश्यते, तदात्मना परिणता इत्यर्थः। "तृतीयाः ससृज इत्याहुरिति। पुनरपि स प्रजापतिः सृष्टिद्वयापेक्षया 'तृतीयाः' अन्याः प्रजाः 'ससृजे' सृष्टवान् 'इति' 'आहुः' अभिज्ञाः कथयन्ति। 'ताः' अपि 'अस्य' पराभूताः अभवन्। 'ते इमे' सर्परूपेण दृश्यन्ते ॥

तृतीयसृष्टावाहुरिति यः परोक्षनिर्देशः, तदभिप्राय माह —"एता ह्येति। 'एताः' पूर्वोक्ताः 'द्वयीः' द्विविधाः 'एव' प्रजाः प्रजापतिना सृष्टाः इति 'याज्ञवल्क्यः' महर्षिः 'उवाच' उक्तवान्, न तृतीयानां प्रजानां सृष्टिः; 'ऋचा' ऋग्भन्त्रेण * 'पुरः' 'त्रयी' त्रिविधा अपि 'प्रजाः' सृष्टा इति प्रतिपाद्यते ॥ २ ॥

स चोदाहरिष्यते— "सोऽर्चन्नित्यादि। त्रिवारं सृष्टानां प्रजानां पराभवकारणं किमिति विचार्य 'सः' खलु 'एतत् एव' कारणं 'ददर्श'। एतच्छब्दनिर्दिष्टं दर्शयति— "अनशनतयेति। उत्पन्नानां प्रजाना मशनराहित्यं पराभवकारण मित्यर्थः। उत्पद्यमानानां प्रजाना मनशनत्वं माभूदिति प्रजापतिना कल्पित मशन माह— "स आत्मन एवेति। 'अग्रे' सृष्टेः प्रागेव प्रजापतिः 'आत्मनः' स्वशरीरस्य एव सम्बन्धिनोः 'स्तनयोः' 'पयः' 'आप्याययाञ्चक्रे' आप्यायितं पूरितं कृतवान्। एव मशनं प्रकल्प्य अनन्तरं या प्रजाः असृजत, 'अस्य' प्रजापतेः 'ताः' सृष्टाः 'प्रजाः' पयसा पूर्णौ 'स्तनौ' 'अभिपद्य' जीवनवत्योऽभवन्। 'ततः' अनन्तरं 'ताः' प्रजाः 'सम्बभूवुः' सम्यगुत्पन्ना लब्धात्मानोऽभवन्। पराभवं न प्राप्ता इत्यर्थः ॥ ३ ॥

* त मिमं मन्त्र मिहैवोपरिष्टात् चतुर्थपञ्चमयोरुद्धृत्य व्याख्यास्यते।

उक्तेऽर्थे ऋङ्मन्त्रं संवादयति— "तस्मादिति। यस्मादग्रे एव मासीत्, तस्मात् कारणात् तदुक्तमर्थजातम् 'ऋषिणा' मन्त्रेण 'अभ्यनूक्तम्' प्रतिपादितम् *। तत्र प्रथमपाद मनूद्योक्तार्थपरता माह— "प्रजा हेति। 'तिस्रः' त्रिविधाः 'प्रजाः' 'अत्यायम्' अत्ययं विनाशम् 'ईयुः' जग्मुः। 'ह'-शब्द एतद्ब्राह्मणप्रसिद्धिं द्योतयति †। "तथा इति। 'याः' खलु प्रजाः त्रिधा सृष्टा अन्नाभावहेतुना 'पराभूताः', 'एतत्' एतेन मन्त्रपादेन ता एवाभिलक्ष्य 'अभ्यनूक्तम्' प्रतिपादितम् ॥

द्वितीयपाद मनूद्य व्याचष्टे— "न्यन्या इति। पयोरूपमन्नं प्राप्य 'अन्याः' प्रजाः 'अर्कम्' अर्चनीयमग्निम् 'अभितः' सर्वतः 'निविविश्रे' निविवेशिरे। "नेविशः"—इति ‡ आत्मनेपदम्, "इरयो रे"—इति § रे-आदेशः। "तथा इत्यादि। 'तत्' तत्र 'या इमाः प्रजाः' 'अपराभूताः', 'ताः' एव, जाठररूपेण लौकिकवैदिकभेदेन वावस्थितम् 'अग्निं' स्वस्वव्यापाराय गर्भमुपविष्टा वर्त्तन्ते। एतदेतेन पादेन प्रतिपादितम् ॥ ४ ॥

तृतीयपाद मनूद्य व्याचष्टे— "महड तस्थाविति। इत्थं देवमनुष्यादिरूपासु प्रजासु सतीषु तत्स्रष्टा प्रजापतिः 'भुव-

---

* ऋ० सं० ८. १०१. १४।

† भाष्यकारस्येदं वचनमश्रद्धेयम्; अस्य हि ब्राह्मणग्रन्थस्य ऋग्वेदीयमन्त्रग्रन्थात् परतन्त्रत्वात्। अत एवात्र ऋङ्मूलमानोपन्यासः सङ्गच्छते। वस्तुतः सर्व एव ब्राह्मणग्रन्थाः सर्वेभ्य एव मन्त्रग्रन्थेभ्यः परभवा इत्येतिह्यासिकसिद्धान्त एव।

‡ पा० सू० १. ३. १७।

§ पा० सू० ६. ४. ७६।

नेषु' 'अन्तः' मध्ये 'महत्' * अधिकं 'तस्थौ' सर्वोत्कर्षेणावस्थितः। गत मन्यत् ॥

चतुर्थपाद मनूद्य व्याचष्टे— "पवमान इति। 'दिशो वै हरितः' दिशो हि हरिच्छब्दवाच्याः, अतः 'ताः' 'अयं' पुरोवर्त्ती 'पवमानः' वायुः 'आविष्टः' दृश्यते। अतस्तुरीयपादेन अय मर्थः प्रतिपाद्यत इति। "ता एवेति, उक्तार्थनिगमनम्। 'ताः' उक्ताः प्रजाः 'एव' अभिलक्ष्येत्यर्थः † ॥

प्रजापतिकृतायाः सृष्टेरविच्छेदेनानुवृत्तिं दर्शयति— "ता इमा इति। 'यथेव' येन हि प्रकारेण पुरा 'प्रजापतिः प्रजाः असृजत', 'तथेव' तेनैव प्रकारेण 'ता इमाः' मनुष्याद्याः 'प्रजाः' 'प्रजायन्ते' उत्पद्यन्ते। एतदेवोपपादयति— "इदं हीति। इदानीं स हि 'यदेव' खलु लोके 'स्त्रियै' स्त्रियाः। षष्ठ्यर्थे चतुर्थी ‡। 'स्तनौ' 'आप्यायेते' पयसा पूरितौ भवतः। व्यत्ययेनैकवचनम् §। गवादिपशूनाम् 'ऊधः' च पयसा पूर्णं भवति। 'अथ' अनन्तरम् 'एव' 'यत् जायते' 'तत्' एव 'जायते', अन्यदजायमानं विपद्यत इत्यर्थः। "तास्तत इति। 'ताः' उत्पन्नाः प्रजाः

* 'बृहत्'— इति मुद्रितायाः शाकलशाखाया आश्वलायनशाखाया वा पाठः। तदेवं शतपथब्राह्मणन्तु शाकलाभिधानां पञ्चानां माश्वलायन्यादीनां माविर्भावात् पूर्वतन मिति गम्यते। नार्थेतेन मन्त्रसंहिताभ्य इदं पुरातन मिति भ्रमितव्यम्।

† ऐतरेयकारणके त्वेष मन्त्रो विशेषतो व्याख्यातः। ऐ० आ० २आ० १अ० १ख० ४—८। तत्र 'तिस्रः'-इत्यस्य 'वङ्गावगधाश्चेरपादाः'—इति व्याख्या समाम्नाता। सायणकृतं तद्व्याख्यानन्तु न समीचीनं मन्यामहे।

‡ पा० २. ३. ६२ सू० १ वा०।

§ पा० सू० ३. १. ८५। इह कारिका द्रष्टव्या।

'ततः' जननानन्तरं पयोधरौ 'स्तनौ एव' 'अभिपद्य' अभिप्राप्य स्तन्यपानेन 'सम्भवन्ति' प्रवर्द्धन्ते, न विपद्यन्ते ॥ ५ ॥

पयसोऽन्नरूपता माह— "तद्वै पय इति। 'तत्' तत्र खलु जन्मानन्तरकाले 'पय एव' प्रजानाम् 'अन्नम्' भवति। 'हि' यस्मात् 'अग्रे' इतरान्नसृष्टेः प्राक् 'एतत्' एव 'अन्नम्' 'प्रजापतिः' 'अजनयत' उत्पादितवान्, तस्मादिद मेव मुख्य मन्न मित्यर्थः। तस्य चान्नस्य कार्यकारणयोरभेदोपचारेण प्रजारूपता मुपपादयति— "अन्न मेवेति। 'हि' यस्मात् 'प्रजाः' 'अन्नात्' 'सम्भवन्ति' प्रवर्द्धन्ते, तस्मात् तदात्मिका इत्यर्थः। 'इदं हि' इदानीं हीत्यर्थः। "जात मेवेति। स्तन्याभावे जातस्य शिशोर्जीविनासम्भवात् तज्जीवनार्थं जननानन्तर मेव 'ताः' प्रजाः स्तन्यमेव 'अदयन्ति' भोजयन्ति *। स्पष्ट मन्यत्। इत्थ मन्नहेतुकं प्रजापतेः प्रजासर्जन मुपोद्घातत्वेनोपन्यस्तम् ॥ ६ ॥

अथोपोद्घातिकेषु वैश्वदेवहविरुत्पादयंस्तद् दर्शयिष्यंस्तावत् वैश्वदेवयागं विधत्ते—"स यः प्रजाकाम इति †। 'यः' यजमानः प्रजाकामः, 'सः' 'एतेन' वैश्वदेवाख्यपर्वरूपेण 'हविषा' यजेत, तस्य प्रजाफलसाधनत्व मुपपादयति— "आत्मान मेवेति। स यजमानः 'आत्मान मेव' प्रजापतिरूप मापन्नम् 'एतद्' वैश्वदेवाख्यं 'यज्ञं विधत्ते' वैश्वदेवयज्ञ मात्मना करोतीत्यर्थः। अतो वैश्वदेवेनेष्टवतः प्रजापतेः प्रजोत्पत्तिसाधनत्व मुन्नीत मित्यर्थः ॥ ७ ॥

तत्र प्रथमं हविर्विधाय प्रशंसति— "स वा इति ‡।

---

* 'आदयन्ति भाजयन्ति'— इति च।

† का० श्रौ० सू० ५. १. १—२०।

‡ का० श्रौ० सू० ५. १. ५। आग्नेयोऽष्टाकपालः पुरोडाशः।

'आग्नेयः' अग्निर्देवता अस्य । "तस्य देवता"-इत्यर्थे * "अग्नेर्ढक्"-इति † ढक् । अष्टसु कपालेषु संस्कृतः 'अष्टाकपालः' । 'अग्निः प्रजनयिता' मातापितृभ्यां भुक्तस्यान्नस्य जाठराग्निपरिपाकवशेन शुक्रशोणिताकृना परिणामादग्नेः प्रजनयितृत्वम् ; अत एव प्रजापतिः सोऽग्निरित्यर्थः ॥ ८ ॥

द्वितीयं हविर्विधाय प्रशंसति— "अथ सौम्य इति ‡ । सोमो देवता अस्य 'सौम्यः' । "सोमाट् ष्यण्"-इति ष्यण् । 'प्रजनयितरि' उत्पादयितरि 'अग्नौ' सोमात्मकं 'रेतः' 'सिञ्चति', तदेव 'तत्' प्रजोत्पत्तिसाधनं 'पुरस्तात्' क्रियमाणं मैकं 'मिथुनं' सम्पन्नं भवतीत्यर्थः ॥ ९ ॥

अथ तृतीयं हविर्विधाय प्रशंसति— "अथ सावित्र इति § । सौम्ययागानन्तर्यम् 'अथ'-शब्दार्थः । सविता देवता अस्य 'सावित्रः' । 'प्रसविता' प्रेरयिता । स एव 'प्रजापतिः' वैश्वदेवादिः । आग्नेयादीनां पञ्चानां यागानां मध्ये इज्यमानः सन् 'सविता' 'मध्यतः' प्रजानां 'प्रजनयिता' भवति ॥ १० ॥

चतुर्थपञ्चमे हविषी विधाय सम्भूय प्रशंसति— "अथ सारस्वत इति ‖ । सरस्वती देवता अस्य 'सारस्वतः' ¶ । "तत् पुनर्मिथुन मित्यादि । आदावनुष्ठितादग्रे क्रियमाणादित्यर्थः । "इतश्चोर्ध्वा इत्यादि । 'इतः' अस्मात् भूलोकादारभ्योपरितन-

---

* पा० सू० ४. २. २४। † पा० सू० ४. २. ३२।

‡ "सौम्यश्चरुः"—इति का० श्रौ० सू० ५. १. ६।

§ "सावित्रो द्वादशकपालोऽष्टाकपालो वा"— इति का० श्रौ० सू० ५. १. ७।

‖ "सारस्वतश्चरुः, पौष्णश्चरुः प्रविष्टानाम्"—इति का० श्रौ० सू० ५. १. ८,९।

¶ "योषा वै सरस्वती" इत्यर्थवादादिह सरस्वत्या देवतात्वं, न तु सरस्वतः।

लोकवर्त्तिनीः 'प्रजाः' 'उभयतः' अवस्थितात् 'मिथुनात्' प्रजापतिः सृष्टवानित्यर्थः। इदानीन्तनयजमानोऽपि एव मेव मिथुनद्वयानुष्ठानेन द्विविधाः प्रजाः सृजतीत्याह— "तयो एवेति। "तस्मादित्यादि, विहितानां हविषां निगमनम् ॥ ११ ॥

एवं पञ्चभिर्हविर्भिरुत्पादितानां प्रजानां स्थित्यर्थं प्रजापतिना कल्पितं पयस्यारूप मन्नं दर्शयितव्य मिति पयस्यायागस्य स्थानं प्रतिजानीते— "अथात इति। 'अथ' एवं प्रजासृष्टेरनन्तरं यतः सृष्टानां प्रजाना मन्न मपेक्षितम्, 'अतः' 'पयस्याया एव' पयोविकारद्रव्यसाध्यस्य यागस्य एतत् 'आयतनं' स्थान मित्यर्थः। अथैवं पयस्यायाग एव षष्ठोऽनुष्ठेय इति, नेत्याह— "मारुतम् इति। 'तु'-शब्दः पयस्यायागस्य न्यायप्राप्तं षष्ठस्थानत्वं व्यावर्त्तयति; 'मारुतः सप्तकपालः' एव षष्ठोऽनुष्ठेय इत्यर्थः *।

एतदाख्यायिकयोपपादयति— "विशो वै मरुत इत्यादिना। वैश्यजातयो हि मरुतः; ते च देवतारूपत्वाद् 'देवविशः' खलु 'अनिषेदुषा इव' † अनिषेधुकाः, नियन्तृरहिता इव स्वतन्त्राः 'चेरुः'। 'ताः' स्वातन्त्र्येण वर्त्तमानाः आद्यैः पञ्चभिः हविर्भिः प्रजा उत्पादितवन्तं 'प्रजापतिं यजमानम्' 'उपेत्य' उपगत्य 'ऊचुः' —'ते' त्वदीयाः 'इमाः' उत्पन्नाः 'प्रजाः' वयं 'विमथिष्यामः' हिंसिष्यामः, 'याः' प्रजाः 'एतेन' वैश्यदेवपर्वाख्येन 'हविषा' त्वं 'स्रक्ष्यसे' सृष्टाः करिष्यसि ॥ १२ ॥

एवं मरुद्भिरुक्ते सति 'सः' 'प्रजापतिः' 'ऐक्षत' पर्यालोचितवान्। 'मे' मदीयाः 'पूर्वाः' पूर्वसृष्टाः 'प्रजाः' 'पराभूवन्'।

---

* का० श्रौ० सू० ५. १. १६, १७।

† 'अनिषेधा इव'—इति क।

'इमाः' प्रजाः 'इमे' मरुतः 'विमथ्नन्ते' बाधन्ते चेत् 'ततः' अनन्तरं 'किम्' अपि सृष्टं 'न परिशेक्ष्यते' परिशेषितं न भविष्यति। 'इति' एवं मरुद्भ्यो भीतः सन्, 'तेभ्यः' 'एतं' सप्तदशकपालरूपं 'भागं' कल्पितवान्। अतः प्राप्तस्थान मपि पयस्यायागं परित्यज्य 'स एष मारुतः' यागः इदानी मपि षष्ठत्वेनानुष्ठीयते। सप्तसङ्ख्या मनूद्य प्रशंसति— "तद्यदिति। मरुतो हि सप्तगणाः, तेष्वेकैकस्मिन् गणेषु सप्त सप्त मरुतः। ते चैकोनपञ्चाशत्सङ्ख्याकाः अग्निस्थापनप्रकरणे "ईट्टङ् चान्याट्टङ् च"— इत्यादिभिर्मन्त्रैस्तत्तन्नाम्ना प्रतिपादिताः * ॥ १३ ॥

तेषां किञ्चिद् विशेषण मुपक्षिपति— 'तं वै स्वतवोभ्य इतीति †। 'तं' खलु सप्तकपालं पुरोडाशं 'स्वतवोभ्यः' 'इति' विशेषणविशिष्टेभ्यो मरुद्भ्यः 'कुर्यात्'। 'तवः' इति बलनाम ‡। स्वायत्तं तवो बलं येषां ते स्वतवसः। अस्य विशेषणस्यान्वर्थता माह— "स्वयं हीति। 'ते' मरुतः 'स्वयं हि' स्वपौरुषेणैव हि 'एतं भागम्' 'अकुर्वन्' स्वीकृतवन्तः, अतस्ते स्वतवसः सम्पन्ना इत्यर्थः।

प्रागुक्त मेव पक्षं निगमयितुं कारण मुपन्यस्यति— "अत इति। यदि तु 'स्वतवोभ्यः' प्रतिपादिके § 'याज्यानुवाक्ये' 'न' लभते, तदा 'सः' एव प्रागुक्तः केवलः 'मारुत एव' यागो

---

* तै० सं० ४. ६. ५. १५—२१ द्रष्टव्याः। "सप्तगणा वै मरुतः" इति च तै० ब्रा० २. ७. २।

† 'स्वतवद्भ्यः'—इति का०-औ०-सू०-सम्मतः पाठः। "स्वतवद्भ्य इति छान्दसं रूपम्"— इति तत्र या० दे०। ‡ निघ० २. ६. ५।

§ 'स्वतवः-प्रतिपादिके'— इति वा स्यादिह पाठः।

भवति। एतच्च पक्षद्वयं कात्यायनोऽप्यसूत्रयत्— "मरुद्भ्यः सप्तकपालो मारुतो वेति *।

"स वा एष इति। 'सः' खलु 'एषः' मारुतो यागः 'प्रजाभ्यः' प्रजानाम्। षष्ठ्यर्थे चतुर्थी †। 'अहिंसायै' मरुत्-क्षतबाधराहित्याय 'एव' 'क्रियते'। "तस्मादिति। मारुत-यागस्य निगमनम् ॥ १४ ॥

पयस्यायागं विधत्ते— "अथात इति ‡। 'अथ'-शब्दो मारुतयागानन्तर्ये। यतः सृष्टाः प्रजा मारुतयागेन तत्कृत-हिंसायाः परिहृतत्वात् सुखेनावस्थिताः अन्न माकाङ्क्षन्ते, अतः पयोरूप मन्नं तेभ्यो जनयितुं पयस्यायागः कर्त्तव्य इत्यर्थः। तस्य प्रजाहविर्हेतुत्व माह— "पयसो वा इत्यादि। सृष्ट्यादौ प्रजापतिना सृज्यमानास्ताः 'प्रजाः' तदीयस्कन्धरूपात् 'पयसः' सकाशात् 'सम्भृताः' प्रवर्द्धिताः यतः, एव मिदानी मपि सर्वाः प्रजाः पयस एव 'सम्भवन्ति' जन्मानन्तरं तत्तत्क्षणे एव पयो-लक्षण मन्नं प्राप्य वर्द्धन्ते। पयोरूपस्य तस्यान्नस्य सम्पत्ति मत्र दर्शयितु मुक्त मर्थ मनुवदति— "तद्यत एवेति। 'तत्' तथा सतीत्यर्थः। 'एतत्' एतेन पयस्यायागेन 'तदेव' प्रजाहविर्हेतुभूतं पयः 'आभ्यः' प्रजाभ्यः 'करोति' सम्पादयति। अत एवेदानीं पूर्वसृष्टानां प्रजाना मभिहविर्दृश्यत इत्याह— "तथा इति। 'पूर्वैः' प्रागुक्तैराग्नेयादिभिः पञ्चभिः 'हविर्भिः'। "एतस्मात्

---

* का० श्रौ० सू० ५, १, १६, १७।

† पा० २, ३, ६२ सू० १ वा०।

‡ "वैश्वदेवी पयस्या"— इति का० श्रौ० सू० ५, १, १८।

पयस इति। दध्ना संस्कृतः पयोविकारः पयस्या *। अस्मै चामिक्षा-शब्देनान्यत्रान्नायते— "तस्मै पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्"—इति †। कात्यायनोऽपि पयस्यां प्रकृत्य सूत्रयामास— "शृते वा दध्यानयति, वाजिनं निषिच्योत्करे करोति"—इति ‡। षष्ठ्यर्थे चतुर्थी §। एतस्याः पयस्यायाः प्रकृतिभूतं पयः ‖ ; एतस्मादुत्पन्नाः प्रजा वर्द्धन्त इत्यर्थः ॥ १५ ॥

एवं यागोपयुक्तं द्रव्यं प्रशस्य तस्य वैश्वदेवत्वं प्रतिपादयति— "तस्या मित्यादिना। 'तस्यां' पयस्यायां प्रजननसाधनं 'मिथुनं'

* "आमिक्षापयस्येति चानर्थान्तरम्"—इति या० दे० (का० श्रौ० सू० ४. ३. १०)। "पयस्या भवति, पयो हि वा एतस्मादपक्रामति"—इति ऐ० ब्रा० २ ३. ६। "आखस्य वा एतद्रूपं यदामिक्षा"—इति तै० ब्रा० १. ६. २०. ४। तथाच वङ्गदेशादिप्रसिद्धा 'छाना' एव पयस्या, सैवामिक्षा चेति स्फुटम्।

† "वैश्वदेव्यामिक्षा"—इत्यादि, "वाजिनो यजति, अग्निर्वायुस्सूर्यस्ते वै वाजिनः"—इत्यादि च तै० ब्रा० १. ६. २, ३; तै० सं० १. ८. २। आमिक्षाया निःसृतं यन्नीरं तदेव वाजिनशब्दाभिधेय मिति च तद्ब्राह्मणोक्तिरेवावगम्यते।

‡ का० श्रौ० सू० ४. ४. ८, ६। "अमावास्यायां पयस्या मैत्रावरुणी"—इति तत्पूर्वसूत्रम्। अत एव पयस्यां प्रकृत्येत्युक्तम्।

§ पा० २. ३. ६२ सू० १ वा०।

‖ अत्र चोपरिष्टात् ३ का० ३ अ० ३ ब्रा० २ क० (३ भा० १६५, १७१ पृ०) दुग्धविधानां गद्यानां परिचयो द्रष्टव्यः।

विद्यते। 'पयस्या'-शब्दस्य स्त्रीलिङ्गत्वात् 'योषा', तदनुनिष्पादि 'वाजिनं' 'रेतः' पुंसो वीर्य्यम्; 'तस्मात् मिथुनात्' 'असम्मितम्' अपरिमितम् इदं 'विश्वं' देवमनुष्याद्यात्मकम् 'अनु प्राजायत' अनुक्रमेण प्रजायते, प्रजात मभूत्। "तद्यदेतस्मादिति, प्रतिपादितार्थस्य हेतुत्वाभिधानम्। "तस्मादिति। यस्मात् विश्वोत्पत्तिहेतुः पयस्या, तस्माद् विश्वदेवदेवत्या कार्येत्यर्थः॥ १६॥

अन्तिमं हविर्विधत्ते— "अथेति *। द्यावापृथिव्यौ देवते अस्येति 'द्यावापृथिव्यः'। "द्यावापृथिवीशुनासीरमरुत्वत्"—इतिसूत्रेण † यत्। तत्र हि चकारेण यदित्यनुकृष्यते। तदेतत्पुराकृति मुदाहृतदृष्टान्तेन उपपादयति— "एतैर्वा इत्यादिना। "द्यावापृथिवीभ्यां पर्यगृह्णादिति। अधस्तात् पृथिव्या, उपरिष्टात् द्युलोकेन, तदुभयलोकवर्त्तिनीः सृष्टाः प्रजाः 'पर्यगृह्णात्' परितो वेष्टितवान्। याश्च 'इमाः' प्रजाः आभ्यां 'द्यावापृथिवीभ्यां' 'परिगृहीताः' परिवेष्टिता एव वर्त्तन्ते, न पुनः स्वतो निर्गच्छन्ति। "तथो एवेति। यथा प्रजापतिः, 'तथो' तथैव 'एषः' इदानीन्तनो यजमानोऽपि 'यः एतैः हविर्भिः प्रजाः सृजते', सृष्ट्वा च पयस्यायागेन तासां पयोरूप मन्नं परिकल्प्य, द्यावापृथिव्ययागेन 'द्यावापृथिवीभ्यां' 'ताः' 'परिगृह्णाति' परिवेष्टयतीत्यर्थः॥

एवं वैश्वदेवपर्वणि अष्टौ प्रधानयागा विहिताः ‡, तद्धित-

* "द्यावापृथिवीय एककपालः"— इति का० श्रौ० सू० ५.१.१६।

† पा० सू० ४.२.३२।

‡ "एतद् वैश्वदेवम्"— इति का० श्रौ० सू० ५.१.२० वृत्तिर्द्रष्टव्या।

निर्देशौषधिद्रव्यत्वाल्लिङ्गसामान्याद् दर्शपूर्णमासविधयस्तत्वाति-दिष्टाः ; "प्रकृतिवद् विकृतिः कर्त्तव्या" इति * ॥ १७ ॥

तत्र यानि वैशेष्यकानि † अङ्गानि तानीदानीं विधातुं प्रति-जानीते— "अथात आहवदेवेति । 'अथ'-इति आनन्तर्ये । यतः प्रधानानां मङ्गापेक्षा , अतः कारणात् । 'आहवत्' शब्दः प्रकार-वाची । चोदकप्राप्ताया मितिकर्त्तव्यतायां प्रकारविशेषः कथ्यते ; न ह्यन्यत् किञ्चिन्नूतन मत्र प्रतिपाद्यत इति 'एव'-कारार्थः । अग्निमन्थनादेर्वैशेष्यकस्याङ्गस्य विधास्यमानत्वात् सहचरित ‡ मुत्तरवेद्यावपन मपि प्रसक्तम् , तन्निषेधति— "नोपकिरन्तीति । 'उत्तरवेदिं' 'नोपकिरन्ति' नोपक्षिपन्ति , नोपवपन्तीत्यर्थः । ऋत्विजां बहुत्वाद् बहुवचनम् । "कॄ विक्षेपे" इति § धातुः । तत्र हेतु माह— "विसृष्ट मिति । सत्यां ह्युत्तरवेदौ तत्रानुष्ठीय-मान मेतत् कर्म तया निरुद्धगति स्यात् ; तदभावे तत्कृतनिरोधा-भावात् क्रियमाणं कर्म 'विसृष्टं' व्यापनशीलम् 'असत्' भवेत् ; अत एव परिच्छेदाभावात् 'सर्वं' कृत्स्नं सम्पूर्णम् 'असत्' भवेत् । कार्त्स्न्यादेव तद् 'वैश्वदेवम्' विश्वदेवसम्बन्धयोग्यम् 'असद्' भवेत् ; न ह्यसर्वस्य सर्वदेवसम्बन्धो घटते ; अतो विसृष्टत्वादिसिद्धये उत्तरवेदिर्न कार्येत्यभिप्रायः ॥

* "प्रकृतिवद् विकृतिः कर्त्तव्या"—इत्येवंरूपेणानुमानिकवचनेन"—इत्यादि का० श्रौ० ४. ३. ३ सूचव्याख्यायां याज्ञिकदेवः। तच्चानुमानं "दर्शपूर्णमासधर्म्मा इष्टिपशुषु सामर्थ्यात् दर्शनाच्च ; वैश्वदेवधर्माश्चातुर्मा-स्येषु वचनप्रवृत्तिभ्याम्"—इत्येवमादिभ्यो वचनेभ्य एव बोभवीति।

† 'वैशिष्यकानि'—इति च।

‡ 'सहचाचित'—इति च। § तु० प० १२८ धा०।

बर्हिराहरणे विशेषं विधत्ते— "त्रेधा बर्हिरिति *। 'त्रेधा' त्रिविधं 'बर्हिः' प्रथमं सन्नह्य, 'तत्' एव 'पुनः' 'एकधा' एकविधं सन्नह्यति। त्रिशब्दात् एकशब्दाच्च "सङ्ख्याया विधार्थे धा"—इति † धा-प्रत्ययः। प्रजोत्पत्त्यनुकूलत्वेनैतत् स्तौति— "एतद्वै इति। यदेतत् त्रिधाबद्धस्य बर्हिषः पुनरेकधा संहतम्, 'एतत्' खलु 'प्रजननस्य' प्रजोत्पत्तेः स्वरूपम्। तदेतत् त्रैविध्यं प्रजननगतं दर्शयति— "प्रजनन मु ह्येति। 'पिता, माता', 'यत् जायते' यज्जायमान मपत्यम् 'तत्', एतत् 'तृतीयं' तृतयम्; इद मेव हि 'प्रजननं' प्रजातिः ‡; अस्य हि मातापित्रादिरूपेण त्रिवृत्त्वात्, प्रजननरूपेण चैकत्वात्, तत्साधनभूतस्य बर्हिषः स्वधर्मभाक्त्वं सूचित मित्यर्थः। तस्मिन्नेव बर्हिषि धर्मविशेषं विधत्ते— "प्रस्व इति §। प्रसुवते फलानीति 'प्रस्वः' पुष्पिताङ्कुराः ‖, ते 'उपसन्नद्धाः' भवेयुः। "षूङ् प्राणिगर्भविमोचने" ¶। प्रपूर्वादस्मात् "सत्-सू-हिष"— इति ** क्विप्। "ओः सुपि"— इति †† यण्। प्रसूतयुक्तानां कुशानां प्रस्तरत्वेन ग्रहणं विधत्ते— "तं प्रस्तर मिति ‡‡। 'तम्'—इति प्रस्तरापेक्षयैकवचनम्। प्रसूभिः कुशैः प्रस्तराख्यं मुष्टिं सम्भरेदित्यर्थः॥

---

* का० श्रौ० सू० ५, १, २५। † पा० सू० ५, ३, ४२।

‡ तैत्तिरीयके (ब्रा० १, ६, ३,) ह्येतं स्पष्टं मान्नातम्— "त्रिवृद् बर्हिर्भवति, माता पिता पुत्रः"—इत्यादि।

§ का० श्रौ० सू० ५, १, २६ क। ‖ 'पुष्पितकुशाः'— इति क्व।

¶ अदा० प० २० धा०।

** पा० सू० ३, २, ६१। †† पा० सू० ६, ४, ८३।

‡‡ का० श्रौ० सू० ५, १, २६ ख।

एतस्य प्रकृतिकर्मानुकल्पना माह — "प्रजनन मु हीद मिति। 'इदं हि' वैश्वदेवाख्यं कर्म 'प्रजननं' प्रजोत्पत्तिसाधनम्, 'प्रस्वः' प्रसूतयुक्ताः कुशाश्च फलोत्पत्तिहेतवः; अतः साधर्म्यात् प्रसूतकुशमयं प्रस्तरं कुर्यादित्यर्थः ॥ १८ ॥

प्रकृतितोऽप्राप्तत्वात् तत्कालविशिष्ट * मग्निमन्थनं विधत्ते— "आसाद्य हवींषीति †। प्रकृतिवद्धविरासादनात्तं कृत्वा अग्निमन्थनं कुर्यादित्यर्थः। तदेतत् प्रशंसति—"अग्निर्ह वै हेति। प्रथमसृष्टौ प्रजापतिरग्निं जनयित्वा तदनन्तर मेव अन्याः प्रजाः सृष्टवान्; अत इहाग्नेर्जननं प्रजोत्पत्तिकारणं भवतीत्यर्थः। अत एव प्रागाम्नातम्— "तद् या इमाः प्रजा अपराभूतास्ता अग्निमभितो निविष्टाः"—इति ‡ ॥ १८ ॥

चोदकप्राप्तानां प्रजानां सङ्ख्यान्तरं विधत्ते § — "नवप्रयाजं भवतीति। नव प्रयाजाः अनुयाजाश्च यस्मिन् तत् 'नवप्रयाजं, नवानुयाजं'; तथा कर्त्तव्य मित्यर्थः ॥। नवसङ्ख्यां प्रशंसति— "दशाक्षरेति। "उभयत इति। प्रधानयागात् पुरस्तादुपरिष्टाच्च। "न्यूनादिति। एकाक्षरेण 'न्यूनात्'। "एतस्माद्वा इत्यादि। 'एतस्मात्' उभयतोऽनुष्ठीयमानात् प्रयाजानुयाजरूपात् एकाक्षरन्यूनात् 'प्रजननात्' प्रजननसाधनादित्यर्थः। "इतश्चोर्ध्वा इति। प्रयाजरूपात् प्रथमाद् विराजो भूलोकादारभ्योर्ध्व-

---

* 'प्रकृतितोऽप्राप्तकालविशिष्ट'— इति च।

† का० श्रौ० सू० ५. १. २७।

‡ पुरस्ताद्धैव चतुर्थकण्डिकायां (२५१ पृ०) द्रष्टव्यम्।

§ 'सङ्ख्यान्तर माह'— इत्येव च-पुस्तके।

॥ का० श्रौ० सू० ५. २. ७।

वर्त्तिनीः प्रजाः सृष्टवान्। उपरिष्टात् क्रियमाणादनुयाजरूपाद् विराजो भूलोकात् अवाचीनाः प्रजाः सृष्टवान्। सृष्टमन्यत् ॥ २० ॥

चोदकप्राप्तस्य समिष्टयजुषोऽपि सङ्ख्यान्तरं विधाय प्रशंसति * — "त्रीणीति। तानि च सूत्रकृता दर्शितानि— "त्रीणि समिष्टयजूंषि जुहोति, देवा गातुविदो यज्ञ यज्ञ मेष त इति† "— इति। "ज्याय इव ह्येद मिति। अन्यस्माद्विषयज्ञाद् दर्शपूर्णमासाद् 'इदं' वैश्वदेवपर्वरूपं हविः 'ज्याय इव' प्रवृद्ध मिव हि। ज्यायस्त्वे कारण माह— "यत्रेति। 'यत्र' यस्मिन् कर्मणि 'नवप्रयाजं नवानुयाजं' भवति, तद्धि प्रकृतेर्ज्यायो भवति; प्रकृतौ प्रयाजानां पञ्चत्वात् अनुयाजानां त्रित्वत्वाच्च ॥

पक्षान्तर माह— "अथो इति। 'एक मेव' समिष्टयजुर्भवति, न तु त्रीणि ‡। तत्र कारण माह— "हविर्यज्ञ इति। 'हि'-शब्दो हेतौ। दक्षिणां विधत्ते— "तस्येति। यजमानस्य गोष्ठे प्रथमं जातः 'प्रथमजः', तादृशो 'गौः', 'तस्य' वैश्वदेवपर्वणो दक्षिणात्वेन देय इत्यर्थः ॥ २१ ॥

विहितस्य वैश्वदेवयागस्य प्रजाश्रीफलसाधनत्वं सदृष्टान्त मुपसंहरति— "एतेनेत्यादिना §। "एतद् बभूवेति ‖। 'एतत्'

---

* 'सङ्ख्यान्तर माह'—इत्येव च-पुस्तके।

† का० श्रौ० सू० ५, २, ६; वा० सं० ८, २१, २२, २३।

‡ "एकं वा वैश्वदेवे"— इति का० श्रौ० सू० ५, २, १२।

§ "प्रजाकामस्यापि वैश्वदेवम्"—इति का० श्रौ० सू० ५, २, २०।

‖ यानि विशेषवक्तव्यानि नेहाम्नातानि तानि सर्वाण्येव प्रायः कात्यायनेन सूचितानि; तत्रैव तानि द्रष्टव्यानि (श्रौ० सू० ५, १, २,)।

एतर्हि 'प्रजापतेः' 'या श्रीः' बभूवेत्यर्थः । "तस्मादिति । उपसंहृतस्य यागविधेर्निगमनम् * ॥ २२ ॥ २ [५.१.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्)

वैश्वदेवेन वै प्रजापतिः । प्रजाः ससृजे ता अस्य प्रजाः सृष्टा वरुणस्य यवान् † जघ्नुर्वरुणयो ह वा ऽग्रे यवस्तद्यन्वेव ‡ वरुणस्य यवान् प्रादंस्तस्माद् वरुणप्रघासा नाम ॥ १ ॥

ता वरुणो जग्राह । ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च प्राणोदानौ हैवाभ्यो नापचक्रमतुरथान्याः सर्वा देवता अपचक्रमुस्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुः ॥ २ ॥

---

* तै० ब्रा० १. ६. १—३, तै० सं० १. ८. १. २; एष्वनुवाकेषु चैतद् वैश्वदेवयागविधानादिकं मान्त्रातम्, तत् सर्वं तत्रैव द्रष्टव्यमिति ॥

† 'यवान्'— इति क, ग। ‡ 'न्वेव'— इति क।

ता एतेन हविषा प्रजापतिरभिषज्यत्। तद्याश्चैवास्य प्रजा जाता आसन् याश्चाजातास्ता उभयीर्व्वरुणपाशात् प्रामुञ्चत् * ता अस्यानमीवा अकिल्बिषाः † प्रजाः प्राजायन्त ‡ ॥ ३ ॥

अथ यदेष एतैश्चतुर्थे मासि यजते। तन्नाह न्वेवैतस्य तथा प्रजा व्वरुणो गृह्णातीति देवा अकुर्व्वन्निति त्वेवैष § एतत्करोति याश्च त्वेवास्य ‖ प्रजा जाता याश्चाजातास्ता उभयीर्व्वरुणपाशात् प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः ¶ प्रजाः प्रजायन्ते ** तस्माद्वा एष एतैश्चतुर्थे मासि यजते ॥ ४ ॥

तद्वै द्वे व्वेदी द्वावग्नी भवतः। तद्यद्द्वे वेदी द्वावग्नी भवतस्तदुभयत एवैतद्वरुणपाशात् प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्माद् द्वे वेदी द्वावग्नी भवतः ॥ ५ ॥

स उत्तरस्या मेव व्वेदौ। उत्तरवेदिमुपकिरति न

---

* 'प्रामुञ्चत्'—इति पाठस्य इदो डा०-वेबरेण।

† 'अकिल्बिषाः'—इति क, ख। ‡ 'प्राजायत'—इति घ, ङ।

§ 'न्वेवैष'—इति घ, ङ। ‖ 'न्वेवास्य'—इति घ, ङ।

¶ 'अकिल्बिषाः'—इति क, ग। ** 'प्रजायते'—इति घ, ङ।

दक्षिणस्यां त्वचं व्ये व्यरुणो व्विशो मरुतः त्वच मेवै-तद्दिश उत्तरं करोति तस्मादुपर्यासीनं त्वत्रिय मधस्तादिमाः प्रजा उपासते तस्मादुत्तरस्या मेव व्वेदा ऽउत्तरवेदि मुपकिरति न दक्षिणस्याम् ॥ ६ ॥

अथैतान्येव पञ्च हवीꣳषि भवन्ति। एतैर्वै हविर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो व्वरुण-पाशात् प्रजाः प्रामुञ्चदितश्चोर्ध्वा इतश्चावाचीस्तस्मा-द्वा ऽएतानि पञ्च हवीꣳषि भवन्ति ॥ ७ ॥

अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति। प्राणोदानौ वा ऽइन्द्राग्नी तद्यथा पुण्यं चक्रुषे पुण्यं कुर्य्यादेवं तत्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुस्तत् प्राणोदानाभ्या मेवैतत् प्रजा भिषज्यति प्राणोदानौ प्रजासु दधाति तस्मादैन्द्राग्नो द्वादश-कपालः पुरोडाशो भवति ॥ ८ ॥

उभयत्र पयस्ये भवतः। पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता यतः सम्भवन्ति तत एवैतदुभयतो व्वरुणपाशात् प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मादुभयत्र पयस्ये भवतः ॥ ९ ॥

व्वारुण्युत्तरा भवति। व्वरुणो ह वा ऽअस्य प्रजा अगृह्णात्तत् प्रत्यक्षं व्वरुणपाभृात् प्रजाः प्रमुच्यति मारुतो दक्षिणाजामितायै न्वेव मारुती भवति जामि ह कुर्य्यादुभे व्वारुण्यौ स्यातां मतो ह वा ऽअस्य दक्षिणतो मरुतः प्रजा अजिघाꣳसंस्तानेतेन भागेनाशमयत् तस्मान्मारुती दक्षिणा ॥ १० ॥

तयोरुभयोरेव करीराण्यावपति। कं वै प्रजापतिः प्रजाभ्यः करीरैरकुरुत कम्वेवैष एतत् प्रजाभ्यः कुरुते ॥ ११ ॥

तयोरुभयोरेव शमीपलाशान्यावपति। शं व्वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकुरुत शम्वेवैष एतत् प्रजाभ्यः कुरुते ॥ १२ ॥

अथ काय एककपालः पुराडाशो भवति। कं वै प्रजापतिः प्रजाभ्यः कायेनैककपालेन पुरोडाशेनाकुरुत कम्वेवैष एतत् प्रजाभ्यः कायेनैककपालेन पुरोडाशेन कुरुते तस्मात् काय एककपालः पुरोडाशो भवति ॥ १३ ॥

अथ पूर्व्वेद्युः। अन्वाहार्यपचने ऽतुषानिव

यवान् कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति यावन्तो गृह्याः स्युस्तावन्त्यकेनातिरिक्तानि ॥ १४ ॥

तत्रापि मेषं च मेषीं च कुर्वन्ति। तयोर्मेषे च मेष्यां च यद्यनैडकीरूर्णा * विन्देत्ताः प्रगिज्य निश्लेषयेयुरथ ऽअनैडकीर्न विन्देदथो ऽअपि कुशोर्णा एव स्युः ॥ १५ ॥

तद्यन्मेषश्च मेषी च भवतः। एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेषस्तत् प्रत्यक्षं वरुणपाशात् प्रजाः प्रमुञ्चति यवमयौ भवतो यवान् हि जन्तुषीर्वरुणो ऽगृह्णान्मिथुनौ भवतो मिथुनादेवैतद् वरुणपाशात् प्रजाः प्रमुञ्चति ॥ १६ ॥

स उत्तरस्या मेव प्रयस्यायां मेषी मव दधाति। दक्षिणस्यां मेष मेव मिव हि मिथुनं क्रूप मुत्तरतो हि स्त्री पुमाꣳस मुपशेते ॥ १७ ॥

स सर्वाण्येव हवीꣳष्यध्वर्युः † । उत्तरस्यां वेदा-

---

* 'यद्यनैलकीरूर्णा'— इति सा०-सम्मतः पाठ इति डा० वेबरः। इहोत्तरत्र 'ऽअनैलकीर्न'— इति चैव मेव।

† 'र्युः'— इति घ, ङ।

वासादयत्यथैता मेव पयस्यां प्रतिप्रस्थाता दक्षिणस्यां व्वेदावासादयति ॥ १८ ॥

आसाद्य हवीऽष्यग्निं मन्थति। अग्निं मन्थित्वानुप्रहृत्याभिजुहोत्यथाध्वर्युरेवाहाग्नये समिध्यमानायानुब्रूहीति ता ऽउभावेवधावभ्याधत्त उभौ समिधौ परिशिष्ट ऽउभौ पूर्व्वावाघारावाघारयता ऽथाध्वर्युरेवाहाग्निमग्नीत् सम्मृड्ढीत्यसम्मृष्ट मेव भवति सम्प्रेषितम् ॥ १९ ॥

अथ प्रतिप्रस्थाता प्रतिपरैति। स पत्नी मुदानेष्यन् पृच्छति केन चरसीति व्वरुत्थं व्वा ऽएतत् स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मे ऽन्नः शल्या * जुहवदिति तस्मात् पृच्छति निरुक्तं व्वा ऽएनः कनीयो भवति सत्यऽ हि भवति तस्माद्देव पृच्छति सा यन्न प्रतिजानीत ज्ञातिभ्यो ह्यस्यैतदहितऽ स्यात् ॥ २० ॥

तां व्वाचयति। प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषस इति यथा पुरोऽनुवाक्येव मेषैतयैवैनानेतेभ्यः पाचेभ्यो ह्वयति ॥ २१ ॥

---

* 'ऽन्नः शल्या'— इति घ, ङ।

तानि वै प्रतिपुरुषम् * । यावन्तो गृह्याः स्युस्तावन्त्येकेनातिरिक्तानि भवन्ति तत् प्रतिपुरुष मेवैतदेकैकेन या अस्य प्रजा जातास्ता व्वरुणपाशात् प्रमुञ्चत्येकेनातिरिक्तानि भवन्ति तद्या एवास्य प्रजा अजातास्ता व्वरुणपाशात् प्रमुञ्चति तस्मादेकेनातिरिक्तानि भवन्ति ॥ २२ ॥

पात्राणि भवन्ति । पात्रेषु ह्यशन मश्नते यवमयानि भवन्ति यवान् हि जचुषीर्व्वरुणो ऽगृह्णाच्छूर्पेण जुहोति शूर्पेण ह्यशनं क्रियते पत्नी जुहोति मिथुनादेवैतद्वरुणपाशात् प्रजाः प्रमुञ्चति ॥ २३ ॥

पुरा यज्ञात्पुराहुतिभ्यो जुहोति । अहुतादो वै व्विशो व्विशो वै मरुतो यत्र वै प्रजापतेः प्रजा व्वरुणगृहीताः परिदीर्णा अनत्यञ्च प्राणत्यञ्च शिश्रियुरे † च निषेदुश्च तद्वासां मरुतः पाप्मानं व्विमेथिरे तथो ऽएवैतस्य प्रजानां मरुतः पाप्मानं व्विमथ्नते तस्मात् पुरा यज्ञात् पुराहुतिभ्यो जुहोति ॥ २४ ॥

---

* 'धं'— इति घ, ङ ।

† 'शिश्रियुरे'—इति 'च' ङ्यो डा०-वेबरेण ।

स * वै दक्षिणोऽग्नौ जुहोति। यद् ग्रामे यदरण्य ऽइति ग्रामे वा ह्यरण्ये वैनः क्रियते यत्सभायां यदिन्द्रिय ऽइति यत्सभाया मिति यन्मानुष ऽइति तदाह यदिन्द्रिय ऽइति यद्देवचेति तदाह यदेनश्चकृमा व्वय मिदं तद्वयजामहे त्वाहेति यत् किञ्च व्वय मेनश्चकृमेदं व्वयं तस्मात् सर्व्वस्मात प्रमुच्यामह ऽइत्येवैतदाह ॥ २५ ॥

अथैन्द्रीं मरुत्वतीं जपति। यत्र वै प्रजापतेः प्रजानां मरुतः पाप्मानं व्विमेथिरे तद्देवाश्चक्र ऽइमे ह मे प्रजा न व्विमथ्नीरन्निति ॥ २६ ॥

स एता मैन्द्रीं मरुत्वती मजयत्। तच्चं वा इन्द्रो व्विशो मरुतः तच्चं व्वै व्विशो निषेद्वा निषिद्वा † असन्निति तस्मादैन्द्री ‡ ॥ २७ ॥

मो षू णः। इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः। महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो व्वन्दते गीरिति § ॥ २८ ॥

---

* 'सा'—इति क, ग।

† 'निषिद्वा'—इति च ङ्थो डा०-वेबरेण।

‡ 'न्द्री'—इति घ, ङ। § 'गौरिति'—इति क, घ, ङ।

अथैनां व्वाचयति । अक्रन् कर्म कर्मकृत इत्य-क्रन् हि कर्म कर्मकृतः सह व्वाचा मयोभुवेति सह हि व्वाचाक्रन् देवेभ्यः कर्म कृत्वेति देवेभ्यो हि कर्म कृत्वास्तं प्रेत सचाभुव इत्यन्यतो ह्योढया सह भवन्ति * तस्मादाह सचाभुव इत्यस्तं प्रेतेति जघ-नार्धो वा ऽएष यज्ञस्य यत्पत्नी ता मेतत् प्राचीं यज्ञं प्रासीषदद् गृहा वा ऽअस्तं गृहाः प्रतिष्ठा तद् गृहेष्वेवैना मेतत् प्रतिष्ठायां प्रतिष्ठापयति ॥ २९ ॥

प्रतिपराणीयोदेति प्रतिप्रस्थाता †। सम्मृज-न्त्यग्निꣳ सम्मृष्टे ऽग्नौ ता ऽउभावेवोत्तरावाघारावा-घारयतो ऽथाध्वर्युरेवाश्राव्य होतारं प्रवृणीते प्रवृतो होतोत्तरस्यै व्वेदेर्हौत्रदन ऽउपविशत्युपविश्य प्रसौति ता ऽउभावेव प्रसूतौ स्रुच आदायाति-क्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह समिधो यजेति यज-यजेति चतुर्थे-चतुर्थे प्रयाजे समानयमानौ नवभिः प्रयाजैश्चरतः ॥ ३० ॥

अथाध्वर्युरेवाहाग्नये ऽनुब्रूहीति । आग्नेय माज्य-

* 'भुवति'—इति क, ग; डा०-वेबरेण च दृष्टः।

† 'ता'—इति क, 'ता'—इति घ, ङ।

भागं तौ उभावेव चतुराज्यस्यावदायातिक्रामतो ऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं यजेति तौ ऽउभावेव व्यषट्कृते जुहुतः ॥ ३१ ॥

अथाध्वर्युरेवाह सोमायानुब्रूहीति। सौम्यं माज्यभागं तौ ऽउभावेव चतुराज्यस्यावदायातिक्रामतो ऽतिक्रम्याश्राव्याध्वर्युरेवाह सोमं यजेति तौ ऽउभावेव व्यषट्कृते जुहुतः ॥ ३२ ॥

तद्यत् किञ्च व्वाचा कर्तव्यम्। अध्वर्युरेव तत् करोति न प्रतिप्रस्थाता तद्यदध्वर्युरेवाश्रावयतीहैव यत्र वषट् क्रियते ॥ ३३ ॥

कृतानुकर एव प्रतिप्रस्थाता। ह्यभं वै व्वरुणो व्विशो मरुतस्तत् क्षत्रायैवैतद्विशं कृतानुकरा मनुष्वर्त्मानं करोति प्रत्युद्यामिनीꣳ ह क्षत्राय व्विशं कुर्याद्यदुपि प्रतिप्रस्थाताश्रावयेत्तस्मान्न प्रतिप्रस्थाताश्रावयति ॥ ३४ ॥

पाणावेव प्रतिप्रस्थाता। स्रुचौ कृत्वोपास्ते ऽथाध्वर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा

पौष्णेन चरुणैन्द्राग्नेन द्वादशकपालेन पुरोडाशेन ॥ ३५ ॥

अथैताभ्यां पयस्याभ्यां प्रचरिष्यन्तौ व्विपरिहरतः। स यो मेषो भवति मारुत्यां तं व्वारुण्या मवदधाति या मेषी भवति व्वारुण्यां तां मारुत्या मवदधाति तदुदेवं व्विपरिहरतः त्वत्तं व्वै वरुणो व्वीर्यं पुमान्वीर्य्य मेवैतत् त्वत्ते धत्तो ऽवीर्य्या वै स्त्री व्विशो मरुतस्तदवीर्या मेवैतद्दिशं कुरुतस्तस्मादेवं व्विपरिहरतः ॥ ३६ ॥

अथाध्वर्युरेवाह व्वरुणायानुब्रूहीति। स उपस्तृणीत ऽआज्य मथास्यै व्वारुण्यै पयस्यायै द्विरवद्यति सो ऽन्यतरेणावदानेन सह मेष मवदधात्यधोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदाने ऽअतिक्रामत्यतिक्रम्याश्राव्याह व्वरुणं यजेति व्वषट्कृते जुहोति ॥ ३७ ॥

सव्ये पाणावध्वर्युः *। स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थातुर्व्वा सो ऽन्वारभ्याह मरुद्भ्यो ऽनुब्रूहीत्युपस्तृणीत ऽआज्यं प्रतिप्रस्थाताथास्यै मारुत्यै

* 'र्युः'—इति क, ङ।

पयस्यायै द्विरवद्यति सो ऽन्यतरेणावदानेन सह मेषौ मवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदाने ऽतिक्रामत्यध्वर्युरेवाश्राव्याह मरुतो यजेति वषट्कृते जुहोति ॥ ३८ ॥

अथाध्वर्युरेव कायेन * । एककपालेन पुरोडाशेन प्रचरति कायेनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृते ऽनुब्रूहीति स सर्वेषा मेव हविषा मध्वर्युः सकृत्सकृदवद्यत्यथैतस्या ऽएव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद् द्विराज्यस्याभिघारयतस्ता ऽउभावेवातिक्रामतो ऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निꣳ स्विष्टकृतं यजेति ता ऽउभावेव वषट्कृते जुहुतः ॥ ३९ ॥

अथाध्वर्युरेव प्राशित्र मवद्यति । इडाꣳ समवदाय प्रतिप्रस्थाचे ऽतिप्रजिहीते तवापि प्रतिप्रस्थाता मारुत्यै पयस्यायै द्विरभ्यवद्यत्यथोपरिष्टाद् द्विराज्यस्याभिघारयत्युपहृत्य मार्जयन्ते ॥ ४० ॥

अथाध्वर्युरेवाह ब्रह्मन् प्रस्थास्यामि । समिध माधायाग्नि मग्नौत्यं मृङ्क्ष्वीति स स्रुचोरेवाध्वर्युः पृष-

* 'कायेन' - इति घ, ङ ।

दाज्यं व्यानयते ऽथ यदि प्रतिप्रस्थातुः पृषदाज्यं भवति तत्स द्वेधा व्यानयत ऽउतो तत्र पृषदाज्यं न भवति स यदेवोपभृत्याज्यं तत् स द्वेधा व्यानयते ता ऽउभावेवातिक्रामतो ऽतिक्रम्याश्राव्याध्वर्युरेवाह देवान्यजेति यज-यजेति चतुर्थ-चतुर्थेऽनुयाजे समानयमानौ नवभिरनुयाजैश्चरतरुद्यन्नवप्रयाजं भवति नवानुयाजं तदुभयत एवैतद्रक्षणपाशात् प्रजाः प्रमुञ्चतीतश्चोर्ध्वा वृतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥ ४१ ॥

ता ऽउभावेव सादयित्वा स्रुचो व्यूहतः । स्रुचो व्युह्य परिधीन्त्समज्य परिधि मभिपद्याश्राव्याध्वर्युरेवाहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकꣳ होता प्रतिपद्यते ऽथेता ऽउभावेव प्रस्तरौ समुल्लुम्पत ऽउभावनुप्रहरत उभौ तूष्णे ऽपगच्छ्योपासाते यदा होता सूक्तवाक माह * ॥ ४२ ॥

अथाग्नीदाहानुप्रहरेति । ता ऽउभावेवानुप्रहरत ऽउभावात्मान ऽउपस्पृशेते ॥ ४३ ॥

---

* 'माह'—इति ख, ङ ।

अथाह संवदस्वेति। अगानग्नीदुगऽच्छावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शं योर्ब्रह्मीत्यध्वर्युरेवैतदाह ता ऽउभावेव परिधीननुप्रहरत उभौ स्रुचः सम्प्रगृह्य स्फ्ये सादयतः ॥ ४४ ॥

अथाध्वर्युरेव प्रतिपरेत्य। पत्नीः संयाजयत्युपास्त ऽएव प्रतिप्रस्थाता पत्नीः संयाज्योदैत्यध्वर्युः * ॥ ४५ ॥

त्रीणि समिष्टयजूंषि जुहोति। तूष्णीमेव प्रतिप्रस्थाता स्रुचं प्रगृह्णाति तद्वै व्वैश्वदेवेन यजमानयोर्व्वाससी परिहिते स्यातां ते ऽएवान्नापि स्याता मथास्यै व्वारुण्यै पयस्यायै क्षामकर्षमिश्र मादायावभृथं यन्ति व्वरुण्यं व्वा ऽएतन्निर्व्वरुणतायै तत्र न साम गीयते न ह्यत्र साम्ना किञ्चन क्रियते तूष्णीमेवेत्याभ्यवेत्योपमारयति ॥ ४६ ॥

अवभृथ निचुम्पुण। निचेरुरसि निचुम्पुणः †। अव दैवैर्दैवकृतमेनो ऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहीति कामऽएतेन यक्ष्ये

---

* 'दैत्यध्वर्युः'—इति ग-पाठः, डा०-वेबरहस्तेऽपि।

† 'गः'—इति घ, ङ।

कामयेत तस्मै दद्यान्न हि दौक्षितवसने भवतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्व्वस्मात् पाप्मनो निर्मुच्यते ॥ ४७ ॥

अथ केशश्मश्रूण्वा । समारोप्याग्नी ऽउदवसायेव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजत ऽउत्सन्नयज्ञ ऽइव वा ऽएष यज्ञातुर्मास्यान्यथेष क्लृप्तः प्रतिष्ठितो यज्ञो यत् पौर्णमासं तत् क्लृप्तेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥ ४८ ॥ ३ ॥

॥ इति चतुर्थप्रपाठके तृतीयं ब्राह्मणम् [५. २.] ॥

विधित्सितस्य वरुणप्रघासाख्यस्य * द्वितीयस्य पर्वणो वरुणपाशविमोचनहेतुत्व माख्यायिकया प्रतिपादयंस्तद्विधि सुन्नयति † — "वैश्वदेवेन वा इत्यादिना । पुरा वैश्वदेवयागेन प्रजापतिना सृष्टाः 'प्रजाः' वरुणसम्बन्धिनो 'यवान्' 'जक्षुः' [भक्षयामासुः । यवस्य वरुणदेवत्यत्व माह— "वरुणो वै ति । 'अग्रे' सृष्टिसमये सृज्यमानः 'यवः' वरुणसम्बन्धी 'एव' अभवत् । अतो यवो वरुणस्य स्वभूतः । तत्प्रसङ्गात् वरुणप्रघासोऽस्य नाम निर्वृत्तम् ।

* पुरस्तात् २५६ पृ० * टीप्पनी द्रष्टव्या ।

† 'सुपनयति'—इति च ।

"तथदिति। 'तत्' तथा सति 'यत्' यस्मात् 'एव' कारणात् 'वरुणस्य' स्वभूतान् 'यवान्' 'प्रादन्' प्रकर्षेणाभक्षयन्, 'तस्माद्' वरुणसम्बन्धियवप्रघासनात् 'प्रजाः' 'वरुणप्रघासाः'। तत्पाश-ग्रहीतानां तासां पाशविमोचनाय क्रियमाणा यागा अप्युपचारेण वरुणप्रघासाख्याः सञ्जाता इत्यर्थः। 'जक्षुः'-इति, अदेर्लिटि लुङि च 'लुङसनोर्घस्लृ"-"लिव्यन्यतरस्याम्"-इति * घस्लादेशे रूपम् ॥ १ ॥

यवादनानन्तरं वरुणकृत्य माह— "ता इति। 'परिदीर्णाः' परितो दीर्णाः, परितो दीर्यमाणावयवाः। "दृ विदारणे"-इति, † अस्मात् निष्ठायां "ग्रहः किति"-इति ङ्कि इट्-प्रतिषेधः, "क्षत इड्वातोः"-इतीत्वम् §, "ल्वादिभ्यः"-इति ‖ निष्ठातकारस्य नकारः। "अनत्यश्चेत्यादि। वरुणपाशग्रहणादेव हेतोः 'अनत्यः' चेष्टमानाः, हस्तपादादिधूननं कुर्वाणाः, 'प्राणत्यश्च' प्राणनव्यापारं श्वासोच्छ्वासादिलक्षणं कुर्वत्यः, 'शिश्यिरे च, निषेदुश्च' शयनासनाभ्यामेव कालं नीतवत्यः, न पुनर्व्यापारान्तरक्षमा बभूवुरित्यर्थः। "प्राणोदानौ हेत्यादि। 'आभ्यः' प्रजाभ्यः सकाशात् केवलं प्राणोदानावेव 'नापचक्रमतुः'; 'अन्याः' तु 'सर्वाः' वाक्चक्षुरादीन्द्रियाधिष्ठातृदेवता अग्न्याद्याः 'आभ्यः' प्रजाभ्योऽपक्रान्ताः, आसामिन्द्रियपाटवमपि प्रभ्रष्टमित्यर्थः। "तयोर्हीवेति। 'तयोः' प्राणापानयोरेवानपक्रमणाद्धेतोः 'अस्य' प्रजापतेः 'प्रजाः' 'न पराबभूवुः' न विनष्टाः ॥ २ ॥

---

* अदा० प० २ धा०। पा० सू० २. ४. ३७, ४०।
† क्र्या० प० २० धा०। ‡ पा० सू० ७. २. ११।
§ पा० सू० ७. २. १००। ‖ पा० सू० ८. २. ४४।

"ता एतेनेत्यादि। वरुणपाशग्रहणजनित मुक्तविधं प्रकार मालोक्य 'प्रजापतिः' 'एतेन' वरुणप्रघासाख्येन 'हविषा' 'ताः' प्रजाः 'अभिषज्यत्' अचिकित्सत्। "भिषज् चिकित्सायाम्"—इति धातुः *। तेन च भेषजेन 'जाताः' 'अजाताः' जनिष्यमाणाश्चोभयविधाः 'प्रजाः' 'वरुणपाशात्' 'प्रामुञ्चत्'। तस्य विमोचने सति 'अस्य' प्रजापतेः प्रजाः 'अनमीवाः' रोगरहिताः, 'अकिल्बिषाः' रोगनिदानभूतपापरहिताश्च अभवन्नित्यर्थः ॥ ३ ॥

विधत्ते— "अथ यदिति। 'अथ'-शब्दो वैश्वदेवानन्तर्ये। 'एषः' यजमानः वैश्वदेवानन्तरं 'चतुर्थे मासि' (सम्पूर्णे सति †) 'एतैः' वक्ष्यमाणैर्हविर्भिः 'यजते' ‡। अप्राप्तार्थत्वाद् वर्त्तमाननिर्देशः। विधिरत्रेतव्यः। यच्छब्दो हेतौ; यस्मादरुणप्रघासैर्यजते, 'तत्' तस्मात्। 'अह', 'नु', 'एव'— इति निपाताः। 'नैव' खलु 'एतस्य' यजमानस्य 'प्रजाः' तथा 'वरुणो गृह्णाति इति'।

"देवा इत्यादि। पुरा खलु 'देवाः' एव मेव वरुणप्रघासम् 'अकुर्वन्'। 'तु'-शब्दोऽप्यर्थः। 'एषः' अपि यजमानः 'इति' एवम्, 'एव' 'एतत्' एतर्हि 'करोति'।

इत्थं मनुष्यकर्त्तृकयागस्य देवकर्त्तृकेन योगेन साम्यात् तादृक्फलसाधनत्व माह— "यास्येति। उक्तार्थ मेतत्। "तस्माद्वा इति, वरुणप्रघासविधेर्निगमनम् ॥ ४ ॥

---

* भिषज्यतिः कण्ड्वादिः।

† एते पदे च-पुस्तकादन्यत्र न दृश्येते।

‡ "अथ यश्चतुर्थं चतुर्थं मासेषु स चातुर्मास्ययाजी। वसन्ते वैश्वदेवेन यजेत, प्रावृषि वरुणप्रघासैः, शरदि शाकमेधैः"—इति आप० श्रौ० सू० ८, १, १३। का० श्रौ० ५, २, १६, २० सूत्रे चेह विवेक्तव्ये।

	Rs.		
Padumawati, Face. 1-4 @ 2/		8	0
Paricişta Parvan, (Text) Fasc. 1-5 @ /8/ each...		1	14
Prāk ta-Paingalam, Fasc. 1-7 @ / / each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ / / each		1	14
Ditto (English) Part II, Fasc. 1			12
Prāk ta Lakşaṇam, (Text) Fasc. 1		1	8
Parāçara Smriti, (Text) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6 ; Vol, III, Fasc. 1-6 @ / / each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each		2	4
***Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10 ; II, 1-6 ; III, 1-7 ; IV, 1-6 ; V, 1-8 @ / / each Fasc....**		12	6
Sānkhya Sūtra V tti, (Text) Fasc. 1-4 @ / /		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Sraddha Kriya Kaumudi, Fasc. 1-6		2	4
Sucruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
Suddhi Kaumudi, Fasc. 1 3		1	2
***Taittereya Saṁhitā, (Text) Fasc. 22-45 @ / / each**		9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ / / each		7	2
Tantra Vartika (English) Fasc. 1-4 @ /12/ ... ... ---		3	0
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ / / each		14	4
Tattvarthadhigama Sutrom, Fasc. 1-3		1	2
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ / /		1	2
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1 8 @ / / each ...	3		0
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Vallala Carita, Fasc. 1		0	6
Varsa K yā Kaumudi, Fasc. 1-6@ / /		2	4
***Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6 ; Vol. II, Fasc. 1-7 , @ / / each**	4		8
Vidhano Parigata, Fasc. 1-7		2	10
Vivādaratnākara, (Text) Fasc. 1-7 @ / / each		2	10
Vrhat Sayambhū Purāṇa, Fasc. 1-6		2	4

Tibetan Series.

Pag-Sam Thi Śiñ, Fasc. 1-4 @ 1/ each	4		0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6 @ 1/ each ... ... --- ...	14		0
Rtogs brjod dpag bkhari Śiñ (Tib. & Sans.) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each	10		0

Arabic and Persian Series.

'Ālamigīrnāmah, with Index, (Text) Fasc. 1-13 @ / / each	4		14
Al-Muquaddasi (English) Vol. I, Fasc. 1-3 @ /12/	2		4
Ain-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22		0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	29		12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37		0
Ditto (English) Vol. I, Fasc. 1-8 ; Vol. II, Fasc. @ 1/ each ...	9		0
Arabic Bibliography, by Dr. A. Sprenger	0		6
Bādshāhnāmah, with Index, (Text) Fasc. 1-10 @ / / each	7		2
Catalogue of Arabic Books and Manuscripts 1-2	2		0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3		0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21		0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14		0
Fihrist-i-Tūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3		0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ / / each	3		6
Ditto of **Āzādī, (Text) Fasc. 1-4 @ / / each**	1		8
Haft Āsmān, History of the Persian Masnawi. (Text) Fasc. 1 ...	0		12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4		8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ / / each	1		2
Isābah; with Supplement, (Text) 51 Fasc. @ /12/ each	38		4
Masīr-ul-Umarā, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-9 ; Vol. III, Fasc. 1-10 ; Index to Vol. I. Fasc. 10-11 ; Index to Vol. ; II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 ; @ /6/ each	13		2
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each	1		14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

"ता एतेनेत्यादि। वरुणपाशग्रहणजनित मुक्तविधं प्रकार मालोक्य 'प्रजापतिः' 'एतेन' वरुणप्रघासाख्येन 'हविषा' 'ताः' प्रजाः 'अभिषज्यत्' अचिकित्सत्। "भिषज् चिकित्सायाम्"—इति धातुः *। तेन च भेषजेन 'जाताः' 'अजाताः' जनिष्यमाणाश्चोभयविधाः 'प्रजाः' 'वरुणपाशात्' 'प्रामुञ्चत्'। तस्य विमोचने सति 'अस्य' प्रजापतेः प्रजाः 'अनमीवाः' रोगरहिताः, 'अकिल्बिषाः' रोगनिदानभूतपापरहिताश्च अभवन्नित्यर्थः ॥ ३ ॥

विधत्ते— "अथ यदिति। 'अथ'-शब्दो वैश्वदेवानन्तर्ये। 'एषः' यजमानः वैश्वदेवानन्तरं 'चतुर्थे मासि' (सम्पूर्णे सति †) 'एतैः' वक्ष्यमाणैर्हविर्भिः 'यजते' ‡। अप्राप्तार्थत्वाद् वर्त्तमाननिर्देशः। विधिरत्रेतव्यः। यच्छब्दो हेतौ; यस्मादरुणप्रघासैर्यजते, 'तत्' तस्मात्। 'अह', 'नु', 'एव'— इति निपाताः। 'नैव' खलु 'एतस्य' यजमानस्य 'प्रजाः' तथा 'वरुणो गृह्णाति इति'।

"देवा इत्यादि। पुरा खलु 'देवाः' एव मेव वरुणप्रघासम् 'अकुर्वन्'। 'तु'-शब्दोऽप्यर्थः। 'एषः' अपि यजमानः 'इति' एवम् 'एव' 'एतत्' एतर्हि 'करोति'।

इत्थं मनुष्यकर्त्तृकयागस्य देवकर्त्तृकेन योगेन साम्यात् तादृक्फलसाधनत्व माह— "यावेति। उक्तार्थ मेतत्। "तस्मादा इति, वरुणप्रघासविधेर्निगमनम् ॥ ४ ॥

---

* भिषज्यतिः कण्ड्वादिः।

† एते पदे च-पुस्तकादन्यत्र न दृश्येते।

‡ "अथ यश्चतुर्षु चतुर्षु मासेषु स चातुर्मास्ययाजी। वसन्ते वैश्वदेवेन यजेत, प्रावृषि वरुणप्रघासैः, शरदि शाकमेधैः"—इति आप० श्रौ० सू० ८, ४, १३। का० श्रौ० ५, २, १६, २० सूत्रे चेह विवेक्तव्ये।

	Rs.	
Padumawati, Fasc. 1-4 @ 2/	8	0
Pariciṣṭa Parvan, (Text) Fasc. 1-5 @ 1/4/ each	1	14
Prāk ta-Paingalam, Fasc. 1-7 @ 1/ 1/ each	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ 1/ 1/ each	1	14
Ditto (English) Part II, Fasc. 1		12
Prāk ta Lakṣaṇam, (Text) Fasc. 1	1	8
Parācara Smriti, (Text) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6 ; Vol. III, Fasc. 1-6 @ 1/ 1/ each	7	8
Parācara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols, I, Fasc. 5-10 ; II, 1-6 ; III, 1-7 ; IV, 1-6 ; V, 1-8 @ 1/ 1/ each Fasc....	12	6
Sānkhya Sūtra V tti, (Text) Fasc. 1-4 @ 1/ 1/	1	8
Ditto (English) Fasc. 1-3 @ 1/12/ each	2	4
Sraddha Kriya Kaumudi, Fasc. 1-6	2	4
Sucruta Saṁhitá, (Eng.) Fasc. 1 @ 1/12/	0	12
Suddhi Kaumudi, Fasc. 1 3	1	2
*Taittereya Saṁhitā, (Text) Fasc. 22-45 @ 1/ 1/ each	9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ 1/ 1/ each	7	2
Tantra Vartika (English) Fasc. 1-4 @ 1/12/	3	0
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ 1/ 1/ each	14	4
Tattvarthadhigama Sutrom, Fasc. 1-3	1	2
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ 1/ 1/	1	2
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1-8 @ 1/ 1/ each ...	3	0
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/12/	4	8
Vallala Carita, Fasc. 1	0	6
Varsa K yā Kaumudi, Fasc. 1-6@ 1/ 1/	2	4
*Vāyu Puāṇa, (Text) Vol. I, Fasc. 2-6 ; Vol. II, Fasc. 1-7 , @ 1/ 1/ each	4	8
Vidhano Parigata, Fasc. 1-7	2	10
Vivādaratnākara, (Text) Fasc. 1-7 @ 1/ 1/ each	2	10
Vrihat Sayambhū Purāṇa, Fasc. 1-6	2	4

Tibetan Series.

Pag-Sam Thi Śiṅ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1 3 ; Vol. III, Fasc. 1-6 @ 1/ each	14	0
Rtogs brjod dpag bkhari Śiṅ (Tib. & Sans.) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ 1/ 1/ each	4	14
Āl-Muquaddasi (English) Vol. I. Fasc. 1-3 @ 1/12/	2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5. @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto (English) Vol. I, Fasc. 1-8 ; Vol. II, Fasc. @ 1/ each ...	9	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ 1/ 1/ each	7	2
Catalogue of Arabic Books and Manuscripts 1-2	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Tūsī, or, Tūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ 1/12/ each	3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ 1/ 1/ each	3	6
Ditto of Azādī, (Text) Fasc. 1-4 @ 1/ 1/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ 1/ 1/ each	1	2
Isābah; with Supplement, (Text) 51 Fasc. @ 1/12/ each	38	4
Magīr-ul-Umarā, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-9 ; Vol. III, Fasc. 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 ; @ 16/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ 16/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /1/ each ...	Rs	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ / / each		7	2
Ma'āṣir-i-Ā'amgīrī, (Text) Fasc. 1-6 @ / / each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Nigāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each ...		1	8
Riyāzu-s-Salātīn, (Text) Fasc. 1-5 @ /1/ each		1	14
Ditto Ditto (English) Fasc. 1-5		3	12
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ / / each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhī of Ziyāu-d-dīn Barnī (Text) Fasc. 1-7 @ / / each ...		2	10
Tārīkh-i-Fīrūshāhī, of Shams-i-Sirāj Alif, (Text) Fasc. 1-5 @ /1/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Tuzuk-i-Jahāngīrī, (English) Fasc. 1		0	12
Wis o Rāmīn, (Text) Fasc. 1-5 @ / / each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ / / each ...		6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each	20	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ / / per No. ; and from 1870 to date @ /1/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1893 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members. *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.*		
4.	Journal and Proceedings, N. S., Vol. I, No. 1, 1905, @ 1-8 per No. to members ana Rs. 2/ per No. to Non-members.		
5.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
6.	Anīs-ul-Musharrahīn	3	
7.	Catalogue of Fossil Vertebrata	3	0
8.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 1/ each ...	32	0
10.	Jawāmlu-l-'ilm ir-riyyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III, with 8 colored plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar ,, ,, ...	8	0
17.	Kacmīracabdām ta, parts I and II @ 1/8/	3	0
18.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
19.	Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

	Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

7-9-'05.

BOOKS ARE SUPPLIED BY V.-P.-P.

BIBLIOTHECA INDICA :

A

Collection of Oriental Works

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1158.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. II, FASCICULUS IV,

CALCUTTA :

PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1906.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS Mr. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W, AND Mr. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

*Advaita Brahma Siddhi, (Text) Fasc. 2,4 @ /1/ each ...	Rs.	0	12
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /1/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-8 @ /1/		8	10
Aphorisms of Sāṇdilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /1/ each ...		2	4
Acvavaidyaka, (Text) Fasc. 1-5 @ /1/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc 1-5; Vol. II. Fasc. 1-5 @ 1/ each		10	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1		1	0
Bāla Bhaṭṭi, Vol. I, Fasc. 1-2		0	12
Baudhayana Srauta Sutra, Fasc. 1-3 @ /1/ each		1	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5		1	14
Bṛhaddēvatā, (Text) Fasc. 1-4 @ /1/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /1/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-3		1	2
Çatadusani, Fasc. 1 2		0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-5, Vol III Fasc 1-7...		7	2
Çatasahasrika-prajñāpāramitā, (Text) Part I, Fasc. 1-12 @ /6/ each ...		4	8
*Caturvarga Chintāmani, (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18, Part II, Fasc. 1-10 @ /1/ each; Vol. IV, Fasc. 1-5		21	12
Çlokavartika, (English) Fasc. 1-5		3	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 6-17 @ /1/ each ...		4	8
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /1/ each; Vol 4, Fasc. 1		6	0
Çri Bhāshyam, (Text) Fasc. 1-3 @ /1/ each		1	2
Dan Kriya Kaumundi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7...		2	10
Ditto Ācārasāra, Vol II, Fasc. 1.		0	6
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /1/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /1/ each...		4	2
Mahā-bhāṣya-pradīpodyota, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-4, @ /1/ each		9	6
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ /1/ each		1	2
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ /12/ each		6	12
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-10 @ /0/ each		4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /1/		2	4
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /1/ each		3	0
Nityacarapaddhati Fasc. 1-7 (Text) @ /1/		2	10
Nityacarapradiph, Fasc. 1-6		2	4
Nyāyabinduṭikā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6, Vol. II, Fasc. 1-3 @ /1/ each		3	0

तेषु वरुणप्रघासेषु चोदकतो वेदेराहवनीयस्य चैकत्वे प्राप्ते द्वित्वं विधत्ते — "तद्वै द्वे इति *। 'तत्' तत्र वरुणप्रघासेषु। वेद्याहवनीययोर्द्वित्व मनूद्य प्रयोजनकथनेन स्तौति— "तद्य दिति। दक्षिणत उत्तरतश्च स्थिताभ्यां वेदिभ्या मग्निभ्याम् 'तदुभयतः' दक्षिणत उत्तरतश्च पार्श्वद्वयादेव 'वरुणपाशात्' प्रजाः' 'प्रमुञ्चति'। "इतरोद्वा इति प्रागुक्तार्थम् †॥ ५॥

उत्तरवेदिनिवपनं विधत्ते — "स इति। द्वयोर्वेद्योर्या 'उत्तरा' उत्तरदिगवस्थिता तस्या मेव वेद्या माहवनीयायतने 'उत्तरवेदिम्' 'उपकिरति' उपचिनोति। एवकारयोर्व्यावर्त्त्यं दर्शयति— "न दक्षिणस्या मिति। 'दक्षिणस्यां' वेदौ उत्तरवेदिः 'न' कार्येत्यर्थः। तच्चोत्तरवेदिनिर्माणं सूत्रकृतापि दर्शितम्— "उत्तरवेदिं निवपति उत्तरस्यां, श्रम्या मादाय चात्वालं मिमीते"—इति ‡॥

तदेतत् स्तौति— "क्षत्रं वा इति। "यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः" इति अग्रे समाम्नास्यते §; अतो वरुणो देवेषु मध्ये क्षत्रियः, मरुतो देवविशः। तत्रोत्तरस्या मादौ वरुण इज्यते दक्षिणस्यां मरुतः। अत एवेदानीं लोके तथा दृश्यत इति प्रसिद्धि मुदाहरति— "तस्मादिति॥ ६॥

वैश्वदेवे पर्वणि आदितो यान्याग्नेयादीनि पञ्च हवींषि तान्यत्रापि विधत्ते— "अग्नेतानीति। अयोगव्यवच्छेदार्थ

* का० श्रौ० सू० ५. ३. ६—१८।
† पुरस्तादिहैव २७०पृ० १८ पं० द्रष्टव्यम्।
‡ का० श्रौ० सू० ५. ३. १६. २०। तत्रान्यत्रापि द्रष्टव्यम्। ३३ सू०
§ प्रात० ब्रा० १४. ४. २. २३।
पुरस्तादिहैवाध्याये १ ब्रा० अष्टमकण्डिकायां द्रष्टव्यानि।

एवकारः । तदेतत् स्तौति— "एतैर्वा इति । एतानि वरुण पाशविमोचने विहितानि हवींषि प्रजापतिः साधनत्वेन यतः प्रायुङ्क्तवान्, अतोऽत्रापि तेषा मनुष्ठान मुपपन्न मित्यर्थः । "इत-स्त्वोद्वा इति, व्याख्यातम् * ॥ ७ ॥

षष्ठं भागं विधत्ते † — "अथेन्द्राग्न इति । तत् प्रशंसति— "प्राणोदानावित्यादिना । "तद्यथेति । तत्र लोके यथा 'पुण्यं' शोभन मुपकारं कृतवते प्रत्युपकाररूपं 'पुण्य' शोभनं 'कुर्यात्', 'एवम्' एव तदिन्द्राग्न्योर्हविर्निर्वपणम् । ताभ्यां कृत मुपकारं दर्शयति— "तयोरिति । प्राणोदानात्मकयोस्तयोरवस्थानादेव कारणात् 'अस्य' प्रजापतेः 'प्रजा न पराबभूवुः' । प्रागाम्नातम्— "प्राणोदानौ वैवाभ्यो नापचक्रमतुः"—इति ‡ । "तत् प्राणोदानाभ्या मित्यादि । 'तत्' तस्मात् प्राणोदानरूपयोरिन्द्राग्न्योर्योगाभ्याम् 'एव' 'एतत्' 'प्रजाः' वरुणपाशगृहीताः चिकित्सति तौ 'प्राणोदानौ' एव तास् 'प्रजासु' स्थापयति । "तस्मादिति प्रतिपादितार्थनिगमनम् ॥ ८ ॥

वेदिहवेऽपि पयस्यां विधत्ते— "उभयत्रेति § । 'उभयत्र अध्वर्युकर्तृकाया मुत्तरस्यां वेद्यां प्रतिप्रस्थातृकर्तृकायां दक्षिणस्यां च । (हे ‖) 'पयस्ये' हविषी 'भवतः' । वरुणपाश-

* पुरस्तादिदैव २७० पृ० १८ पं० द्रष्टव्यम् ।

† 'षष्ठं हविरिन्द्राग्नी द्वादशकपालः पुरोडाशो भवति'—इति का० श्रौ० ५. ४. २२सू० । ‡ अत्रैव २७२ पृ० १४ पं० ।

§ 'अवरोक्त मुत्तरम्'—इति का० श्रौ० स० १. १०. ५ । "दक्षिणं प्रतिप्रस्थातुः"—इति च का० श्रौ० सू० ५. ४. २५ ।

‖ च-पुस्तकादन्यत्र नैतत् पद मस्ति ।

विमोचनानुकूल्यं पयस्यायाः प्रतिपादयति— "पयसो वा इति। पुरा प्रजापतिना सृष्टाः 'प्रजाः' तदीयस्तन्यरूपात् 'पयसः' 'सम्भूताः' वर्द्धिताः, इदानी मपि मानुषाः स्तन्यरूपात् पयस इव 'सम्भवन्ति' वर्द्धन्ति। "तत्यत एवेति, अस्यार्थस्यानुवादः। 'तत एव' सम्भूतिहेतोः 'पयसः' कारणात् 'उभयतः' दक्षिणत उत्तरतश्च पार्श्वहृदयात्, प्रजानां वरुणपाशविमोचनं कृतवान् भवति ॥ ८ ॥

अध्वर्युकर्त्तृकायाः पयस्याया देवतां विधाय स्तौति— "वारुणीति *। उत्तरस्यां वेद्यां या पयस्या, सा वरुणदेवताका कार्या। 'तत् प्रत्यक्षं मिति। देवान्तरयागेन वरुणपाशविमोचनं परोक्षम्, वरुणदेवताकेन तु यागेन 'तत्' पाशविमोचनं 'प्रत्यक्षम्' एवेति वरुणदेवताकत्वं युक्ततर मित्यर्थः।

प्रतिप्रस्थातृकर्त्तृकायाः पयस्याया देवतां विधाय स्तौति— "मारुती † दक्षिणेति। दक्षिणस्यां वेदौ क्रियमाणा पयस्या मरुद्देवताका भवेत्। "अजामितायाइति। वरुणदेवतां परित्यज्य 'अस्याः' पयस्याया यत् मरुल्लक्षणदेवतान्तरकरणम्, तत् जामितादोषराहित्याय भवति। व्यतिरेकेण तदेवाह— "जामीति। 'यदु' यदि 'उभे' अपि दक्षिणोत्तरपयस्ये वरुणदेवताके 'स्याताम्' तदा प्रयुक्तस्या एव देवतायाः पुनःप्रयोगो नवीकरणाभावात् अन्यतारूपजामितादोषः स्यादित्यर्थः।

मारुतत्वे कारणान्तर माह— "अतो ह वा इति। 'अतः' अस्मदध्यमाणादपि हेतोः दक्षिणा पयस्या मारुती कार्या। अस्य हि प्रजापतेः सम्बन्धिनी प्रजा पुरा दक्षिणतः स्थितानां मरुता

* 'वारुणी अध्वर्योः'—इति का० श्रौ० ५. ४. २३ सू० या० दे०।

† 'मारुती मरुत्यां प्रतिप्रस्थाता दक्षिणस्याम्'—इति का० श्रौ० ५. ५. ५।

मुपशमनाय दक्षिणतः क्रियमाणेषा पयस्या मारुती कार्येत्यर्थः ॥ १० ॥

करीराणां मावपनं विधाय स्तौति "तयोरिति । तयोरुभयोः पयस्ययोः करीराणि प्रक्षिपेत् * । मधुराः फलविशेषाः करीराणि ; तानि चोत्तरापथे प्रसिद्धानि † । "कं वा इत्यादि । 'करीरैः' एतैः करीरफलैः 'प्रजापतिः' 'प्रजाभ्यः' अस्माकं 'कं' सुखम् 'अकुरुत' तस्मादिदानीं मध्येव यजमानस्तदावपनेन सुखमेव प्रजाभ्यः करोति ॥ ११ ॥

शमीपर्णानां मावपनं विधत्ते — "तयोरिति । 'शमीपलाशानि' शम्याः पर्णानीत्यर्थः । "शं वा इत्यादि । 'शम्' उपद्रवाणां शमनमित्यर्थः । स्पष्टमन्यत् । अत एवोक्तं कात्यायनेन — "उभयोः करीराण्यावपति शमीपलाशमिश्राणि"—इति ‡ ॥ १२ ॥

अथाग्निमह विधत्ते — "अथ काय इति । कः प्रजापतिर्देवता अस्य 'सास्यदेवता'—इत्यणि § "कस्येत्"—इति 'क'

"वाजिने निधिच्योभयोः करीराण्यावपति"—इति का० श्रौ० सू० ५. ५. १ ।" "यतोना मवद्यमानानां शीर्षाणि परापतन् ते खर्जूरा अभवन् तेषां रसऊर्वोत्पतत्तानि करीराण्यभवन्त्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं प्रावयति यत् करीराणि भवन्ति"—इति तै० सं० २. ४. ६. ४ ।

† राजस्थान प्रदेशीय जयपुर पत्तनादावपि बहु जायन्त इमानि सुमिष्टस्वादफलानि ; व्यवहृयन्ते चैतदामानि शाकार्थं मधीति दृष्टम् ।

‡ का० श्रौ० सू० ५. ५. १ । "शमी नाम कण्टकी वृक्षः, तस्य पर्णानि शमीपलाशानि । करीरोऽपि व्यपर्णः कण्टकीवृक्षः, तस्य फलानि करीराणि । शमीपर्णानां करीरफलानाच्च तुल्यत्वम्" इत्यादि च तत्र या० दे०

§ , ‖ पा० सू० ४. २. २४, २५

शब्दस्येकारान्तादेशः। एतस्य हविषः प्रयोजनमाह— "कं वा इति। सुखात्मको हि प्रजापतिः 'क'-शब्दवाच्यः। अतस्तद्देवताकेन यागेन सुखकारणमुपपन्नमिति भावः॥ १३॥

करम्भपात्राणां निर्माणं विधत्ते— "अथ पूर्वेद्युरिति। यस्मिन् दिवसे वरुणप्रघासयागः, ततः 'पूर्वेद्युः' पूर्वे दिवसे। "अन्वाहार्यपचने इति। अन्वाहार्यो नामेष्टिः। दक्षिणदिग्भागे मरुतो 'जिघांसन्' हन्तुमिच्छन्; तान् प्रजापतिरेतेन पयस्यारूपेण भागेन 'अशमयत्' शमितवानिति यावत्, तस्माद्। दक्षिणात्वेन देय ओदनो यस्मिन् पच्यते स तथोक्तः। तस्मिन् दक्षिणाग्नौ 'अतुषान्' तुषरहितान् 'कृत्वा', मन्मथ्य 'तान्' 'ईषदिव' अत्यल्पमिव 'उपतप्य' अपयित्वोदकेनालोड्य, तैः 'करम्भपात्राणि' भ्रष्टयवचूर्णाः * करम्भाः, तन्मयानि पात्राणि 'कुर्वन्ति' अध्वर्युयजमानादयः †। कियन्ति तानि पात्राणीत्यपेक्षाया माह— "यावन्त इति। यावत्सङ्ख्याका यजमानस्य 'गृह्याः' स्वगृहे वर्त्तमानाः पुत्रपौत्रादिरूपा ज्ञातयो भवेयुः, 'तावन्ति' तावत्सङ्ख्याकानि करम्भपात्राणि कार्य्याणि। तानि च जनिष्यमाणापत्यार्थम् 'एकेन' 'अतिरिक्तानि' अधिकानि कार्य्याणि ‡॥ १४॥

करम्भपात्रावशिष्टाद् यवपिष्टादेव मेषमेषीलक्षणमिथुनस्य

* 'पिष्टचूर्णाः'—इति च।

† करम्भो दध्ना संयुताः सक्तवः, तन्मयानि पात्राणि करम्भपात्राणीति का० श्रौ० ५. ५. २ सू० या० दे०।

‡ "यावन्तो यजमानगृह्या एकाधिकानि"—इति का० श्रौ० सू० ५. ३. ३। तत्र इतोऽतिरिक्ते चैमे सूत्रे— "प्रजायां वा ज्ञातयुतेः, त्रीणि वा नित्यत्वात्" इति ४, ५।

निर्माणं विधत्ते — "तत्रापीति । 'अपि'-शब्द एवकारार्थः । 'तत्र' करम्भपात्रनिर्माणसमये एव , तेनैव पिष्टेन मेषमेष्यौ कर्त्तव्ये * । "तयोरिति । सम्भूयानुदितयोः । 'मेषे च मेष्यां च' इति पृथगुपादानं विस्पष्टार्थम् । "यद्यनैडकीः †" इति । एड़को ‡ मेषः, तत्सम्बन्धरहिता अनैड़क्यः, 'ऊर्णाः' कम्बलोपादानभूतानि तज्जातीयानि रोममयानि § सूत्राणि । यदि तास्तथाविधा ऊर्णाः 'विन्देत्' लभेत, तदा 'ताः' 'प्रणिज्य' प्रक्षाल्य, तयोः मेषमेष्योः 'निश्लेषयेत्' संश्लेषयेत् ‖ । 'यद्यु' यदि खलु "अनैड़कीः" ऊर्णाः "न विन्देत्" न लभेत, तर्हि "कुशोर्णा एव स्युः" कुशमया एवोर्णाः , तयोः संश्लेषणीयाः भवेयुः ¶ ॥ १५ ॥

मेषमेष्योः करण मनूद्य स्तौति— "तद्यदिति । "वरुणस्य पशुर्यन्मेष इति । 'यद्' 'एषः' खलु 'प्रत्यक्षं' 'वरुणस्य' हविर्भूतः 'पशुः' । अत एव पञ्चैकादशिन्याम् "अधोरामः सावित्रो वारुणः कृष्ण एकशितिपात् पेत्वः"—इत्यामायते * * । पेत्वो विगतपुंस्को मेष इति हि तत्रार्थः । "यवान् ह्येति । 'हि' यस्माद् 'यवान्' 'जक्षुषीः' भक्षितवतीः प्रजाः 'वरुणः' "अगृह्णात्", अतस्तद्यवप्रत्यर्पणाय मेषमेष्योर्यवत्वं सम्पद्यत इत्यर्थः ।

---

* का० श्रौ० सू० ५, ३, ६ । निस्तुषा सम्भृत्यवकरम्भस्यैव मेष मेषाकारं प्रतिरूपकम् मेषीं मेषाकारां प्रतिकृतिञ्च करोति"—इति या० दे० ।

†, ‡ 'नैलकीः', 'एलको' च ।

§ तज्जातीयरोममयाणि'—इति च ।

‖ का० श्रौ० सू० ५, ३, ७ ।

¶ का० श्रौ० सू० ५, ३, ८

* * वा० सं० २६, ५८

तयोः स्त्रीपुंसरूपता मनूद्य स्तौति— "मिथुनौ भवत इति। 'मिथुनाद्'–इत्येतद् 'वरुणपाशाद्'–इत्यस्य विशेषणम्। द्वैरूप्याधिकरणाद् दक्षिणस्यां मेषो न मोचनहेतुः * ॥ १६ ॥

अथ तयोः प्रक्षेपं विधत्ते— "स इति। अध्वर्युकर्तृकायाम् 'उत्तरस्याम् पत्न्यायां' 'मेषीम्' 'अवदधाति' प्रक्षिपति। प्रतिप्रस्थातृकर्तृकायां 'दक्षिणस्यां' 'मेषं' प्रक्षिपति। अनयोर्दक्षिणोत्तरभावं लोकन्यायेनोपपादयति— "एव मिवेति † ॥ १७ ॥

हविषा मासादनं विधत्ते— "स सर्वाण्येवेति। आग्नेयादीनि 'सर्वाण्येव हवींषि' 'उत्तरस्यां' 'वेदौ' वेद्यां 'सः अध्वर्युः' 'आसादयेत्', 'प्रतिप्रस्थाता' तु 'एताम्' मारुतीं 'पत्न्या मेव' 'दक्षिणस्यां' वेद्या मासादये दित्यर्थः ‡ ॥ १८ ॥

हविरासादनोत्तरकाल मग्निमन्थनं विधत्ते— "आसाद्येति। "अग्निं मथित्वेत्यादि। अग्निमन्थनानन्तरजातम् 'अग्निम्' आहवनीये "भवतन्नः"–इति § मन्त्रेण 'अनुप्रहृत्य' प्रक्षिप्य, "अग्नावग्निः"–इति ‖ मन्त्रेणाभिजुहुयात्। एतच्चाग्निमन्थनादिकम् ¶ 'अध्वर्युः' एकः 'एव' कुर्य्यात्; न प्रतिप्रस्थातेत्यभिप्रायः। दक्षिणोत्तरयोरुभयोरप्याहवनीययोराहुत्यधिकरणत्वेनेध्मादीनां समिन्धनीयत्वात् तद्धेतुभूतः सामिधेनीप्रैषोऽपि अध्वर्युप्रतिप्रस्थातृभ्यामुभाभ्यां प्रयोक्तव्य इत्याशङ्क्याह— "अथाध्वर्युरेवेति। 'एव'-कारः

* का० श्रौ० सू० ५. ५. २, ३।

† का० श्रौ० सू० ५. ५. ५। ‡ का० श्रौ० सू० ५. ५. ४।

§ वा० सं० ५. ३। ‖ वा० सं० ५. ४।

¶ "अग्नये मथ्यमानायानुवाचयति, मन्थति गायत्रेणेति (का० श्रौ० ५. २.)"—इत्यादीनि मन्त्राणीहालोच्यानि।

प्रतिप्रस्थात्रव्यावृत्त्यर्थः। एकस्याहवनीयस्य देशभेदेन द्विधावस्थानात्, प्रतिप्रस्थातुराहवनीयान्तराभावात्, प्रेष्यस्य च होतुरुभयत्रैकत्वाद्, अध्वर्युणोच्यमान एव प्रैष उभयत्रोपकरोति, ता उभौ समिधावित्यभिप्रायः। इध्माधानादिकन्तु ताभ्यां समनुष्ठेय मित्याह- "ता उभाविति। 'तौ' अध्वर्युप्रतिप्रस्थातारौ 'उभौ'। अथाध्वर्योरेव कर्त्तव्य माह— अथाध्वर्युरेवेति। हे 'अग्नीत्!' 'अग्निम्' आहवनीयं 'सम्मृङ्धि' सम्मार्जनेन संस्कुरु। "असंसृष्ट मेवेति करम्भपात्राणां होमस्य कालविधिः। अग्नि मग्निदिति सम्प्रैषे कृते तदर्थत्वात् आग्नीध्रेणानुतिष्ठत इत्यर्थः * ॥ १९ ॥

तस्य च करम्भपात्राणां होमस्य पत्नीकर्त्तृकत्वं विधित्सुस्तस्या सम्भावितस्य पुरुषान्तरसम्पर्कजनितस्यैनसः प्रश्नं दर्शयति— "अथ प्रतिप्रस्थातेति। अग्नि मग्नीदिति सम्प्रैषानन्तरं 'प्रतिपरैति' निवर्त्तते, पत्नी यत्रास्ते तं देशं प्रतिगच्छेदित्यर्थः। 'सः' च प्रतिप्रस्थाता 'पत्नीम्' 'उदानेष्यन्' उदागमयिष्यन्। तां पत्नीं 'पृच्छन्ति',— त्वं 'केन' जारेण 'चरसि' वर्त्तसे 'इति' †। पुरुषान्तरसङ्गतेर्दोषान्तरता माह— "वरुण्य मिति। येन पापेन हेतुना वरुणपाशबन्धो भवति, तत् पापं 'वरुण्यम्'। 'अन्यस्य पुरुषस्य पत्नी 'सती', 'अन्येन' पुरुषान्तरेण सह 'चरति' वर्त्तते यत्, एतत् वरुण्य मेव 'स्वीकरोति'। प्रष्टुः प्रतिप्रस्थातुरभिप्राय माह— "अथो इति। 'अथो' अपि च एषा पत्नी 'अन्तःशल्या' शरीरमध्ये दुश्चरितजनितेन पापरूपेण शल्येन § युक्ता सती 'न इत्' नैव 'मे' मदीयेऽग्नौ 'जुहवत्' 'इति'। 'तस्मात्' कृतस्

* का० श्रौ० सू० ५, ५, ६ क। † का० श्रौ० सू० ५, ५, ६ ख।
§ 'शल्या', 'शल्येन' च।

पापस्य कनीयस्त्वम्। "तस्माद् वेवेति। 'उ'-शब्दोऽपीत्यर्थे, 'एव'-कारो भिन्नक्रमः। तस्मादपि कारणात् पृच्छत्येवेत्यर्थः *।

विपत्ते बाधोपन्यासेन पत्न्या अपि यथार्थभाषणं कर्त्तव्य मिति विधत्ते— "सेति। 'यत्' यदि 'सा' पत्नी पृष्टमर्थं 'न प्रतिजानीत' न प्रतिब्रूयात्, 'तत्' तदा, 'अस्यै' षष्ठ्यर्थे चतुर्थी, अस्याः पत्न्याः 'ज्ञातिभ्यः' 'अहितम्' अनिष्टं स्यात्, तस्माद् वस्तुतो विद्यमानं वृत्तान्त माचक्षीतेत्यर्थः। तैत्तिरीयकेऽप्या-म्नायते— "यज्जारं सन्तं न ब्रूयात्, प्रियं ज्ञातिं रुन्ध्यात्, असौ मे जार इति निर्हिंगेदिति †। तदुक्तं कात्यायनेन— "प्रति-प्रस्थाता पत्नी मानेष्यन्नाह केन चरसीति संसृतानाचष्टे"-इति ‡। संसृताः परिजाता जारा इत्यर्थः॥ २०॥

तस्या वाचनं विधत्ते— "तां वाचयतीति। "प्रघासिनः" -इत्यादिर्वाचनीयो मन्त्रः §। तस्याय मर्थः— 'प्रघासिनः' प्रघासः प्रघसनीयं भोज्यं हविः, तद्वतो 'मरुतः' "शुक्रज्योतिश्च चित्रज्योतिश्च"-इत्यादिना प्रतिपादितनामधेयान् एकोनपञ्चा-शत्सङ्ख्याकान् देवान् 'हवामहे' आह्वयामः। यतो 'रिशादसः' रिशाः हिंसकाः शत्रवः, तेषां निरसितारः। 'करम्भेण' करम्भ-

* पत्नी एतावन्तो मे जारा इति नामग्राहं कथयति, अमुना अमुना जारेण सह चरामीति वा; नो चेन्नान्येनेति। यदि लज्जादि-वशात् न कथयति, प्रति जारं लक्षणानि उद्गृह्णाति। का० श्रौ० ५. ५, ७—१० सू० इत्यादिषु द्रष्टव्यम्।

† तै० ब्रा० १. ६. ५, २।

‡ का० श्रौ० सू० ५, ५. ६, ७।

§ वा० सं० ३, ४४, १।

पात्ररूपेण हविषा 'सजोषसः' समानप्रीतयश्च भवन्ति, तान् मरुत इति।

एतन्मन्त्रं पुरोऽनुवाक्यानुवचनसादृश्येन स्तौति—"यथेति। 'पुरोनुवाक्या' हि यज्यमाणदेवताह्वानार्था, 'एवम् एव', 'एषा' प्रवासिन इत्यृक्। अतः 'एतया एव' 'एतान्' मरुतः 'एतेभ्यः' 'पात्रेभ्यः' करम्भपात्रेभ्यः 'ह्वयति' होष्यमाणं करम्भपात्रलक्षणं हविर्भोक्तुं माह्वयतीत्यर्थः॥ २१॥

"करम्भपात्राणि कुर्वन्ति यावन्तो ग्रहाः स्युस्तावन्ति"—इति वाक्येन प्राग्विहितम्*, तदनु स्तौति—"तानि वा इति। 'प्रतिपुरुषं' पुरुषं पुरुषं प्रत्येकैकं करम्भपात्रं भवति। यावन्त इत्याद्युक्तार्थम्। पुरुषसङ्ख्या पात्रनिर्माणस्य प्रयोजनमाह—"तत् प्रतिपुरुषमिति। 'अस्य' यजमानस्य 'याः प्रजाः जाताः', 'ताः' 'प्रतिपुरुषं' प्रत्येकम् 'एकैकेन' पात्रेण 'वरुणपाशात्' 'प्रमुञ्चति'। एतदतिरिक्ततामनूद्य स्तौति—"एकेनेति। जनिष्यमाणानां प्रजानां वरुणपाशविमोचनार्थमेकमतिरिक्तं कर्त्तव्यमित्यर्थः॥ २२॥

पुरोडाशादिरूपतां विहाय पात्ररूपेण निर्माणमुपपादयति—"पात्राणीति। 'हि' यस्मात् 'पात्रेषु' कांस्यादिनिर्मितेषु 'अन्नम्' अन्नम् 'अश्यते' भुज्यते, अतो मरुतां पयस्यारूपस्यान्नस्य भोजनीयपात्ररूपेणैव निर्मातव्यानीत्यर्थः। यवमयत्वं मनूद्य स्तौति—"यवमयानीति। 'जक्षुषीः' भक्षितवतीरित्यर्थः। अथ तेषां करम्भपात्राणां होमं विधत्ते—"शूर्पेणेति†। जुह्वादि

* पुरस्तात् पृ० २७६ पं० १ द्रष्टव्यम्।

† "करम्भपात्राणि जुहोति शूर्पेण मूर्ध्वानि कृत्वा दक्षिणे अग्नौ प्रत्यङ्मुखो जायापती वा"—इत्यादि का० श्रौ० सू० ५. ५. ११।

पात्रं विहाय शूर्पेणैव तानि जुहुयात् । तेन हि 'शूर्पेण' तुषनिर्वपनद्वारा * 'अशनम्' अन्नं 'क्रियते', अतः न चात्र शूर्पो हेत्वर्थः शङ्कनीयः ; "हेतुर्वास्यादर्थवत्तोपपत्तिभ्याम् , स्तुतिस्तु शब्दपूर्वत्वात्"-इत्यधिकरणे † स्तुतित्वेनान्वयस्य प्रतिपादितत्वात् । "पत्नी जुहोतीति कर्तृविधिः ‡, मिथुनदेवेलादि तत्प्रशंसा । स्त्रिया अपि कर्तृत्वेन होमेऽन्वयात् मिथुनं सम्पद्यते । तथाच यजमानपत्नीरूपात् मिथुनादेवेत्यय मर्थः सिध्यति ॥ २३ ॥

स्रुवाघारहोमादेः पूर्वभावित्वं करम्भपात्रहोमस्य विधत्ते— "पुरेति । यज्ञो वषट्कारप्रदानो यजतिचोदित आग्नेयः, आहुतयः स्वाहाकारप्रदाना जुहोतिचोदिताः । एतत्पूर्वभावित्व मुपपादयति— "अहुताद इति । अहुतं होमसंस्काररहितम् अदन्ति भक्षयन्त्यहुतादः । मरुतां वैश्यजातित्वेन अहुतादानधर्मवत्त्वात् सर्वहोमात् पूर्वं तेभ्यो हविःप्रदानं युक्त मिति भावः । इतोऽपि करम्भपात्राणां पूर्वहोम इत्याह— "यत्रेति । 'परिदीर्णाः'-इत्यादिकं व्याख्यातम् § । 'यत्र' यदा खलु 'प्रजापतेः प्रजाः' 'वरुणगृहीताः' परिदीर्णत्वादि-रोगग्रस्ता अभवन् , 'तत्' तदा 'आसां' प्रजानां प्रधानं 'मरुतः' 'विमेथिरे' विलोपयन्ति ‖ स्म, संक्षे-

---

* 'तुषापवनद्वारा'—इति च ।

† मी० जै० सू० १. २. २६—३० ; अधि ३ ।

‡ 'करम्भपात्राणि पत्नी जुहोति , जुहूस्थानापन्नेन शूर्पेण ; मस्तकस्योपरि शूर्पं कृत्वा । यदा पत्नीयजमानौ जुहुतो नैकाकिनी पत्नी' —इति तत्र वृत्तौ या० दे० ।

§ २८७ पृ० ८ पङ्क्तौ द्रष्टव्यम् ।

‖ 'विलोपयन्ति'—इति च ।

षितवन्त इत्यर्थः । 'तथो एव' 'एतस्य' यजमानस्य 'प्रजानां' वरुणपाशगृहीतानां 'पाप्मानं' पाशविमोचनात् प्रागेव मरुतः 'विमथ्नते' संविश्लेषयन्ति । 'तस्माद्' वरुणपाशविमोचनार्थाद् यस्मात् , 'आहुतिभ्यः' च पूर्व मेव करम्भपात्राणां होमेन् मरुतां ग्रंसनं * युक्त मित्यर्थः ॥ २४ ॥

अग्निविशेषं विधत्ते — "सा वा इति । 'सा' खलु पत्नी 'दक्षिणे' दक्षिणस्यां वेद्या मवस्थिते आहवनीये 'अग्नौ' 'जुहोति' । "यद् ग्राम इति † । तं पदशोऽनूद्य व्याचष्टे— "यद् ग्रामे इत्यादिना ‡ । 'यत् एनः क्रियते', 'तत्' ग्रामे वा अरण्ये वा भवति । "यत् सभाया मिति, द्वितीयपादस्य कात्स्न्येनानुवादः । तत्र प्रथमार्द्धं मनूद्य सभाशब्दं व्याचष्टे — "यत्सभाया मिति । यन्मनुष्यसङ्घैः एनः क्रियत इति योऽर्थः , अय मेव यत्सभाया मिति मन्त्रभागः प्रतिपादयतीत्यर्थः । यदिन्द्रियपदस्य देवसङ्घपरत्व माह — "यदिन्द्रिय इति । 'इन्द्रिये' इन्द्रसम्बन्धिनि देवसमूहे । तदुत्तरभाग मनूद्य व्याचष्टे — "यदेन इति । ग्रामादिस्थानेषु यत् पापचयं 'चक्रम' कृतवन्तः , 'तत्' पापम् 'इदम्' इदानीं करम्भपात्रलक्षणेन हविषा 'अवयजामहे' समर्पयामः । 'स्वाहा'–इति निपातो दानार्थे, स्वाहुत मिद मस्त्विति मन्त्रभागस्यार्थः । "तस्मात् सर्वस्मादित्यादि । कृतस्यैनसोऽवयजनं नाम 'तस्मात् सर्वस्मात्' 'प्रमोचनं' विश्लेषः । ग्रामारण्यादिस्थानभेदेन बहुविधस्यैनसः सङ्ग्रहाय सर्वस्मादिति विशेषणम् ॥ २५ ॥

* 'ग्रसनं'—इति च ।

† वा० सं ३. ४५. १ ।

‡ का० श्रौ० सू० ५. ५. ११ ।

यजमानस्य मन्त्रजपं विधत्ते— "अथेति। 'अथ'-शब्दो होमानन्तर्ये, 'ऐन्द्रीम्' इन्द्रदेवताकाम्, 'मरुत्वतीं' मरुत्त्वच्छब्द-युक्ताम्, "मो षू ण इन्द्र"-इत्यादिकां ऋचं * यजमानो जपेदि-त्यर्थः। उक्तं हि सूत्रकृता— "मो षू ण इति यजमानो जपति" -इति †। मरुत्वदिन्द्रदेवताकां ऋचं प्रशंसति— "यत्रेति। "मरुतः पाप्मान मित्यादि। यदा खलु वरुणपाशेन बद्धाः प्रजाः, तासां यद् बन्धनकारिणं पापं 'मरुतः' 'विमेथिरे' विलोपितवन्तः, 'तत्' तदानीं प्रजापतिः खलु 'ईक्षाञ्चक्रे' पर्यालोचितवान्— 'इमे' खलु 'मरुतः' मदीयाः 'प्रजाः' न विमथ्नीरन्' न विबा-धेरन् 'इति' ॥ २६ ॥

"स एता मिति। 'सः' प्रजापतिः पूर्वोक्तरूपं पर्यालोच्य 'एताम् ऐन्द्रीं मरुत्वतीम्' ऋचम् 'अजपत्'। अत्रेन्द्रस्य प्रसङ्ग माह— "क्षत्रं वा इति। 'इन्द्रः' खलु क्षत्रियजातिः, तस्येन्द्रस्य 'विशो मरुतः'; क्षत्रियो हि प्रजानां 'निषेद्धा' निरोधकः, तेनेन्द्रेण 'निषिद्धाः' निवारिता भवेयुः। 'इति' अनेनाभिप्रायेणैन्द्रदेवता-काया ऋचो जप इत्यर्थः ॥ २७ ॥

ता मृचं पठति— "मो षू ण इति। अस्याश्चाय मर्थः। हे 'इन्द्र!' 'अत्र' एषु 'पृत्सु'। सङ्ग्रामनामैतत्। अस्मदीयाः प्रजाः 'मा उ सु हिंसीः'। 'हे शुष्मिन्' बलवन्निन्द्र! 'देवैः' मरुद्भिः सहितः 'ते' तव 'अवया:'। अवपूर्वाद् "अवया: श्वेतवाः"-इति ‡ निपात्यते। अवयजमानरूपकरम्भपात्रहोमः 'अस्ति' खलु। 'मह-श्चित्' महतोऽपि 'मीढुषः' सेक्तुः 'यव्याः'। "सुपां सुलुक्"-

* वा० सं० ३. ३६. १।

† का० श्रौ० सू० ५. ५. १२। ‡ पा० सू० ८. २. ६७।

रित्यादि । होता सौदत्यस्मिन्निति होतृषदनम् । उत्तरस्या वेद्याः सम्बन्धिनि 'होतृषदने' स्थाने ; न दक्षिणस्या इत्यर्थः । 'प्रसौति' अध्वर्युप्रतिप्रस्थातारौ ; प्रयाजान् कर्त्तुं युगादाने प्रेरयति । "षु प्रसवैश्वर्ययोः"–इति * धातुः । 'प्रसूतौ' प्रेरितौ , अनुज्ञातावित्यर्थः । "स्रुच आदायेति । अध्वर्युप्रतिप्रस्थात्रोरुभयोरपि प्रत्येकं जूहूपभृतौ स्तः †, तदभिप्रायेण स्रुच इति बहुवचनम् । "समिधो यज"–इति प्रथमप्रयाजसम्प्रेषः । द्वितीयादिषु "यज"–इत्येव सम्प्रेषः ‡ । वीप्सा द्वितीयादिषु सर्वत्र सम्बन्धार्था । "चतुर्थे-चतुर्थे"–इति वीप्सा द्विरावृत्त्या । उभावपि 'चतुर्थं चतुर्थं प्रयाजं' अपि हुत माज्यं जुहूं 'समानयमानौ' प्रतिनयन्तौ 'नवभिः' नवसङ्ख्यकैः 'प्रयाजैः चरतः § ॥ ३० ॥

आज्यभागयोरपि प्रतिप्रस्थातृसाहित्यं विधातु माह— "अथाध्वर्युरिति । "उभावेवेति । उभावपि अध्वर्युप्रतिप्रस्थातारौ ध्रौवस्य 'आज्यस्य' सकाशात् 'चतुरवदाय' जुहां चतुर्गृहीत्वेत्यर्थः । "वषट्कृते जुहुत इति । एकस्मिन्नेव वषट्कारे उभावपि स्वस्वाहवनीये जुहुत इत्यर्थः ॥ ३१ ॥

"अथाध्वर्युरेवाह सोमायेत्यादि । एतेन द्वितीयाज्यभागस्यानुष्ठानप्रकारः प्रतिपादितः । सामिधेनिप्रेषादौ 'आश्राव्य' आश्रावणेन अध्वर्युरेवेति ॥ ३२ ॥

---

* अदा० प० ३१ धा० । † का० श्रौ० सू० ५. ५. १५ ।

‡ "यजयजेत्युत्तरौ"–इति का० श्रौ० सू० ३. ५. ७। 'उत्तरौ-दावनुयाजौ यजयजेत्येवं प्रैषति, प्रथम एव देवान् यजति"–इति तत्र या० दे० । आप० श्रौ० सू० ३. ५. १ च द्रष्टव्यम् ।

§ "नवप्रयाजं नवानुयाजम्"– इति का० श्रौ० सू० ५. २. ७ ।

तत्र तत्र यत् प्रसङ्गत उक्तम्, तदिदानीं विधत्ते— "तद्यदिति। 'यत्' किमपि आश्रावणादिकं 'वाचा कर्त्तव्यं' वागिन्द्रियसाध्य मिति, 'तत्' 'अध्वर्युरेव' कुर्यात्। 'प्रतिप्रस्थाता' तूष्णीं क्रियमाण मनुतिष्ठेत्, आश्रावणादिकं वाचा न प्रयुञ्जीत। इमा मेव श्रुति मभिप्रेत्य सूत्रित मापस्तम्बेन— "यत् किञ्च वाचाकर्मोण मध्वर्युरेव तत् कुर्यात्"—इति *। अस्य नियमस्य प्रयोजन माह— "तद्यदिति। 'यत्र' उत्तरस्यां वेद्यां 'वषट् क्रियते' होता वषट्कारः प्रयुज्यते, 'इहैव' अस्मिन्नेव स्थाने 'अध्वर्युरेव आश्रावयति' †॥ ३३॥

"क्रतानुकर एवेति। 'प्रतिप्रस्थाता' 'क्रतानुकरो' क्रतानुकुर्वाणम् 'अनुवर्त्मानम्' अनुगमनशीलं 'करोति'। विपक्षे बाध माह— "प्रत्युद्यामिनो मिति। 'यदि' यदि हि अध्वर्युवत् प्रतिप्रस्थातापि पृथगाश्रावणं कुर्यात्, तदा 'क्षत्राय' वैश्यजातिं 'प्रत्युद्यामिनीं' प्रत्युद्यमनशीलां 'कुर्यात्'। "तस्मादिति, उक्तार्थानुगमनम् ‡॥ ३४॥

"पाणावेवेति। एव मुभौ अध्वर्युप्रतिप्रस्थातारौ आज्यभागाभ्यां प्रचर्य, 'प्रतिप्रस्थाता' हस्ते एव जुहूप्रभृतौ धारयन् 'उपास्ते' उपविशति, आ पयस्याप्रचरणकालात्। 'अध्वर्युः' तु 'एनैः'

* आप० श्रौ० सू० ८. ५. १७। 'वागिति वागिन्द्रिय मुच्यते, तज्जन्यो व्यापारो वाचाकर्म, तत्साध्यं कर्म वाचाकर्मोणम्'—इति तद्वृत्तिः।

† "प्रणीतापत्नीसन्नहनाग्निमन्थनाश्रुतप्रत्याश्रुतप्रैषयजमानवाचनहोऽवदानवरणप्राग्निचाङ्गुलिपर्वाञ्जनावान्तरेडाभागापराग्नावभृथान्न प्रतिप्रस्थाता"—इति का० श्रौ० सू० ५. ४. ३३।

‡ "क्रतानुकरोऽन्यत्र दक्षिणस्याम्"—इति का० श्रौ० सू० ५. ४. ३४।

आग्नेयादिभिः स्रुवेद्या मासादितैः 'हविर्भिः' 'प्रचरति'। तानि हवींषि परिगणयति— "आग्नेयेनेत्यादिना ॥ ३५ ॥

"अथैताभ्या मित्यादि। एव मैन्द्राग्नपर्यन्तैः षड्भिर्हविर्भिरिष्ट्वा 'अथैताभ्यां' वारुणीमारुतीभ्यां 'पयस्याभ्यां' 'प्रचरिष्यन्तौ' यज्ञं तावध्वर्युप्रतिप्रस्थातारौ मेषमेषौ 'विपरिहरतः'। तदेव विपरिहरणं दर्शयति — "स य इति। "सः उत्तरस्या मेव पयस्यायां मेषीम्"–इत्यादिना * विधानात् 'वारुण्यां मेषी' स्यात्, 'मारुत्यां मेषः'। तत्र यो मारुत्यां मेषो भवति, तं तत आहृत्य वारुण्यां स्थापयेत्; या च मेषी वारुण्याम्, तां तत आहृत्य मारुत्यां स्थापयेत् †। तदेतद् विपरिहरण मनूद्य स्तौति — "तद्यदेव मिति। मेषो हि पुंरूपत्वाद् वीर्यरूपः; वरुणश्च क्षत्रियजातिः; तस्मिन् क्षत्रियमेषस्य निधानात् 'वीर्य मेव एतत् धत्तः'। 'अवीर्या' वीर्यं सामर्थ्यम्, तद्रहिता खलु 'स्त्री'; मरुतश्च वैश्यजातिः; मारुते हविषि स्त्रीपशोर्मेष्या निधानात् तां वैश्यजातिम् अवीर्यां वीर्यरहिता मेव कुरुतः ॥ ३६ ॥

विपरिहरणानन्तरं वारुण्या पयस्यायाः प्रचरणं विधत्ते— "अथाध्वर्युरिति। "वरुणायानुब्रूहीति। होतारं प्रत्यनुवाक्यार्थं सम्प्रेष मुक्त्वा, जुह्वा मुपस्तीर्य, 'अस्यै वारुण्यै' षष्ठ्यर्थे चतुर्थी। वारुण्या पयस्यायाः 'हिरवद्यति'। 'सः' अवद्यन्नध्वर्युः 'अन्यतरेण' पूर्वेण उत्तरेण वा 'अवदानेन' 'सह' क्रत्वं 'मेषं' स्रुचि 'अवदधाति', पुनरभिघार्य अवत्तप्रदेशे हविःप्रत्यञ्चनं कुर्यात्। स ततोऽतिक्रमणादीनि प्रकृतिवत् कुर्यादित्यर्थः ‡ ॥ ३७ ॥

---

* पुरस्तात् २७६पृ० १३पं० द्रष्टव्यम्। † का० श्रौ० सू० ५. ५. १७।
‡ का० श्रौ० सू० ५. ५. १८।

प्रतिप्रस्थातुर्मारुत्या पयस्याया: प्रचरणे विशेष माह— "सव्ये पाणाविति। स्वकीये 'स्रुचौ' जुह्वपभृतौ अध्वर्यु: आत्मीये 'सव्ये पाणौ' कृत्वा, 'दक्षिणेन प्रतिप्रस्थातु:' 'वासोऽन्वारभ्य', "मरुद्भ्यो ऽनुब्रूहि"–इति होतारं प्रतिप्रेष्य, उपस्तरणादिकं प्रतिप्रस्थाता कुर्यात्।

स प्रतिप्रस्थाता पूर्वेणोत्तरेण वावदानेन सह कृत्स्नं मेषं स्रुचि अवदध्यात्। ततो मेषीं वारुण्या प्रत्यञ्चनेनेति। तत: प्रतिप्रस्थाता वेदी मतिक्रामति। अनन्तर मध्वर्युरेव तदीयं वासोऽन्वारभ्य मरुतो यजेति ब्रूयात्। होतुर्याज्यान्ते वषट्कृते सति केवलं प्रतिप्रस्थाता दक्षिणे आहवनीये हविर्जुहोति, त मनु किञ्चिद् वाचाप्याहरेत्। एतत् सर्वं सङ्गृह्य कात्यायनेन सूत्रितम्— "पयस्याप्रचरणकाले मेषौ व्यतिहरतो ऽन्यतरेणावदानेन सह मेषं सव्येन स्रुचौ गृहीत्वा प्रतिप्रस्थातुर्वामो दक्षिणेन मरुद्भ्योऽनुवाच यति वारुणीवदवदानम्"–इति * ॥ ३८ ॥

कायेन हविषा प्रचरणं विधत्ते— "अथेति। प्रधानयागानन्तर मनुष्ठेयं स्विष्टकृदादिप्रयोगजातं सर्वं मनुक्रामति—"अध्वर्युरेवाग्नये स्विष्टकृत इत्यादिना †। "अनुब्रूहि"–इति स्विष्टकृद् यागस्य पुरोऽनुवाक्याप्रेष:। अनुष्ठितं प्रधानयागं न्यूनातिरेकदोष परिहारेण स्विष्टं शोभनं यज्ञं करोतीति स्विष्टकृत्।

"सर्वेषा मेवेति। आग्नेयादि-कायान्तानाम् ‡। "सकृदिति। प्रधानयागस्य। द्विरवदानप्रसक्तिं वारयति— "एतस्या एवेति। 'एतस्या:' मारुत्या: पयस्याया: 'एव' हविष: सकाशात् स्विष्टकृदर्थं

* का० श्रौ० सू० ५. ५. १७—२०।

† का० श्रौ० सू० ५. ५. २१। ‡ ३५ ३६ :कण्डिकासु द्रष्टव्यम्।

'सकृत्' एव अवद्येत्, नान्यस्मादित्येवकारार्थः। चतुरवदानसम्य क्त्ये अभिघारणस्य द्वित्वं विधत्ते— "अथोपरिष्टादिति। 'द्विः' क्रियाभ्यावृत्तिगणनेऽर्थे, "द्वित्रिचतुर्भ्यः सुच्"-इति * द्वि शब्दात् सुच् ॥ ३८ ॥

"अथाध्वर्युरेव प्राशित्र मिति। प्रतिप्रस्थातः प्राशित्रावदानं नास्तीत्येवकारार्थः। तस्य पयस्यारूपहविषः सान्नाय्यविकृतित्वात् प्रकृतौ सान्नाय्यात् प्राशित्रावदानस्यादर्शनादित्यभिप्रायः। "इडां समवदायेति। सर्वेभ्यो हविर्भ्यः सम्भूय एकस्मिन्निडापात्रे अवद्यादित्यर्थः। "अति प्रजिहीत इति। उत्तरां वेदिं अतिक्रमय्य तदिडापात्रं प्रगमयेदित्यर्थः †। "ओ हाङ् गतौ"-इत्यस्मात् ‡ अन्तर्णीतण्यर्थाल्लिटि रूपम्, "भृञा मित्"-इति § अभ्यासस्येत्त्वम्। "मारुत्यै पयस्याया इति, षष्ठ्यर्थे चतुर्थी। "हिरण्यस्याभिघारयतीति। अध्वर्युरेव, न प्रतिप्रस्थाता ॥ ४० ॥

"अथाध्वर्युरेवाह ब्रह्मन् प्रस्थास्यामीति। इडोपह्वानादिकं प्रकृतिवदेव कृत्वा, अनुयाजार्थं मध्यनुज्ञापकं मिमं प्रैषं अध्वर्युरेव ब्रूयात्। "यत् किञ्च वाचा कर्त्तव्य मध्वर्युरेव तत् करोति"-इति प्राक् प्रतिपादितस्यायं प्रपञ्चः ‖, प्रैषार्थः प्रकृतिवर्णितः। "स सुचोरेवेत्यादि। 'सः' अध्वर्युः 'सुचोः' जुह्वुपभृतोः 'एव' 'पृषदाज्यं' दधिमिश्रं माज्यं 'व्यानयते' विविध मासिञ्चति। पृषदाज्यधानीगतं पृषदाज्यं जुह्वा महं मासिच्य, शिष्ट माज्य मुपभृति

---

* पा० सू० ५. ४. १८।
† का० श्रौ० सू० ५. ५. २२। ‡ ज्० प० ७ धा०।
§ पा० सू० ७. ४. ७६।
‖ पुरस्तात् २८१ पृ० ८ पं० द्रष्टव्यम्।

आनयेदित्यर्थः । प्रतिप्रस्थातुः पक्षद्वय माह— "अथ यदीति *। आज्यग्रहणकाले यदि प्रतिप्रस्थाता पृषदाज्यं गृह्णीयात्, तत् पृषदाज्यम्, इदानीं स प्रतिप्रस्थाता अध्वर्युवत् जुह्वुपभृतोः द्विधा व्यासिञ्चेत् । "उतो इति, पक्षान्तरद्योतने । यदि तु तत्र ग्रहण-समये पृषदाज्यं न गृहीतं भवति, तदा स प्रतिप्रस्थाता उपभृति स्थितं यदेवाज्यं विद्यते, तस्यौपभृतस्याज्यस्य अर्धं प्रथमं जुह्वा मासिञ्च, शिष्ट माज्यं चतुर्थे प्रयाजे आसिञ्चेदित्यर्थः ।

आसेचनानन्तरं कर्त्तव्य मतिक्रमणादिक मुपदिशति— "ता उभावेवेत्यादिना । 'देवान् यज'–इति प्रथमोऽनुयाजप्रैषः । 'यज यज' –इत्यादि सर्वत्र । "नित्यवीप्सयोः"–इति † यजेत्यस्य द्विर्वचनम् । जौहवेन पृषदाज्येन त्रिरिष्ट्वा, 'चतुर्थे-चतुर्थे' अनुयाजे औपभृतम् । 'समानयमानौ' उभावपि अध्वर्युप्रतिप्रस्थातारौ 'नवभिः अनुयाजैः' 'चरतः' प्रचरत इत्यर्थः । उभयापेक्षया 'चतुर्थे-चतुर्थे' इति वीप्सा । प्रयाजानुयाजानां तत्सङ्ख्याकत्वं सम्भूय प्रशंसति— "तद्यदिति । "प्रयाजानुयाजौ यज्ञाङ्गे"–इति ‡ निपातनात् कुत्वाभावः । नव प्रयाजा अनुयाजाश्च यस्मिन् इत्युभयत्र बहुव्रीहिः, शिष्ट मुक्तार्थम् ॥ ४१ ॥

अनुयाजानन्तरभावि स्रुग्व्यूहनादिक मपि चोदकप्राप्त मुभाभ्यां कर्त्तव्य मित्यनुक्रामति— "ता उभावेवेत्यादिना §। "परिधि मभिपद्येति । मध्यमं परिधि मन्वारभ्येत्यर्थः । उक्तं हि कात्या-

* "प्रतिप्रस्थाता च, न वा (गृह्णाति)"—इति का० श्रौ० ५. ४. ३१, ३२ ।
† पा० सू० ८. १. ४ । ‡ पा० सू० ७. ३. ६२ ।
§ का० श्रौ० सू० ५. ५. २४ ।

यनेन— "प्रथमं परिधिं गृहीत्वाग्न्याहेषिता दैव्या"–इति *। "इषिता देव्या"–इति सूक्तवाकप्रेषः प्रकृतावेव व्याख्यातः †। "समुल्लुम्पत इति। "लुप्ऌ छेदने" ‡। समुच्छिनत्तः, समुद्गृह्णीत इति यावत्। "उभावनुप्रहरत इति। सूक्तवाकेऽनूच्यमाने 'उभौ' अध्वर्युप्रतिप्रस्थातारौ 'अनुप्रहरतः' स्वं स्वं प्रस्तर मग्नौ प्रक्षिपत इत्यर्थः। "यदा होतेति। 'यदा' खलु होता सूक्तवाकं परिसमापयति (४२), 'अथ' अनन्तरम् 'आग्नीत्' आग्नीध्रः 'अनु प्रहर'–'इति' अध्वर्युं प्रति 'आह'। "उभावेवेति। यद्यप्यनुप्रहरेत्येकवचनेनाध्वर्युरेव प्रेर्यते, तथापि कृतानुकरत्वात् § प्रतिप्रस्थातुरपि तूष्णानुप्रहरणं विद्यत इत्यर्थः। "आत्मानं उपस्पृशेते इति। "चक्षुषा"–इति ‖ मन्त्रेण। तथा च सूत्रितम्— "चक्षुषा इत्यात्मान मालभते"–इति ¶ ॥ ४२, ४३ ॥

संवदस्वागानग्नीदित्यादीना मुक्तिप्रत्युक्तिरूपं यदस्ति, तदप्याग्नीध्रस्य अध्वर्युणोक्तेनैवेत्यभिप्रेत्याह— "अथाहेति। 'अथ' अनन्तरं "संवदस्व"–'इत्याह' आग्नीध्रः। तच्च संवदन मुक्तिप्रत्युक्तिरूप मनुक्रामति— "अगानिति। ते च मन्त्राः प्रकृतौ व्याख्याताः **। तेषु च विभागः सूत्रकृता दर्शितः— "एतेषां

---

* का० श्रौ० सू० ३. ६. १।

† १. ८. ३. १०— १ भा० ५६०, ५७१ पृ०।

‡ तु० उ० १५१ धा०।

§ इतः पूर्वं मेवोक्तम्, टीकितञ्च तत् द्रष्टव्यम् (३०५ पृ०)।

‖ वा० सं० २. १६. १०।

¶ का० श्रौ० सू० ३. ६. १५।

** १. ८. ३. २०— १ भा० ५६३, ५७४ पृ०।

संवदस्वागाच्छ्रोषडित्यग्नीच्छेष मितरो व्यत्यासं ब्रूतः"–इति *। "स्वगा देव्या"–इति प्रयुवाकप्रैष मध्वर्युरेव ब्रूयात्। परिधि-प्रहरणादिकं तूभाभ्या मेवानुष्ठेयम्। "उभौ स्रुच इत्यादि। 'सम्य-ग्गृह्य' सम्यग् गृहीत्वा विमोचनार्थं 'स्फ्येन सादयतः'॥ ४४॥

"अथाध्वर्युरेवेति। "प्रतिपरेत्येति। आहवनीयदेशात् प्रति-निवृत्य, गार्हपत्यसमीपं गत्वेत्यर्थः। "उपास्त इति। पत्नी-संयाजसमये तूष्णी मुपविशेत् प्रतिप्रस्थाता। न तु तस्य तदानीं कृतानुकरत्व मपेक्षित मित्यर्थः। "पत्नीः संयाज्योदेत्यध्वर्युरिति। पत्नीसंयाजानन्तर माहवनीयदेशं गत्वेत्यर्थः॥ ४५॥

"त्रीणि समिष्टयजूंषीति। तानि च पूर्वस्मिन् वैश्वदेव-ब्राह्मणे व्याख्यातानि †। "तूष्णी मेवेति। प्रतिप्रस्थातुः समिष्ट-यजुर्होममसमये आत्मीयं स्रुचं तूष्णी मेव दक्षिणाग्नौ प्रगृह्णीयात्। स्रुगग्र माज्यं धारयेत्, तन्मन्त्रः स्वाहाकारो वा न विद्यते इत्यर्थः ‡। "तद् ये वैश्वदेवेनेत्यादि। वैश्वदेवयाजमाने समाप्ते 'यजमानयोः' यजमानपत्न्योर्ये 'वाससी', ते परिहिते भवतः।

वरुणप्रघासाङ्गत्वेनावभृथगमनं विधत्ते—"अथास्या इत्यादि। या वरुणदेवताका पयस्या तस्याः। 'क्षामकर्षमिश्यम्' क्षामोऽति-पाकेन दग्धः पात्रे संसक्तः, "कृष विलेखने" कृष्यते इति कर्षः। क्षामश्चासौ कर्षश्चेति क्षामकर्षः, तेन मिश्रं हविः 'आदाय', 'अवभृथम्' उदकं प्रति 'यन्ति' ऋत्विग्यजमानाः, उदकसमीपं गच्छेयुरित्यर्थः। गमनस्य प्रयोजन माह—"वरुणं वेति।

* का० श्रौ० सू० ३. ६. १६।

† पुरस्तात् २७१ पृ० ४पं० द्रष्टव्यानि।

‡ का० श्रौ० सू० ५. ५. २८।

'एतत्' श्यामकर्षमिश्रं हविः 'वरुण्यम्' वरुणसम्बन्धि, पापदेवतया सम्बद्ध मित्यर्थः ; "यो विदग्धः स नैर्ऋतः"— इतिश्रुतेः * । यद्वा पयस्याया वरुणदेवताकत्वात् तद्यागशिष्टं सर्व मपि वरुण्यम् । अतः 'निर्वरुणतायै' वरुणसम्बन्धराहित्याय अवभृथगमनं युक्त मित्यर्थः ।

सौमिकावभृथवत् प्रसक्तं सामगानं निषेधति— "तत्र न सामेति । अवभृथगमनसमये हि "अग्निष्टपति"–इति साम † प्रस्तोत्रा गेयम् ‡, 'तत्र' तस्मिन् वरुणप्रघासाङ्गावभृथगमने तत्र गातव्यम् । तदुपपादयति— "न हीति । सोमयागे हि स्तोत्रादिरूपेण साम्नां प्रयोगात् , तदङ्गावभृथगमनेऽपि सामगान मयुक्तम् । 'न' खलु 'अत्र' वरुणप्रघासे 'साम्ना' 'किम्' अपि प्रयोजनं 'क्रियते', अतोऽप्रयुज्यमानस्य साम्नोऽवभृथेऽप्यप्रयोग एव युक्त इत्यर्थः । अतः 'तूष्णीम्' अमन्त्रकम् 'एव' अवभृथसमीपम् 'अभ्यवेत्य' "अवभृथ निचुम्पुण"–इति मन्त्रेण § श्यामकर्षमिश्रं हविः 'उपमारयति' अप्सु प्रक्षिपति । सूत्रितञ्चेदम्— "वारुणीनिष्क्रामेणावभृथं तूष्णी मेत्याभ्यवेत्य मज्जयत्यवभृथेति" –इति ‖ ॥ ४६ ॥

---

* तै० सं० २. ६. ३. ४ ।

† "स गायति , अग्निष्टपति प्रतिदहत्यहावोऽहाव इति"—इत्याम्नास्यति चेहोपरिष्टात् (४का० ४अ० ५ब्रा० ८क०) ।

‡ षड्विंश-ब्राह्मणस्य तृतीयप्रपाठके प्रथमखण्डे एतद्विवरणं स्फुटम् । तत्साम स्वरूपन्तु योनिगाने १२. १. ४० द्रष्टव्यम् । आर्षेयनामब्राह्मणे त्वेतदवभृथसामेत्येवाम्नातम् । एतद्भूमूलक मेवाग्निष्टोमसाम मूह्ये ६. २. ४ अतम् ।

§ मन्त्र एष वा० सं० ३. ४८ । ‖ का० श्रौ० सू० ५. ५. २६, ३० ।

"अवभृथेति। मन्त्रस्थाय मर्थः— सोमलिप्तानि पात्राणि अवाचीनान्यस्मिन् क्रियन्त इत्यवभृथः। अवपूर्वात् भृञः औणादिकः थक् प्रत्ययः। हे 'अवभृथ!' 'निचुम्पुण' नितरां पुण्यहेतुर्भव। "पुण कर्मणि शुभे *"—इत्यस्माल्लोटि व्यत्ययेन द्विर्वचन मभ्यासस्य पुगागमश्चकारादेशश्च। यद्वा, "चुप मन्दायां गतौ †"—इत्यस्माल्लोटि वर्णव्यत्यये रूपं ज्ञेयम्। नीचीनं गच्छेत्यर्थः। यतश्च 'निचेरुः' नितरां चरणशीलः 'असि', अतो 'निचुम्पुण' नीचीनं गच्छ। 'देवैः' इन्द्रियैः, तदधिष्ठातृदेवैः 'देवकृतम् एनः' देवविषयं यदेनः कृत मस्ति, अहं तत् 'अवायासिषम्' अवाचीनं प्रापयामि, अप्सु प्रक्षिपामीत्यर्थः। "या प्रापणे ‡"—इत्यस्माल्लुङि "यमरमनमाताम्"—इति सगिटौ §। तथा "मर्त्तैः" मनुष्यैः ऋत्विग्भिः 'मर्त्यकृतं' मनुष्यविषये यत् कृत मेनः, तदपि 'अवायासिषम्'। हे 'देव' स्वामिन्! अवभृथ! 'पुरुराव्णः' पुरुरावणशीलान् बहुविधाक्रोशकारणान्। रौतेरौणादिको ऽमिप्रत्ययः ‖। यद्वा, "रा दाने ¶"—इत्यस्मात् "आतो मनिन्क्वनिब्वनिपश्च"—इति ** क्वनिप्। पुरु बहुलं संसारदुःखं राति ददातीति पुरुरावा, तस्मात् इन्द्रियहिंसकात् वरुणपाशग्रहणलक्षणात् पापात् अस्मान् पाहीति। एव मनेन मन्त्रेण चामकर्षमिश्रं हविःशेषं जायापती जुहुतः। तदुक्तं सूत्रकारेण— "जायापती स्नातोऽमज्जन्तावन्योन्यस्य पृष्ठे धावतः"—इति ††। पूर्वयोर्वासमो-

* तु० प० ५३ धा०। † स्वा० प० ४०३ धा०।
‡ अदा० प० ३६ धा०। § पा० सू० ७. २. ७३।
‖ उ० ४ पा० २४२ सू०। ¶ अदा० प० ४७ धा०।
** पा० सू० ३. ४. ७४। †† का० औ० सू० ५. ५. ३१, ३२।

दीनं विधत्ते— "काम मिति *। स्नानानन्तर मन्ये वाससी परिधाय †। पूर्वपरिधानं निषिद्धम् ; "न दीक्षितवसनं परिदधीत" इति श्रुतेः ‡। एतद्दानं प्रशंसति— "स यथेति। 'यथा' खलु 'अहिस्त्वचो निर्मुच्येत', 'एवम्' पूर्वपरिहितवाससं सर्वस्मात् पापादेव यजमानो निर्मुच्यते ॥ ४७ ॥

अवभृथानन्तरं केशश्मश्रुवपनं विधत्ते— "अथेति। केशाश्च श्मश्रूणि च 'केशश्मश्रू', प्राण्यङ्गत्वादेकवद्भावः। 'उप्त्वा' वापयित्वेत्यर्थः। समारोढृणपुरस्सरं गृहे प्रत्यागमनं विधत्ते— "समारोह्येति §। 'अग्नी' गार्हपत्याहवनीयौ। "एतेन यजत इति। वरुणप्रघासाख्येन यागेनेत्यर्थः। "न हि तदिति। वरुणप्रघासनिमित्ताया मुत्तरवेद्यां 'यत्' अग्निहोत्रहवनम्, न तद् युज्यत इत्यर्थः। यस्मादेवं तस्मात् कारणात् वरुणप्रघासस्थानादुदवमानं ‖ कर्त्तव्य मिति निगमयति— "तस्मादिति। समारोपणानन्तरं तस्मात् स्थानात् निष्क्रम्य 'गृहान्' 'इत्वा' गत्वा, 'निर्मथ्य', तत्र 'पौर्णमासेन' यागेन 'यजेत'। एतत्प्रतिष्ठाहेतुना स्तौति— "उत्सन्नयज्ञ इत्यादिना। दर्शपूर्णमासवच्चातुर्मास्याना मनुष्ठान बाहुल्याभावात् उत्सन्नयज्ञत्वम्। अतस्तेषा मप्रतिष्ठाहेतुत्वेन ¶ तदनुष्ठाने यजमानस्यापि अप्रतिष्ठा सम्भाव्येत ; अतः

* "पूर्वे दद्यादधिक्रतेभ्यो यस्मा इच्छेत्"—इतीह का० श्रौ० ५. ५. ३४।
† 'परिधापयेत्'—इति च।
‡ का० श्रौ० सू० ५. ५. १३ अपि।
§ का० श्रौ० सू० ५. ५. ३५. ३६।
‖ इतोऽनन्तरं '[निष्क्रमणं]'—इति च।
¶ 'मप्रतिष्ठत्वेन'—इति च।

तस्य प्रतिष्ठायै स्वयं प्रतिष्ठितः पौर्णमासयागः सम्पद्यत इत्यर्थः। "तस्मादुदवस्यतीति, वरुणप्रघासदेशान्निष्क्रमणविधेर्निगमनम् * ॥ ४८ ॥ ३ [५. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम् ॥

(अथ तृतीयं ब्राह्मणम् .)

वरुणप्रघासैर्वै प्रजापतिः। प्रजा वरुणपाशात् प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजाः प्राजायन्ताथैतैः साकमेधैरेतैर्वै देवा वृत्रं मघ्नन्नेतैर्वै व † व्यजयन्त येय मेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते तस्माद्वाऽएष एतैश्चतुर्थे मासि यजते स वै द्वाह मनूचीनाहं यजते ॥ १ ॥

स पूर्वेद्युः। अग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निꣳ ह वै देवा अनीकं कृत्वोपप्रेयुर्वृत्रꣳ

---

* 'धेनुर्दक्षिणा, अश्वो वा ; षट्, द्वादश वा"—इति का० श्रौ० सू० ३७—४०। आप० श्रौ० सू० ८ अध्या० ५—८ क० १२६ सूत्राणि चेह द्रष्टव्यानि।

† 'तैर्यै व'—इत्यपि डा०-वेबर-दृष्टः।

हनिष्यन्तः स तेजोऽग्निर्नाव्यथत तथो ऽएवैष एतत् पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्नग्नि मेवानीकं कृत्वोपप्रैति स तेजोऽग्निर्न व्यथते तस्मादग्नये-ऽनीकवते ॥ २ ॥

अथ मरुद्भ्यः सान्तपनेभ्यः। मध्यन्दिने चरुं निवपति मरुतो ह वै सान्तपना मध्यन्दिने व्यृचꣳ सन्तेपुः स सन्तप्तोऽनन्नेव प्राणान् * परिदीर्णः शिश्ये तथोऽएवैतस्य पाप्मानं द्विषन्तं भ्रातृव्यं मरुतः सान्त-पनाः सन्तपन्ति तस्मान्मरुद्भ्यः सान्तपनेभ्यः † ॥ ३ ॥

अथ मरुद्भ्यो गृहमेधिभ्यः। शाखया वत्सान-पाकृत्य पवित्रवति सन्दोह्य तं चरुꣳ श्रपयति चरुरु ह्येव स यत्र क्व च तण्डुलानावपन्ति तन्मेधो देवा दधिरे प्रातर्व्यृचꣳ हनिष्यन्तस्तथोऽएवैष एतत्पाप्मा-नं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्मेधो धत्ते तदुत्क्षीरौ-दनो भवति मेधो वै पयो मेधस्तण्डुलास्तु मुभयं मेध-मात्मन्धत्ते तस्मात्क्षीरौदनो भवति ॥ ४ ॥

---

* 'प्राणान्'—इति क।

† 'ने'—इति ग, घ।

तस्यावृत् * । सैव स्तीर्णा व्वेदिर्भवति या मरुद्भ्यः सान्तपनेभ्यस्तस्यामेव स्तीर्णायां व्वेदौ परिधींश्च शकलांश्चापनिदधति तथा सन्दोह्य चरुꣳ श्रपयति श्रपयित्वाभिघार्योद्वासयति ॥ ५ ॥

अथ द्वे पिशीले वा पात्रीं वा निर्णेनिजति । तयोरेनं द्वेधोद्यरन्ति तयोर्मध्ये सर्पिरासेचने कृत्वा सर्पिरासिञ्चति । स्रुवं च स्रुचं च सम्मार्ष्ट्यथैताऽओदनावादायोदेति स्रुवं च स्रुचं चादायोदेति स इमा मेव स्तीर्णां व्वेदि मभिमृश्य परिधीन्परिधाय यावतः शकलान् कामयते तावतोऽभ्यादधात्यथैताऽओदनावासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥ ६ ॥

अग्नयेऽनुब्रूहीति । आग्नेय माज्यभागꣳ स दक्षिणस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति व्वषट्कृते जुहोति ॥ ७ ॥

* 'वृत्'—इति ग, घ ।

अथाह सोमायानुब्रूहीति । सौम्य माज्यभागꣳ स उत्तरस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति व्वषट्कृते जुहोति ॥ ८ ॥

अथाह मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीति । स दक्षिणस्यौदनस्य सर्पिरासेचनात्तत आज्य मुपस्तृणीते तस्य द्विरवद्यत्यधोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति व्वषट्कृते जुहोति ॥ ९ ॥

अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उत्तरस्यौदनस्य सर्पिरासेचनात्तत आज्य मुपस्तृणीते तस्य द्विरवद्यत्यधोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेति व्वषट्कृते जुहोत्यथेडा मेवावद्यति न प्राशित्र मुपहृत्य मार्जयन्त ऽएतन्व्वेक मयनम् ॥ १० ॥

अथेदं द्वितीयꣳ * । सैव स्तीर्णा व्वेदिर्भवति या मरुद्भ्यः सान्तपनेभ्यस्तस्या मेव स्तीर्णायां व्वेदौ परि

* 'यꣳ'—इति ग, घ ।

धीँश्च शकलांश्चोपनिदधति तथा सन्दोह्य चरूँ श्रपयति नेदेव * प्रतिवेश माज्य मधिश्रयति श्रपयित्वाभिघार्योद्दास्यानक्ति स्थाल्या माज्य मुद्दासयति स्रुवं च स्रुचं च सम्मार्ष्ट्यथैतꣳ सोम्य † मेव चरु मादायोदैति स्थाल्या माज्य मादायोदैति स्रुवं च स्रुचं चादायोदैति स इमा मेव स्रोणां व्वेदि मभिमृश्य परिधीन्परिधाय यावतः शकलान् कामयते ‡ तावतोभ्या § दधात्यथैतꣳ सोम्य ‖ मेव चरु मासादयति स्थाल्या माज्य मासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चादद्दान आह ॥ ११ ॥

अग्नयेऽनुब्रूहीति । आग्नेय माज्यभागꣳ स स्थाल्यै चतुर्गृह्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति व्वषट्कृते जुहोति ॥ १२ ॥

---

* 'तुदेव'—इति क, ङ।

† 'सोम्य'—इत्यपि डा०-वेबर-इष्टः।

‡ 'वामयते'—इति च दृष्टो डा०-वेबरेण।

§ 'न्या'—इति च डा०-वेबर-इष्टः।

‖ अत्रापि 'सोम्य'—इत्येव पाठो दृष्टः कस्मिंश्चित् पुस्तके डा०-वेबरेण।

अथाह सोमायानुब्रूहीति । सौम्य माज्यभागꣳ स स्याल्याऽ एव चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति व्वषट्कृते जुहोति ॥ १३ ॥

अथाह मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीति । स उपस्तृणीत ऽआज्य मथास्य चरोर्द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदान ऽअतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति व्वषट्कृते जुहोति ॥ १४ ॥

अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उपस्तृणीत ऽआज्य मथास्य चरोः सकृदवद्यत्यथोपरिष्टाद् द्विराज्यस्याभिघारयति न प्रत्यनक्त्यवदान मतिक्रामत्यतिक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेति व्वषट्कृते जुहोति ॥ १५ ॥

अथेडा मेवावद्यति न प्राशित्रम् । उपहृत्य प्राश्नन्ति यावन्तो गृह्या हविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुरथो ऽअप्यृत्विजः प्राश्नीयुरथो ऽअप्यन्ये ब्राह्मणाः प्राश्नीयुर्यदि बहुरोदनः स्यादथैता मनिरशितां कुम्भी मपिधाय निदधति पूर्णादर्व्वाय मातर्भिर्व्वत्सान्त्समवाऽर्ज्जन्ति तदु पशवो मेध मात्मन्दधते

यवाग्वैताए रात्रि मग्निहोत्रं जुहोति निवाल्यां प्रातर्दुहन्ति पितृयज्ञाय ॥ १६ ॥

अथ प्रातर्हुते वाहुते वा। यतरथा कामयेत सोऽस्या ऽअनिरशिताये कुम्भ्ये दर्व्यो पहन्ति पूर्णा दर्व्वि परापत सुपूर्णा पुनरापत। व्वस्नेव व्विक्रीणावहा ऽइषं सूर्जए शतक्रतविति यथा पुरोऽनुवाक्येव मेषैतयैवैन मेतस्मै भागाय ह्वयति ॥ १७ ॥

अथऽर्षभ माह्वयितवै ब्रूयात्। स यदि रूयात्सुव्वषट्कार इत्यु हैक ऽआहुस्तस्मिन्वषट्कारं जुहुयादित्यथो ऽइन्द्र मेवैनत् स्वेन रूपेण ह्वयति व्वृत्रस्य बधायैतद्वा † ऽइन्द्रस्य रूपं यदृषभस्तत्स्वेनैवैन मेतद्रूपेण ह्वयति व्वृत्रस्य बधाय ‡ स यदि रूयादा म ऽइन्द्रो यज्ञ मगन्त्सेन्द्रो मे यज्ञ इति ह व्विद्यादयदु न रूयाद्ब्राह्मण एव दक्षिणत आसीनो ब्रूयाज्जुहुधोति मैवैन्द्रो वाक् § ॥ १८ ॥

स जुहोति। दृंहि मे ददामि ते नि मे धेहि

* 'ज्ञाय'—इति ग, घ। † 'व्यधायैतद्वा'—इति क, ङ।

‡ 'व्यधाय'—इति क, ङ। § 'वाक्'—इति ग, घ।

नि ते दधे। निहारं च हरासि मे निहारं निहरामि ते स्वाहेति * ॥ १९ ॥

अथ मरुद्भ्यः क्रौडिभ्यः। सप्तकपालं पुरोडाशं निर्व्वपति मरुतो ह वै क्रौडिनो व्रत्रꣳ हनिष्यन्त मिन्द्र मागतं त मभितः परिचिक्रौडुर्महयन्तस्तथो ऽएवैतं पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्त मभितः परिक्रीडन्ते महयन्तस्तस्मान्मरुद्भ्यः क्रौडिभ्यो ऽथातो महाहविष एव तद्यथा महाहविषस्तथो तस्य ॥ २० ॥ ४ ॥

॥ इति चतुर्थप्रपाठके तृतीयं ब्राह्मणम् [५. ३.] ॥

अथ शाकमेधाख्यस्य विधित्सितस्य तृतीयस्य पर्वणः † पापरूपशत्रुजयहेतुत्वं वक्तुं ह्लन्तान्तं सङ्कीर्त्तयति— "वरुणप्रघासैरिति। 'अनमीवाः' रोगरहिताः अकिल्बिषाः, तन्निदानभूतपापपरिहीनाः। "अथैतैरिति। वरुणप्रघासानन्तर मनुष्ठेयैः 'एतैः साकमेधैः' प्रजापतिः ता एव प्रजा विजितपापा अकरोत्। एतेषां विजयहेतुत्व माख्यायिकया प्रतिपादयति— "एतैर्वा इति। 'व्रत्रम्' आवरणशीलम्, एतन्नामान मसुर मित्यर्थः।

* 'स्वाहेति'—इति ग, घ।

† "कार्त्तिक्यां साकमेधा दाहम्"—इत्यादिसूत्रसन्दर्भो द्रष्टव्यः (५. ६. १)

"येय मेषा मिति। 'एषां' देवानां हतहनन-कर्मणा 'येयं' 'विजितिः' विजयो विद्यते, व्यजयन्नेति सम्बन्धः। अथाप्येषां तत्फलसाधनत्व माह— "तथो एवैष इति। 'द्विषन्तं' द्वेषणशील मनर्थकारणं पापरूपं 'भ्रातृव्यं' शत्रु मिति सामानाधिकरण्येन सम्बन्धः। "तथो एव विजयत इति। तथा हतः पापशत्रुः, तत्सजातीयस्यापि निहत्या सर्वत्र साकमेधयाजिनो विजय एव, न कुत्रचित् प्रतिहतिरित्यर्थः।

उक्त मर्थं हेतुतया इदानीं विधत्ते— "तस्मादिति। यस्मात् उक्तफलहेतवः साकमेधाः, 'तस्मात्' 'एषः' वरुणप्रघासैरिष्टवान्। पुनः 'चतुर्थे मासि' 'एतैः' साकमेधैर्यजेत। अनीकवत्त्वादीनां साकमेधगतानां मिष्टीनां बहुत्वादेतैरिति बहुवचनम्। अहर्दयसाध्यत्वं विधत्ते — "स वा इति। द्वयोरह्नोः समाहारो द्यहः। "तद्धितार्थः"— इति * समासः। "सङ्ख्यादेः समाहारे"–इति † अह्नादेशस्य प्रतिषेधः। "अनूचीनाह मिति। अनु सम्यगञ्चतीत्यन्वक्, अन्वगेवानुचीनम्; "विभाषाञ्चेरदिक्स्त्रियाम्"–इति ‡ स्वार्थिकः खच् प्रत्ययः। अनूचीनं नैरन्तर्येण वर्त्तमान महः अनूचीनाहम्। "राजाहःसखिभ्यः"–इति § टच्समासान्तः॥ १॥

तत्र पूर्वदिवसे प्रातर्मध्याह्नसायाह्नेषु तिस्र इष्टयोऽनुष्ठेयाः, तत्र प्रथमं विधाय स्तौति— "स पूर्वेद्युरित्यादिना ‖। "सद्यः-

---

* पा० सू० २, १. ५१।

† पा० सू० ५. ४. ८६।

‡ पा० सू० ५. ४. ८।

§ पा० सू० ५, ४. ९१।

‖ का० श्रौ० सू० ५. ६. २।

परुत्"-इत्यादिसूत्रेण * पूर्वदिनशब्दस्य पूर्वेद्युरिति निपातः । साकमेधेषु प्रधानभूता महाहविराख्या इष्टिर्यस्मिन् दिवसेऽनुष्ठीयते, ततः पूर्वदिवसे चतुर्हैश्यां प्रातरनीकवद्गुणविशिष्टायाग्नेयेऽष्टकपालेषु संस्कृतं पुरोडाशं निर्वपेदित्यर्थः । "अनीकं क्रत्वेति । प्रमुखं क्रत्वेत्यर्थः । "स तेज इति । स च तेजोरूपोऽग्निः हृत्वक्रतात् उपद्रवात् न 'अव्यथत' व्यथां न प्राप्तवान् । दृष्टान्तिकेन योज्यते— "तथो एवैष इति । उक्तहेतोरनीकवद्गुणवैशिष्ट्यं पुरोडाशदेवताया अग्नेर्युक्त मित्याह— "तस्मादिति ॥ २ ॥

मध्यन्दिनेऽनुष्ठेया मिष्टिं विधाय प्रशंसति— "अथेति । देवताविशेषण मुपपादयति— "मरुतो ह वा इति † । 'मरुतो' हि सन्तपनकारिणः 'सान्तपनाः' । तथाविधाः मरुतो मध्यन्दिनसमये 'हृत्वम्' असुरं 'सन्तेपुः' सन्तप्तं क्रतवन्तः । स च सन्तप्तः सन् श्वासप्रश्वासौ कुर्वन् 'परिदीर्णः' विदारितसर्वावयवः 'शिश्ये' शयनं क्रतवान् । "तथो एवेति , फलकथनम् ॥ ३ ॥

सायाह्ने कर्त्तव्या मिष्टिं विधत्ते— "अथेति । गृहमेधित्वगुणविशिष्टेभ्यो 'मरुद्भ्यः' "चरुं श्रपयन्ति"-इत्युपरितनेन सम्बन्धः । श्रपणप्रकार माह— "शाखयेति ‡ । दर्शयागवत् शाखाहरण-वत्सापाकरणे क्रत्वा , शाखापवित्रं निर्माय , तद्वति पात्रे गाः 'सन्दोह्य' दुग्ध्वा , 'तम्' इति निर्देशः । 'तं' दुग्धं पयः 'चरुं' 'श्रपयति' । "चरुरु ह्येवेति § । 'सः' वै मरुद्भो

* पा० सू० ५. ३. २२ ।

† का० श्रौ० सू० ५. ६. ३ ।

‡ का० श्रौ० सू० ५. ६. ६ ख ।

§ 'चरुरु ह्येवेति पायमत्वाशङ्कां निवर्त्तयति'— इति या० दे०

गृहमेधिभ्यः कृतः 'चरुः एव हि' ओदनः खलु । अत इदानीमपि तदर्थं चरुरेव अपयितव्य इत्यर्थः ॥

"यत्र क्व चेति । यत्र क्व चावस्थितान् तण्डुलान् आहृत्य, तस्मिन् पयसि प्रक्षिप्ते तत् तथैव हि देवा पुरुषादिभ्योऽपक्रम्य व्रीहिषु सङ्क्रान्तो 'मेधः' सारं 'दधिरे' अधारयन् । तत्र कारणमाह— "प्रातरिति । "हविष्मन्त इति । हेतौ शतृप्रत्ययः । प्रातः करिष्यमाणाद् हवनहननाद्धेतोरित्यर्थः । "तथा एवेति । इदानीन्तन-यजमानस्यापि तथैव प्रतिपादनम् । "क्षीरौदन इति । पयसि तण्डुलान् प्रक्षिप्य अपक्वे सति क्षीरेण संस्कृत ओदनो निष्पद्यते । "अन्नेन व्यञ्जनम्"–इति * तृतीयासमासः । द्रव्यद्वयं सम्भूय प्रशंसति— "मेधो वा इति । बलकरः सारांशो मेधशब्दार्थः । स्पष्टमन्यत् ॥

एष च गृहमेधीययागः सान्नाय्यविकृतिरिति सप्तभिः पक्षे पूर्ववत् स्वीकृत्य, ततो वैकचोदनादिति राद्धान्तितं दशमे । कात्यायनोऽप्याह स्म— "मरुद्भ्यो गृहमेधिभ्यः सायं चरुः पयसि, सान्नाय्यवत्, तूष्णीं वैकचोदनात्"–इति † ॥ ४ ॥

अतस्तृतीय मनुक्रामति— "तस्याहुतिरिति । 'तस्य' गृहमेधीययागस्य 'आहुत्' क्रिया, प्रयोगः, क्रमः, अभिधीयत इति शेषः । सान्तपनेष्टौ 'या वेदिः' बर्हिषा 'स्तीर्णा' अभूत्, गृहमेधीय-

---

* पा० सू० २. १. ३४ ।

† का० श्रौ० सू० ५. ६. ६, ७, ८ । एतत् पयस्तृणमेव संस्कर्त्तव्यम्; न सान्नाय्यवत् समन्त्रकं तद्धर्मकं वा । कुतः? 'एकचोदनात्', यतः कारणात् इयं मेका चोदना" इति चाष्टमसूत्रभाष्ये या० दे० ।

स्यापि 'मैव' उपकरोति। "तस्या मेवेत्यादि, निगदसिद्धम्; अतः सन्दिग्धपदविवरणमात्र मेव क्रियते। "शाकलांश्चेति। इध्मस्य स्थाने शाकलानेव सम्मृज्य परिधिभिः सह तान् सादयेदित्यर्थः *। "सन्दोह्य चरु मिति। विहितस्यानुवादः क्रमार्थः॥ ५॥

"अथ द्वे इति। "पिशिले वेति। पिशिलशब्दः † सराववाची। अत एवोक्तं सूत्रकृता— "अपयित्वाभिघार्यौदास्य शरावयोरुद्धरति ‡। "निर्णेनिजतीति। प्रक्षालयतीत्यर्थः। "णिजिर् शौचपोषणयोः"—इति § धातुः। "द्वेधोद्धरन्तीति। 'एनं' चरुं द्वेधा विभज्य तयोः शरावयोः पात्रयोर्वा ‖ निदध्यादित्यर्थः। "सर्पिरासेचने इति। सर्पिः सर्पणशील माज्यम्, आसिच्यते आनीयतेऽस्मिन्निति सर्पिरासेचनम्। अधिकरणे ल्युट्। पात्रस्थयोस्तयोरोदनयोर्मध्ये सर्पिः पूरणायावटौ कृत्वेत्यर्थः ¶। "सुवञ्चेति। एकत्व मविवक्षितम्। प्रयाजानुयाजे * * * अवभृतः प्रयोगाभावात् ता मेव संसृज्यादित्यर्थः। "ओदनावासादयतीति। पात्रद्वये स्थापितौ तावेवौदनौ गृहीत्वा वेद्या मासादयितुं गच्छेदिति **। ओदनमध्यस्थितेनैवाज्येन कृत्स्नाज्यकार्यनिष्पत्तेः ध्रुवाया अप्यप्रयोग इति जुहुम इत्यर्थः। "इमा मेवेति। सान्तपन्या मिठौ या वेदिः बर्हिषा स्तीर्णास्ति, ता मेव वेदिम् गृहमेधीयाङ्गत्वेनास्तरणमन्त्रेण तूष्णी मेवावमृशेत। यदाह कात्यायनः— "स्तरणयजुषा

---

* का० श्रौ० सू० ५. ६. ६ क। † 'पिशीलशब्दः'—इति च।
‡ का० श्रौ० सू० ५. ६. १०। § जु० उ० १० धा०।
‖ का० श्रौ० सू० ५. ६. ११। ¶ का० श्रौ० सू० ५. ६. १२।।

** का० श्रौ० स० ५. ६. १३।

वेदि मभिमृश्य तूष्णीं वा क्रतत्वात्''–इति *। न पुनर्बर्हिषास्तरणं कर्त्तव्य मित्यर्थः।

इध्मवत्त्वत्कार्यशकलानां सङ्ख्यानियमप्रसक्तावाह— ''यावत इति। यावद्भिः शकलैराहवनीयस्य प्राबल्यं भवति, तानयं कामयेत; 'तावतः' शकलांस्तत्राभ्यादध्यादित्यर्थः। तस्यां वेद्यां हविरासादनं विधत्ते— ''अथैतावि ति। ''उपविशति होतेति। सामिधेन्यनुवचनादेरभावात्। होत्रषदने तूष्णी मेवोपविशेत्। होतुरुपवेशनानन्तर माज्यभाग मित्येव कर्त्तव्यम्, न पुनराघारादिक मित्यभिप्रेत्याह — ''सुवञ्च सुचञ्चेत्यादिना ॥ ६ ॥

''अग्नयेऽनुब्रूहीति। ''दक्षिणस्यौदनस्येति। दक्षिणोत्तरभागेन वेद्या मासादितयोरोदनयोः यो दक्षिणस्थित ओदनः, तस्य 'सर्पिरासेचनात्' सर्पिषा पूर्णात् पात्रात् पूर्वाज्यभागार्थं चतुरवदानम्, उत्तरस्यौदनस्य सर्पिरासेचनात् द्वितीयस्याज्यभागस्यावदानम्। तथा प्रधानयागस्य गृहमेधीयस्य दक्षिणौदनस्य सर्पिरासेचनात् उपस्तरणाभिघारणे, उत्तरौदनस्य सर्पिरासेचनात् स्विष्टकृद्यागस्योपस्तरणाभिघारणे। अत एव सूत्रितं कात्यायनेन— ''आज्यभागाभ्यां चरति, आग्नेयं दक्षिणात्, सौम्य मुत्तरात्, गृहमेधीयस्विष्टकृती चाज्यभागवत् समवदानौ''–इति †। निगदसिद्ध मन्यत् ॥ ७—९ ॥

''अथाहाग्नय इति। 'न प्राशित्र मिति। प्राशित्रावदानं न कर्त्तव्यम्; पयसि संस्कृतत्वेन सान्नाय्यविकृतित्वात् ‡। न हि

* का० श्रौ० सू० ५. ६. १४।
† का० श्रौ० सू० ५. ६. १७–२१।
‡ का० श्रौ० सू० ५. ६. २६।

प्रकृतौ साम्नाय्यात् प्राशित्र मवदीयते। उक्त मुपयोगक्रमं निगमयति— "एतदिति। एतत् खलु 'एक मयनं' गृहमेधीयस्यानुष्ठानमार्गः ॥ १० ॥

अन्यदप्ययनं दर्शयति— "अथेद मिति। अस्मिन् पक्षेऽपि पूर्ववदेव * "सैव स्त्रीर्णा वेदिर्भवतीत्यादेरर्थः। एतावांस्तु विशेषः। अपि तस्य द्वयोर्हयोरुदरणम्, तेषां सर्पिरासेचनकरणम्, तदासेचनञ्चोत्पत्त्यैव न भवति, किन्तु यदा चरुं श्रपयति 'तत्' तदानी मेव 'प्रतिवेशं' समापनार्थं प्रतिनिधित्वेन निवेशनस्थानं प्रतिवेशः, तत्स्थानीय माज्यम्; दक्षिणाग्नावाज्यस्थाल्या मधिश्रयेदित्यर्थः। "उद्दास्यन्नीति। उद्दासनात् पूर्वं मभिघार्य तदुत्तरकाल मपि हविरुद्वासादित्यर्थः।

"सोख मेवेति। यस्यां स्थाल्यां चरुः श्रप्यते, तत्सहित मेव; न पुनः पात्रान्तरे धारणं कर्त्तव्य मित्यर्थः। "स्थाल्या माज्य मिति। स्थालीसहित मेव चरुं वेद्या मासाद्य, आज्यस्थालीतलगत माज्य मप्यासादयेदित्यर्थः। आज्यभागादिषु यदाज्यकार्यं तत् सर्वं स्थालीगताज्यादेव कर्त्तव्य मिति। अय मेव पूर्वस्मादस्य पक्षस्य विशेषः, शिष्टं समानं पूर्वेण ॥ ११ ॥ ॥ १२—१५ ॥

"अथेडा मेवावद्यतीति। इडोपह्वानानन्तरं यत् प्राशनम्, तत्र विशेष माह— "यावन्त इति। गृहे भवा 'गृह्याः' यजमानगृहे वर्त्तमानाः पुत्रपौत्रभ्रात्रादिरूपाः 'यावन्तः' सन्ति, 'तावन्तः' 'हविरुच्छिष्टाशाः' भवेयुः; अस्यैव विवरणं 'प्राश्नीयुः'—इति, हविःशेषं सर्वं प्राप्नुयुरित्यर्थः। 'अथो' अपि च 'ऋत्विजः अपि'

* ३१७ पृ० १ पं०, ३२५ पृ० १६ पं०।

'प्राश्नीयुः'। 'अपि' च 'अन्ये' 'ये ब्राह्मणाः' आगताः, तेऽपि 'प्राश्नीयुः'। 'यदि' 'ओदनः' 'बहुः' अधिकः 'स्यात्', तदा अन्येषां प्राशन मित्यर्थः। कुम्भीनिधानं विधत्ते— "अथैता मिति। निःशेषेण अशिता निरशिता, तद्विपरीता अनिरशिता ताम्, शेषसहिता मित्यर्थः। तादृशीं कुम्भीं पाचान्तरेण विधाय *, 'पूर्णदर्वाय'। हविषा पूर्णा दर्वी यस्मिन् कर्मणि, तत् पूर्णदर्वम् †, तस्मै पूर्णदर्वाय कर्मणे, तदर्थं स्थापयेत्॥

अस्यां रात्रौ वत्सानां मातृभिः सह वासं विधत्ते— "मातृभिरिति। 'समवार्जन्ति' "अर्ज गतिस्थानार्जनेषु" ‡, संसृष्टां कुर्युरित्यर्थः §। "तदु पशव इति। 'तत्' तेन वत्ससङ्गमेन पशवोऽपि ते 'आत्मन्' स्वात्मनि अस्यां रात्रौ 'दधते' धारयन्ति। अग्निहोत्रार्थं मपि तस्यां रात्रौ पयो न दोग्धव्य मिति द्रव्यान्तरं विधत्ते— "यवाग्वेता मिति। एवं यजमानगृहवर्त्तिनां सर्वेषां वत्सानां मातृसमवार्जनप्रसक्तौ प्रातः पित्र्ययज्ञार्थं दोह्याया निवान्याया गोर्वत्सस्य बन्धनं कर्त्तव्य मित्यभिप्रेत्याह— "निवान्या मिति। स्वयं नष्टवत्सा अन्यदीयेन वत्सेन या गौर्दुह्यते सा निवान्या, ताम् 'प्रातः' पित्र्ययज्ञार्थं यतो 'दुहन्ति', अतस्तस्य वत्सस्य बन्धनं कर्त्तव्य मित्यध्याहृत्य योजनीयम्॥ १६॥

पूर्णदर्वाख्यस्य कर्मणः कालं विधत्ते— "अथेति। 'प्रातः' अग्निहोत्रे 'हुते वा अहुते वा' अनयोः पक्षयोः 'यतरथा' येन

* 'अनिरशितां शेषरहितां कुम्भीं पाचान्तरेणापिधाय'—इति च।

† का० श्रौ० ५, ६, ३१ सू० या० दे० द्र०।

‡ भ्वा० प० २२४ धा०।

§ का० श्रौ० ५, ६, ३४ सू०।

प्रकारेण 'कामयेत' तथैवानुष्ठेय मित्यर्थः *। होमाय समन्त्रकं हविर्ग्रहणं विधत्ते — "सोऽस्या इति। षष्ठ्यर्थे चतुर्थी। सोषायाः ग्टहमेधीयकुम्भ्याः सकाशात् "पूर्णा दर्वी"–इतिमन्त्रेण † दर्व्या आघातेन 'उपहन्ति' ग्टह्णीयात्। मन्त्रस्यायं मर्थः। हे 'दर्वि!' प्रथमं हविषा 'पूर्णा' सती अस्याः सकाशात् 'परापत' परागच्छ, देवान् प्राप्नुहि। पुनः कर्मफलेन 'सुपूर्णा' सती अमुतः सकाशात् अस्मान् पुनरागच्छ। हे 'शतक्रतो!' इन्द्र! 'वस्ना' वसुना मूल्येन 'इव' आवाम् 'इषम्' इष्यमाणम् अन्नम् 'ऊर्जम्' बलकरं रसं च 'विक्रीणावहै'। त्वया दत्तं फलं स्वीकृत्य हविर्दास्यामि त्वयि; मया दत्तं हविर्ग्टहीत्वा मह्यं फलं दास्यसि त्वम्; एवं व्यतिहारेण कर्म क्रीणावहा इत्यर्थः। एतन्मन्त्रोच्चारणं प्रशंसति–"यथेति। 'एनम्' इन्द्रम् 'एतस्मै' पूर्णदर्वाख्याय 'भागाय' पुरोनुवाक्यास्थानीयया पुरोवक्तव्यया एतया आह्वय इति॥ १७॥

ऋषभध्वनौ होतव्य मिति विधित्सुराह— "अथेति ‡। 'आह्वयितवै' आह्वातुम्। "तुमर्थे से-सेनसे"–इति § तवै-प्रत्ययः। "स यदीत्यादि। 'सः' आहुतः ऋषभः, 'यदि' 'रुयात्' शब्दं कुर्यात्। "रुशब्दे"–इति ‖ धातुः। तद्ध्वनिः वषट्कारात्मक इति केचिदाहुः। तथा च तैत्तिरीयकम्— "ऋषभ माह्वयति, वषट्कार एवास्य स इति कथयन्ति"–इति। अतः तस्मिन् वषटकारे हविर्जुहुयादित्येकं मतम् ¶।

पक्षान्तर माह–"अथो इति। योऽयं ऋषभध्वनिः, नासौ वषट्-

---

* का० श्रौ० सू० ५. ६. ३६।
† वा० सं० ३. ४६।
‡ का० श्रौ० सू० ५. ६. ३७।
§ पा० सू० ३. ४. ६।
‖ अदा० प० २४ धा०।
¶ का० श्रौ० सू० ५. ६. ३८।

कारः, किन्तु इन्द्रस्य स्वभूतेन ऋषभाख्येन रूपेण तमेव 'इन्द्रम्' एतेन शब्देन 'ह्वयति'। किमर्थम्? 'हतस्य वधाय' हत मसुरं हन्तु मित्यर्थः। हतस्येति कर्मणि षष्ठी। "तुवर्थाच्च भाववचनात्" –इति वधशब्दाच्चतुर्थी *। एतदेव विवृणोति-- "एतद्वा इति 'यदि' 'सः' ऋषभः शब्दं कुर्यात्, तदा "आ म इन्द्रो यज्ञ मगन्†" आगमत्, मदीयो यज्ञः इन्द्रसहितोऽभवदिति 'विद्यात्'। यज्ञे ऋषभस्य शब्दाकरणेऽनुष्ठानप्रकार माह— "यद्यु नेति। 'यदि' तु मदीयो 'यज्ञः' 'सेन्द्रः' ऋषभो 'न' शब्दं कुर्यात्, तदाह 'दक्षिणतः' उपविशेत् 'ब्राह्मणः' ब्रह्मैव, 'जुहुधीति' अध्वर्युं प्रति 'ब्रूयात्' शंसेदु, 'ऐन्द्री' इन्द्राह्वानार्था वाक् ‡ ॥ १८ ॥

अथ समन्त्रकं होमं विधत्ते— "स जुहोतीति। दर्व्या गृहीतं हविः "देहि मे"–इति मन्त्रेण § तथैव दर्व्या आहवनीये जुहुयात् ‖। मन्त्रस्याय मर्थः। इन्द्रो ब्रवीति— हे यजमान! त्वं 'मे' मह्यं प्रथमं हविः 'देहि', अह मपि 'ते' तुभ्यम् इष्टं फलं 'ददामि'। तथा त्वं 'मे' मह्यं हविः 'निधेहि' नितरां धारय, अह मपि तुभ्यं फलं 'निदधे' निदधामि, नियच्छामि। नियमेन हि क्रियत इति निहारो मूल्यद्रव्यम्। 'निहारं' हविषो मूल्यभूतम्, फलस्य मूल्यभूतं हविः; 'च'–शब्दश्चेदर्थे, त्वं चेत् प्रथमं 'हरासि' हरेः, दद्या इत्यर्थः; हरतेर्लेट्याडागमः; अनन्तर मेव 'ते' तुभ्यम् अह मपि 'निहारं' हविषो मूल्यभूतं फलं

---

* पा० सू० २. ३. १५।

† इहैव ब्राह्मणे ३२१ पृ० १२ पं० द्रष्टव्यम्।

‡ का० श्रौ०सू० ५. ६. ३६।

§ वा० सं० ३. ५०।

‖ का० श्रौ० सू० ५. ६. ४०।

'निहराणि' नितरां प्रापयामि। 'स्वाहा' इदं हविः स्वाहुत मस्तु इति। एतत् सर्वं कात्यायनेन सूत्रितम्— "प्रातर्हुत्वा-हुत्वा वा स्थाल्या दर्व्यादत्ते पूर्णा दर्वीति, ऋषभ माह्वयितवै ब्रूयाद्, रुते जुहोति, अव्याहरति ब्रह्मा जुहुधीत्याह, देहि म इति जुहोति"—इति * ॥ १६ ॥

एतदनन्तरकर्त्तव्या मिष्टिं विधत्ते— "अथेति। क्रीडन्तीति क्रीडिनः, एतद्गुणविशिष्टेभ्यः 'मरुद्भ्यः' समस्तु कपालेषु संस्कृतं पुरोडाशं निर्वपेदित्यर्थः †। क्रीडिन इति मरुतां यथार्थं विशेषण मिति प्रतिपादयति— "मरुतो ह वा इत्यादिना। हतं हन्तु मुद्युक्त मिन्द्र मभितो यस्माद् 'परिचिक्रीडुः' क्रीडितवन्तः, तस्मादिन्द्रव-द्यजमानस्य समीपे क्रीडनशीलेभ्यो मरुद्भ्यो यागः कर्त्तव्यः।

साकमेधेषु प्रधानभूताया महाहविराख्याया इष्टेरारम्भं प्रति-जानीते— "अथात इति ‡। यतोऽनुष्ठानकालः प्राप्तः, अतः प्राप्ता-वसरत्वात् हविषः प्रयोगो क्रियत इत्यर्थः। वरुणप्रघासतन्त्रं तत्रातिदिशति— "तद्यथेति। तत्र 'महाहविषः' महान्ति बर्हिनि हवींषि §

* का० श्रौ० सू० ५. ५. ३६—४०। † का० श्रौ० सू० ५. ७. १।

‡ "महाहविरुदवसाय निर्मथ्य"—इति का० श्रौ० सू० ५. ७. ५। 'निर्मथ्यव्यपदेशात् पूर्व मग्नी समारोप्योदवसाय'—इत्यादि या० दे०। "पूर्वेद्युर्वा"—इति चात्र का० श्रौ० सू० ५. ७. ५। 'अथवा पूर्वेद्युरेव अनीक-वत्या: पूर्व मेव समारोपोदवसानमन्थनानि कृत्वा पर्वारम्भणीयम्; एतेनेति ग्रन्थस्य प्राकमेधाख्यसकलपर्ववाचित्वात्'—इत्यादि स्तद्वृत्तिश्चात्र समा-लोच्या। 'एतेन'—इत्यादि त्वत्रैवोपरिष्टादान्नातम् (५ प्र० ३ब्रा० १६ क०)।

§ "नित्येभ्योऽधिकानि, ऐन्द्राग्नः, माहेन्द्रश्चरुः, वैश्वकर्मण एक कपालः"—इति का० श्रौ० सू० ५. ७—१०। 'नित्येभ्यः आग्नेयादिभ्यः पञ्चभ्यः' इति या० दे०।

यत्र, महाहविर्वरुणप्रघासाख्यो यागः, तस्य ; वक्ष्यमाणस्य महाहविराख्यस्य यागस्य 'यथा', एव मिति सम्बन्धः । तस्य पूर्वोक्तस्य वरुणप्रघासस्य हविषो यथानुष्ठानम् , तथैव महाहविषो वक्ष्यमाणस्यापीति ॥ २० ॥ ४ [५. ३.] ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥

॥ इति द्वितीयकाण्डे चतुर्थः प्रपाठकः * ॥

---

* "कण्डिकासङ्ख्या ११३"—इति क, "कण्डिकाः ११५"—इति ग, "कण्डिकासङ्ख्या १०५"—इति घ। तत्र १ब्रा० २५ क०, २ ब्रा० २२ क०, ३ ब्रा० ४८ क०, ४ब्रा० २० क० : सङ्कलनया ११५ सिद्धम् ॥

अथ

पञ्चमप्रपाठके प्रथमं ब्राह्मणम्,

अथवा

पञ्चमेऽध्याये चतुर्थं ब्राह्मणम्।

॥ हरिः ॐ ॥

महाहविषा ह वै देवा व्वृचं जघ्नुः। तेनो ऽएव व्यजयन्त येय मेषां व्विजितिस्तां तथो ऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथो ऽएव विजयते तस्माद्वा ऽएष एतेन यजते ॥ १ ॥

तस्यावृत् *। उप किरन्त्युत्तरवेदिं गच्छन्ति पृषदाज्यं मन्थन्त्यग्निं नवप्रयाजं भवति नवानुयाजं त्रीणि समिष्टयजूꣳषि भवन्त्यथैतान्येव पञ्च हवीꣳषि भवन्ति ॥ २ ॥

स यदाग्नेयो ऽष्टाकपालः पुरोडाशो भवति।

* 'वृत्'—इति ग, घ।

अग्निना ह वा ऽएनं तेजसाघ्नन्त्स तेजो ऽग्निर्नाव्यथत तस्मादाग्नेयो भवति * ॥ ३ ॥

अथ यत्सौम्यश्चरुर्भवति। सोमेन ह वा ऽएनꣳ राज्ञाघ्नन्त्सोमराजान एव तस्मात्सौम्यश्चरुर्भवति ॥४॥

अथ यत्सावित्रः †। द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता सवितृप्रसूता ह्येवैन मघ्नंस्तस्मात्सावित्रो भवति ॥ ५ ॥

अथ यत्सारस्वतश्चरुर्भवति। व्वाग्वै सरस्वती व्वागु ह्येवानुममाद प्रहर जहीति तस्मात्सारस्वतश्चरुर्भवति ॥ ६ ॥

अथ यत् पौष्णश्चरुर्भवति। इयं वै पृथिवी पूषेयꣳ ह्येवैनं बधाय ‡ प्रतिप्रददावनया ह्येवैनं प्रतिप्रत्तं जघ्नुस्तस्मात् पौष्णश्चरुर्भवति ॥ ७ ॥

अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति। एतेन ह्येवैन मघ्नंस्तेजो वा ऽअग्नि रिन्द्रियं वीर्य मिन्द्र एताभ्या मेन मुभाभ्यां वीर्याभ्या मघ्नन् ब्रह्म

---

* 'भवति'—इति घ, ङ। † 'त्रः'—इति ग, घ।

‡ 'अधाय'—इति ङ।

वा ऽअग्निः क्षत्रमिन्द्रस्ते ऽउभे सꣳरभ्य ब्रह्म च क्षत्रं च सयुजौ कृत्वा ताभ्यां मेन मुभाभ्यां व्वीर्याभ्यां मन्नंस्तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥ ८ ॥

अथ माहेन्द्रश्चरुर्भवति । इन्द्रो वा ऽएष पुरा व्वृत्रस्य बधादथ * व्वृत्रꣳ हत्वा यथा महाराजो व्विजिग्यान एवं महेन्द्रो ऽभवत्तस्मान्माहेन्द्रश्चरुर्भवति महान्त मु चैवैन मेतत् खलु करोति व्वृत्रस्य बधाय † तस्माद्देव माहेन्द्रश्चरुर्भवति ॥ ९ ॥

अथ व्वैश्वकर्मण एककपालः पुरोडाशो भवति । व्विश्वं वा ऽएतत् कर्म कृतꣳ सर्व्वं जितं देवाना मासीत् साकमेधैरीजानानां व्विजिग्यानानां विश्वम्वे वैतस्यैतत् कर्म कृतꣳ सर्व्वं जितं भवति साकमेधैरीजानस्य व्विजिग्यानस्य तस्माद्वैश्वकर्मण एककपालः पुरोडाशो भवति ॥ १० ॥

एतेन वै देवाः । यज्ञेनेष्ट्वा येयं देवानां प्रजा-

---

* 'व्यधादथ'—इति ङ ।

† 'व्यधाय'—इति ङ ।

तिर्यो श्रीरेतु बभूवुरेताꣳ ह वै प्रजातिं प्रजायत ऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वा ऽएतेन यजेत ॥ ११ ॥ १ ॥

॥ इति पञ्चमप्रपाठके प्रथमं ब्राह्मणम् [५. ४.] ॥

अथ तस्य महाहविषः प्रयोगक्रमं विधित्सुः प्राग् "एतैर्वै देवा इष्ट्वा मघ्नन्"-इत्यादिना * यत् साकमेधानां फलं प्रतिपादितम्, तत्फलं महाहविष एव साक्षात् साधनत्व मिति प्रतिपादयति— "महाहविषा ह वा इत्यादिना। उक्तगुणविशिष्ट इन्द्रो यस्मिन् यागे तत्साधनं हविः। अन्यद् व्याख्यातम् ॥ १ ॥

तस्य प्रयोग मनुक्रामति— "तस्याहुरित्यादिना। आहुरिष्ट्वः क्रियावाची। उत्तरवेदीनिवपनपृषदाज्यग्रहणाग्निमन्थनादीनि वरुणप्रघासवदेवात्रापि कार्याणीत्याह— "उपकिरन्तीत्यादिना। अत एव सूत्रकृतोक्तम्— "उत्तरवेदिष्वग्निप्रणयनमन्थनपृषदाज्यञ्च वरुणप्रघासवत्"-इति †। "अथैतान्येवेति। यानि वैश्वदेवे उक्तानि आग्नेयादीनि पञ्च सञ्चराणि हवींषि ‡, 'एतानि एव' अत्रापि कर्त्तव्यानि भवन्तीत्यर्थः ॥ २ ॥

---

* एतत्पूर्वतनब्राह्मणे प्रथमकण्डिकायां द्रष्टव्यम्।

† का० श्रौ० सू० ५. ७. ११।

‡ पुरस्तात् २५२ पृ० ५ पङ्क्तितो द्रष्टव्यानि। का० श्रौ० सू० ५. १. ५—६ (आग्नेयः, सौम्यः, सावित्रः, सारस्वतः, पौष्णः)।

तत्राग्नेय मनूद्य स्तौति—"स यदिति। "एनं तेजसाघ्नन्निति। पुरा खलु देवाः 'अग्निना' अग्निलक्षणेन 'तेजसा' 'एनं' हतम् 'अघ्नन्' अहिंसन्। 'सः' तेजोरूपः 'अग्निः' 'न अव्यथत' व्यथितः पीडितो नाभवत्। तस्मादाग्नेययागस्य प्राथम्य मुक्तम् ॥ ३ ॥

सौम्यं हविरनूद्य स्तौति—"अथ यदिति। "सोमराजान एवेति। सोमो राजा येषां ते तथोक्ताः। "राजाहःसखिभ्यष्टच्"—इति * टच्-समासान्तो न भवति; तत्पुरुषाधिकारात्। सोमराजेनाधिष्ठिता देवाः, तेनैव 'राज्ञा सोमेन' 'एनं' हतम् 'अघ्नन्' अहिंसयन्नित्यर्थः ॥ ४ ॥

तृतीयं हविरनूद्य स्तौति—"अथ यत् सावित्र इति। "द्वादशकपालोऽष्टाकपालो वेति। कपालसङ्ख्या यागः कर्त्तव्यः † ॥ ५ ॥

चतुर्थं हविरनूद्य स्तौति—"अथ यत् सारस्वत इति। "वागु हैवेति। वागात्मिका हि सरस्वती ‡। सा खलु वाक् हतं हनिष्यन्त मिन्द्रम् 'अनु ममाद' हृष्टा बभूव §। अनुमदनप्रकार माह—हे इन्द्र! 'प्रहर' वज्रेण हतं ताडय, ततस्तं 'जहि' मारयेति। जहीति हन्तेर्लोटि मध्यमैकवचने "हन्तेर्जः"

* पा० सू० ५. ४. ९१।

† "सावित्रो द्वादशकपालोऽष्टाकपालो वा"—इति का० श्रौ० सू० ५. १. ७। "उपांशु काम्यदेवता"—इति (का० श्रौ० ४. ५. १ सू०) चेह द्रष्टव्यम्।

‡ नत्विय मृगिह सरस्वद्देवताका मन्त्रेत; "योषा वै सरस्वती"—इत्यादार्थवादश्रुतेः (५. १. ११.)।

§ हतवधव्यापारेऽनुमोदनं चकारेत्यर्थः।

इति * जादेशः, तस्य "असिद्धवदत्राभात्"–इति असिद्धत्वात् † हेर्लक् न भवति ॥ ६ ॥

पञ्चमं हविरनूद्य स्तौति— "अथ यत् पौष्णश्चरुर्भवतीति । "इयं वै पृथिवीत्यादि । इय मेव हि पृथिवी पोषयति भूतजातानीति पूषा । इय मेव खलु 'एनं हतं 'वधाय' हननाय 'प्रतिप्रदौ' प्रत्यर्पयामास, अतः 'अनयैव' पृथिव्या साधनेन 'एनं' हतं देवाः 'प्रतिजघ्नुः' प्रतिहतवन्त इत्यर्थः ॥ ७ ॥

षष्ठं हविर्विधत्ते— "अथैन्द्राग्न इति ‡ । "एतेन हेत्यादि । 'एतेन' इन्द्राग्निदेवताकेन यागेन । इन्द्राग्नी हतजननहेतुत्व मुपपादयति —"तेजो वा अग्निरित्यादिना । योऽयम् 'अग्निः' स दहनसमर्थः 'तेजः'; यदिदं पुरुषे प्रविष्टम् 'इन्द्रियम्' इन्द्रलिङ्गम्, इन्द्रेण दत्तं 'वीर्यम्', तदात्मक इन्द्रः; तथा च 'एताभ्याम् उभाभ्याम्' 'एनं' हतं देवाः 'अघ्नन्'। तस्मादैन्द्राग्नो यागो युक्त इत्यर्थः ॥

प्रकारान्तरेण स्तौति— "ब्रह्म वा अग्निरिति । 'अग्निः', 'ब्रह्म' ब्राह्मणजातिः; ब्राह्मणेन सह प्रजापतिमुखादुत्पन्नत्वात् । 'इन्द्रः', 'क्षत्रम्' क्षत्रियजातिः; प्रजापतेरुरसो बाहुभ्यां च सकाशात् क्षत्रियेण सहोत्पत्तेः । 'ते उभे' ब्रह्मक्षत्रे 'संरभ्य' अवलम्ब्य 'सयुजौ' परस्परं सहायभूते 'कृत्वा' 'ताभ्या मुभाभ्या' ब्रह्मक्षत्रसम्बन्धिभ्यां वीर्याभ्याम् 'एनं' हतम् 'अघ्नन्' ॥ ८ ॥

सप्तमं हविर्विधत्ते —"अथ माहेन्द्रश्चरुर्भवतीति § । मरुं-

* पा० सू० ६. ४. ३६ । † पा० सू० ६. ४. २२ ।
‡ का० श्रौ० सू० ५. ७. ८ । § का० श्रौ० सू० ५. ७. ९ ।

आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मखत मुदा पात्रसाक्षिक्रणायैः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे पञ्चमाध्यायः समाप्तः ॥ ५ ॥

---

* इत्यपाठभेदात्तु प्रथम मेव द्रष्टव्या ।

(अथ षष्ठाध्याये प्रथमं ब्राह्मणम् .)

महाहविषा ह वै देवा व्वृत्रं जघ्नुः। तेनो ऽएव व्यजयन्त येय मेषां व्विजितिस्ता मथ यानेवैषां तस्मिन्त्सङ्ग्रामे ऽघ्नंस्तान् पितृयज्ञेन समैरयन्त पितरो वै त ऽआसंस्तस्मात् पितृयज्ञो नाम ॥ १ ॥

तद्वसन्तो ग्रीष्मो व्वर्षाः। एते ते ये व्यजयन्त शरद्धेमन्तः शिशिरस्त ऽउ ते यान्पुनः समैरयन्त ॥ २ ॥

अथ यदेष एतेन यजते। तन्नाह न्वेवैनꣳ तथा कं चन घ्नन्तीति देवा अकुर्व्वन्निति न्वेवैष एतत् करोति य मु चैवैभ्यो देवा भाग मकल्पयंस्त मु चैवैभ्य एष एतद्भागं करोति यानु चैव देवाः समैरयन्त तानु चैवैतद्वति स्वानु चैवैतत्पितृञ्छ्रेयाꣳसं लोक मुपोन्नयति यदु चैवाध्यात्मात्मनो

ऽचरणेन हन्यते वा मोयते वा तदु चैवाखेतेन पुनराप्यायते तस्माद्वा ऽएष एतेन यजते ॥ ३ ॥

स पितृभ्यः सोमवद्भ्यः । षट्कपालं पुरोडाशं निर्व्वपति सोमाय वा पितृमते षड् वा ऽऋतव ऋतवः पितरस्तस्मात् षट्कपालो भवति ॥ ४ ॥

अथ पितृभ्यो बर्हिषद्भ्यः । अन्वाहार्यपचने धानाः कुर्व्वन्ति ततो ऽर्धाः पिष्यन्त्यर्धा दुग्धेव धाना अपिष्टा भवन्ति वा धानाः पितृभ्यो बर्हिषद्भ्यः ॥ ५ ॥

अथ पितृभ्यो ऽग्निष्वात्तेभ्यः । निवान्यायै दुग्धे सकृदुप मथित एकशलाकया मन्थो भवति सकृदु ह्यव पराञ्चः पितरस्तस्मात् सकृदुप मथितो भवत्येतानि हवीꣳषि भवन्ति ॥ ६ ॥

तद्धो सोमेनेजानाः । ते पितरः सोमवन्तो ऽथ ये दक्षेण पक्षेण लोकं जयन्ति ते पितरो बर्हिषदो ऽथ ये ततो नान्यतरञ्चन यानग्निरेव दहन्त्स्वदयति ते पितरो ऽग्निष्वात्ता एत ऽउ ते ये पितरः ॥ ७ ॥

स उ जघनेन गार्हपत्यम्। प्राचीनावीती भूत्वा दक्षिणासीन एतꣳ षट्कपालं पुरोडाशं श्रपयति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्न वहन्ति सकृत् फलीकरोति सकृदु ह्येव पराङ्ः पितरस्तस्मात् सकृत् फलीकरोति ॥ ८ ॥

स उ दक्षिणैव द्रुषदुपले ऽउपदधाति। दक्षिणार्धे गार्हपत्यस्य षट्कपालान्युपदधाति तद्यदेतां दक्षिणां दिशꣳ सचन्त ऽएषा हि दिक् पितॄणां तस्मादेतां दक्षिणां दिशꣳ सचन्ते ॥ ९ ॥

अथ दक्षिणेनान्वाहार्यपचनं। चतुः सक्तिं व्वेदिं करोत्यवान्तरदिशो ऽनु सक्तीः करोति चतस्रो वा ऽअवान्तरदिशो ऽवान्तरदिशो वै पितर स्तस्मादवान्तरदिशो ऽनु सक्तीः करोति ॥ १० ॥

तन्मध्ये ऽग्निꣳ समादधाति। पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानभ्युपावृत्तास्तस्मात्तेभ्यः प्राङ् तिष्ठन् जहोति सर्व्वतः पितरो ऽवान्तरदिशो वै पितरः सर्व्वत-ऽइव ह्येमा ऽवान्तरदिश स्तस्मान्मध्ये ऽग्निꣳ समादधाति ॥ ११ ॥

स उत एव प्राक् स्रुग्वयजुर्हरति। स्रुग्व-

यजुर्हुत्वाथेत्येवाग्ने परिगृह्णात्यथेत्यथेति पूर्व्वेण परिग्रहेण परिगृह्य लिखति हरति यद्वार्थं भवति स तथेवोत्तरेण परिग्रहेण परिगृह्णात्युत्तरेण परिग्रहेण परिगृह्य प्रति मृज्याह प्रोक्षणीरासादयेत्यासादयन्ति प्रोक्षणीरिध्मं बर्हिरुपसादयन्ति स्रुचः सम्मार्ष्ट्याज्येनोदेति स यज्ञोपवीती भूत्वाज्यानि गृह्णाति ॥ १२ ॥

तदाहुः । द्विरुपभृति गृह्णीयाद्द्वौ ह्यृचानुयाजौ भवत इति तद्दृष्टावेव कृत्व उपभृति गृह्णीयान्नेदाज्यस्य विधाया अयानीति तस्मादृष्टावेव कृत्व ऽउपभृति गृह्णीयादाज्यानि गृहीत्वा स पुनः प्राचीनावीती भूत्वा * ॥ १३ ॥

प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्ने प्रोक्षत्यथ व्येदि मथास्मै बर्हिः प्रयच्छन्ति तत् पुरस्ताद् गन्ध्यासादयति तत् प्रोक्ष्योपनिनीय विष्णुरूप्य यन्थि न्न प्रस्तरं गृह्णाति सकृदु ह्येव पराञ्चः पितरस्तस्मा न्न प्रस्तरं गृह्णाति ॥ १४ ॥

---

* भूत्वा—इति, ग ।

अथ सन्तहन मनुविस्रꣳस्य । अपसलवि त्रिः परिस्तृणन् पर्येति सो ऽपसलवि त्रिः परिस्तीर्य यावत् प्रस्तर भाजनं तावत् परिशिनष्ट्यथ पुनः प्रसलवि त्रिः पर्येति यत् पुनः प्रसलवि त्रिः पर्येति तद्यानेवामूꣳस्त्रयान् पितॄनन्ववागात्तेभ्य एवैतत् पुनरपोदेतो मꣳ स्वं लोक मभि तस्मात् पुनः प्रसलवि त्रिः पर्येति ॥ १५ ॥

स दक्षिणैव परिधीन् परिदधाति । दक्षिणा प्रस्तरꣳ स्तृणाति नान्तर्दधाति व्विधृति सकृदु ह्येव पराञ्चः पितरस्तस्मान्नान्तर्दधाति व्विधृती ॥ १६ ॥

स तत्र जुहू मासादयति । अथ पूर्वा मुपभृत मथ ध्रुवा मथ पुरोडाश मथ धाना अथ मन्थ मासाद्य हवीꣳषि मंमृशति ॥ १७ ॥

ते सर्व ऽएव यज्ञोपवीतिनो भूत्वा * । इत्याद्याज † मानश्च ब्रह्मा च पश्चात् परीतः पुरस्तादग्नीत् ‡ ॥ १८ ॥

---

* भुत्वा—इति ग । † इषाद्याज—इति च इष्टं डा० बेबरेण ।

‡ पुरस्तादग्नीत्—इति ग ।

तेनोपाꣳशु चरन्ति। तिर-इव वै पितर-स्तिर-इवै तद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥ १९ ॥

परिवृतं चरन्ति। तिर-इव वै पितर-स्तिर-इवैतद्यत् परिवृतं तस्मात् परिवृते चरन्ति * ॥ २० ॥

अथेध्म मध्यादधदाह। अग्नये समिध्यमाना-यानु ब्रूहीति स एका मेव होता सामिधेनीं त्रिरन्वाह सकृदु ह्येव पराञ्चः पितरस्तस्मादेकाꣳ होता सामिधेनीं त्रिरन्वाह ॥ २१ ॥

सो ऽन्वाह। उशन्त स्त्वा निधी मह्युशन्तः समिधी महि। उशन्नुशत आवह पितॄन्हविषे ऽअत्तव ऽइत्यथाग्नि मावह सोम मावह पितॄन् त्सोमवत आवह पितॄन् बर्हिषद आवह पितॄ नग्निष्वात्तानावह देवाꣳ ऽआज्यपाꣳ ऽआवहा-ग्निꣳ होत्रायावह स्वं महि मान मावहेत्यावाह्यो-पविशति ॥ २२ ॥

अथाश्राव्य न होतारं प्रवृणीते। पितृयज्ञो

* चरन्ति—इति च दृश्यं उ० वेबरेण।

वा ऽअयं नेद्धोतारं पितृषु दधानीति तस्मान्न होतारं प्रवृणीते सोद होतरित्येवाहोपविशति होता होतृषदन ऽउपविश्य प्रसौति प्रसूतो ऽध्वर्युः स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह समिधो यजेति सो ऽपबर्हिष श्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्नेत् प्रजाः पितृषु दधानीति तस्मादपबर्हिषश्चतुरः प्रयाजान्यजत्याज्यभागाभ्यां चरत्याज्यभागाभ्यां चरित्वा * ॥ २३ ॥

ते सर्व ऽएव प्राचीनावीतिनो भूत्वा †। एतैर्वै हविर्भिः ‡ प्रचरिष्यन्त इत्याजमानश्च ब्रह्मा च पुरस्तात् परीतः पश्चादग्नीत्तदुताश्रावयन्त्यो३ꣳ स्वधेत्यस्तु स्वधेति प्रत्याश्रावणꣳ स्वधा नम इति व्वषट्कारः § ॥ २४ ॥

तदुहोवाचामुरिः। आश्रावयेयुरेव प्रत्याश्रावयेयुर्व्वषट् कुर्युर्नेद्यज्ञस्य व्विधाया अयामेति ‖ ॥ २५ ॥

अथाह पितृभ्यः सोमवद्भ्यो ऽनुब्रूहीति। सो-

---

* चरित्वा—इति ग। † भूत्वा—इति ग।

‡ एतैर्हविर्भिः—इति क, ङ। § वषट्कारः—इति ग।

‖ अयामेति—इति ग।

माय वा पितृमते स द्वे पुरो ऽनुवाक्ये ऽन्वाहैकया वै देवान् प्रच्यावयन्ति द्वाभ्यां पितॄन् त्सकृदु ह्येव पराञ्चः पितरस्तस्माद्वे पुरो ऽनुवाक्ये ऽन्वाह ॥ २६ ॥

स उपस्तृणीत ऽआज्यम्। अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत् सकृदवदधात्यथोपरिष्टाद्विराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितॄन् त्सोमवतो यजेति व्वषट्कृते जुहोति ॥ २७ ॥

अथाह पितृभ्यो बर्हिषद्भ्यो ऽनुब्रूहीति। स उपस्तृणीत ऽआज्य मथासां धानाना मवद्यति स तेनैव सह मन्थस्य तेन सह पुरोडाशस्य * तत् सकृदवदधात्यथोपरिष्टाद्विराज्जस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितॄन् बर्हिषदो यजेति व्वषट्कृते जुहोति ॥ २८ ॥

* पुरोडाशस्य इति च पठनं डा० वेबरेण।

अथाह पितृभ्यो ऽग्निष्वात्तेभ्यो ऽनुब्रूहीति। स उपस्तृणीत ऽआज्यमथास्य मन्थस्यावद्यति स तेनैव सह पुरोडाशस्य तेन सह धानाना तत् सकृदवदधात्यथोपरिष्टाद्विराज्यस्याभिघारयति प्रत्यनक्तावदानानि नातिक्रामतीत एवोपोत्थायाथाऽऽह पितृनग्नि ष्वात्तान्यजेति व्वषट्कृते जुहोति ॥ २९ ॥

अथाहाग्नये कव्यवाहनायानुब्रूहीति। तत् स्विष्टकृते हव्यवाहनो वै देवानां कव्यवाहनः पितृणां तस्मादाहाग्नये कव्यवाहनायानुब्रूहीति ॥ ३० ॥

स उपस्तृणीत ऽआज्यम्। अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत् सकृदवदधात्यथोपरिष्टाद्विराज्यस्याभिघारयति न प्रत्यनक्तावदानानि नातिक्रामतीत एवोपोत्थायाथाऽऽह्याग्निं कव्यवाहनं यजेति व्वषट्कृते जुहोति ॥ ३१ ॥

स यन्नातिक्रामति। इत एवोपोत्थायं जुहोति सकृदु ह्येव पराञ्चः पितरो ऽथ यत् सकृत् सकृत् सर्व्वेषाꣳ हविषाꣳ समवद्यति सकृदु ह्येव

पराञ्चः पितरो ऽथ यद्व्यतिषङ्ग मवदानान्यवद्यत्यृतवो वै पितर ऋतूनेवैतद्व्यतिषजत्यृतून् सन्दधाति तस्माद्व्यतिषङ्ग मवदानान्यवद्यति ॥ ३२ ॥

तद्धैके। एत मेव होचे मन्य मादधति तऽ होतो पहूयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावैव जिघ्रति तमग्नीधे प्रयच्छति तमग्नीद्वैव * जिघ्रत्येतन्नवैतत् कुर्व्वन्ति यथा त्वेवैतरस्य यज्ञस्येडाप्राशित्रऽ समवद्यन्त्येव मेवैतस्यापि समवद्यित्वा मुपहूयावैव जिघ्रन्ति न प्राश्नन्ति प्राशितव्यं त्वेव व्वयं मन्यामह ऽहति ह स्माहासुरिर्यस्य कस्य चाग्नौ जुह्वतीति † ॥ ३३ ॥

अथ यतरो दाक्षन् भवति। यद्यध्वर्युर्वा यजमानो वा स उदपात्र मादायाप्रसलवि चिः परिषिञ्चन्पर्येति स यजमानस्य पितर मवनेजयत्यसाववनेनिक्ष्वेत्यसाववनेनिक्ष्वेति पितामह-मसाववनेनिक्ष्वेति प्रपितामह ‡ तद्यथाशिष्य ऽभिषिञ्चेदेवं तत् § ॥ ३४ ॥

---

* तमग्नीद्वैव—इति च दृष्टं डा० वेबरेण। † जुह्वतीति—इति ग।

‡ प्रपितामह—इति क ङ। § तत्—इति ग।

अथास्य पुरोडाशस्यावदाय । सव्ये पाणौ कुरुते धानाना मवदाय सव्ये पाणौ कुरुते मन्थस्यावदाय सव्ये पाणौ कुरुते ॥ ३५ ॥

स ये मामवान्तरदिश मनु स्वक्तिः * । तस्यां यजमानस्य पित्रे ददात्यसावेतत्त ऽइत्यथ ये मामवान्तरदिश मनु स्वक्ति स्तस्यां यजमानस्य पितामहाय ददात्यसावेतत्त ऽइत्यथ ये मामवान्तरदिश मनु स्वक्ति स्तस्यां यजमानस्य प्रपितामहाय ददात्यसावेतत्त ऽइत्यथ ये मामवान्तरदिश मनु स्वक्ति स्तस्यां निमृष्टे ऽत्र पितरो मादयध्वं यथाभाग मावृषायध्व मिति यथा भाग मश्नीतेत्येवैतदाह तद्यदेवं पितृभ्यो ददाति तेना स्वान्पितॄनेतस्माद्यज्ञान्नान्तरेति ॥ ३६ ॥

ते सर्व ऽएव यज्ञोपवीतिनो भूत्वा † । उदञ्च उपनिष्क्रम्याहवनीय मुपतिष्ठन्ते देवान्वा ऽएष उपावर्त्तते य आहिताग्निर्भवति यो दर्शपूर्ण-

* 'स्वक्तिः'—इति ग, घ।

† 'भूत्वा'—इति ग, घ।

मासाभ्यां यजते ऽथैतत् पितृयज्ञेनेवाचारिषुस्तद् देवेभ्यो निह्नुवते * ॥ ३७ ॥

ऐन्द्रीभ्या माहवनीय मुपतिष्ठन्ते । इन्द्रो ह्याहवनीयो ऽस्मन्नमी मदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ मुसन्दृशं त्वा व्वयं मघवन्वन्तिषो महि । प्र नूनं पूर्णबन्धुर स्तुतो यासि व्वशाँ२ ॥ ऽअनु † योजान्विन्द्र ते हरीऽ इति ‡ ॥ ३८ ॥

अथ प्रतिपरेत्य गार्हपत्य मुपतिष्ठन्ते । मनो न्वाह्वा महे नाराशꣳसेन स्तोमेन । पितॄणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे § ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ

---

* निह्नुते—इति सा०-सम्मत इति डा० वेबरः ।

† 'वशाꣳऽअनु'—इति च दृष्टो डा०-वेबरेण ।

‡ 'हरीऽइति'—इति ग ।

§ 'दृशे'—इति ग, घ ।

सचे मह्वीति पितृयज्ञेनैव वा ऽएतदचारिषु-रुतु खलु पुनर्जीवानुपिपद्यन्ते तस्मादाह जीवं व्रातए सचेमह्वीति * ॥ ३९ ॥

अथ यतरो दद्दाति। स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपत्यमी मदन्त पितरो यथाभाग मावृषायिषतेति यथाभाग माशिषुरित्येवैतदाह ॥ ४० ॥

अथोदपात्र मादाय। पुनः प्रसलवि त्रिः परिषिञ्चन् पर्येति स यजमानस्य पितर मवनेजयत्यसाववनेनिक्ष्वेत्यसाववनेक्ष्वेति पितामह मसाववनेनिक्ष्वेति प्रपितामहं तद्यथा जघुषे ऽभिषिञ्चेदेवं तत्तद्यत् पुनः प्रसलवि त्रिः परिषिञ्चन् पर्येति प्रसलवि न इदं कर्मानु सन्तिष्ठाता ऽइति तस्मात् पुनः प्रसलवि त्रिः परिषिञ्चन् पर्येति ॥ ४१ ॥

अथ नीवि मुदृह्य नमस्करोति। पितृदेवत्या वै नीविस्तस्मान्नीवि मुदृह्य नमस्करोति यज्ञो

---

* 'सचेमह्वीति'—इति ग, घ।

वै नमो यज्ञियानेवैनानेतत् करोति षट् कृत्वो नमस्करोति षड् वा ऽऋतव ऋतवः पितरस्तृहतु-ष्वेवैतद्यज्ञं प्रतिष्ठापयति तस्मात् षट् कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणाऽ ह पितर र्दृशत ऽएषो ऽएतस्याशीः कर्म्मणः ॥ ४२ ॥

ते सर्व्व ऽएव यज्ञोपवीतिनो भूत्वा । अनुयाजाभ्यां प्रचरिष्यन्त इत्याद्यजमानस्य ब्रह्मा च पश्चात् परीतः पुरस्तादग्नीदुपविशति होता होतृषदने ॥ ४३ ॥

अथाह ब्रह्मन् प्रस्थास्यामि । समिध माधायाग्नि मग्नीत् सम्मृड्ढीति स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह देवान् यजेति सो ऽप बर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिर्नेत् प्रजाः पितृषु दधानीति तस्मादप बर्हिषौ द्वावनुयाजौ यजति ॥ ४४ ॥

अथ सादयित्वा स्रुचौ व्यूहति । स्रुचौ व्यूह्य परिधीन्त्समज्य परिधि मभिपद्याश्राव्याहैषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकꣳ होता प्रतिपद्यते नाध्वर्युः

प्रस्तरꣳ समुल्लुम्पतीत्येवोपास्ते यदा होता सूक्तवाक माह * ॥ ४५ ॥

अथाग्नीदाहानु प्रहरति । स न किञ्चनानुप्रहरति तूष्णी मेवात्मान मुपस्पृशति ॥ ४६ ॥

अथाह संवदस्वेति † । अगानग्नीदगञ्छावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्ति मानुषेभ्यः शं योर्बृहीत्युपस्पृशत्येव परिधीन्नानुप्रहरत्यथैतद्बर्हिरनुसमस्यति परिधींश्च ॥ ४७ ॥

तद्वैके । हविरुच्छिष्ट मनु समस्यन्ति तदु तथा न कुर्याद्धुतोच्छिष्टं वा एतन्नेद्धुतोच्छिष्ट मग्नौ जुहवामेति तस्मादपो वैवाभ्यवहरेयुः प्राश्नीयुर्वा ॥ ४८ ॥ २ ॥

॥ इति पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् [६. १.] ॥

---

* 'मूक्तवाक माह'—इति ग, घ ।

† 'संवदस्वेति'—इति ग, घ ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त मह वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ पिण्डपितृयज्ञं * विधित्सुः पितृणा मुत्पत्ति माह— "महाहविषा ह वा इत्यादि †। "येय मेषां विजितिरिति। व्यजयन्तेति सम्बन्धः। "अथ यानित्यादि। 'यस्मिन्' हतासुरयुद्धे येषां देवानां मध्ये 'यान् एव' असुराः 'अघ्नन्' अमारयन्, 'तान्' हतान् देवान् पितृयज्ञाख्येन वक्ष्यमाणेन कर्मणा 'समैरयन्त' समागच्छन्त। ते मृताः पितृदेवता एव अभवन्। पितॄनुद्दिश्य क्रियमाणत्वात् 'पितृयज्ञः' इति अन्वर्थेयं सञ्ज्ञेत्याह— "तस्मादिति ॥ १ ॥

"तेऽसन्त इत्यादि। 'तत्' तत्र 'ये' देवाः 'व्यजयन्त' विजय मेव प्राप्ताः, न पुनरसुरेण हताः, 'ते' वसन्ताद्यृतुत्रयात्मकाः; 'यान्' हतवन्तः, 'ते' पितृयज्ञेन 'समैरयन्त' समगच्छन्, 'ते' एव शरदाद्यात्मय ऋतवः। एतेषा मनुरूपत्वप्रतिपादनम् उपरिष्टात् ‡ "ऋतवः पितरः"—इति करिष्यमाणसुत्योपोद्घातत्वेन ॥ २ ॥

---

* 'अथ पितृयज्ञं'—इति च।

† आग्नेयोऽष्टाकपालः पुरोडाश्नः, सौम्यश्चरुः, सावित्रो द्वादशकपालो ऽष्टाकपालो वा उपांशुदेवतः, सरस्वत्यै चरुः, पूष्णे चरुः, ऐन्द्राग्नो द्वादशकपालः, माहेन्द्रश्चरुः, वैश्वकर्मण एककपाल उपांशुदेवतः। एषा मष्टानां हविषां नाम महाहविरिति।

‡ इहैव ब्राह्मणे चतुर्थकण्डिकायां (३४४ पृ० ६ पं०) द्रष्टव्यम्।

इदानीमननुष्ठानस्यापि उक्तफलसाधनत्व माह— "अथ यदिति। 'अथ' इदानी मपि 'एषः' यजमानः 'एतेन' पिण्डयज्ञेन 'यजते' इति 'यत्', 'तत्' तस्मात्। 'अह', 'नु', 'एव' इति त्रयो निपाताः। 'एतस्य' यजमानस्य सम्बन्धिनं 'कञ्चन' 'चन'-शब्दोऽप्यर्थे, कमपि पुरुषं 'न' एव 'घ्नन्ति' असुरादयो न मारयन्ति। तत्र कृतानुकरत्वे हेतु माह— "इति देवा इति। इत्थं 'देवाः' पुरा 'अकुर्वन्' पिण्डयज्ञाख्यं कर्म। देवैर्येन प्रकारेणानुष्ठितम्, तेनैव प्रकारेणानुतिष्ठति, न स्वातन्त्र्येण किञ्चित् करोतीत्यर्थः। तदेव द्रव्यदेवतासङ्गं प्रतिपादयति— "य मु चैवैभ्य इत्यादिना। 'एभ्यः' पितृभ्यो 'यम्' एव पुरोडाशधानादिरूपम् 'भागं' 'देवाः' 'अकल्पयन्', 'एतत्' एतर्हि 'एषः' यजमानोऽपि 'तम्' एव भागम् 'एभ्यः' 'करोति'। तथा देवाः पुरा असुरहतान् पितृभावं प्राप्तान् 'यान्' एव 'समीरयन्त' समगच्छन्, 'तान्' एव पितृत्वं प्राप्तान् देवान् 'एतद्' यजमानः 'अवति' हविषा तर्पयति। अवतिरत्र तृप्त्यर्थः *। तेन च पितृदेवतातर्पणेन 'स्वान्' स्वकीयानेव 'पितॄन्' पितृ-पितामहाद्यान् 'श्रेयांसम्' प्रशस्यतमं 'लोकम्' 'उपोन्नयति' उपप्रापयति। अपि च 'अत्र' अस्मिन् कर्मणि 'अस्य' यजमानस्य 'आत्मनः' स्वस्य 'अनुचरणेन' अनुगमनेन च यदेव प्राणिजातं 'हन्यते', 'मीयते' ताड्यते। यद्वा 'मीयते' "मीङ् † हिंसायाम्"

---

* "अव-रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु"—इति भ्वा० प० ६०० धा०।

† 'मिद्'—इति (भ्वा० प० ८६८ धा०) च।

-इति धातुः *। 'एतेन' पिण्डयज्ञेन अस्य तदेव पुनराप्यायते, पुनः प्रवृद्धं भवतीति। "तस्मादिति। पिण्डयज्ञस्य विधिः। यस्मात् उदीरितफलहेतुः पिण्डयज्ञः, तस्मादनेन यष्टव्य मित्यर्थः। 'यजते'-इति पञ्चमलकारेन वर्त्तमानोपदेशः † ॥ ३ ॥

तत्र प्रथमं हविर्विधत्ते— "स पितृभ्य इति। सोम एषा मस्तीति सोमवन्तः कृतसोमयागः। एतद्विशेषयागविशिष्टेभ्यः 'पितृभ्यः' षट्सु कपालेषु संस्कृतं 'पुरोडाशं' 'सः' यजमानः निर्वपेत्। देवताविकल्प माह— "सोमाय वेति। × × × सोमाय वा निर्वापः कर्त्तव्यः। तदुक्तं कात्यायनेनापि— "पितृभ्यः सोमवद्भ्यः षड्कपालः सोमाय वा पितृमते"-इति ‡। इदं देवताविकल्प माश्वलायनोऽप्याह स्म— "पितरः सोमवन्तः सोमो वा पितृमान्"-इति §। कपालसङ्ख्यां प्रश्नयंसति— "षड् वा इति। "ऋतवः पितर इति। शरदेमन्तशिशिराः, त एते यत् पुनः समैरयन्तेत्याम्नातवान्, तत् पितृणा मृतुतादात्म्यम्। यद्वा "यस्मिन् वा ऋतौ पुरुषः प्रमीयते, सोऽस्यामुष्मिंल्लोके भवति"-इति श्रुत्यन्तरे प्रसिद्धेः ‖ वसन्ताद्यृतुत्वात्मकाः पितरः ॥ ४ ॥

द्वितीयं हविर्विधत्ते— "अथ पितृभ्यो बर्हिषद्भ्य इति। बर्हिषि सीदन्तीति बर्हिषदोऽकृतसोमयागाः, केवलहविर्यज्ञ-

* दि० आ० ११३७ धा०।
† का० श्रौ० सू० ५, ८, १।
‡ का० श्रौ० सू० ५, ८, ६, १०।
§ आश्व० श्रौ० सू० २.१६, २१।
‖ तै० ब्रा० १, ६, ८, ३।

याजिनः पितरः। पृषोदरादित्वात् वर्णलोपः *। एतद्गुण-विशिष्टेभ्यः पितृभ्यो धानारूपं हविः कर्त्तव्य मिति शेषः †। तत्करणप्रकार माह — "अन्वाहार्यपचन इति। भृष्टयवतण्डुला धानाः; तदर्थं दक्षिणाग्नौ भर्जनकपाल मधिश्रित्य, तत्र तत्तण्डुलानोप्य भर्जनं कुर्यादित्यर्थः। ततो भर्जनानन्तरं ता धाना द्वेधा विभज्य, अर्धाः प्रकृतिवत् समन्त्रकं 'पिषन्ति' समन्त्रकं चूर्णयन्ति। "पिष्लृ सञ्चूर्णे"–इति धातुः ‡। 'अर्धा इत्येव'। एव मेवापरा अर्धा 'धानाः' 'अपिष्टाः' पेषणरहिता अधिक्रता भवन्ति। ता अपिष्टा धानाः 'पितृभ्यो बर्हि-षद्भ्यः' देयाः § ॥ ५ ॥

अथ तृतीयं यागं विधत्ते — "अथ पितृभ्योऽग्निष्वात्तेभ्य इति ‖। आधानसंस्काराभावेन तेताग्न्यभावात् केवल मौपा-सनाग्निनैवाद्यमाना (?) गौः 'निवान्या'। षष्ठ्यर्थे चतुर्थी। तस्याः पयसि प्रक्षिप्तो मथितो धानाचूर्णः ¶, 'एकशलाकया' एका चासौ शलाका च, "पूर्व कालैकसर्व०"–इत्यादिना ** समासः। एकयैव शलाकया 'सकृत्' एकवारम् 'उपमथितः' आलोडितो हविः 'मन्थः भवति' इत्यर्थः। उपमथनस्य सकृत्त्वं प्रशंसति — "सकृदु ह्येवेति। एकवार मेव हि अध्वर्युस्तस्माद् गार्हपत्यापरदेशात् उत्थाय अन्वाहार्यपचनस्यादूरेणोत्तरप्रदेशे × × × रागता अपुन-

* "एषोदरादीनि यथोपदिष्टम्"—इति पा० सू० ६. ३. १०९।
† का० श्रौ० सू० ५. ८. ११। ‡ रु० प० १५ धा०।
§ का० श्रौ० सू० ५. ८, १८, १९ द्रष्टव्ये। ‖ का० श्रौ० सू० ५. ८. १२।
¶ एष एव मन्थ उच्यते। पा० सू०·२. १. ३९।

राक्षसाः सन्तः पितरो भवन्ति (?), अतस्तेषां सकृत्त्व मसाधारण-धर्म इति हविःसंस्कारस्यापि सकृत्त्व मुचित मिति भावः *। विहितानि त्रीणि हवींषि सम्भूय निगमयति— "एतानिति ॥६॥

एतेषां हविषां या देवताः "पितृभ्यः सोमवद्भ्यः"-इत्यादिना निर्दिष्टाः, तासां स्वरूपं परस्परासङ्कीर्ण मिति ब्रूते— "तत्र इति। 'तत्' तत्र 'सोमेनेजानाः' सोमेनेष्टवन्तः पञ्चत्वं प्राप्ताः 'ते पितरः' 'सोमवन्तः' इत्युच्यन्ते। 'अथ'-शब्दः त्वर्थः। 'ये' तु 'पक्वेन' पाकसंस्कृतेन, चरुपुरोडाशादिहविषा देवेभ्यो दत्तेन केवलं हविर्यज्ञयाजिन एव † सन्तो 'लोकं जयन्ति', 'ते पितरः' 'बर्हिषदः' इत्याख्यायन्ते। 'ये' पुनः 'ततः' तयोर्मध्ये 'अन्यतरत्' अपि 'न' प्राप्नुवन्ति, केवल मौपासनाग्निरेव 'दहन्' शरीरान्ते 'खदयति' आस्वादयति, भक्षयतीत्यर्थः। तैत्तिरीयकेऽप्यामातम्— "ये वै यज्वानः, ते पितरो बर्हिषदः०—०; ये वा अयज्वानो गृहमेधिनः ते पितरोऽग्निष्वात्ताः"-इति ‡ ॥ ७ ॥

पितृयज्ञप्रयुक्तं विशेषं वक्तुं चोदकप्राप्त मङ्गकलाप मनुक्रामति— "स जघनेनेत्यादिना। दक्षिणामुखत्वं प्राचीनावीतित्वं च हविर्यहणे विशेष इत्यर्थः। "स तत एवेत्यादि। 'सः' अध्वर्युः तस्माद् गार्हपत्यापरदेशादुत्थाय अन्वाहार्यपचनस्य अदूरेणोत्तरदेशे दक्षिणामुखस्तिष्ठन् अवहन्यात् §। चोदकप्राप्तं फली-

---

* "यदसकृद्देवानां तत्, सकृत् पित्र्या मिति पित्र्यात्वादेव सकृद्-ग्रहणे प्राप्ते आह— 'चतुर्वा ग्रहणम् (का० श्रौ० सू० ५, ८, १३)'— इति वा निर्द्धारणे"—इति या० दे०।

† 'हविर्यज्ञयागिन एव'—इति च।

‡ तै० ब्रा० १, ६, ८, ६। § का० श्रौ० सू० ५, ८ १४ क।

करणस्य विष्करण मपास्य सक्तत्वं विधत्ते— "सक्तत् फली-करोतीति ॥ ८ ॥

"स दक्षिणेवेति। 'सः' अध्वर्युः दक्षिणामुख एव सन् अवहननदेशे पेषणार्थं 'दृषदुपले' उपदध्यात्। षट्कपालस्य पुरोडाशस्य गार्हपत्यदक्षिणायां अपणं विधाय स्तौति— "दक्षि-णार्हं गार्हपत्यस्येत्यादिना *। "तद् यदेता मिति। 'तत्' तत्र पित्र्यसम्बन्धित्वेनानुष्ठेयपदार्थेषु 'यद्' यस्मात् कारणात् 'एतां दक्षिणां दिशं सचन्ते' ऋत्विग्यजमानाः समवयन्ति। "षच समवाये"—इति † धातुः। "एषा ह्येति। 'हि'—शब्दो दक्षिणस्या दिश इह श्रुत्यन्तरप्रसिद्धं पित्र्यसम्बन्धं द्योतयति। तथा च तैत्तिरीयकम्— "देवमनुष्या दिशो व्यभजन्त, प्राचीं देवा दक्षिणां पितरः"—इति ‡ ॥ ९ ॥

पित्र्याया वेदेर्निर्माणं विधत्ते— "अथ दक्षिणेनेति §। "चतुः-स्रक्ति मिति। चतस्रः स्रक्तयः कोणा यस्याः सा तथोक्ता। तासां चतुःस्रक्तीना माग्नेयाद्यवान्तरदिक्सम्बन्धं विधत्ते— "अवा-न्तरदिशोऽन्विति। लक्षणे अनोः कर्मप्रवचनीयत्वम् ‖, "कर्म-प्रवचनीययुक्ते"—इति द्वितीया ¶। अवान्तरदिक्ख्याः स्रक्तीः कुर्या-दित्यर्थः। स्रक्तीनां चतुष्ट मुपपादयति— "चतस्रो वा इति। पितृणा मवान्तरदिग्रूपता श्रुत्यन्तरप्रसिद्धाऽवगन्तव्या ॥ १० ॥

---

* का० श्रौ० सू० ५. ८. १४ ख।

† भा० उ० ६६७ धा०। ‡ तै० सं० ६. १. १. १।

§ "दक्षिणेन दक्षिणाग्निं परिहृत्य मुदग्द्वारं तन्मध्ये वेदिं करो-त्यवान्तरदिक् स्रक्ति माप्नान्ते"—इति का० श्रौ० सू० ५. ८. २१।

‖ पा० सू० "अनुर्लक्षणे"—इति १. ४. ८४। ¶ पा० सू० २. ३. ८।

अथाग्निस्थापनं विधत्ते— "तस्माध्व इति। दक्षिणाग्नि माहत्य तस्या वेदेर्मध्ये स्थापयेदित्यर्थः। तथा च कात्यायनः— "अवान्तरदिक् स्वक्ति मासाद्यान्ते दक्षिणाग्निं मध्येऽस्याः करोति"— इति *। एतन्मध्ये स्थापन मुपपादयति— "पुरस्ताद्वा इत्यादिना। 'पुरस्तात्' पूर्वस्यां दिशि आहवनीयसमीपे 'प्रत्यञ्चः' प्रत्यङ्मुखाः सन्तो देवा 'मनुष्यान्' ऋत्विग्यजमानान् 'अभि'-लक्ष्य 'उपावृत्ताः' उपगता भवन्ति। 'तस्मात्' कारणात् 'तेभ्यः' देवेभ्यः 'प्राङ्'-मुखः 'तिष्ठन्' अध्वर्युः जुहोति। व्याप्यावस्थितानां तेषां सर्वतोमुखत्व मुपपादयति— "सर्वतः पितर इति। अवान्तरदिशां व्यापित्वेन तद्रूपाणां पितॄणा मपि व्यापित्वात् प्राच्याद्यन्यतमदिङ्मुखत्वं दुर्ज्ञान मिति सर्वतः परीत्य हवनार्थं मध्येऽग्नेः स्थापन मिति निगमनवाक्यस्यार्थः॥ ११॥

"स तत एवेत्यादि। अस्मिन् हि पित्र्ययज्ञे दक्षिणा दिक् प्राची जाता, ततः प्राक्प्रतीच्यौ तु दक्षिणोत्तरदिशौ सम्पन्ने; तत्र सव्यभागेऽवस्थिता प्राची दिक् उत्तरा, दक्षिणभागावस्थिता प्रतीची दिक् दक्षिणा; तथाच प्रकृतौ उदीच्यां दिशि क्रियमाणं स्रुग्व्ययजुर्हरण मत्र प्राच्यां सम्पद्यते। अय मर्थः,— तस्या वेदेः सकाशादेव सोऽध्वर्युः प्राक् प्राच्यां दिशि स्रुग्व्ययजुर्हरेत्†। तस्या वेदेः परिग्रह मभिनयेन दर्शयति— "अथेत्येवाग्रे इति। 'अग्रे' प्रथमम् 'इत्येव' एवमेव पश्चाद् भागे दक्षिणापवर्गं रेखया परिगृह्णीयात्। 'अथ' अनन्तरम् 'इति' एवम् उत्तरतः प्रागपवर्गं परिगृह्णीयात्। एवं पुरस्ताद् दक्षिणापवर्गं परि-

* का० श्रौ० सू० ५. ८. २१ख०, २२।

† १ भा० १५७ पृ० "१"—टीप्पनी द्रष्टव्या।

गृह्णीयात्। अत्र प्रतीच्युदीचीप्राचीत्यनेन क्रमेण पूर्वोक्तरीत्या दक्षिणाप्रतीच्युदग्दिशो भवन्ति। तासु दिक्षु परिग्रहणं प्रकृतौ व्याख्यातम् *। सूचितञ्च कात्यायनेन— "पूर्वं परिग्रहं परिगृह्णाति दक्षिणतः पश्चात् उत्तरतश्च"—इति †।

लेखनादीनि यानि वेदिसम्बन्धीनि कर्माणि, एतानि सर्वाणि अत्रापि तथैव कर्तव्यानि इति अभिप्रेत्य सिद्धवत् अनुक्रामति— "लिखति हरति यद्वार्यं मित्यादिना ‡। 'यत्' 'हार्यं' हरणीयं भवति, तत् हरेत् इति सम्बन्धः। "स तथैवेति। येन प्रकारेण पूर्वपरिग्रहः कृतः, तेनैव प्रकारेणोत्तरं परिग्रहं कुर्यात्।

ननु "परौ यज्ञे"—इति § परिपूर्वाद् ग्रहेर्यज्ञविषये घञा भवितव्यम्, कथ मच्,— पूर्व-पूर्वपरिग्रहेणेति, उत्तर परिग्रहेणेतिरूपसिद्धिः ? नैषः दोषः; "व्यत्ययो बहुलम्"—इति ‖ 'ग्रह-ह-दृ-नि-शि-गमश्च"—इत्यप् ** भवति।

"प्रतिसृज्येति। "पुरा क्रूरास्य"—इति प्रकृतौ यदनुमार्जनम् ††, तत् कृत्वेत्यर्थः। प्रकृतिवदेव ‡‡ "प्रोक्षणीरासादय"—इति प्रैष मग्नीध्रप्रेषितार्थानुष्ठानमाह— "प्रोक्षणीरित्यादिना। "स यज्ञोपवीतीति। एतावत् कर्म प्राचीनावीतिनैवाध्वर्युणा कर्त्तृ-

---

* १का० २अ० ४ब्रा० ८—२१ कण्डिका द्रष्टव्याः।

† का० श्रौ० सू० २. ६. २५।

‡ तदर्थं कात्यायनेन— "पिलयज्ञाग्निचित्ययोः"—इति २. ६. २८।

§ पा० सू० ३. ३. ४७। ‖ पा० सू० ३. १. ८५।

** पा० सू० ३. ३. ५८। †† १भा० १६६ पृ० ५ पं०।

‡‡ १भा० १५५ पृ० १२ पं०, १६८ पृ० ८पं० द्रष्टव्य।

व्यम् ; 'सः' अध्वर्युः इदानीं 'यज्ञोपवीती' 'भूत्वा' प्राकृतवदेव 'आज्यानि' गृह्णीयात् * ॥ १२ ॥

तत्रोपभृति ग्रहणे केषाञ्चित् मत मुपन्यस्यति— "तदाहुरिति। 'द्वौ स्रुवौ'–इति तत्र कारणाभिधानम्। 'अत्र' खलु पित्रयज्ञे 'हि' यस्माद् 'द्वौ' एव 'अनुयाजौ' प्रयाजानुयाजाना मेव बर्हिष्टस्य विधास्यमानत्वात् प्रथमस्यानुयाजस्य बर्हिषोऽननुष्ठाने सति द्वावेवानुयाजौ 'भवतः', अतस्तदर्थं 'हिरुपभृति गृह्णीयात्' †। ननु प्रयाजेषु समानयनार्थं मपि गृहीतु माज्येन भवितव्य मिति चेत्, न ; प्रयाजेषु बर्हिर्युक्तस्य चतुर्थयागस्य प्रतिषेधेन तत्प्रयुक्तस्य समानयमानस्याप्यभावात्। अत एवोक्तं सूत्रकृता— "असमानयनं वा बर्हिःसंयोगात्"–इति ‡।

इदानीं पक्षान्तर माह— "तदष्टावेवेति। प्रकृतिवद् अष्टत्व एव 'उपभृति गृह्णीयात्'। गृह्णतोऽभिप्राय माह— "नेदिति। यज्ञसम्बन्धिन्याः विधायाः, विधा प्रकारः संख्या ; तस्मात् 'न' एव 'अयानि' गच्छानि 'इति' अनेनाभिप्रायेणेत्यर्थः।

आज्यग्रहणानन्तर मिध्मप्रोक्षणादिकर्मस्वध्वर्योः पुनः प्राचीनावीतित्वञ्च विधत्ते — "आज्यानि गृहीत्वेति ॥ १३ ॥

इध्मप्रोक्षणादिकं प्रकृतिवदेव कर्त्तव्य मित्यनुक्रामति— "प्रोक्षणीरिति। "अथास्मा इति। 'अथ' वेदिप्रोक्षणानन्तरम् 'अस्मै' अध्वर्यवे 'बर्हिः प्रयच्छन्ति'। आदाय अध्वर्युहस्ते परिकर्मिणो दद्युरित्यर्थः। "तत्पुरस्तादुपन्यीति। 'तद्' बर्हिः

---

* "यज्ञोपवीत्याज्यग्रहणे"—इति का० श्रौ० सू० ५, ८, २६।

† "द्विर्वोपभृति"—इति च का० श्रौ० सू० ५, ८, २७।

‡ का० श्रौ० सू० ५, ८, ३६।

'पुरस्तादग्नि' पूर्वस्यां दिशि यथा भवति तथा वेद्या मध्वर्युरासादयेदित्यर्थः *। तत् प्रकृतिवदेव प्रोक्षणीशेषम् 'उपनीय', बर्हिषः सन्नहनस्य यज्ञियं विस्रंस्य, ततः सकाशात् प्रस्तरमुष्टिं पृथक् न गृह्णीयात् †। तत्र कारणमाह— "सकृद्धि वेति। बर्हिषः सकाशात् प्रस्तरस्य पृथक्करणे बर्हिषः सकृत्त्वं व्याहन्येत, न चैतत् पितृयज्ञे युक्तमिति भावः ॥ १४ ॥

बर्हिषः स्तरणप्रकारमाह— "अथ सन्नहनमिति। सन्नह्यतेऽनेनेति सन्नहनं रज्जुः। 'अपसलवि' अप्रदक्षिणम्, अग्निं परितो वेद्यां 'त्रिः परिस्तृणन्' पर्येतीत्यर्थः। एवं परितः स्तरणानन्तरं 'यावद्' बर्हिः 'प्रस्तरभाजनं' प्रस्तरस्य योग्यं पर्याप्तं भवति, 'तावत्' 'परिशिनष्टि' अवशेषयेत्। "अथ पुनरिति। 'अथ' अप्रदक्षिणपरिगमनानन्तरम् 'पुनः' 'प्रसलवि' प्रदक्षिणं 'त्रिः पर्येति'। अत एव सूत्रकृतोक्तम्— "बर्हिर्विस्रंस्य यूनद्भाग्रे गृहीत्वा त्रिस्तृणन्नग्निं पर्येति प्रस्तरमात्रं शिष्ट्वा तावत् प्रतिपर्येति"—इति ‡।

एतत् प्रतिपरिगमनमनूद्य स्तौति— "तद्यानेवेति। 'तत्' तत्र स्तरणसमये त्रिरप्रदक्षिणगमनेन 'यान्' एव 'असून्' विप्रकर्षेण पितृलोकेऽवस्थितान् त्रिविधान् "पितृभ्यः सोमवद्भ्यः" —इत्यादिना हविर्देवतात्वेन प्रागुदर्शितान् 'अन्ववागात्' अनुप्राप्नोत्, 'एतत्' एतेन पुनस्त्रिः प्रदक्षिणकरणेन 'तेभ्यः एव' पितृभ्यः

---

* का० श्रौ० सू० ५. ८. २८।

† का० श्रौ० सू० ५. ८. ३०। 'कुशप्रसूप्रस्तरोपसन्नद्धं त्रेधा बर्हिः' —इति तत्पद्धतौ (५. ७)।

‡ का० श्रौ० सू० ५. ८. २९, ३०। 'यूनं = सन्नहनम्'— इति या० दे०।

सकाशात् 'पुनः' 'अपोदेति' अपगच्छति, 'स्वं' स्वकीयम् 'इमं लोकम्' 'अभि' प्राप्नुम्। "तस्मादिति, प्रतिपादितार्थनिगमनम् * ॥ १५ ॥

"स दक्षिणेव परिधीनिति। 'सः' स्वयं 'दक्षिणा' दक्षिणाग्नान् 'एव' 'परिधीन्' परिदध्यात्। ततः पश्चात् पुरस्ताच्च तत्र दक्षिणाग्नौ परिधीन्, उत्तरमागग्रं प्रस्तरं, सर्वं मवशेषितं बर्हिश्च दक्षिणाग्नं स्तृणीयात्। प्रकृतितः प्राप्तं † विकृत्यन्तर्धानं निषेधति—"नान्तर्दधातीति। अन्तर्धानेऽधस्तनबर्हिषी विभज्येयाताम् ॥ १६ ॥

तस्मिन् प्रस्तरजुह्वादीना मासादनस्य प्रकारविशेषं विधत्ते—"स तत्रेति। प्रस्तरस्योपरि पश्चाद्भागे प्रथमं 'जुहूम्' आसाद्य, ततः पूर्वभागे 'उपभृतम्', ततः पुरस्तात् 'ध्रुवाम्' ‡, अन्ततो 'हवींषि', इत्यनेन क्रमेणासादयेत्तासादितहविषा मभिमर्शनं कुर्यादित्यर्थः § ॥ १७ ॥

"ते सर्व एवेति। न केवल मध्वर्युरेव, ऋत्विग्यजमानाः 'सर्व एव ते' अस्मिन् समये 'यज्ञोपवीतिनः' भवेयुः ‖। 'इत्यात्'—इत्यभिनयदर्शने; अनेन प्रकारेण ब्रह्मयजमानौ आहवनीयस्य पुरतो गत्वा, अप्रदक्षिणं पर्याहृत्य, पितृयज्ञवेदेः पश्चाद्देशं

---

* का० श्रौ० सू० ५. ८. २४. २५।

† १ का० २ प्र० ६. १३, ३प्र० १. १ द्रष्टव्ये।

‡ 'स्रुवो जुहूः. उपभृत् पृषदाज्योपभृच्च ध्रुवा'—इति पद्धतौ या० दे०।

§ का० श्रौ० सू० ५. ८. ३१, ३२।

‖ "सामिधेनिप्रैषादाव्यभागाभ्यां यज्ञोपवीतिनः सर्वे"—इति का० श्रौ० सू० ५. ८. ३३।

'परीतः' परिक्रामत इत्यर्थः। आग्नीध्रस्तु तस्या वेदेः 'पुरस्तात्' पूर्वदेशं गच्छेत् * ; तत्र हि स्वयजुर्हरणं कृतम् ॥ १८ ॥

पितृयज्ञेनोपांशुप्रचरणं विधत्ते— "तेनोपांशु चरन्तीति †। "तिर इव वा इति। तिरोहिता एव पितरो ऽभवन्, तेभ्यः 'यद्' 'उपांशु' करणम्, 'तत्' अपि 'तिरः' तिरोहित मेव भवति। तथाचान्तर्हितानां सुपांशुप्रचरणं युक्त मिति भावः ॥१९॥

पितृयज्ञस्थानस्य परिश्रयणं विधाय स्तौति— "परिहृत इति। 'परिहृते' परिवेष्टिते स्थाने; सिद्ध मन्यत् ॥ २० ॥

"स एका मेवेति। 'सः' होता "अग्नये समिध्यमानाय" —इति अध्वर्युणा प्रेषितः सन् 'एका मेव' 'सामिधेनीं' 'ब्रिः' ब्रूयात्। "प्र वो वाजाः"—इत्याद्याः सामिधेन्यः पञ्चदश ‡। तत्र सामिधेन्येकत्वे कारण माह— "सकृदु ह्येवेति ॥ २१ ॥

अनुवक्तव्यां तां मेकां सामिधेनीं दर्शयति— "सोऽन्वाहेति। 'सः' होता "उशन्तस्त्वा"—'इति' § एतां सामिधेनीं ब्रिः अनुब्रूयात्। अस्याय मर्थः— हे अग्ने! 'उशन्तः' कामयमानाः वयं त्वां 'निधीमहि' वेद्यां स्थापयामः। तथा 'उशन्तः' त्वत्साध्यं यागं कामयमाना एव सन्तः 'समिधीमहि' त्वां समिद्धं करवामहै। अग्ने! त्व मपि अस्मदुक्त

---

* का० श्रौ० सू० ५. ८. ३४, ३५।

† "पितृयज्ञ उपांशुचरणम्, पुरस्तादुपचारः, ब्रह्मयजमानयोश्च, पूर्ववद्दा, अपत्नीकः, दक्षिणाग्निराहवनीयवत्, पूर्वेणाहवनीयं प्रणीताः परिहरति, अर्थवच्च"—इत्यष्टौ (का० श्रौ० सू० ५. ८. १—८) सूत्राणीह समम्नादालोच्यानि। ‡ ऋ० सं० ३. २७. १—१५।

§ ऋ० सं० १०. १६. १२; य० वा० सं० २०. ७०।

मर्थं 'उशन्' कामयमानः सन् 'उशतः' अस्मदीयं यज्ञं कामयमानान् 'पितॄन्' 'आवह' आगमय। किमर्थम्? 'हविषे अत्तवे' अस्माभिर्दत्तं हविर्भोक्तुम्। "क्रियाग्रहण मपि कर्त्तव्यम्"–इति * कर्मणः सम्प्रदानत्वाच्चतुर्थी। "अद भक्षणे" –इति †, अस्मात् "तुमर्थे सेसेन्"–इति तवेन् प्रत्ययः ‡। "अथाग्नि मावहेत्यादि। सामिधेन्यनुवचनानन्तरम् "अग्नि मावह"–इत्याद्यावाहननिगदं ब्रूयात्। तत्राग्नीषोमावाज्यभागदेवते, पितरः सोमवन्त इत्याद्याः प्रधानदेवताः, 'देवा आज्यपाः' प्रयाजानुयाजदेवताः। तेषां सर्वेषा मावाहनं कर्त्तुं मग्निः प्रेष्यते— "अग्निं होत्राय"–इत्यादिना। शेषेण स्विष्टकृद्देवताया आवाहनप्रतिपादनम्। 'होत्राय' होमाय होतृकर्मणे वा 'अग्निम् आवह'। अग्निष्वात्तनाम्नस्तव स्वभूतो महिमा, तम्, तद्रूपस्वीकारिणं मग्नि मावहेत्यर्थः। "इत्यावाहयेति। अनेन निगदेनावाह्य तत्रोपविशेदित्यर्थः॥ २२॥

प्रकृतिवत् प्राप्तं होतृवरणं निषेधति— "अथाश्राव्य न होतार मिति §। आवाहनानन्तर माश्रावणप्रत्याश्रावणे कृत्वा, 'सीद होतः!' इत्येवाध्वर्युर्ब्रूयात्; न तु "अग्निर्देवो दैव्या होता"–इति निगदेन होतारं प्रवृणीतेत्यर्थः। एतदुपपादयति— "पितृयज्ञो वा अय मिति। यतोऽयं पितृयज्ञः, अतोऽत्र पितरः सन्निहिताः; तत्र यदि होतुर्वरणं कुर्यात्, तदा 'न' 'होतारं' तेषु पितृषु 'दधाति' स्थापयति, न चैतद् युक्तम्, 'इति' अनेनाभिप्रायेण 'होतारं 'न' प्रवृणीयात्; किन्तर्हि

---

* पा० १. ४. ३२ सू० वा० १। † अदा० प० १ धा०।
‡ पा० सू० ३. ४. ६। § का० श्रौ० सू० ५. ८. ३६।

आश्रावणानन्तरं ब्रूयात् इति, तदाह— "सीदेति। हे 'होतः' त्वं 'सीद' उपविश 'इति' एतत् वाक्यम् अध्वर्युर्ब्रूयात्; न होतुर्वरणम्। 'होता' चैवं कृत्वा 'होढषदने' 'उपविशति' उपविशेत्।

सुगादाननिगदेनाध्वर्युः 'प्रसौति' अनुजानाति। "षु प्रसवैश्वर्ययोः"—इति * धातुः। स च 'प्रसूतः' होता प्रेरितः 'अध्वर्युः' 'स्रुचौ' जुह्वादिभृती 'आदाय' 'प्रत्यङ्'-मुखः अतिक्रामति। 'अतिक्रम्य' वेदेः पश्चिमभागे स्थित्वा, आश्रावणप्रभृति 'अपबर्हिषः' बर्हिश्चतुर्थः प्रयाजः, तदूर्ध्वं 'चतुरः प्रयाजान्' यजेत। बर्हिर्वर्जनस्याभिप्राय माह— "प्रजा वा इति। शिष्टं निगदसिद्धम् † ॥ २३ ॥

हविर्भिः प्रचरणार्थं प्राचीनावीतित्वं पुनर्विधत्ते— "ते सर्व एवेति। 'ते' ऋत्विग्यजमानाः 'सर्व एव' 'प्राचीनावीतिनः' भवेयुः ‡। ब्रह्मयजमानाग्नीध्राणां पूर्वं परिक्रान्तानां प्रधानयागार्थं मन्यथा परिक्रमणं विधत्ते— "इत्यादिति। 'इत्यात्' अनेन प्रकारेण ब्रह्मयजमानौ चतुःस्रक्केर्वेदेः 'पुरस्तात्' प्रतिगच्छतः, आग्नीध्रः 'पश्चात्' प्रतिगच्छेत्। प्रधानहविषो याज्यानामाश्रावणवषट्कारानाचष्टे— "तदिति। 'तत्' तत्र पित्र्येषु प्रधानहविष्षु 'ॐस्वधा'—इति अध्वर्युराश्रावयेत्, 'अस्तु स्वधा'—इति आग्नीध्रः प्रत्याश्रावणं कुर्यात्, होता 'स्वधा नमः'—इति

---

* अदा० प० ३० धा०। † का० श्रौ० सू० ५. ८. ३७।

‡ का० श्रौ० सू० ५. ६. १। पित्र्यत्वादप्रसक्तं सर्वत्र प्राप्त मेव, सत्यस्यापि वाचनिकस्याज्यभागान्तस्यावधि (८. ३३.) पूर्ण इति प्राचीनावीतित्वं प्राप्त मेवेति कात्यायनेन नेह पुनः सूत्रित मिति ध्येयम्।

वषट्कुर्यात् । अस्याय मर्थः— "ॐ श्रावय"—"अस्तु श्रौषट्"—"यौषट्"—शब्दानां स्थाने एते प्रयोक्तव्या इत्यर्थः ॥

तत्राध्वर्युप्रैषस्याय मर्थः— ॐकारोऽङ्गीकारार्थः , स्वधेति पितॄणां हविर्नाम । हे अग्नीत् ! पितृभ्यर्थमादीयमान मिदं हविः तवाभिमतं किमिति । तत्तथास्त्विति अग्नीत् । नमः शब्दस्त्यागार्थः , पितॄनुद्दिश्य दीयमानैतत् 'स्वधा' तदीयं हविः 'नमः' त्यक्त मस्तु , इति वषट्कारप्रतिनिधिभूतस्य वाक्यस्यार्थः * ॥ २४ ॥

प्रकृतिवदेवाश्रावणादिकं कर्त्तव्य मिति पक्षान्तर माह— "तदु होवाचेति । 'आश्रावयेयुः'—इत्यादिना आश्रावणादि कर्त्तृणा मध्वर्यादीना मेकत्वेऽपि पूजार्थं बहुवचनम् । 'यज्ञस्य' प्रकृतिभूतस्य दर्शपूर्णमासयागस्य 'विधायाः' विधा प्रकारः संस्थानम् , तस्मात् 'न' एव 'अयाम' प्रच्यवामहै 'इति' प्रागुदीरितस्यापेक्षा ; अन्यथा हि आश्रावणादीनां प्रकृतिवदप्रयोगात् यज्ञविधायाः प्रच्युतिः स्यादित्यभिप्रायः । अत एव सूत्रकृत् स्वधाकरणयज्ञस्य विकल्प माह स्म— "ॐ स्वधेत्यस्तु स्वधेति वाऽऽश्रुतप्रत्याश्रुते"—इति † ॥ २५ ॥

अनुवाक्यार्थं प्रैषवचनं प्रथमयागस्य विधत्ते — "अथाहेति ।

* "स्वधा नम इति वषट्कारः"—इति का० श्रौ० सू० ५. ६. १२ ।

† का० श्रौ० सू० ५. ६. ११ । ॐ स्वधेत्यादिषु स्थानापत्त्या श्रुतौ भवत्येवेति पद्मञ्जरीकारः, तथा चाश्वलायनः— "नित्याः श्रुतयः"—इति । तेन ॐस्वधेत्यत्र ओकारः स्वयुच्चरितोऽकारश्च श्रुतौ,— 'ओ३४ स्वाऽधा' —इति , तथा 'अस्तु स्वाऽधा"—इति , 'स्वाऽधा नमः'—इति । एवं 'ये यजामहे'—इत्यस्य स्थाने 'येऽ स्वधामहे'—इत्यपि बोध्यम् ।

पिढप्रधान-सोमप्रधानयोरुभयोरपि युक्तत्वात् तदपेक्षया पितरः सोमवन्तः पिढवन्तो वेति विकल्पः प्रागुपन्यस्तः; तदभिप्रायेणात्रापि सम्प्रेषस्य हेविध्यम्। होतानुवाक्यावचने प्रकृतितो विशेष माह— "स ह इति। अनुवाक्याहित्व मुपपादयति — "एकया वा इत्यादि। 'एकया' एव अनुवाक्यया 'देवान्' स्वस्थानात् 'प्रच्यावयन्ति' देवयजनदेश मागन्तुम्। पितरस्तु परागमनात् अपुनराहृत्तिरूपाः, अतो न ते एकया पुरोनुवाक्यया प्रच्यावयितुं शक्याः; ततः प्रयत्नविशेषे कर्त्तव्ये 'द्वाभ्यां' पुरोनुवाक्याभ्यां होता तान् 'पितॄन्' आगमयतीत्यर्थः॥२६॥

त्रीणि हवींषि समवदाय एकैका देवता यष्टव्या, तत्र पितॄणां सोमवतां यजनप्रकार माह — "स उपस्तृणीत आज्य मिति। "द्विराज्यस्येति। आज्येनोपस्तरण मेक मवदानम्, पुरोडाशादिहविस्त्रयात् सकृत्सकृदवदानम्, तत् सकृदिति यदवदानं सम्पद्यते, एतेन सकृदवदधातीति वाक्य मुक्तार्थं भवति *। यदि अभिघारण मुपस्तरणं च सकृदेव स्यात्, तदा चतुरवत्तसम्पत्तिर्न स्यात्; चतुरवत्तं हि यागयोग्यं द्रव्यम्, तस्माद् द्विरभिघारणं कर्त्तव्य मित्यर्थः †। "प्रत्यनक्त्यवदानानीति। अवद्यत्यस्मादित्यवदानम्, अवत्तशिष्टं हविः। "कृत्यल्युटो बहुलम्"—इति ‡ अपादाने ल्युट्। अवत्तशिष्टानि हवींषि प्रत्यञ्जादित्यर्थः। प्रकृतिवत् प्राप्त मतिक्रमणं निषेधति — "नातिक्रामतीति §। कथन्तर्हि कर्त्तव्य मिति तत्राह —

---

* का० श्रौ० सू० ५. ६. २, ३।

† का० श्रौ० सू० ५. ६. ४। ‡ पा० सू० ३. ३. ११३।

§ का० श्रौ० सू० ५. ६. ५।

"इत एवेति। यत्रोपविश्यावक्ष्यति, 'इत एव' स्थानात् 'उपोत्थाय' तत्रैव तिष्ठता आश्रावणादिकं कुर्यादित्यर्थः ॥ २७ ॥

द्वितीयतृतीययागयोरेवमेवानुप्राणनप्रकारं दर्शयति—"अथाहेति। अत्रापि पूर्ववदेव पुरोनुवाक्यादित्व मवगन्तव्यम्। "उपस्तृणीत इत्यादि, पूर्ववत्; एतावांस्तु विशेषः,— द्वितीययागस्य हविरादाने धानानां प्राथम्यम्, तृतीयस्य हविरादाने मन्थ्य प्राथम्यम्। अस्मादेव प्राथम्यात् सोमवदादियागत्रयस्य हविषां त्रयस्य धारणेऽपि निर्वापकाले सपित्रभ्यः सोमवद्भ्यः षट्कपालं पुरोडाश मिति विशेषाभिधानम् * ॥ २८, २९ ॥

इत्थं प्रधानयागं कृत्वा स्विष्टकृत्स्थानेऽग्निः कव्यवाहनो यष्टव्य इत्यभिप्रेत्य तदनुवाक्याप्रेषस्य वचनं विधत्ते— "अथाहाग्नय इति। "तत् स्विष्टकृत इति। यदेतत् "अग्नये कव्यवाहनायानुब्रूहि"—इति सम्प्रेषवचनम्, 'तत्' 'स्विष्टकृते' स्विष्टकृद्यागार्थम्। पितॄणां कव्यवाहनसम्बन्धप्रतिपादनेनैवैतदुपपादयति— "कव्यवाहनो वा इति। देवेभ्यो दीयमानं हविः 'हव्यम्', पितृभ्यस्तु दीयमानं तत् 'कव्यम्'। तदुभयं वहतीति हव्यवाहनकव्यवाहननामानौ द्वावेवाग्नी क्रमेण देव-पितृ-सम्बन्धिनौ। "कव्यपुरीषपुरीष्येषु ण्युट्"—"हव्येऽनन्तःपादम्"—इति सूत्राभ्यां † वहतेर्ण्युट्। एष चानेरवान्तरभेदः प्रागप्यान्नातः, तैत्तिरीयकेऽप्यान्नायते— "त्रयो वा अग्नयः; हव्यवाहनो देवानाम्,

---

* "सोमाय वा पितृमते, एवं बर्हिषद्भ्य उत्तरतो धानामन्थ्यपुरोडाशानाम्"—अग्निष्वात्तेभ्यो दक्षिणतो मन्थ्यपुरोडाशधानानाम्"—इति का० श्रौ० सू० ५. ६. ६, ७, ८।

† पा० सू० ३. २. ६६, ६७।

कव्यवाहनः पितॄणाम्, सहरक्षाः असुराणाम्"–इति * । यस्मादेवं कव्यवाहनः पितॄणां सम्बन्धी, तस्मात् "अग्नये कव्यवाहनाय"–इत्येव वक्तव्य मिति निगमयति–"तस्मादाहेति † ॥ २० ॥

तस्य स्विष्टकृत्स्थानीयस्य कव्यवाहनयागस्य पूर्ववदुपस्तरणादिहोमान्तानुष्ठानप्रकार माह— "स उपस्तृणीत इत्यादिना । स्विष्टकृद्यागस्य शेषद्रव्यसाध्यत्वात् हविरुत्पत्तिक्रमेणैवात्रावदान मित्यभिप्रेत्याह— "अथास्य पुरोडाशस्येति । "न प्रत्यनक्तीति । हविःप्रत्यभिघारणस्य स्विष्टकृदर्थत्वात् तस्य च हविषो ग्रहणात् पुनः प्रत्यभिघारणं न कर्त्तव्य मित्यर्थः । अन्यदुक्तार्थम् ‡ ॥ २१ ॥

स्विष्टकृच्चतुर्थेषूक्तेषु यागेषु नातिक्रामतीति योऽतिक्रमनिषेध उक्तः, त मनूद्य स्तौति— "स यत्रातिक्रामतीति । सकृदवदानं प्रशंसति— "अथ यदिति । सोमवदादियागत्रयेऽपि यद्हविषो व्यतिषजन मुक्तम्, "अथास्य पुरोडाशस्यावद्यतीत्यादिना, तदनूद्य स्तौति— "अथ यद् व्यतिषङ्क्त मिति । क्रियाविशेषणम्; परस्परं संसृष्टं यथा भवति तथेत्यर्थः । "ऋतवो वै पितर इति । पितॄणा मृतुरूपत्वं प्रागेव दर्शितम्— "त उ ते यान् पुनः समैरयतेति । तथा च 'एतत्' एतेन, पितृदेवत्यहविषा व्यतिषङ्क्तेन 'ऋतूनेव व्यतिषजति' परस्परं संसर्जयति, तेन व्यतिषजनेन तान् 'ऋतून्' 'सन्दधाति' परस्पर मविनाभूतान् करोति ॥ ३२ ॥

अथेडां प्रत्याम्नायत्वेन मन्त्रस्याधान मेकीयमतेनोपन्यस्यति— "तद्वेक इति । 'तत्' तत्र खलु 'एके' शाखिनः यागशिष्टम्

---

* तै० सं० २. ५. ८. ११ । † का० श्रौ० सू० ५. ६. १० ।

‡ "पुरस्ताद्ग्नये कव्यवाहनाय यथापूर्वम्"– इति का० श्रौ० ५. ६. ६ ।

'एत मेव मन्थं होत्रे आदधति' होतुर्हस्ते प्रक्षिपन्तीत्यर्थः। एतस्मिन् पक्षे होतुः कर्त्तव्य मुपदिशति— "तं होतेति। "उपह्वयेति। वेदिसमीपे इडानिगदेनोपह्वं कृत्वा, तदनन्तर मवघ्राय अग्नीधे दद्यात्। सोमवज्जिघ्रत्येव, न तु कस्य चिदप्यत्र भक्षण मस्तीत्येवकारार्थः। प्राशित्रेडावदान-पक्ष मप्याह— "एतन्वेवेति। 'तु'-इति प्रसिद्धौ, 'एव'-कारो-ऽवधारणार्थः, 'उत'-शब्दोऽप्यर्थः *। अपि खल्वेतद् वक्ष्यमाण मेकं पक्षं केचिदनुतिष्ठन्ति। तदेव दर्शयति— "यथा त्वेवेति। 'तु'-शब्द एकीयमतव्यावृत्त्यर्थः। 'इतरस्य' दर्शपौर्णमासादेः 'यज्ञस्य' 'यथा' इडां प्राशित्रं च 'समवद्यन्ति' सर्वेभ्यो हविर्भ्यः सम्भूयावद्यन्ति, 'एव मेव' 'एतस्यापि' पित्र्ययज्ञस्य समवद्येयुः। "अवैव जिघ्रन्तीति। अस्मिन्नपि पक्षे इडाप्राशित्रयोरवघ्राण मेव कर्त्तव्यम्, न तु प्राशन मित्यर्थः। प्राशनपक्ष मप्याह— "प्राशितव्यं त्वेवेति। इडावदानं च यज्ञान्तरवत् अत्रापि 'प्राशितव्य मेव' 'वयं मन्यामहे' 'इति' 'आसुरिः' महर्षिः प्रतिपादयतीत्यर्थः। एवं प्रतिपादयत आसुरेरभिप्राय माह— "यस्य कस्येति। इडां प्राश्नन्तः ऋत्विजः 'यस्य कस्यचित्' आत्मनः सम्बन्धिनि 'अग्नौ' वैश्वानरे तद्धविः 'जुह्वति', अतः प्राशने न शेष इत्यनेनाभिप्रायेणेत्यर्थः †॥ ३३॥

यजमानपितॄनुद्दिश्य पिण्डप्रदान मध्वर्युयजमानयोरन्यतरस्य कर्त्तव्यत्वं सिद्धवदनुवदनम्, तत्प्रागङ्ग मवनेजनं विधत्ते—

---

* कात्यायनेति चानुसन्धेयम्।

† "मन्थ मुपहृत्य होताध्वर्युर्ब्रह्माग्नीदवप्राहं निदधति, प्राशित्र मवदायेडां वा, सर्वे प्राश्नन्ति वा"—इति का० श्रौ० सू० ५, ६, १३—१५।

"अथ यतर इति। अध्वर्युयजमानयोर्मध्ये यतर इत्यर्थः। "किं यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्"—इति * डतरजन्तः। 'यदि अध्वर्युर्वा यजमानो वा' 'दास्यन्' पिण्डदाता 'भवति', 'सः' स्वयं यजमानः अध्वर्युर्वा 'उदपात्रम्' उदकपूर्णं पात्रम् 'आदाय', 'अपसलवि' अप्रदक्षिणं 'त्रिः परिषिञ्चन्' पित्र्यां वेदिम् 'पर्येति' †। "स यजमानस्येति। 'सः' अध्वर्युः 'यजमानस्य पितरम्' "असाववनेनिक्ष्व"—इति मन्त्रेण ‡ 'अवनेनिक्ते' अवनेजति। यजमानस्तु यदि स्वयं पिण्डदाता भवति, तदा स्वकीय मेव पितर मवनेजयेत्। "असाववनेनिक्ष्व"—इत्यादिकं पिण्डपितृयज्ञप्रकरणे व्याख्यातम् § ॥ ३४ ॥

"अथास्य पुरोडाशस्येत्यादि। पुरोडाशादिहविःशेषान् 'मध्ये पाणौ' 'अवदाय' आलोड्य, त्रीन् पिण्डान् कृत्वा, तस्मिन्नेव हस्ते धारयेत् ‖ ॥ ३५ ॥

"स येमा मवान्तरदिश मिति। 'इदं'-शब्देनोत्तरापरां दिश मभिनयेन निर्दिशति ¶। "अनुर्लक्षणे"—इति ** लक्षणे अनुशब्दस्य कर्मप्रवचनीयत्वम्। उत्तरापरस्यां दिशि येयं वेदेः स्रक्तिः, 'तस्यां' 'यजमानस्य पित्रे' "असावेतत् ते"—'इति'

---

* पा० सू० ५. ३. ९२।

† "वेदिं त्रिः परिषिञ्चति उदपात्रेणाध्वर्युर्यजमानो वा"—इति का० औ० सू० ५. ६. १६।

‡ पुरस्तादिहैव ४ अ० २. २३ काण्डा श्रुतोऽयम्।

§ पुरस्तादिहैव काण्डे ४ अ० २. २३ भाष्यं द्रष्टव्यम्।

‖ का० औ० सू० ५. ६. १६।

¶ 'दर्शयति'—इति च। ** पा० सू० १. ४. ८४।

मन्त्रेण * । पितामहस्य पिण्डदानं विधत्ते— "अथ येमा मिति । 'इमं'-शब्देन दक्षिणापरा अवान्तरा दिग् गम्यते । अन्यत् समानं पूर्वेण । प्रपितामहस्य पिण्डदानं विधत्ते— "अथ येमा मिति । अत्रेदमा दक्षिणपूर्वा दिगभिनयेन निर्दिश्यते । अत्र या वेदेः स्रक्तिः, तस्यां प्रपितामहार्थं पिण्डं दद्यात् † । इत्थं: निसृष्ट स्रक्तिषु पिण्डदानं विधाय, अवशिष्टायां स्रक्तौ समन्त्रके लेपमार्जने विधत्ते— "अथ येमा मवान्तरदिश मिति । इमा मुत्तरपूर्वा मवान्तर दिश मनु या वेदेः स्रक्तिः, तस्याम् "अत्र पितरः"-'इति' मन्त्रेण ‡ हस्तगलेपं 'निमृष्टे' निमृजीत । तथा चोक्तं सूत्रकृता— "उत्तरापरस्यां प्रथमम्, सव्ये समवदाय सर्वेभ्यो यथावनिक्तं पिण्डान् ददात्यसावेतत्त इति, उत्तरपूर्वस्यां पाणी निमृष्टेऽत्र पितर इति"-इति § । "असावेतत्ते"-इत्यादि मन्त्रार्थः पिण्डपित्रयज्ञे एव वर्णितः ‖ । प्रपितामहादिभ्यः उक्तरीत्या पिण्डान् ददातीत्यर्थः । तथाचैवं सति 'स्वान्' स्वकीयान् 'पितॄन्' 'एतस्मात्' पित्रयज्ञात् 'नान्तरेति' अन्तरितान् न करोति, अपि तु भागिनः कृतवान् भवति ॥ ३६ ॥

आहवनीयोपस्थानं विधत्ते – "ते सर्व एवेति ¶ । "उदक्

* पुरस्तादिदेव ४अ० २, १६ कण्डां श्रुतोऽयम् ।

† "सक्तिषु पित्र्यावनेजन' परिषिच्य—परिषिच्य पूर्ववत्"—इति का० श्रौ० सू० ५, ६, १७ ।

‡ वा० सं० २, ३१ । § का० श्रौ० सू० ५, ६, १८, १६, २० ।

‖ पुरस्तात् २०८ पृ० ७ पङ्क्तितो द्रष्टव्यः ।

¶ "यज्ञोपवीतिनः सर्वे निष्क्रम्योदक्षोऽग्नमीमदन्तेत्याहवनीय मुपतिष्ठन्ते दाभ्याम्"—इति का० श्रौ० सू० ५, ६, २१ ।

उपनिष्क्राम्येति। उदङ्मुखाः सन्तः परिहृतात् पिण्डपितृयज्ञस्थानात् निर्गत्येत्यर्थः। "देवान् वा इत्यादि। 'यः' खलु 'आहिताग्निर्भवति', 'दर्शपौर्णमासाभ्यां' च 'यो यजते', 'एषः' 'देवान्' 'उपावर्त्तते' उपगतो भवति, देवसम्बन्धगतस्य यजमानस्य देवान् परित्यज्य यत् पितृयज्ञाचरणम्, तेन देवानां मनसि क्रोधोऽभूत्; पुनरावृत्याहवनीयोपस्थानेनातीवोदासीनताजनित मपराधं 'देवेभ्यः' 'निह्नुवते' शमयन्ति ॥ ३७ ॥

"ऐन्द्रीभ्या मिति, मन्त्रविधिः। ऐन्द्रा ऋचः कथ मग्न्युपस्थाने सङ्गतिः, लिङ्गविरोधात्? इत्यत आह – "इन्द्रो ह्येति। परमैश्वर्ययोगादाहवनीय एवेन्द्रः, अतस्तदीयोपस्थाने ऐन्द्रा करणत्वं न विरुद्धयत इत्यर्थः। त एवैन्द्रीं पठति—

"अत्तन्नमीमदन्तेति *। 'अत्तन्' अस्माभिर्दत्तं हविः पितरः अत्तन्। अदेर्लुङि "लुङ्सनोर्घस्लृ"–इति † घस्लादेशे, "मन्त्रे घसह्वरणश०"–इति ‡ च्लेर्लुकि, "गमहन०"–इति § उपधालोपे, अत्तन्निति रूपम्। 'हि' यस्मात् एवम्, अतस्ते पितरो हविःस्वीकारेण 'अमीमदन्त' तृप्ता अभवन्। "मद तृप्तियोगे"–इति ‖, अस्मात्यान्तात् लुङि चङि रूपम्। तृप्तिरपि कुतोऽवगम्यते इति तत्राह— "अवप्रिया इति। 'प्रियाः' आत्मीयाः तनूः ते पितरः 'अव अधूषत' भुक्तस्य हविषो रसातिशयस्याभिव्यक्त्यर्थम् अवाकम्पयन्। "धूञ् कम्पने"–इति ¶ धातुः। तदनन्तरं 'स्वभानवः' स्वायत्तदीप्तयः, 'विप्राः' मेधा-

---

* वा० सं० ३. ५१।
† पा० सू० २. ४. ३७।
‡ पा० सू० २. ४. ८०।
§ पा० सू० ६. ४. ९८।
‖ भु० आ० २२९ धा०।
¶ भु० उ० ३०१ धा०।

विनः ते पितरः हविषः प्रदातारं यजमानं नविष्ठया' नवतरया 'मती' मत्या स्तुत्या 'अस्तोषत' उपभुक्तं हविः प्राशंसन्, सम्यगेतत् सञ्जात मिति। आहवनीयावस्थित! हे 'इन्द्र!' त्व मपि 'ते' त्वदीयौ 'हरी' अश्वौ गमनार्थं 'नु' क्षिप्रं 'योजान्' योजयेति प्रथमाया ऋचोऽर्थः।

"सुसन्दृशं त्वेति *। हे 'मघवन्!' धनवन्! आहवनीयरूपेन्द्र! सुष्ठु-सन्दर्शनीयं 'त्वा' त्वां 'वन्दिषीमहि' नुमः, अभिवादयामो वा। "वदि अभिवादनस्तुत्योः"—इति † धातुः। अस्माभिः वन्दितस्त्वं 'पूर्णबन्धुरः' दत्तेन हविषा पूर्णेन रथनीडेन युक्तः, 'सुतः' च सन् अस्माभिः कृतं स्तोत्रं हविश्च स्वीकृत्य 'वशान् अनु' कामान् अनु यथाकामं यथेष्टं 'प्रयासि'। "योजानित्यादि, पूर्ववत्॥ ३८॥

गार्हपत्योपस्थानं विधत्ते— "अथ प्रतिपरेत्येति ‡। 'प्रतिपरेत्य' आहवनीयसमीपात् प्रतिनिवृत्त इत्यर्थः। तस्मिन् गार्हपत्योपस्थाने "मनो न्वाह्वामहे"—इत्याद्यास्रयो मन्त्रा पठिताः, तेषा मयमर्थः—

तत्र प्रथमा "मनो न्विति §। अस्मदीयं 'मनः' 'नु' क्षिप्रम् 'आह्वामहे'। केन साधनेन? 'नाराशंसेन स्तोमेन' नरैः शंसनीयेन स्तोत्रेण, 'पितॄणां' सम्बन्धिभिः 'मन्मभिः' मननैश्च॥

"आ न एत्विति ‖ द्वितीया। पित्र्यप्रकरणादप्रकान्त

---

* वा० सं० ३. ५२। † भा० आ० ११ धा०।

‡ "'मनो न्वाह्वामह इति गार्हपत्यं तिसृभिः"—इति का० श्रौ० सू० ५. ६. २२।

§ वा० सं० ३. ५३। ‖ वा० सं० ३. ५४।

मस्मदीयं 'मनः' 'पुनः' अस्मान् 'एतु' आगच्छतु। किमर्थम्? 'क्रत्वे' क्रतुकर्मणे, 'दक्षाय' बलाय, 'जीवसे' जीवनाय, 'ज्योक्' चिरकालं 'सूर्यं च' 'दृशे' द्रष्टुम्। "दृशे विख्ये च" —इति * तुमर्थे निपात्यते ॥

पुनर्न इति † तृतीया। हे 'पितरः!' 'देव्यः' देवसम्बन्धी 'जनः' 'नः' अस्मभ्यं 'मनः पुनः ददातु'। 'जीवं' जीवनवन्तं, 'व्रातं' गणम् पुत्रपौत्रादिसमूहम् 'सचेमहि' प्राप्नुयामेति। अन्तिमपादे जीवशब्दप्रयोगस्याभिप्राय माह— "पितृयज्ञेनेवेति। 'पितृयज्ञेन' खलु 'एतत्' इदानीम् 'अचारिषुः', अतः पितृयज्ञस्य कर्त्तारं ऋत्विग्यजमानाः पितृसम्पन्नाः सन्तः प्रजायुक्ता भवेयुः। 'तत्' तथा सति "जीवं व्रातम्"—इति अनेन मन्त्रभागेन 'जीवान्' एव पुत्रपौत्रादीन् 'अपिपद्यन्ते' अपिगच्छन्ति। "तस्मादिति, उक्तार्थनिगमनम् ॥ ३९ ॥

पिण्डदातृजपं विधत्ते— "अथ यतर इति ‡। 'अथ' उपस्थानानन्तरम्, अध्वर्युयजमानयोर्मध्ये 'यतरः' पिण्डं 'ददाति', 'स पुनः' 'प्राचीनावीती' 'भूत्वा', पित्र्यं देशम् 'अभिपद्य' प्रविश्य "अमीमदन्त"—इति § मन्त्रं जपेत्। स च मन्त्रः, तद् ब्राह्मणं च पिण्डपितृयज्ञे व्याख्यातम् ॥ ४० ॥

पिण्डदानस्योदीच्याङ्गं मृदकावनेजनं पूर्ववद् विधत्ते— "अथोदपात्र मिति। "तद्यथा जक्षुषे इति, अवनेजनस्य

---

* पा० सू० ३. ४. ११। † वा० सं० ३. ५५।
‡ का० श्रौ० सू० ५. ६. २३। § वा० सं० २. ३१. २।
॥ पुरस्तात् २१० पृ० ७ पङ्क्तितो द्रष्टव्यम्।

प्रयोजनकथनम्। एतत् सर्वं पिण्डपितृयज्ञे एव व्याख्यातम् *।

विच्छिन्नं परिषेचनं पुनः श्रुतम्, तस्य यत् प्रादक्षिण्यम्, तत् स्तौति— "यत् पुनरित्यादिना। "प्रसलविन इति। अपसल मप्रादक्षिण्यम्, तद्विपरीतं प्रसलं प्रादक्षिण्यम्; मत्वर्थीयो विनिः। प्रादक्षिण्यवतो मम 'इदं' पित्र मपि 'कर्म' 'अनुसन्तिष्ठातै' संस्थितं भवेत्। 'इति' अनेनाभिप्रायेण अवसाने 'प्रसलवि' सब्येन परिषेचनं क्रियत इत्यर्थः॥ ४१॥

"अथ नीवि मित्यादि †। पिण्डपितृयज्ञप्रकरणे व्याख्यातम् ‡॥ ४२॥

चोदकप्राप्त मनुयाजाद्युदीच्याङ्गकलापं सविशेष मतःपर मनुक्रामति— "ते सर्व एवेति। "इत्याद्यजमानस्येति। प्रयाजाद्युदीच्याङ्गानुष्ठानसमये एव ब्रह्मयजमानाद्याः तत्र तत्र स्थाने परीत्योपविशेयुः §॥ ४३॥

"अथाहेति। "प्रत्यङ्ङतिक्रामतीति। प्राचो दक्षिणदिक्स्थ प्रागुपपादितत्वात् दक्षिणातिक्रमणस्थाने पत्यङ्मुखोऽध्वर्युरतिक्रामेदित्यर्थः। 'अपबर्हिषौ' बर्हिः प्रथमानुयाजः, तद्वर्जितौ 'द्वावनुयाजौ' यज-यजेति। बर्हिर्वर्जने कारण माह— "प्रजा वा इति॥ ४४॥

स्रुग्व्यूहनादिकं प्रकृतिवत् कर्त्तव्य मित्यनुक्रामति—

---

* पुरस्तात् २१० पृ० १८ पङ्क्तितो द्रष्टव्यम्।

† "अवनेज्य पूर्ववत् प्रदक्षिणं नीविं विस्रंस्य नमो व इत्यञ्जलिं करोति षड् वा नमस्कारान् गृहान् नः पितरो दत्त"—इति का० श्रौ० सू० ८, ६, २४, २५, २६।

‡ पुरस्तात् २११ पृ० ८पं० द्रष्टव्यम्। § का० श्रौ० सू० ५, ६, २७।

"अथ सादयित्वेत्यादिना। सूत्रवाक्यानुवचनं प्रज्ञातिवत् प्राप्तम्। प्रस्तरप्रहरणं निषेधति — "नाध्वर्युरिति *। 'न समुह्यम्यति' न गच्छति, न प्रहरेत्, तूष्णी मेवोपासीत प्रस्तर मा प्रहरणम् †॥ ४५, ४६॥

अग्नीत्प्रेषस्यानित्तिं माह — "अथाहेति। "स्रुगा दैव्या होतृभ्यः"—इति सत्प्रेषेऽध्वर्युणोक्ते होता शंयुवाकं ब्रूयात्; न च तदानी मध्वर्युः परिधीनप्रहरेत्, केवल मुपस्पृशेदेव ‡। बर्हिषः परिधीनाञ्च तूष्णी मग्नौ प्रहरणं विधत्ते — "अथैतदिति। 'एतत्' चतुःस्रक्त्यां वेद्यां स्तीर्णं 'बर्हिः' 'परिधींश्च' आदाय युगपदग्नौ 'अनुसमस्यति' प्रक्षिपति §॥ ४७॥

अथाग्नौ प्रक्षेप मेकीयमतेनोपन्यस्यति— "तदेक इति। तदेतन्निषिध्योपपादयति— "तदु तथेति। हुतशेषस्य पुनर्होमयोग्यत्वाभावात् नैष पक्षो युक्त इत्यर्थः। का तर्हि हविःशेषस्य प्रतिपत्तिरिति, ता माह— "तस्मादिति। 'हुतोच्छिष्टम् अपोऽभ्यवहरेयुः'। अग्नौ प्रासनपक्षस्य व्युदासार्थ 'एव'-कारः। ऋत्विजो 'वा प्राश्नीयुः' इति पक्षान्तरम्॥ सूत्रकारोऽप्येतत् सर्वं

* "न प्रस्तर मादत्ते"—इति का० श्रौ० सू० ५. ६. २८।

† "अनुप्रहरेत्यु क्ते किञ्चनापि नानुप्रहरति, तूष्णी मात्मानं संस्पृशति"—इति का० श्रौ० सू० ५. ६. २६, ३०।

‡ उपस्पृश्य परिधीन् नानुप्रहरति"—इति का० श्रौ० सू० ५. ६. ३१।

§ "बर्हिःपरिधयौ प्रास्यति"—इति का० श्रौ० सू० ५. ६. ३३।

॥ "हविरुच्छिष्टञ्च, अप्सु, प्राश्नं वा"—इति का० श्रौ० सू० ५. ६. ३४, ३५, ३६।

माह स्म—"न प्रस्तर मादत्त इत्यादिना * ॥ ४८ ॥ २† [६.१.] ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे षष्ठाध्यायस्य प्रथमं ब्राह्मणम् ॥

---

* का० श्रौ० ५. ६. २८–३६ सूत्राणि द्रष्टव्यानि।

† "अथात्र चिन्त्यते। के पुनस्ते पितरो येभ्य इदं दीयते? उच्यते—यजमानस्य पितृभ्यो ददातीत्यादिवचनात्, एत एव पितरः; तेभ्यो जीवद्भ्य एव दाने प्राप्ते,—"प्रेतेभ्यो ददाति"—इति वचनात्, "सकृद् ह्येव पराञ्चः पितरः"—इत्यादिदर्शनेभ्यश्च प्रेतेभ्यो देयम्। अथ "वसवः पितरो रुद्रा ज्ञेया रुद्रा ज्ञेया पितामहाः। प्रपितामहास्तथादित्या इत्येषा वैदिकी श्रुतिः"—इति, तथा "यानेवैषां तस्मिन्त्संङ्ग्रामेऽग्नींस्तान् पितृयज्ञेन समैरयन्त, पितरो वै त आसन्"—इति (२ का० ६.१.१), तथा "प्रारङ्गैमन्तग्निरास्ते पितरः"—इति, तथा अग्निष्वात्तादयः पितृगणा स्तेषां कोपयोगः? एत एव तु आधिदैविकाः पितरः, ततश्च यथा ब्राह्मणे श्रूयते पितरस्तृप्यन्ति, तथा तेष्वपि तृप्यत्सु आधिदैविकावस्थास्ते तृप्यन्ति; महापितृयज्ञे तु त एव सोमपादय उच्यन्ते। पिण्डाश्च सक्तिषु प्रेतेभ्यो एव दीयन्ते। अथ यस्य पितरौ मुक्ताः स्युः, स कथं दद्यात्? सोऽपि तेभ्य एव ब्रह्मत्व मापन्नेभ्यो ददन् बहुतरमेवैनसा विमुच्यते। या तु तेषां तृप्तिस्तदानुसङ्गिकं फलम्, न तदभावे क्रियानादर्थक्या। वस्तादयस्त्वाधिदैविकाः, तेऽपि तृप्यन्त्वेव; श्राद्धेन विशेषोपादान विधानादिति गम्यते"—इत्याहात्र हरिस्वामी। तैत्तिरीयकास्त्वेवं समामनन्ति—"देवान् वै पितॄन् प्रीतान् मनुष्याः पितरोऽनुप्रपिपते"—इति तै० ब्रा० १.३.१०.४। 'द्विविधा हि पितरः, देवात्मका मनुष्यात्मकाश्च'—इत्यादि सायणीयं भाष्यञ्चात्र द्रष्टव्य मिति, दिक् ॥

Padumawati, Face. 1-4 @ 2/	Rs.	8	0
Paricişta Parvan, (Text) Fasc. 1-5 @ /6/ each...		1	14
Prāk ta-Paingalam, Fasc. 1-7 @ /6/ each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prāk ta Lakşaṇam, (Text) Fasc. 1		1	8
Parācara Smriti, (Text) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6 ; Vol. III, Fasc. 1-6 @ /8/ each		7	8
Parācara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10 ; II, 1-6 ; III, 1-7 ; IV, 1-6 ; V, 1-8 @ /8/ each Fasc....		12	6
Sānkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Shaddarsana-Samucchchaya, Fasc. 1 , ...		0	6
Sraddha Kriya Kaumudi, Fasc. 1-6		2	4
*Sucruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
Suddhi Kaumudi, Fasc. 1-4		1	8
*Taittereya Saṁhitā, (Text) Fasc. 22-45 @ /6/ each		9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each		7	2
Tantra Vartika (English) Fasc. 1-6 @ /12/		4	8
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each		14	4
Tattvarthadhigama Sutrom, Fasc. 1-3		1	2
Trikānda-Maṇḍanam, (Text) Fasc. 1-3 @ /6/		1	2
Tul'si Satsai (Text) Fasc. 1-5 @ /6/		1	14
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1-8 @ /6/ each ...		3	0
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Vallala Carita, Fasc. 1		0	6
Varsa K yā Kaumudi, Fasc. 1-6@ /6/		2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6 ; Vol. II, Fasc. 1-7 , @ /6/ each		4	8
Vidhano Parigata, Fasc. 1-7		2	10
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each		2	10
V hat Sayambhū Purāṇa, Fasc. 1-6		2	4
Tibetan Series.			
Pag-Sam Thi Śiñ, Fasc. 1-4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 2-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6 @ 1/ each		14	0
Rtogs brjod dpag tkhari Śiñ (Tib. & Sans.) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each		9	0
Arabic and Persian Series.			
'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /8/ each		4	14
Al-Muquaddasi (English) Vol. I, Fasc. 1-3 @ /12/		2	4
Ain-i-Akbari, (Text) Fasc. 1-22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each		37	0
Ditto (English) Vol. I, Fasc. 1-8 ; Vol. II, Fasc. 1-2 @ 1/ ...		10	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /8/ oach		7	2
Catalogue of Arabic Books and Manuscripts 1-2		2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc 1-21 @ 1/ each		21	0
Farhang-i-Rashidi, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Tūsi, or, Tūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each		3	0
Futūh-ush Shām of Wāqidi, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto of Āzādi, (Text) Fasc. 1-4 @ /8/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1-3 @ /6/ each		1	2
Isābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Masīr-ul-Umarā, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-9 ; Vol. I I. Fasc. 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc 10-12 ; Index to Vol. III, Fasc. 11-12 ; @ /6/ each		13	2
Maghāzi of Wāqidi, (Text) Fasc. 1-5 @ /6/ each		1	14

The other Fasciculi of these works are out of stock, and complete copies cannot be supplied,

Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /6/ each ...	Rs	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āṣir-i-Ālamgīrī, (Text) Fasc. 1–6 @ /4/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's -Khiradnāmah-i-Iskandari, (Text) Fasc. 1–2 @ /12/ each ...		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto Ditto (English) Fasc. 1–5		3	12
Tabaqāt-i-Nāgirī, (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārikh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each ...		2	10
Tārikh-i-Firūshāhi, of Shams-i-Sirāj Alif, (Text) Fasc. 1-5 @ /6/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Tuzuk-i-Jahāngīrī, (English) Fasc. 1		0	12
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each ...		6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each	20	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No. ; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N. S., Vol. I, No. 1, 1905, @ 1-8 per No. to members ana Rs. 2/ per No. to Non-members.		
5.	Memoirs Vol 1, No 1,4,5 @ 1/8 to non members and to members ...	1	2
	Ditto No. 2 @ 1/ Ditto Ditto ...		12
	Ditto No. 3 @ 2/ Ditto Ditto ...	1	8
6.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
7.	Anīs-ul-Musharrahīn	3	0
8.	Catalogue of Fossil Vertebrata	3	0
9.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
10.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each ...	32	0
11.	Jawāmlu-l-'il.a ir-riyyāḍī, 168 pages with 17 plates, 4to. Part 1 ...	2	0
12.	Khizānatu-l-'ilm	4	0
13.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
14.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III with 8 colored plates, 4to. @ 6/ each	18	0
15.	Sharaya-ool-Islām	4	0
16.	Tibetan Dictionary, by Csoma de Körös	10	0
17.	Ditto Grammar ,, ,, ...	8	0
18.	Kacmīracabdāmṛita, parts I and II @ 1/8/	3	0
19.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
20.	Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0
21.	Persian Translation of Hāji Bābā of Ispāhān, by Hāji Shaikh Ahmad-i-Kirmāsi and edited with notes by Major D. C. Phillott.	10	0
	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by *Dr.* R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

16-9-06.

BOOKS ARE SUPPLIED BY V.-P.-P.

BIBLIOTHECA INDICA :

A

Collection of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NO. 1159.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRÂHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SÂYAṆA ÂCÂRYA.

EDITED BY

ÂCÂRYA SATYAVRATA SÂMAS'RAMÎ.

VOL. II, FASCICULUS V.

CALCUTTA :

PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1906.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS Mr. BERNARD QUARITCH, 15, Piccadilly, London, W., and Mr. Otto Harrassowitz, Bookseller, Leipzig, Germany

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.		
*Advaita Brahma Siddhi, (Text) Fasc. 2,4 @ /6/ each ...		0	12
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-8 @ /6/		8	10
Aphorisms of Sāṇdilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Acvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each		10	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1		1	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1-2		0	12
Baudhayana Srauta Sutra, Fasc. 1-3 @ /6/ each		1	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5		1	14
Bṛhaddēvatā, (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-3		1	2
Çatadusani, Fasc. 1-2		0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-5, Vol III Fasc 1-7 ...		7	2
Çatasahasrika-prajñāpāramitā, (Text) Part I, Fasc. 1-12 @ /6/ each ...		4	8
*Caturvarga Chintāmani, (Text) Vo's. II, 1-25 ; III. Part I, Fasc. 1-18, Part II, Fasc. 1-10 @ /6/ each ; Vol. IV, Fasc. 1-5		21	12
Çlokāvārtika, (English) Fasc. 1-5		3	12
*Çrauta Sūtra of Apastamba, (Text) Fasc. 6-17 @ /6/ each ...		4	8
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 @ /6/ each; Vol 4, Fasc. 1		0	0
Çri Bhāshyam, (Text) Fasc. 1-3 @ /6/ each		[illegible]	
Dan Kriya Kaumundi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7		2	10
Ditto Ācārasāra, Vol II, Fasc. 1.		0	6
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-4, @ /6/ each		0	6
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ /6/ each		1	2
Mārkaṇdeya Purāṇa, (English) Fasc. 1-9 @ /12/ each		6	12
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-19 @ /6/ each		4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /8/		2	4
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /6/ each		3	0
Nityacarapaddhati Fasc. 1-7 (Text) @ /6/		2	10
Nityacarapradiph, Fasc. 1-6		2	4
Nyāyabinduṭīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1,6, Vol. II, Fasc. 1-3 @ /6/ each		3	6

BIBLIOTHECA INDICA:
A
Collection Of Oriental Works

PUBLISHED BY
THE ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NOS. 1131, 1132, 1133, 1158 & 1159.

THE CATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCHĀRYA

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAŚRAMĪ,
Associate Member of the Asiatic Society of Bengal; Editor, Author, Commentator, Annotator, Compiler, Translator, & Publisher of different Vedic Works &c. &c.

VOL. II. KANDA II.

CALCUTTA:
PRINTED BY HITAVRATA CHATTOPADHYAYA, SATYA-PRESS.
1906.

॥ शतपथब्राह्मणम् ॥

(शुक्लयजुर्वेदस्य माध्यन्दिनशाखीयम्)

श्रीमत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्येण सहितम् ।

वङ्गदेशीयास्थायितिकसमितेरनुमत्या व्ययेन च,

सामग्रमीत्युपनामाचार्यसत्यव्रतशर्म्मणा

यथामति संशोध्य सटीक्य च सम्पादितम् ।

॥ २ भा० । २ का० ॥

(द्वितीयकाण्डात्मको द्वितीयो भागः)

कलिकाता-राजन्वत्याम ,

१८६३-संवत्समायां सत्ययन्त्रेण यन्त्रतो मुद्रितम् ॥

॥ सम्पादकोक्तिः ॥

अथ यद्यपि शतपथ-द्वितीयकाण्डीय-सायणाचार्यकृत-भाष्यस्य विशुद्धैकपुस्तकस्यापि लाभाय बहु यतितम्, क्रमव्यत्यासदोष मुररीकृत्यैवैतत्सम्पादनतः पूर्व मेव द्वितीयकाण्डं सम्पादितञ्च, इत्थं तथापि न कथमपि फलितं मे मनोरथद्रुमेण; न ह्याद्याप्यभिलषित-रूप मेक मपि तत्पुस्तक मवापीति; तदनन्यगत्या बहुशुद्धाना-दर्शानेवावलम्ब्यातिश्रमतः कष्टतश्च समपाद्येतदद्य ससंशोधनम्।

तदेतद्द्वितीयकाण्डस्य पाठान्तरादिस्थानबोधनाय सङ्गृहीतानां तेषा मादर्शपुस्तकाना मेवं नामधेयानि कल्पितानि—

क = ३५३-पत्रात्मकम्, १६८६-संवल्लिखितम्, पूर्णम्।

ख = १०८-पत्रात्मकम्, १६५८-संवल्लिखितम्, पूर्णम्।

ग = डा०-वेबर-सम्पादितम्, खृ०-१८४८-बार्लिन्मुद्रितम्, पूर्णम्।

घ = अजमेर-वैदिकयन्त्रालये १८५८-संवन्मुद्रितम्, पूर्णम्।

ङ = ८३-प०, स्याद् द्विशताब्द्यधिककालीनम्, पूर्णम्।

च = डा०-वेबरेणाविलुप्ताक्षराणि विचित्य समाहृतं ग-मुद्रितम्।

छ = २१-पत्रात्मकम्, १८२६-खृ०-लिखितम्, पूर्णम्।

ज = श्रीरामपुरकलेजीयन्तु 'च'तोऽविभिन्न मिति परित्यक्त मिव।

एतेषु अष्टस्वादर्शपुस्तकेषु कादीनि चत्वारि मूलस्थ, अपराणि भाष्यस्येति वेद्यम्। किञ्च ग-पुस्तक मवलम्ब्यैव मुद्रितं घ-पुस्तकं गम्यत इति तयोरेकत्व मेव तत्वतः।

एतस्मिन् हि काण्डे अग्न्याधानम्, पुनराधानम्, पवमानेष्ट्यादि, अग्निहोत्रम्, पिण्डपितृयज्ञः, आग्रयणेष्टिः, दाक्षा-

यणेष्टिर्वसिष्ठेष्टिर्वा , चातुर्मास्यानि च समाम्नातानि । वैश्वदेव-यागः , वरुणप्रघासयागः साकमेधयागः , पितृयागः , त्र्यम्बक-यागः, शुनासीर्यश्च चातुर्मास्यावयवभूता एवेति तेऽपीहैव विहिताः । सर्व एवैते यागा आधानानन्तरभाविन इति अग्न्याधान-पुनराधा-नयोः सर्वपूर्ववर्त्तित्वेनेह विधान माम्नातम् । अग्निहोत्रं हविर्यज्ञानां प्रकृतिरिति पिण्डपितृयज्ञादीना मिहाप्राधान्यम् । चातुर्मास्य-यागो भवति त्रिपर्वा ; तत्र तस्य वैश्वदेवाख्यं प्रथमं पर्व , वरुण-प्रघासाख्यं द्वितीयम् , साकमेधाख्यं तृतीयम् , पितृयज्ञस्त्र्यम्बक-हविःशुनासीर्याणां तु तदङ्गत्वम् । अपि वा चतुष्पर्वैष चातुर्मास्ययागः , तत्र शुनाशीर्यं चतुर्थं पर्व , परं न तस्या-नुष्ठानस्य वैश्वदेवादेरिव कालनियम इत्येव विशेषः । तदत्र "अवश्यं ह वै सुकृतम् (५प्र० ४ब्रा०)"–इत्यस्य सायणीयं भाष्यं द्रष्टव्यम् । तदेव माधानपुनराधानयोः सर्वकर्मसु व्यवहार्यत्वात् सर्वकर्मतः पार्थक्य मिति सर्वतो भिन्नत्व मङ्गीकृतम् , ततोऽन्या-वग्निहोत्रचातुर्मास्यावेवेह प्रधानतो विहितावित्येव मन्तव्यम् । अत एवोक्तं श्रीमता सायणाचार्येण तृतीयकाण्डीयभाष्योपक्रमे—

"आधानपुनराधाने अग्निहोत्रं ततः परम् ।
चातुर्मास्यानि सपशु द्वितीयकाण्ड ईरितम्"–इति ॥

अथैतस्य द्वितीयकाण्डस्य सायणीयं भाष्यं तु सर्वथैवाकिञ्चित्कर मेव ; तत्रापि द्वितीयाध्यायादीनां तु टीप्पन्येवाकारि , न भाष्यम् । तदाह च तत्र स स्वय मेव , ५८ पृष्ठस्य १६ पङ्क्तितो द्रष्टव्य मिति शम् ॥

कालीकोठा-नाम-राजन्वती ।
संवत् १९६३। खृ० १९०६ ।

श्रीसत्यव्रतशर्म्मा ।
(आवसथः सामश्रमी , आचार्यश्च)

॥ अथ मूलशुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	प्र० ब्रा० क०	पृष्ठे
न्निर्भच्यास ...	निर्भच्यास ...	१ १ ८ ...	३
व्यृद्धा ...	व्यृद्धा ...	१ २ ४ ...	१४
गुह्य ...	गुह्यं ...	१ २ ११ ...	१५
०रिष्यते ...	०निष्यते ...	१ ४ १५ ...	३६
कुमाराय ...	कुमाराय वा ...	१ ५ १ ...	५३
०ज्वल० ...	०ज्वल० ...	१ ५ ८ (द्विः) ...	५४
दत्र ...	०दत्रं ...	१ ५ ११ ...	५५
बर्हिषि ...	बर्हिषी ...	१ ५ १६ ...	५७
ऋतून् ...	ऋतून् ...	२ १ ११ ...	७८
प्रविश० ...	प्राविश० ...	२ १ १४ ...	७८
च्चचक्रुस्ते ...	च्चक्रुस्ते ...	२ २ १६ ...	८६
मेवैत् ...	मेवैतत् ...	२ ३ ४ ...	१०५
हि ...	हि ...	२ ३ १३ ...	१०८
०सर ...	०सरां ...	२ ३ १७ ...	१०८
दून्द्व्य ...	द्वन्द्व्य ...	२ ३ २३ ...	१११
चाशाद् ...	चाशा ...	२ ३ २४ ...	१११
०व्यदनद्धो ...	०व्यदनद्धो ...	२ ३ २५ ...	१११
०माथे ...	मभि ...	२ ३ २८ ...	११२

स्वोहुति	...	स्वाहेति	...	२	३	३२	...	११२
अथः	...	अथ	...	२	३	३३	...	११३
सिति	...	मिति	...	२	४	११	...	१३१
मनुष्यार्णा	...	मनुष्याणां	...	३	४	६	...	१८१
मजयत्	...	मजपत्	...	४	३	२७	...	२७८
वारुण्ये	...	वारुण्यै	...	४	३	३७	...	२८२
मदायो	...	मादायो	...	४	४	११	...	३१८
गृहप्रेधिभ्यो	...	गृहमेधिभ्यो	...	४	४	१४	...	३२०
तिष्ठन्त वहन्ति		तिष्ठन्तवहन्ति	...	५	२	८	...	३४५
जहोति	...	जुहोति	...	५	२	११	...	३४५
यज्ञपवीती	...	यज्ञोपवीती	...	५	२	१२	...	३४६
सन्तहन	...	सन्नहन	...	५	२	१५	...	३४७
प्रस्तर भाजनं		प्रस्तरभाजनं	...	५	२	१५	...	३४७
देती मए	...	देतीमए	...	५	२	१५	...	३४७
चर०	...	चर०	...	५	२	२३	...	३४८
राज्जस्या	...	राज्यस्या	...	५	२	२८	...	३५०
प्रयछति	...	प्रयच्छति	...	५	२	३३ (द्विः)	...	३५२
ऽहति	...	ऽहुति	...	५	२	३३	...	३५२
ज्योक्य	...	ज्योक् च	...	५	२	३८	...	३५४
रुद्रियेण	...	रुद्रियेण	...	५	३	१८	...	३८०
चुरः	...	चुरः	...	५	५	५	...	४२१

॥ अथ ॥

शतपथब्राह्मण-द्वितीयकाण्डस्य

सूचीपत्राणि।



॥ अथ प्रपाठकसूची ॥

अथ प्रथमः प्रपाठकः (स यदा इतश्चेतश्च १ अ० १ ब्रा०) ... १९०
अथ द्वितीयः प्रपाठकः (वरुणो हैनद्राज्यकाम २ अ० ३ ब्रा०) ... ७५
अथ तृतीयः प्रपाठकः (यत्र वै प्रजापतिः ३ अ० ३ ब्रा०) ... १३६
अथ चतुर्थः प्रपाठकः (प्रजापतिर्ह वा इदमे० ४ अ० ४ ब्रा०) ... २२८
अथ पञ्चमः प्रपाठकः (महाहविषा ह वै ४ अ० ४ ब्रा०) ... ३३४

॥ अथाध्यायसूची ॥

अथ प्रथमाध्यायः (स यदा इतश्चेतश्च १ प्र० १ ब्रा०) १९०
अथ द्वितीयाध्यायः (उद्धृत्याहवनीयं १ प्र० ५ ब्रा०) ५३
अथ तृतीयाध्यायः (सूर्यो ह वा २ प्र० ३ ब्रा०) १०५
अथ चतुर्थाध्यायः (अथ हुतेऽग्निहोत्रे ३ प्र० ३ ब्रा०) १८०
अथ पञ्चमाध्यायः (प्रजापतिर्ह वा इदमे ४ प्र० २ ब्रा०) २५०
अथ षष्ठाध्यायः (महाहविषा ह वै ५ प्र० २ ब्रा०) ३४३

॥ अथ ब्राह्मणसूची ॥

सङ्ख्या	ब्राह्मणनाम	प्रपाठकस्य	अध्यायस्य	पृष्ठे
१ ...	सम्भारब्राह्मणम् ...	१प्र० १ब्रा०	... १अ० १ब्रा० ...	१
२ ...	नक्षत्रब्राह्मणम् ...	१प्र० २ब्रा०	... १अ० २ब्रा० ...	१३
३ ...	ऋतुब्राह्मणम् ...	१प्र० ३ब्रा०	... १अ० ३ब्रा० ...	२७
४ ...	अग्न्याधानब्राह्मणम् ...	१प्र० ४ब्रा०	... १अ० ४ब्रा० ...	३१
५ ...	पवमानेष्टिब्राह्मणम् ...	१प्र० ५ब्रा०	... २अ० १ब्रा० ...	५३
६ ...	दक्षिणाब्राह्मणम् ...	१प्र० ६ब्रा०	... २अ० २ब्रा० ...	६३
७ ...	पुनराधेयब्राह्मणम् ...	२प्र० १ब्रा०	... २अ० ३ब्रा० ...	७५
८ ...	सृष्टिब्राह्मणम् ...	२प्र० २ब्रा०	... २अ० ४ब्रा० ...	६२
९ ...	अग्निहोत्रधर्म्मब्राह्मणम्	२प्र० ३ब्रा०	... ३अ० १ब्रा० ...	१०५
१० ...	अग्निहोत्रब्राह्मणम् ...	२प्र० ४ब्रा०	... ३अ० २ब्रा० ...	१२८
११ ...	उपस्थानब्राह्मणम् ...	३प्र० १ब्रा०	... ३अ० ३ब्रा० ...	१३९
१२ ...	तदेव ...	३प्र० २ब्रा०	... ३अ० ४ब्रा० ...	१५१
१३ ...	क्षुद्रकोपस्थानब्राह्मणम्	३प्र० ३ब्रा०	... ४अ० १ब्रा० ...	१८०
१४ ...	पिण्डपितृयज्ञ-ब्राह्मणम्	३प्र० ४ब्रा०	... ४अ० २ब्रा० ...	१९०
१५ ...	आग्रयणब्राह्मणम् ...	३प्र० ५ब्रा०	... ४अ० ३ब्रा० ...	२१४
१६ ...	दाक्षायणब्राह्मणम् ...	४प्र० १ब्रा०	... ४अ० ४ब्रा० ...	२२८
१७ ...	वैश्वदेवब्राह्मणम् ...	४प्र० २ब्रा०	... ५अ० १ब्रा० ...	२५०
१८ ...	वरुणप्रघासब्राह्मणम् ...	४प्र० ३ब्रा०	... ५अ० २ब्रा० ...	२७२
१९ ...	शाकमेधब्राह्मणम् ...	४प्र० ४ब्रा०	... ५अ० ३ब्रा० . .	३१५
२० ...	महाहविर्ब्राह्मणम् ...	५प्र० १ब्रा०	... ५अ० ४ब्रा० ...	३३४
२१ ...	पितृयज्ञब्राह्मणम् ...	५प्र० २ब्रा०	... ६अ० १ब्रा० ...	३४३
२२ ...	त्र्यम्बकहविर्ब्राह्मणम् ...	५प्र० ३ब्रा०	... ६अ० २ब्रा० ...	३८५
२३ ...	शुनासीर्यब्राह्मणम् ...	५प्र० ४ब्रा०	... ६अ० ३ब्रा० ...	४०४
२४ ...	चातुर्मास्यफलब्राह्मणम्	५प्र० ५ब्रा०	... ६अ० ४ब्रा० ...	४२०

॥ अथ कण्डिकासूची ॥

कण्डिकाप्रतीकम् .	पृष्ठं
अच्छय्य२ ह वै सुक्रतं ...	४०४
अग्नेयेऽनुब्रूहीति। आग्नेय ०—० स दक्षिण ...	३१७
अग्नेयेऽनुब्रूहीति। आग्नेय ०—० स स्थाल्यै ...	३१६
अग्निर्मूर्द्धा दिवः। ककुत् ...	१५४
अग्नौ ह वै देवाः। सर्वाणि	७५
अग्नौ ह वै देवाः सर्वान् ...	१५१
अथ काय एककपालः ...	२७५
अथ केशश्मश्रूणा समारोह्य	२८६
अथ केशश्मश्रूणा समारोह्य	३६०
अथ गा अभिमन्थति ...	१५६
अथ गा मर्भयंति। अन्वस्थान्यो	१५८
अथ गा मर्भयंति। इड एत्यदिति	१६१
अथ गार्हपत्य मर्भयंति ...	१५६
अथ गार्हपत्य सुपतिष्ठते ...	१८१
अथ चतुरवत्तयति । चतुर्हो	१०६
अथ चातुर्ह्याय्य मोदनं ...	३२
अथ जाग्रति जाग्रति देवाः	३३
अथ दक्षिणान्वाहूनन्वावर्त्तन्ते	३६०
अथ दक्षिणेनान्वाहार्यपचनं	३४५
अथ दिशो व्याघारयति ...	२४५
अथ दीक्षेत। तं नानीज्ञानं	४०७

कण्डिकाप्रतीकम् .	पृष्ठ
अथ द्यावापृथिव्य एककपालः	२५४
अथ द्विपदाः। अग्ने त्वं ...	१६०
अथ द्विपदाः। पुरुष ...	१६०
अथ हे पिप्पीलिके वा पात्रौ वा	३१७
अथ नीवि सृदृह्य नमस्करोति	१६६
अथ नीवि सृदृह्य नमस्करोति	३५५
अथ पराङ् पर्य्यावर्त्तते ...	१६५
अथ पितृभ्योऽग्निष्वात्तेभ्यः	३४४
अथ पितृभ्यो बर्हिषद्भ्यः ...	३४४
अथ पुत्रस्य नाम गृह्णाति ...	१६३
अथ पुनःप्रयुञ्जानस्य ...	४०७
अथ पुनः प्रसवि चिः ...	३८८
अथ पुनरेत्य जपन्ति ...	३८७
अथ पुरस्तात्परीत्य। पूर्वार्द्ध	३६
अथ पुरस्ताद्वलमुकं निदधाति	१६३
अथ पूर्वेद्युः। अन्वाहार्यपचने	२७५
अथ प्र वा व्रजति प्र वा ...	१८१
अथ प्र वा व्रजति प्र वा	१८२
अथ प्रति परेत्य गार्हपत्य ...	३५४
अथ प्रतिप्रस्थाता प्रतिपरेति	२७७
अथ प्रवत्स्यन्। गार्हपत्य ...	१८०
अथ प्रातः। अनग्निमत्वा मुहूर्त्तं	१२६
अथ प्रातः। आग्नेयः०—० पुरो-	

कण्डिकाप्रतीकम् .	पृष्ठं
डाग्नोऽथ या मेवासूं ...	२३३
अथ प्रातः । आग्नेयः०—० पुरो-	
डाग्नोऽथैतावेवाईमासौ	२३३
अथ प्रातः । आग्नेयः पुरोडाग्नो	
भवति मैत्रावरुणी ...	२३१
अथ प्रातः । आग्नेयः पुरोडाग्नो	
भवत्यैन्द्र२ सान्नाय्यं ते दे	२३०
अथ प्रातः । आग्नेयः पुरोडाग्नो	
भवत्यैन्द्र२ सान्नाय्यं प्रातः	२३१
अथप्रातः । ज्योतिः सूर्यः ...	११३
अथ प्रातः । मनुर्दैवेन ...	११४
अथ प्रातः । सूर्यो ज्योतिर्	११३
अथ प्रातर्हूते वाहुते वा ...	३२१
अथ मरुद्भ्यः क्रीडिभ्यः ...	३२२
अथमरुद्भ्यः सान्तपनेभ्यः ...	३१६
अथ मरुद्भ्यो गृहमेधिभ्यः	३१६
अथ माहेन्द्रश्चरुर्भवति । इन्द्रो	३३६
अथ यः कामयेत । चत्व२ ...	२८
अथ यः कामयेत । बहु ...	२८
अथ यः पुरादित्यस्यास्तमयात्	१०६
अथ य एष एकोऽतिरिक्तो ...	३८७
अथ य एष सभाया मग्निः ...	१२६
अथ यतरो दद्यात् । स पुनः	३५५
अथ यतरो दास्यन् भवति ...	३५२
अथ यत् पूर्व्वेद्युः । अग्नीषोमीयेण	
०—० ते दे देवते ...	२३०

कण्डिकाप्रतीकम् .	पृष्ठं
अथ यत् पूर्व्वेद्युः । अग्नीषोमीयेण	
०—० य मेवासु	२३१
अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन	
०—० तृतीय सवने ...	२३१
अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन	
०—० ते दे देवते ...	२३१
अथ यत् पूर्व्वेद्युः । ऐन्द्राग्नेन	
०—० दर्शपूर्णमासयो ...	२३३
अथ यत् पौर्णमासश्चरुर्भवति ...	३३५
अथ यत्रैतदङ्गारावाकाशयन्त	१३१
अथ यत्रैतत्प्ररितरा मिव ...	१३१
अथ यत्रैतत्प्रदीप्ततरो	
भवति । उच्चैर्धूमः ...	१३१
अथ यत्रैतत्प्रदीप्ततरो	
भवति । तर्हि हैष ...	१३०
अथ यत् प्रातरनुदिते जुहोति ।	
अस्य रसस्य जीवनस्य	१०७
अथ यत् प्रातरनुदिते जुहोति ।	
प्रजनयत्येवैनं	१०५
अथ यत्साकमेधैर्यजते ...	४९१
अथ यत्सावित्रः । द्वादश ...	३३५
अथ यत्सारस्वतश्चरुर्भवति	३३५
अथ यत्सौम्यश्चरुर्भवति ...	३३५
अथ यदग्नय इन्दुमते ...	८१
अथ यदग्नये पवमानाय ...	८१
अथ यदग्नये पावकायय निर्व्वपति	५५

कण्डिकापदौकम् .	पृष्ठं
अथ यदग्नये शुचये निर्वपति	५५
अथ यदस्तमेति । तदग्नावेव ...	१०५
अथ यदेष एतेन यजते ...	२१७
अथ यदेष एतेन यजते । तन्नाह	३४३
अथ यदेष एतैर्यजते । तन्नाह	३८५
अथ यदेष एतैश्चतुर्थे मासि	२७३
अथ यदरुणप्रघासै-	४२१
अथ यत्साकमेधैर्यजते	४२१
अथ यस्माच्छ्नाभीर्यैग	४०४
अथ यस्मादुपैव तिष्ठति उतवै	१५३
अथ यस्मादुपैव तिष्ठति यज्ञो वै	१५२
अथ यस्मान्न कृत्तिका	१३
अथ यस्मान्न रुद्रगृहीर्षे ...	१५
अथ यस्मान्नोपतिष्ठति यज्ञो वै	१५२
अथ यस्मान्नोपतिष्ठति यो वै	१५२
अथ या मेतार्२ समिध	१४३
अथर्षभ माहुवितवै ब्रूयात ...	३२१
अथ वाजिभ्यो वाजिनं जुहोति	२३४
अथ वायव्यं पयो भवति ...	४०६
अथ वैश्वकर्म्मण एककपालः	३३६
अथ शर्कराः समभरति ...	३
अथ श्नाभीर्यो द्वादशकपालः	४०५
अथ सन्नदाच्छिन्ना	१६४

कण्डिकापदौकम् .	पृष्ठं
अथ सन्नहन मनुविस्रंस्य ...	३४७
अथ सर्पराज्ञ्या ऋग्मि-	४०
अथ सादयित्वा सुचौ ...	३५६
अथ सारस्वतश्चरुर्भवति ...	२५२
अथ सावित्रः । द्वादशकपालो	२५२
अथ सावित्री । सविता ...	१६२
अथ सौम्यश्चरुर्भवति । रेतो वै	२५२
अथ सौर्य एककपालः	४०६
अथ स्वाहाग्नि मित्याह ...	८०
अथ हिरण्यर्२ सम्भरति ...	२
अथ हुतेऽग्निहोत्र उपतिष्ठते	१८०
अथ हैनर्२ प्रत्यवदन्त्यसुरा ...	१६१
अथ होवाच । अन्वाऽहं ...	१६
अथाश्वकरीषर्२ समभरति ...	३
अथाग्नये पावकाय निर्वपति	५४
अथाग्नये शुचये निर्वपति ...	५४
अथार्द्रौदाहानुप्रहरति ...	२८४
अथार्द्रौदाहानु प्रहरेति ...	३५७
अथार्द्रयौ । तदग्नय	१६२
अथातः पयस्याया एवायतनम्	२५६
अथातः पयस्येव । पयसो वै ...	२५४
अथातः परिवर्तनस्येव ...	४०८
अथात आदृदेव । नोपकिरन् ...	२५५
अथातो ग्रहाणा मेवोपचारः ...	१८६
अथादित्ये चरुं निर्वपति ...	५७
अथाद्भिरभ्युक्षति	२

कण्डिकाप्रतीकम् .	पृष्ठं
अथाध्वर्युरेव कायेन ...	... २८३
अथाध्वर्युरेव प्रतिपरेत्य	... २८५
अथाध्वर्युरेव प्राग्निच	... २८३
अथाध्वर्युरेवाह ब्रह्मन्	... २८३
अथाध्वर्युरेवाह वरुण ...	... २८२
अथाध्वर्युरेवाह सोमाया-	... २८१
अथाध्वर्युरेवाहाग्नये ...	... २८०
अथान्तरेणाहवनीयं च	... १६१
अथाप्रसलवि चिः परियन्ति	३८८
अथायमन्यतोमुखः पुरुषः	... ४०८
अथाश्व न होतारं प्रवृणीते	३४८
अथाश्व माक्रमयति	३८
अथासीनः। म त्व मग्ने	... १५८
अथास्य पुरोडाशस्यावदाय	... ३५३
अथाह पितृभ्यः सोमवद्भ्यो	३४६
अथाह पितृभ्यो बर्हिषद्भ्यो	... ३५१
अथाह पितृभ्यो बर्हिषद्भ्यो	... ३५०
अथाह ब्रह्मन् प्रस्थास्यामि	... ३५६
अथाह मरुद्भ्यो गृहमेधिभ्य	
०—० स उपस्तृणीत	... ३२०
अथाह मरुद्भ्यो गृहमेधिभ्य	
०—० स दक्षिण ...	... ३१८
अथाहवनीय सुप्रतिष्ठते	
प्राश्य प्राशन् मे ...	... १८०
अथाह संवदस्वेति	
०—० ब्रूहीत्यध्वर्युरेव	... २८५

कण्डिकाप्रतीकम् .	पृष्ठं
अथाह संवदस्वेति०—०	
ब्रूहीत्युपस्तृत्य व ...	... ३५७
अथाह सोमायानुब्रूहीति	
०—० स उत्तरस्यौदनस्य	३१८
अथाह सोमयानुब्रूहीति	
०—० स स्याल्यामेव	... ३२०
अथाहाग्नये कव्यवाहनाय	... ३५१
अथाहाग्नयेऽनुब्रूहीति।	
अग्निं यजाग्नये	८१
अथाहाग्नयेऽनुब्रूहीति।	
आग्नेय माज्यभागं	८०
अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति।	
०—० स उपस्तृणीत ...	३२०
अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति।	
०—० स उत्तरस्यौदनस्य	३१८
अथेडा मेवावद्यति न प्राग्निचम्	३२०
अथेदं द्वितीयम्। आग्नेय ...	५८
अथेदं द्वितीयम्। तूष्णी ...	३६
अथेदं द्वितीयम्। सैव स्त्रीणां	३१८
अथैभ्य मभ्यादधाह।	३४८
अथैतदेव परोऽक्षम्	७७
अथैतान्यजमानोऽञ्जलौ ...	३८६
अथैतान्येव पञ्च हवींष्यभि	... २७४
अथैतान्येव पञ्च हवींष्यभि	... ४०५
अथैताभ्यां पयस्याभ्यां	... २८६
अथैनं देवाः। अन्तरात्मन्नादधत	६९

कण्डिकाप्रतीकम् .	पृष्ठे
अथैन मग्निर्वाक्तिनोपयर्य्याववर्त्त	६२
अथैनं पशव उपासीदन् ...	१६१
अथैनं पितरः। प्राचीनावीतिनः	१६०
अथैनं मनुष्याः। प्राहृता ...	१६१
अथैनां वाचयति	२८०
अथैन्द्राग्नी। उभा वा ...	१५४
अथैन्द्राग्नी। द्वादशकपालः ...	२७४
अथैन्द्राग्नो द्वादशकपालः ...	३३५
अथ न्द्री। इन्द्रो वै यज्ञस्य ...	१६२
अथैन्द्रीं मरुत्वतीं जपति ...	२७६
अथोदपात्र मादाय०—०	
तद्यथाऽग्निष्यते	१६४
अथोदपात्रमादाय। पुनः ...	३५५
अथोदपात्र मादाय०—०	
तद्यथा जत्रुषेऽभिषिषेदेवं	१६५
अथोपपल्प्याय जपति	१६५
अथोल्लिखति	१
अथोषान्तसम्भरति	२
अधिश्रित्यैव जुहुयात् ...	१०८
अनेनैव जुहुयात्। सर्जुर्देवेन	११४
अन्तरेणागाद् यद्यतदिति ...	६७
अभयो ह वा एषता अन्नाद्यस्य	१३२
अयं वै यज्ञो योऽयं पवते ...	३७
अयं ते योनि र्त्वियः	१५५
अय मिह प्रथमः। धायि ...	१५५
अर्कपलाशाभ्याम्। यवमय ...	७६

कण्डिकाप्रतीकम् .	पृष्ठे
अर्कपलाशाभ्याम्। व्रीहिमय	७८
अवभृथ निचुम्पुण	२८५
अष्टाकपालः सर्वे पुरोडाशा	५७
अस्य प्रत्नम्। अनुद्युतः ...	१५५
अर्हवैः देवाः। अनपहत- ...	३४
अहोरात्रे ह वा एऽअमुष्मि- ...	१४२
आग्नेय मेव पञ्चकपालं ...	७६
आग्नेयोऽयं यज्ञः। ज्योति ...	७७
आत्मैव जातम्। अङ्गा हि ...	१११
आत्मैव भूतम्। अङ्गा हि ...	१११
आत्मैवागतम्। अङ्गा हि ...	१११
आत्मैवाद्य। अङ्गा हि ...	१११
आदित्यस्त्वे सर्वऽऋतवः ...	७८
आसाद्य हवीरषग्निं मन्यति	२७७
आसाद्य हवीरषग्निं मन्यन्ति	२२५
इन्द्रो ह वा ऽईक्षाञ्चक्रे ...	१६
इन्द्वानाक्षा। घृतरः हिमा ...	१५७
उच्चैरुत्तम मनुयाजं	८०
उत्तरतो वाऽग्निहोत्रस्य ...	१४३
उद्धृत्याहवनीयं पूर्णाहुतिं ...	५३
उपवसथ ऽएवैन माहरेयुः ...	१३०
उभयत्र पयस्ये भवतः	२७४
एकं हे त्रीणि। चत्वारीति	१३

कण्डिकाप्रतीकम् .	पृष्ठे
एता ह वै देवता योऽग्नि ...	१२८
एता ह वै प्राच्यै दिशो ...	१३
एतेन वै देवाः । यज्ञमेष्ट्वा ...	३३६
एतेन वै देवाः । यज्ञमेष्ट्वोभयी	२१७
एतेन वै प्रजापतिः । यज्ञमेष्ट्वा	२५६
एतेन ह स्म वा ऋषयः ...	१५७
एतेषा मेकꣳ संवत्सर सुपेत्यैतं	१३२
एष उ वै प्राणः । तं वै तथैव	
०—० स्यात् ।	३७
एष उ वै प्राणः । तं वै तथैव० ०	
स्यात्तस्माद् तथैव हरेयुः ...	३८
ऐन्द्रीभ्या माहवनीय सुपतिष्ठन्ते	३५४
ऋतायुकर एव प्रतिपद्यताम्	२८१
ऋत्विक्खलमी ऽआदधीत ...	१३
केवलवर्हिः प्रथमꣳ हविर्भवति	५६
क्षत्रं वा ऽइन्द्राग्नी । विशो ...	२१६
ग्नस्ति वा ऽएतत्सत्रं । यदेतं तन्वते	६३
चतुर्विꣳशतिं दद्यात्	६४
चित्राया मग्नी ऽआदधीत ...	१६
चित्रावसो स्वस्ति ते	१५७
छाययेव वा अयं पुरुषः ...	७८
तं यत्र प्राच्यꣳ हरन्ति	३७
तं वै तथैव हरेयुः	३७
तं वै दर्भे कुहरति	७८
तं वै पुराणानां कुर्य्यादित्याहुः	२१६
तं वै खनतोभ्य इति कुर्य्यात्	२५३
तꣳ अप्रयति । तस्मिन्नधिश्रित	१६२
त ऽउ ह विश्वे देवा ऊचुः ...	२१६
त ऽउ हैत ऊचुः । वयं वै ...	६५
तत एतत् त्वष्टा पुनराधेयं ...	७६
ततो देवाः । तनीयाꣳस इव	६६
ततो देवा एते वज्रं दृढमगुः ।	३६
तत्र जपति । अत्र पितरो ...	१६५
तत्रापि मेषं च मेषीं च ...	२७६
तथो एवैष एतत्	४
तदवद्योतयति । इदं ...	१०८
तदाहुः । अमावैवैतत् ...	११३
तदाहुः । एता मेवाहुतिꣳ ...	५४
तदाहुः । दिरूपभृति यज्ञीयाद्	३४७
तदाहुः । न सर्परराज्ञा ऋग्भि	४०
तदाहुः । नैवैकयेन	४
तदाहुः । पर्य्याभूदा ऽअय ...	२१७
तदाहुः । यन्नर्च्या न मात्रा ...	३५
तदाहुः । षडेवर्तव:	४
तदाहुः । स मेवान्ये	१०८
तद् खलु तनूपा अग्नेऽसि ...	१५६
तदु ह्यपि कुमार्यः पदीषुः ...	३८८

कण्डिकाप्रतीकम् .	पृष्ठे	कण्डिकाप्रतीकम् .	पृष्ठे
तदु ह्याप्यरुण मौपवेशिं ...	६८	तद्धो सोमेनेजानाः । ते पितरः	३४४
तदु हैतदेवारुणये	११२	तदमलो ग्रीष्मो वर्षाः ...	३४३
तदु होवाच कहोडः	२१४	तदस्यैव प्रजननस्यैव	११२
तदु होवाच जीवलश्चैलकिः ...	११३	तदा एतत् । एव विचि- ...	६४
तदु होवाच भालुवेयः ...	३३	तदाऽएतत् । मासि-मास्येव	१६२
तदु होवाच याज्ञवल्क्याः ...	११०	तदा ऽएतदेवैतासां नाम ...	६६
तदु होवाच याज्ञवल्क्याः ...	२१४	तदा ऽएताः रात्रिम्	२३४
तदु होवाचासुरिः । आत्मा- ...	३४६	तदा ऽएत मेतदग्रे देवाना ...	६२
तदु होवाचासुरिः । किं नु ...	४०८	तदा ऽएष एव स्तुयः	१४०
तदेतत् समाहार्ष्यः	१५६	तदा ऽएष एवेन्द्रः । यदा ...	१२८
तदुग्ध्वाधिश्रयति । पृत ...	१०८	तदेतदेव महिपर्यस्त मिव ...	५५
तदु हय मेवैते ऽग्याहुती ...	१११	तदेव दधीत । अग्निर्वा- ...	१४
तद्धैके । एत मेव होचे मत्य	३५२	तदेव दधीत । न वा	१५
तद्धैकेऽज सुपवभ्रन्ति	३२	तदै देवाः शुश्रुवुः	२१५
तद्धैकेऽनुदिते मथित्वा ...	३४	तदै दे वेदी दावग्नी	२७३
तद्धैके । रात्रीरापिपयिषन्ति ...	४०७	तदै पञ्चैव भक्षयन्ति । होता	१३५
तद्धैके । हविरुच्छिष्ट मनु ...	३५७	तदै पय एवान्नम् । एतद् ...	२५१
तद्धोचुः । हन्त मां प्रतिष्ठां ...	३	तन्न साम्युदामयेत् । सामि ...	१०४
तद्यत् किञ्च वाचा	२८१	तन्त्वेवानवरुन्धं यो मनुष्ये ...	६२
तद्यचैतत्प्रथमꣳ समिद्धो ...	१३०	तन्मध्ये ऽग्निꣳ समादधाति ...	३४५
तद्यचैन मदो मन्यति ...	६७	त मन्थस्य पद ऽआधत्ते ...	३८
तद्यथा योनौ रेतो दध्यात् ...	६५	त माजगाम । सुम्ना मार्ज्मयो	२२६
तद्यथा शङ्कुभिश्चर्म	४	त समृद्धीप्य समिन्धे । इह ...	६७
तद्यदाहुः । माकमेधैवै ...	४२०	तयोरुभयोरेव करीरागया- ...	२६५
तद्यदायव्यं भवति । अयं ...	४०६	तयोरुभयोरेव शमीपलाशा-	२७५
तद्यन्मेषश्च मेषी च भवतः ...	२७६	तस्मादाहुः । एता मेवाहुतिꣳ	५४

कण्डिकाप्रतीकम् .	पृष्ठं	कण्डिकाप्रतीकम् .	पृष्ठं
तस्मादेतदधिगाभ्यनूक्तम् ...	१४०	तान्त्सार्धं प्राच्याश्च समुद्रास्य ...	३८६
तस्मादेतदधिगाभ्यनूक्तम् ...	२५१	ता सु ह्यग्निरभिदध्यौ ...	६६
तस्मै कं पुनराधेय मादधीत ...	७६	ता वरुणो जगाह । ता वरुण	२७२
तस्मै क मग्नी ऽउपतिष्ठेत ...	१५२	ता वा ऽएताः । षड् विभक्तिः ...	८२
तस्य परिचक्षा । यस्यै वै ...	२१६	ताविन्द्राग्नी ऽउदजयताम् ...	२१५
तस्य प्रथमजो गौर्दक्षिणा ...	२१८	ता वै षड् दद्यात् । षड् वा ऽऋतवः	६४
तस्य वा ऽएतस्याग्न्याधेयस्य ...	६८	तासा सुतासां मन्थोऽस्ति ...	३८८
तस्य सर्पिरासेचनं कृत्वा ...	३३	तेनोपाश्वसु चरन्ति । तिरइव	३४८
तस्य हिरण्यं दक्षिणा ...	८२	तेनोपाश्वसु चरन्ति । यद्वै ...	७६
तस्यां मिथुन मास्ते । योषा-	२५४	तेनो ह तत ईजे । दक्षः पार्वति	२३०
तस्याष्टत् । उपकिरन्त्युत्तर- ...	३३४	तेनो ह तत ईजे । देवभागः	२३०
तस्याष्टत् । नोपकिरन्त्युत्तर- ...	४०५	तेनो ह तत ईजे । प्रतीदर्शः ...	२२६
तस्याष्टत् । सैव स्त्रीर्णा वेदिः ...	३१७	ते वा अक्ताः स्युः । अक्तश्च ...	३८६
तस्याश्वश्वेतो दक्षिणा	४०७	ते वा ऽएत ऽऋतवः । उभय ...	२६
तस्यै धेनुर्दक्षिणा । धेनुरिव ...	५८	ते वा ऽएत ऽऋतवः । देवा ...	२७
तस्यै विराजौ संयाज्ये स्याता	५७	ते वा ऽएते प्राणा एव	६८
तां वाचयति । प्रघासिनो ...	२७७	ते वै प्रतिपुरुषं । यावन्तो ...	३८५
तां वै पूर्णां जुहोति	५३	ते वै रौद्रा भवन्ति । रुद्रस्य	३८५
ता ऽउभावेव सादयित्वा ...	२८४	तेषा सुपस्थानम् । यदेव सायं	१२६
ता एतेन ह्विषा प्रजापतिः ...	२७३	ते सर्व ऽएव प्राचीनावीतिनो	३४६
तानि दक्षिणोपस्तृणाति ...	१६४	ते सर्व ऽएव यज्ञोपवीतिनो भूत्वा । अनुयाजाभ्यां ...	३५६
तानि वै प्रतिपुरुषम्	२७८	ते सर्व ऽएव यज्ञोपवीतिनो भूत्वा । इत्याद्	३४७
तानु ह्याग्निर्निचक्रमे	१५१	ते सर्व ऽएव यज्ञोपवीतिनो भूत्वा । उदञ्च	३५३
तान्दूयोर्मृतकयोरुपनह्य ...	३८६		
तान्यु ह्याग्निर्निचक्रमे	७६		
तान्वा ऽएतान् । प्रच्च	४		

कण्डिकाप्रतीकम् .	पृष्ठे
ते स्तुत्वा प्राच्य उचक्रमुः ...	६५
ते ह देवा ऊचुः	१७
ते ह देवाः समेत्योचुः	१६
ते हुत्वा देवाः । इमां प्रजातिं	६७
ते होचुः । अथैनं वयं न्येव ...	६६
ते होचुः । आ वै वय मग्नौ ...	६६
ते होचुः । उभयेषु वै नोऽय मग्नौ	६६
ते होचुः । कस्य न इदं ...	२१५
ते होचुः । केन राज्ञा ...	४३०
ते होचुः । केनैव राज्ञा ०—० स ह वरुण ...	४२०
ते होचुः । केनैव राज्ञा ०—० स हेन्द्र	४२१
ते होचुः । को न इदृश् ...	११४
ते होचुः । भद्रं वा उदृक् ...	६५
ते होचुः । हन्तेदं मन्तव मन्तरा	६१
ते होचुः । हन्तेदं जुहवामहा	६६
त्रीणि समिष्टयजूंषि जुहोति	२५६
त्रीणि समिष्टयजूंषि भवन्ति	२८५
देवान् ह वा उग्नौ उग्राधास्य ...	३६
देवाश्च वा उसुराश्च ...	६५
दयं वा उदं जीवनम् ...	१०७
दया वै देवा ०—० स्तद्यथा ...	२१८
दया वै देवा ०—० स्तेषां ...	६५
द्वादश दद्यात् । द्वादश वै मासा	६४

कण्डिकाप्रतीकम् .	पृष्ठे
द्वादश वा त्रयोदश वाक्षराणि	८२
नव प्रयाजं भवति । नवानुयाजं	२५५
नवावसिते वैन माहरेयु ...	१३०
नाना ह वा उदृतान्यग्ने ...	१७
नैव देवा अतिक्रामन्ति ...	१६१
नौर्ह वा उदृग् स्वर्ग्या ...	१४३
परिस्तृते चरन्ति । तिर-इव ...	३४८
पलाग्रस्य पलाग्रेण मध्यमेन ...	३८७
पाप्मानेव प्रतिप्रस्याता	२८१
पात्राणि भवन्ति । पात्रेषु ...	२७८
पुरा यज्ञात्पुराहुतिभ्यो ...	२७८
पूर्वेणाहवनीयं परीत्य	१४२
प्रजापतिं वै भूतान्युपावीदन्	१६०
प्रजापतिर्वा अग्निः	१४४
प्रजापतिर्ह वा ०—० स प्रजा	२५०
प्रजापतिर्ह वा ०—०ऽग्निः ...	६२
प्रजापतिर्ह वा उदृतेनाग्ने ...	२२८
प्रजापतिर्वा उदृग भूत्वा ...	१५३
प्रति परास्मीयोदेति	२८०
प्राजापत्याः पस्पृधिरे	६५
प्रोक्षणीरध्वर्यरादत्ते । स इध्म	३४६
फल्गुनीष्वग्नौ उादधीत ...	१५

कण्डिकाप्रतीकम् .	पृष्ठं
ब्रह्मैव वसन्तः । चत्वं ग्रीष्मो ...	२८
भूरिति वै प्रजापतिः । आत्मान	३५
भूरिति वै प्रजापतिः । इमा ...	३५
भूरिति वै प्रजापतिः । ब्रह्मा- ...	३५
मनो ह वै देवा मनुष्यस्या- ...	१८२
महद्ध तस्यौ भुवनेष्वन्तरिति ...	२५१
महाहविषा ०—० तां तथो ...	३३४
महाहविषा ०—० ता ०—० इषव	३८५
महाहविषा ०—० ता ०—० घ्नन्	३४३
महि त्रीणा मेवोऽस्त	१६१
मिथुनादिदा ऽएन मेतत् ...	२३४
मृगग्रीर्षेऽग्नी ऽआदधीत ...	१४
मो षु णः । इन्द्राच	२७८
यजमानदेवत्यो वै गार्हपत्यः ...	१२६
यत्र वै प्रजापतिः प्रजा ...	१३६
यथा वा ऽइषोरनीकम् ...	१४२
यदहरस्य श्वोऽग्न्याधेयꣳ ...	३१
यद्व वा ऽअग्निहोत्रं जुह्वत् ।	
०—० प्रजायै वा ॥ ...	१५६
यद्व वा ऽअग्निहोत्रं जुह्वत् ।	
०—० प्रजायै वा तस्मे ...	१५६
यदा ऽअदो दीर्घ मभ्युपस्थानम्	१८०
यदा ऽआहवनीय सुप्रतिष्ठते ।	

कण्डिकाप्रतीकम् .	पृष्ठं
दिवं तदुप्रतिष्ठते	१६१
यदा ऽआहवनीय सुप्रतिष्ठते ।	
पशूंस्तद्	१६०
यां वै प्रजापतिः । प्रथमा ...	५२
या वै प्रजा यज्ञे ऽनन्वाभक्ताः ...	११०
योषा वा ऽआपः	२
राजन्त मध्वराणाम्	१५६
रेवती रमध्व मिति रेवतो ...	१५६
रोहिण्या मग्नी ऽआदधीत ...	१४
रोहिण्या सु ह वै पशवः ...	१४
वरुणप्रघासैर्वै प्रजापतिः ...	३१५
वरुणो ह्येनद्गृह्णाति काम ...	७५
वसन्तो ग्रीष्मो वर्षाः	२७
वारुण्यत्तरा भवति । वरुणो	२७५
वैश्वदेवेन वै प्रजापतिः । प्रजा	२७२
स आग्राद्याह । समिधो ...	८०
स आह । उपप्रयन्तो ऽध्वर	१५४
स आहवनीय सुप्रतिष्ठते ...	२८१
स आहवनीय मेवाग्र ऽउपतिष्ठते ।	
०—० तृष्णौ मेवाहवनीयं	१८२
स आहवनीय मेवाग्र ऽउपतिष्ठते ।	
०—० गृहा वै गार्हपत्यो	१८१
स उत्तरस्या मेव प्रयस्यायां	२७६

कण्डिकाप्रतीकम् .	पृष्ठं
स उत्तरस्या मेव वेदौ ...	२७३
स उद्गृह्याग्नौ द्वे ऽआहुती ...	१६३
स उपस्तृणीत ऽआज्यम्०—० पितृनुल्लोम	३५०
त उपस्तृणीत ऽआज्यम् ०—० ऽआयाद्दार्षिं	३५१
स एता मैन्द्रीं मरुत्वती ...	२७६
स एतास्तिस्रस्तनूरेषु लोकेषु ...	५५
स एतेनान्नेन प्रान्तः	५३
स एष यज्ञो हतो न दक्षि ...	६४
स ऐक्षत प्रजापतिः। अन्नादं	६२
स ऐक्षत प्रजापतिः। पुरा मे	२५१
स ऐक्षत प्रजापतिः। यथा ...	२५०
स गार्हपत्य मुपतिष्ठते ...	१८०
स जघनेन गार्हपत्यम्। प्राची-०—० गृह्णाति	१६२
स जघनेन गार्हपत्यम्। प्राची-०—० षट्कपालं	३४५
स जघनेन गार्हपत्यम्। यज्ञोपवीती भूत्वो- ...	३८६
स जुहोति। अग्नये	१६३
स जुहोति। अग्निर्ज्योतिर् ...	११२
स जुहोति। एष ते रुद्रभागः	३८७
स जुहोति। देहि मे ...	३२१
स तत एव प्राक्स्तम्बयजुर्हरति	३४५
स तत्र जुहु मासादयति ...	३४७

कण्डिकाप्रतीकम् .	पृष्ठं
स दक्षिणेव दृषदुपले ऽउपदधाति	३४५
स दक्षिणेव परिधीन् परिदधाति	३४७
स ददाति। असावेतत्त ...	१६५
स नः पितेव सूनवे	१५६
स निदधाति। ये रूपाणि ...	१६४
स पितृभ्यः सोमवद्भ्यः ...	३४४
स पूर्वेद्युः। अग्नयेऽनीकवते ...	३१५
सप्त च वै घृतान्यग्नीतीना ...	१४४
सप्त चैव घृतानि वि२घृतिश्च	१४४
स यः कामयेत। ब्रह्मवर्चसी ...	२८
स यः पुरादित्यस्यास्तमयात् ...	१०६
स यः प्रजाकामः। एतेन हविषा	२५२
स यजति। अग्न ऽआज्यस्य ...	८०
स यजति। अग्नेर्वैसुवने ...	८२
स यत् कनीय इव	१३२
स यत्सुप्तो सुप्सृप्तति। तदस्यां	६६
स यत् प्राङुपोदेति	१४३
स यत्र म्रियते। यत्रैन०—० ऽयास्य शरीरं ...	६४
स यत्र म्रियते। यत्रैन०—० स यथा हैवैष ...	१४७
स यत्रैव साकमेधैर्यजते ...	४०७
स यत्रोदङ्ङावर्त्तते। तर्ह्यग्नौ	२७
स यत्रोदङ्ङावर्त्तते। देवेषु ...	२७
स यत्साय मस्तमिते जुहोति। अग्नावेवैभ्य एतत्प्रविर्हभ्यो	१०७

कण्डिकाप्रतीकम् .	पृष्ठ	कण्डिकाप्रतीकम् .	पृष्ठ
स यत्साय मस्तमिते जुहोति ।		सर्व आग्नेयो भवति	७६
अस्य रसस्य जीवनस्य ...	१०७	सर्वतोमुखोऽय मग्निः	४०८
स यत्साय मस्तमिते जुहोति ।		स वा ऽअग्नये च सोमाय ...	१६३
गर्भ मेवैत्	१०५	स वा ऽअग्नये पवमानाय ...	५४
स यत्साय मस्तमिते जुहोति ।		स वा ऽअपराह्णे ददाति ...	१६२
य इदं तस्मिन्निह	१०५	स वा ऽआग्नेयोऽष्टाकपालः ...	२५२
स यत्साय मस्तमिते दे ...	१४१	स वा ऽउपवत्या प्रतिपद्यते ...	१५३
स यथा रथोपस्थे तिष्ठन् ...	१४२	स वै कनीय इव पूर्वा-	१३२
स यथाहिस्त्वचो निर्मुच्येत ...	१०६	स वै खलु तूष्णी मेवोपतिष्ठते	१८२
स यदग्नये पवमानाय निर्वपति ।		स वै तुष्णी मेवाग्र ऽउपस्तृणाति	३६
प्राणा वै	५५	स वै त्रिः प्रथमां जपति ...	१५६
स यदग्नये पवमानाय निर्वपति ।		स वै दक्षो नाम	२२८
यदेवाग्नये	५५	स वै दक्षिणेऽग्नौ जुहोति ...	२७६
स यदग्नौ ऽआधत्ते	१४०	स वै दिरग्नौ जुहोति... ...	१०६
स यदग्नौ जुहोति । तद्देवेषु ...	११०	स वै पञ्चादिव यज्ञस्य जुहोति	२३५
स यददित्यै चरुं निर्वपति ...	५७	स वै पूर्ववाट् स्यात्	३६
स यदाग्नेयो ऽष्टाकपालः ...	३३४	स वै भूर्भुव इति । एतावतैव	३५
स यदा ऽइतश्चेतश्च	१	स वै वर्षास्वादधीत	७७
स यदेश्वदेवेन यजते ।		सर्वे प्राणावध्वर्युः	२८२
अग्निनैवैतद्राज्ञाग्नि ...	४२१	स सर्वाण्येव हवीꣳष्यवध्वर्युः ...	२७६
स यदेश्वदेवेन यजते ।		स हुत्वा न्यष्टङ्क । ततो ...	६४
अग्निरेव तर्हि	४२२	स हुत्वा प्रजापतिः	६३
स यन्नातिक्रामति । इत ...	३५१	स होवाच । अग्नयेऽग्निरनुष्ठ्या	६६
स येमा मवान्तरदिशः मनु ...	६५३	स होवाच । न वाऽअहं मिदं	१३६
स यस्मिन् हूयेतावसुं	४२२	स होवाच । हन्ताहं मिमा	१६
स यस्य कामयते	१४१	सान्नाय्यभाजना वा ऽअमावास्या	२३४

कण्डिकाप्रतीकम् .	पृष्ठे	कण्डिकाप्रतीकम् .	पृष्ठे
सा या पूर्वाहुतिः । ते देवा ...	१३२	सूर्यो ह वा ऽग्निहोत्रम् ...	१०५
सा या पूर्वाहुतिः । साग्नि- ...	१११	सैषैकाहुतिरेवाग्ने	११०
सा या पूर्वाहुतिः । सात्मान	११२	सो ऽन्वाह उग्नन्नस्त्रा निधीमहि	३४८
सा ह्येनं नाभिराधयाञ्चकार	६३	सोऽर्चञ्छ्राम्यन् प्रजापति- ...	२५०
सा ह्येनं मभिराधयाञ्चकार	६३	हस्तेऽग्नी ऽआदधीत	१६

॥ अथ विषयसूची ॥

(१ प्र० १ ब्रा०)

अथाग्न्याधानम् । तत्रोदकहिरण्योषाखुकरीषशकराकृपाणां पञ्चसम्भाराणां विधानम् । तेषां सम्भाराणां निवपनोल्लेखनाभ्युक्षण-संस्काराणां विधानम् । सम्भारविचारो चेति ॥

(१ प्र० २ ब्रा०)

आग्न्याधानकालनिर्णयाय प्रथमं नक्षत्रविधानम् । तत्र कृत्तिकाया माधानप्रतिपादनम् , रोहिण्या माधानपक्षोल्लेखः , मृगशीर्षाधानपक्षोल्लेखश्च । ततः पुनर्वसोः पुनराधानविषयता-कथनम् , फल्गुन्योश्चाधानस्वीकारः , लाभकामस्य हस्तेऽग्न्याधान-विधानम् , क्षत्रियजातेश्चित्राया मग्न्याधानविधिः, ततो नक्षत्रनाम-निर्वचनञ्चेति ॥

(१ प्र० ३ ब्रा०)

ततस्तत्रैव ऋतुविधानम् । ऋतूनाञ्च देवपित्राद्यना द्विविधत्वाख्यानम् । ततस्तत्रैवायनविधानम् । उदगयनदक्षिणायनयोः स्वरूपकथनं देवपित्रसम्बन्धाख्यानञ्च । ततो ब्राह्मणादिवर्णानुसारेणर्त्तुव्यवस्था । ततः काम्यपक्षे ,— ब्रह्मवर्चसकामस्य वसन्तर्त्तौ , श्रीकामस्य ग्रीष्मर्त्तौ , प्रजापशुकामस्य वर्षर्त्तौ अग्न्याधानव्यवस्था । ततः सर्वेषा मेवर्त्तूना माधानयोग्यकालत्वात् ऋजीवनस्य निश्चयताभावात् कालप्रतीक्षण मकर्त्तव्य मित्युपदेशश्चेति ॥

(१ प्र० ४ ब्रा०)

अग्न्याधानप्रयोगः । तत्र प्रथम मुपवसथदिवसकर्त्तव्यताया उपदेशः , ब्रह्मौदनपाकविधिः , तद्रात्रौ यजमानस्य जागरणविधिः , रात्रावग्निमन्थननिषेधः सूर्योदये तद्विधिश्च , व्याहृतीना मृग्यजुस्सामातिरिक्तत्वेन वर्णनम् , वर्णत्रयोत्पत्त्यादिहेतुत्वेनाधानस्य प्रशंसा , अग्निमन्थनसमये तस्य पुरस्तादश्वस्य धारणविधिः , अग्नेर्हरणप्रकारोपदेशः , आहृतस्याग्नेराधानम् , आहितस्याग्नेः पूर्वभागस्य मुल्मुक मन्वारभ्य मन्त्रजपविधिः , तस्याग्नेः सार्परात्रीभिरुपस्थानविधिश्चेति ॥

(१ प्र० ५ ब्रा०)

तत्र पूर्णाहुतिविधानम् । ततोऽग्न्याधेयाङ्गपवमानेष्टिनामाग्नेयेष्टिविधानम् । तत्र पवमानपावकशुच्याख्याग्निदेवतात्रयाख्यानम् , चरु-पुरोडाश-याज्या-पुरोनुवाक्या-संयाज्या-दक्षिणानां विधानम् , ततः पवमानाख्यादिशुन्याग्नेयेष्टिविधानञ्चेति ॥

(१ प्र० ६ ब्रा०)

अग्न्याधानदक्षिणाविधिः । तत्र षड्दादशादिविकल्पाख्यानम् , दक्षिणानामनिर्वचनम् , अनूचानानां देवत्वकथनम् , दक्षिणादानेन तेषां प्रीत्युत्पादनविधिः , अदक्षिणस्य यज्ञस्य व्यर्थताख्यानम् , अग्न्याधानस्य फलकथनार्थाख्यायिकाख्यानम् , अग्न्याधानस्थानविचारः , आहिताग्नेः सत्यवादितादिव्रतनिरूपणञ्चेति ॥

———

(२ प्र० १ ब्रा०)

अथ पुनराधेयविधानार्थाख्यानम् । तत्र पुनराधेयस्य विधिप्रशंसे । ततः पुनराधेयस्य त्रैवर्णिकसाधारण्येन ऋतुविशेषविधिः , आदित्यस्य सर्वर्त्तुरूपत्वाभिधानम् , मध्यन्दिनाधानप्रशंसा , पुनराधित्सितस्याग्नेर्दर्भैरेवोद्धरणविधिः , व्रीहियवमययोरपूपयोरर्कपलद्वयसङ्ख्हीतयोर्गार्हपत्याहवनीययोर्निधानविधिः , तत्र पञ्चकपालेष्टिविधानम् , प्रयाजानुयाजयाज्यादीनां विधिः , पुनराधेयस्य दक्षिणानिर्देशश्चेति ॥

(२प्र० २ब्रा०)

अथाग्निहोत्रविधानार्थाख्यानम् । तत्र सर्वादिसृष्टिवर्णनम् । अग्निहोत्रानग्निहोत्रिणोः प्रेतात्मनोर्गतिपार्थक्यसूचनम् । अग्निहोत्रहवण्याः स्रुचोः वैकङ्कतत्वाख्यानम् , अग्निहोत्रहोमद्रव्यस्य पयसः उत्पत्त्यादिकथनम् , अग्निवायुसूर्याणां , अग्निहोत्रदेवतानां पौर्वापर्यनिरूपणञ्चेति ॥

(२ प्र० ३ ब्रा०)

अग्निहोत्रहोमकालविधिः । तत्र सायम्प्रातर्होमयोः कालविशेषविधिविचारः । अग्निहोत्रस्य ज्योतिष्टोमादित श्रौत्कर्षनिर्णयः । ततः पयसोऽग्निहोत्रहोमसाधनत्वं विधाय तत्पयसोऽग्नावधिश्रयणपूर्वकश्रपणप्रकारोपदेशः, ततोऽनुपसादनोपसादनयोर्विधिप्रशंसे, होमोपमार्जनप्राशनोन्नयनानां प्रशंसादिकम् । ततोऽग्निहोत्रस्य याज्ञवल्क्याभिमतपाकयज्ञत्वोपन्यासः, अग्निहोत्रीयाहुतिद्वयविधानार्थाख्यायिकादिकथनम्, तयोश्च सायम्प्रातर्होमयोर्मन्त्रद्वयान्नानादिकम्, होमप्रकारोपदेशश्च । ततो हुतशिष्टस्य स्थालीमध्यस्य पयसो ब्राह्मणपेयत्वविधानादिकञ्चेति ॥

(२ प्रा० ४ ब्रा०)

अग्न्युपस्थानविधानम् । तत्र यजमाने इन्द्रयमनड्वनैर्षिधेतिपञ्चदेवतानां स्थितिस्वीकारः, तद्विशेषवर्णनम्, पञ्चाना मग्नीनां देवत्वप्रतिपादनञ्च । तत आहवनीयाग्न्युपस्थानप्रकारः, गार्हपत्योपस्थानप्रकारः, अन्वाहार्यपचनोपस्थानप्रकारः, सभ्याग्न्युपस्थानप्रकारः, आवसथ्याग्न्युपस्थानप्रकारश्च । ततोऽग्नेरवस्थाभेदतो रुद्रादिनामभेदाद्युपदेशश्चेति ॥

(३ प्र० १ ब्रा०)

तत्र गार्हपत्याहवनीययोरग्न्योरुपस्थानविधिः । तत्रादावग्निस्वभावादिनिर्देशः । प्रसङ्गतस्तत्राग्नावग्निहोत्रयाजिशरीरप्रक्षेपकथादि, अग्न्यग्निहोत्रिणोः पितापुत्रसम्बन्धनिर्देशश्च । ततोऽग्नि-

होत्रयाजिनोऽमृतत्वावाप्तिफलकथनम्, मृत्योरतिमोक्षलाभप्रकार-प्रतिपादनम्, अग्निहोत्रद्वारा इतरयज्ञेष्वपि अतिमुक्तिः सिध्यतीति प्रदर्शनम्, अहोरात्राभ्या मपि मृत्योरतिमुक्तिर्यजमानेन ज्ञातव्येत्युपदेशश्च। ततो होमार्थं मन्त्रागमनविधिः। ततोऽग्निहोत्रस्य नौरूपतया, चित्याग्नि सम्पत्त्या, महदुक्थसम्पत्त्या च स्तुतिश्चेति ॥

(३ प्र० २ ब्रा०)

ततः सायङ्कालीनाग्न्युपस्थानविधानार्थाख्यानम्। तत्र विचारः। तत आहवनीयोपस्थानविधिः, तदुपस्थानमन्त्राणां विधिव्याख्याने, 'चित्रावसो'-इति मन्त्रस्यात्र त्रिर्जपविधिः, तत्रोत्थानासीनभावविधिश्च। ततोऽग्न्युपस्थानाभिप्रायकथनम्। अतःपरं अग्निहोमद्रव्यस्य पयसः सम्पादनप्रकारादिकम्। ततो गार्हपत्योपस्थानविधिः, तदुपस्थानमन्त्राणां विधिव्याख्याने च। ततः समन्त्रकगोसूर्यन विधिः, दर्शपूर्णमासयोरिवाग्निहोत्रेऽपि पुत्रनामग्रहणविधिश्चेति ॥

(३ प्र० ३ ब्रा०)

तत्रैव शुक्लकोपस्थानविधानम्। प्रवासं करिष्यत उपस्थानमन्त्रस्य विधिव्याख्याने, प्रवत्स्यत उपस्थानमन्त्रस्य विधिव्याख्याने, गच्छतोऽग्निहोत्रिणः पथि वाचंयमविधिः, प्रत्यागमनकालेऽपि वाचंयमविधिः, प्रत्यागतस्योपस्थानवैपरीत्यविधिः, प्रत्यागतस्य समन्त्रकाहवनीयोपस्थानविधिः, तथैव गार्हपत्योपस्थानविधिश्च। ततोऽमन्त्रकोपस्थानपक्षप्रतिपादनम्। ततः प्रवासादागतस्याग्निहोत्रिणोऽग्निविषयकर्त्तव्योपदेशादिकम्, गृहाणा मुपचारश्चेति ॥

(३ प्र० ४ ब्रा०)

अथ मासिमाष्यमावास्यायां पिण्डपित्र्ययज्ञविधानार्थाख्यानम् । तत्र पितृणा मर्च्चनप्रकारोपदेशः, देवाना मर्च्चनप्रकारोपदेशः, मनुष्याणा मर्च्चनप्रकारोपदेशश्च । ततो गवादिपशूना मसुराणाञ्च प्रजापत्युपसदनादिकथनम्, देवानां प्रजापत्याज्ञानुल्लङ्घनकारित्वाख्यानम्, मनुष्याणां प्रजापत्याज्ञोल्लङ्घनकारित्वेन रोगशोकपापनिलयभोगित्वाख्यानञ्च । ततो मनुष्याणां सायम्मातराग्नित्वाद्युपदेशश्च । ततः पित्र्ययज्ञार्थं काल निर्णयः, स्थाननिर्णयः, द्रव्यनिर्णयः, मन्त्रनिर्णयश्च । तत्रैव पिण्डदानार्थाग्निनिधानस्य, अवनेजनस्य, बर्हिःस्तरणस्य, मन्त्रस्य च विधानम् । पिण्डदानानन्तरञ्च मन्त्रजपस्य, परागावर्त्तनस्य, उदकावनेजनस्य, नमस्कारस्य, तन्मन्त्रस्य च विधानम् । ततः पित्र्यप्रार्थनस्य, पिण्डशेषाघ्राणस्य च विधानादिकञ्चेति ॥

(३ प्र० ५ ब्रा०)

अथाग्रयणेष्टिविधानम् । तत्र ऐन्द्राग्न-वैश्वदेव-द्यावापृथिव्यहविषां विधानम् । तत्रानाग्नितदोषविचारः । दक्षिणाविधानम् । ईजानानीजानभेदेनाग्रयणव्यवस्था । ब्राह्मणभोजनविधिः, तद्दक्षिणाविधिश्चेति ॥

(४ प्र० १ ब्रा०)

अथ दाक्षायणेष्टिविधानम् । तत्राख्यायिका । तद्यज्ञस्य नामनिरुक्तिः, फलकथनम्, विशिष्टफलान्तरहेतुताप्रतिपादनाय आख्यायिकया परकृतित्रयोपन्यासश्च । ततो दाक्षायणयज्ञप्रयोग-

विषयकोपदेशः । तत्र पूर्वपौर्णमास्या मनुष्ठेययागविधिः, ततः परेद्युरनुष्ठेययागदयविधिः, अमावास्याप्रयोगेऽप्येवं पूर्वेद्युर्यागैकस्य परेद्युर्यागदयस्य च विधानञ्च । ततो दाक्षायणयज्ञस्य सोमयाग-रूपताप्रतिपादनादिकम् । ततः पौर्णमास्यां साक्राय्ययागविध्या-दिकम्, अमावास्यायां पयस्यायागविध्यादिकञ्च । वाजिनहोम-विधानादि, वाजिनेन दिग्व्याघारणञ्चेति । ततो यजमानपञ्च-माना मृत्विजां भक्षणविधिः, तन्मन्त्रानुज्ञापनञ्चेति ॥

(४ प्र० २ ब्रा०)

अथ चातुर्मास्ययागविधिः । तञ्चातुर्मास्ययागीयं वैश्वदेवाख्यं प्रथमं पर्व । तस्य वैश्वदेवयागस्य प्रजासृष्टिहेतुत्वाख्यानम्, आख्यायिकोक्तेऽर्थे मन्त्रप्रमाणप्रदर्शनम्, पादशस्तन्मन्त्रतात्पर्या-ख्यानञ्च । ततो वैश्वदेवयागविधिः; तत्र पञ्चानां हविषां विधिः, पयस्याप्रशंसादिकम्, पयस्यायागविधानादिकञ्च । तत-स्तदीयविशेषाङ्गकर्मणां विधानम्; तत्र बर्हिराहरणाग्निमन्थन-काल-प्रयाजसङ्ख्या-समिष्टयजुषां प्रकृतियागतो विभिन्नताख्यानम्, वैश्वदेवयागस्य प्रजाश्रीफलसाधनत्वाख्यानञ्चेति ॥

(४ प्र० ३ ब्रा०)

अथ चातुर्मास्ययागीयं वरुणप्रघासाख्यं द्वितीयं पर्व । तस्य वरुणप्रघासयागस्य वरुणपाशमोचनहेतुत्वाख्यानम्, तत्प्रयोग-विध्यादिकञ्च । तत्र उत्तरवेदिनिवपनम्, पूर्वविहितपञ्चहवि-षाञ्चेह विधानम्, करीराणा मावपनम्, शमीपर्णाना मावपनम्, अन्तिमहविषो विधानञ्च । करम्भपात्राणां निर्माणविधिः,

करम्भपात्रनिर्माणावशिष्टाद् यवपिष्टात् मेषमेषीमिथुनस्य निर्माण-विधिः, मेषमेष्योः प्रयागादिकञ्च। ततोऽग्निमन्थनविधानम्। तस्मिन्नेवाग्नौ पत्नीकर्तृककरम्भपात्रहोमस्य विधानाय पत्नी-व्यभिचारप्रश्नादिकम्, तद्दोषप्रशमनाय मन्त्रवाचनञ्च। तत्क-रम्भपात्रसञ्ज्ञाविधानादि, यजमानस्य पत्न्याश्च मन्त्रवाचनादि, तदनन्तरं अध्वर्युप्रतिप्रस्थात्रोराश्रावणादिकम्, मेषमेष्योर्विपरि-हरणम्, अध्वर्योर्वारुण्याः पयस्यायाः प्रचरणम्, प्रतिप्रस्थातु-र्मारुत्याः पयस्यायाः प्रचरणे विशेषोपदेशः, स्रुच्यवदानादिकञ्च। अध्वर्योः प्राशित्रावदानम्, इडोपह्वानादिकञ्च। तत आसेचनम्, अतिक्रमणम्, स्रुग्व्यूहनञ्च। ततोऽध्वर्वग्नीध्रयोरुक्तिप्रत्युक्ती। ततः पत्नीसंयाजः, समिष्टयजूंषि, अवभृथगमनादिकम्, केशश्मश्रुवपनविधिश्चेति॥

(४ प्र० ४ ब्रा०)

अथ चातुर्मास्ययागीयं साकमेधाख्यं तृतीयं पर्व। तस्य साकमेधयागस्य पापोपशमनहेतुत्वाख्यानम्, तत्प्रयोगविध्यादि-कञ्च। तत्र पूर्वदिवसे प्रातर्मध्याह्नसायाह्नेषु क्रमादनीकवदिष्टेः सान्तपनेष्टेः गृहमेधीयेष्टेश्च विधानादिकम्। ततः पूर्णदर्वाख्यस्य कर्मणो विधानादि। तत ऋषभध्वनौ होमविधानादि, अन्त्येष्टि-विधिश्च। ततो महाहविराख्यप्रधानहविषः प्रस्तावश्चेति॥

(५ प्र० १ ब्रा०)

तस्य साकमेधीयमहाहविषः प्रयोगविधिः। तत्र क्रमशो-ष्टानां हविषां विधान मिति॥

(५ प्र० २ ब्रा०)

अथ पिण्डपितृयज्ञप्रस्तावः । तत्र प्रथमं पितृणा मुत्पत्ति-कथनम्, पितृणां वसन्तादृतुरूपत्वाख्यानञ्च । ततः पितृयज्ञ-विधिः । तत्र सोमपानां प्रथमहविर्विधानम्, बर्हिषदां द्वितीयहविर्विधानम्, अग्निष्वात्तानां तृतीयहविर्विधानञ्च । पितृयज्ञकारिणां दक्षिणामुखत्वादिविधानम्, पित्र्याया वेदे-र्निर्माणविधानादि, तदीयसामिधेनीप्रयोगोपदेशः, द्वोत्तवरण-निषेधादिकञ्च । प्रधानयागानन्तरं स्विष्टकृत्स्थानीयकव्यवाहनयाग-विध्यादि । ततः पिण्डदानस्य तदङ्गकर्मणां तन्मन्त्राणाञ्च विधयः, हुतोच्छिष्टस्याग्न्यादौ प्रक्षेपादिर्विधिविकल्पश्चेति ॥

(५ प्र० ३ ब्रा०)

अथ त्र्यम्बकयागविधानार्थाख्यानम् । तत्रादौ त्र्यम्बकनाम-निरुक्त्यादि । ततः त्र्यम्बकहविषा मभिघारणादिविधानानि । ततश्चतुष्पथान् प्रत्यागतस्य मन्त्रहयजपः, तयोर्व्याख्यानञ्च । ततः परिगमनविध्यादि, तत्तन्मन्त्रविधिव्याख्याने च । ततो मूतकासजनविधिः, तन्मन्त्रविधिव्याख्याने च । ततः केशश्मश्रु-वपनविध्यादिकञ्चेति ॥

(५ प्र० ४ ब्रा०)

अथ चातुर्मास्ययागीयचतुर्थपर्वणः शुनासीर्याख्यस्य विध्युपो-द्घातत्वेन चातुर्मास्यानां चतुर्णा मेव यागाना मवश्यफलहेतुत्व-वर्णनादि, विशेषतः शुनासीर्ययागस्य श्रीलाभफलादिवर्ण-

नञ्च। ततः शुनासीर्य्यप्रयोगविधयः। तत्राप्यष्टानां हविषां विध्यादिकम्, यागदक्षिणा च। ततः शुनासीर्य्ययागस्य कालविचारः परिवर्त्तनविधिश्चेति॥

(५ प्र० ५ ब्रा०)

अथ वैश्वदेवादिषु सर्वेष्वेव पर्वसु सेतिकर्त्तव्यताकपरिवर्त्तनविधिः। तत्रादौ चातुर्मास्ययागस्य शत्रुविजयहेतुत्वाख्यानम्। ततश्चातुर्मास्यानां प्रथमपर्वणो वैश्वदेवयागस्याग्निमुखत्वाख्यानम्, द्वितीयपर्वणो वरुणप्रघासयागस्य वरुणमुखत्वाख्यानम्, तृतीयपर्वणः साकमेधस्येन्द्रमुखत्वाख्यानञ्च। ततो लौहक्षुरेण केशानां छेदनं श्मश्रूणां वपनञ्च। ततश्चातुर्मास्ययाजिनां परमगतिफलाम्नानञ्चेति॥

॥ अथ कर्ममूची ॥

कर्म	प्र०	ब्रा०	क०	कर्म	प्र०	ब्रा०	क०
अग्निनिधानम् ...	३	४	१४	अग्निस्थापनम् ...	५	२	११
अग्निमन्थनम् ...	१	४	८	अग्निहरणम् ...	१	४	१८
अग्निमन्थनम् ...	४	२	१६	अग्निहोत्रम् ...	२	२	१
अग्निमन्थनम् ...	४	३	१६	अग्नीत्प्रेषः ...	५	२	४७
अग्निष्वात्तयजनम्	५	३	६	अग्न्याधानम् ...	१	२	३

कर्म.	प्र०	ब्रा०	क०
अग्न्याधानम्	५	२	३२
अग्न्याधानदक्षिणा ...	१	५	२१
अग्न्याधानदक्षिणा	१	६	३
अग्न्युपस्थानम् ...	३	२	३
अजोपबन्धनम् ...	१	४	३
अध्वर्युकर्म	४	३	३२
अध्वर्युप्रैषः	५	२	२४
अध्वर्यूग्नीध्रसंवादः ...	३	३	४४
अनुदिताहुतिः ...	२	३	२
अनुयाजप्रैषः ...	४	३	४१
अनुयाजयागः ...	४	२	२०
अन्तरागमनम् ...	३	१	१३
अन्वाहार्यपचनम्	२	४	६
अपूपनिधानम् ...	२	१	१२
अभिघारणम्	५	३	६
अभ्युक्षणम्	१	१	३
अवभृथगमनम् ...	४	३	४६
अस्तमिताहुतिः ...	२	३	६
आखूत्करे क्षेपः ...	५	३	१०
आग्रयणदक्षिणा ...	३	५	१३
आग्रयणेष्टिः ...	३	५	१
आग्नेययागः ...	४	२	८
आज्यग्रहणम् ...	५	२	१३
आज्यभागप्रचरणम्	४	३	३५
आज्यावदानम् ...	५	२	२६

कर्म.	प्र०	ब्रा०	क०
आश्रावणम् ...	५	२	२३
आहवनीयोद्धरणम्	२	३	७
आहवनीयोपस्थानम्	३	२	३२
आहवनीयोपस्थानम्	३	३	८
आहवनीयोपस्थानम्	५	२	३७
इडाप्राशनम् ...	४	४	१६
इडोपह्वानम् ...	४	४	१५
इध्मप्रोक्षणम् ...	५	२	१४
उत्तरवेदिनिवपनम्	४	३	६
उदकावनेजनम् ...	३	४	१६
उदकावनेजनम् ...	३	४	२३
उदिताहुतिः ...	२	३	३६
उपसादनम् ...	२	३	१७
उपस्तरणादिहोमः	५	२	३१
उपस्थानम् ...	१	४	२६
उपस्पर्शनम् ...	१	४	२७
उपांशुचरणम् ...	२	१	१६
उपांशुप्रचरणम् ...	५	२	१६
उल्मुकनिधानम् ...	३	४	१५
उल्लिखनम्	१	१	२
ऋषभाक्षानम् ...	४	४	१६
करम्भपात्रनिर्माणम्	४	३	१४

कर्म.	प्र०	ब्रा०	क०
करम्भपात्रहोमः	... ४	३	२४
करीरावपनम्	... ४	३	११
कव्यवाहनयागः	... ५	२	३०
कुमारीमन्त्रजपः	... ५	३	१३
कुम्भीनिधानम्	... ४	४	१६
केशश्मश्रुवपनम्	... ४	३	४८
केशश्मश्रुवपनम्	... ४	३	१६
गार्हपत्योपस्थानम्	... ३	२	२८
गार्हपत्योपस्थानम्	... ३	३	६
गार्हपत्योपस्थानम्	... ५	२	३६
गृहमेधीयेष्टिः	... ४	४	४
गोरुपस्थानम्	... ३	२	३
चतुःसप्तिवेदिनिर्माणम्	५	२	१०
चतुरवदानम्	... ४	३	३६
चतुरुन्नयनम्	... २	३	१७
चतुष्पथहोमः	... ५	३	७
चरुनिर्वपनम्	... १	५	१८
चरुश्रपणम् ...	... ३	४	१
चरुश्रपणम् ...	... ४	४	५
चरुहोमः ...	... ३	४	११
चरूदासनम्	... ३	४	११
चरूदासनम्	... ४	४	६
चर्वभिघारणम्	... ४	४	६
चातुर्मास्येष्टिः	... ४	२	१
त्र्यम्बकयागः	... ५	३	१
त्र्यम्बकहविःप्रणयनम्	५	३	४
दर्शेष्टिः ...	... ४	१	१
दाक्षायणयज्ञः	... ४	१	२
दिग्व्याघारणम्	... ४	१	२४
द्यावापृथिवीयागः	... ४	२	१७
निवपनम् ...	... १	१	२
निवान्यादोहनम्	... ४	४	१६
नीविमुद्बर्हणम्	... ५	२	४२
पक्षर्त्विजाम्भक्षणम्	४	१	२५
पत्नीवाचनम्	... ४	३	२१
पत्नीसंयाजः	... ४	३	४५
पधिहोमः ...	... ५	३	७
पयस्याप्रचरणम्	... ४	३	३७
पयस्यायागः	... ४	१	२०
पयस्यायागः ...	... ४	२	१५
पयसोऽधिश्रयणम्	... २	३	१५
पयोदोहनम्	... २	३	१४
पयोदोहनम्	... ४	४	१६
परिगमनम् ...	... ५	३	१२
परिग्रहपरिग्रहणम्	५	२	१२
परिधिपरिधानम्	... ५	२	१६
परिवर्त्तनम् ...	... ५	४	१४

कर्म.	प्र०	आ०	क०
परिवर्त्तनम्	५	५	७
पवमानेष्टिः ...	५	५	६
पिण्डदात्रजपः ...	५	२	४०
पिण्डदानम् ...	३	४	१६
पिण्डदानम्	५	२	३४
पिण्डदानम्	५	२	३६
पिण्डदानोदीच्याङ्गम्	५	२	४१
पिण्डपित्रयज्ञः ...	३	४	१
पिण्डपित्रयज्ञः ...	५	२	१
पिण्डपेषाघ्राणम् ...	३	४	२४
पित्रनमस्करणम् ...	३	४	२४
पित्रप्रार्थनम् ...	३	४	२४
पित्रयज्ञः	३	४	१
पित्रावाहनम् ...	५	२	२२
पुत्रनामग्रहणम् ...	३	२	४१
पुनराधेयम्	२	१	१
पुनराधेयदक्षिणा ...	२	१	२८
पुरोडाशनिर्वापः ...	१	५	२२
पुरोडाशप्रतिपत्तिः	४	३	१६
पुरोऽनुवाक्याप्रत्यावनम्	५	२	२६
पूर्णादर्वीकर्म्म	४	४	१७
पूर्णाहुतिहोमः ...	१	५	२
पूर्णाहुतिहोमः ...	१	५	३
पृषदाज्यानयनम्	४	३	४१
पौर्णमास्येष्टिः ...	४	१	१५
पौष्णयागः	४	२	११

कर्म.	प्र०	आ०	क०
प्रजापत्युपसदनम् ...	३	४	४
प्रतिपरिगमनम् ...	५	२	१५
प्रतिप्रस्थात्रकर्म ...	४	३	३१
प्रत्याश्रावणम् ...	५	२	२३
प्रवत्स्यतो वाग्यमनम्	३	३	६
प्रयाजयागः	४	२	२०
प्रस्तराद्यासादनम् ...	५	२	१७
प्राग्निलावदानम् ...	४	१	४०
फलीकरणम् ...	३	४	६
बर्हिषद्व्यजनम् ...	५	२	५
बर्हिःसन्नहनम् ...	५	२	१५
बर्हिःस्तरणम् ...	५	२	१५
बर्हिःस्तरणम् ...	३	४	१७
ब्रह्मौदनपाकः ...	१	४	४
ब्रह्मौदनप्राशनम् ...	१	४	६
ब्राह्मणभोजनम् ...	३	५	१४
मन्त्रजपः	१	४	२८
मन्त्रजपः	३	४	२२
महाहविःप्रयोगः ...	५	१	५
महाहविरिष्टिः ...	४	४	२
महाहविरिष्टिः ...	४	४	२१
मारुतयागः	४	२	१२
मारुतेष्टिः	४	४	२०

कर्म.	प्र०	ब्रा०	क०
मृतकावसजनम् ...	५	३	१७
ष्टताग्निहोत्रिप्रक्षेपः	३	१	५
मेघमेषीनिर्माणम् ...	४	३	१५
मेघमेषीप्रक्षेपः ...	४	३	१७
मेघावदानम्	४	३	३८
मेघीप्रत्यञ्चनम् ...	४	३	३८
यजमानमन्त्रजपः ...	५	३	११
रुद्रावसदानम् ...	५	३	१८
वरुणप्रघासेष्टिः ...	४	३	१
वसिष्ठयज्ञः	४	१	२
विपरिहरणम् ...	४	३	३६
व्रीह्यवहननम् ...	३	४	६
वैश्वदेवदक्षिणा ...	४	२	२२
वैश्वदेवपर्व ...	४	२	७
वैश्वदेवपर्व ...	४	३	१
शमीपर्णावपनम् ...	४	३	१२
शाकमेधपर्व	४	४	१
शुनासीर्यदक्षिणा ...	५	४	६
शुनासीर्ययागः ...	५	४	२
शुनाशीर्ययागः ...	५	४	११

कर्म.	प्र०	ब्रा०	क०
सर्पिरासेचनम् ...	४	४	६
समिदाधानम् ...	३	३	८
समिष्टयजुःप्रयोगः ...	४	३	४६
समिष्टयजुर्यजनम् ...	४	२	२१
सम्भरणम्	१	१	१
सम्भयजुर्हरणम् ...	५	२	१८
सक्थ्योर्वाहननम् ...	५	३	११
सान्तपनेष्टिः ...	४	४	३
साम्राज्ययागः ...	४	१	१५
सामिधेन्यनुवचनम् ...	५	३	२१
सारस्वतयागः ...	४	२	११
सावित्रयागः ...	४	२	१०
स्थानसंस्कारः ...	३	४	१३
सुगव्यूहनम् ...	४	३	४२
सुगव्यूहनम् ...	५	२	४५
सोमप्रायजनम् ...	५	२	४
सौम्ययागः	४	२	६
हविर्निर्वपणम्	१	१	५
हविर्यज्ञः	४	२	२
हविरासादनम् ...	४	३	१८
हुतशिष्टप्राश्नम् ...	५	२	४८
हुतशेषप्राश्नम् ...	५	२	४८
हुतशेषस्याग्नौप्रक्षेपः	५	२	४८
होत्रपवेश्नम् ...	५	२	२३

॥ अथ स्मर्त्तव्यालोच्यवचनसूची ॥

"अचय्यं ह वै सुकृतं चातुर्मास्ययाजिनो भवति" ५. ४. १.

"अग्ने रेतो हिरण्यम्" २. १. २८.

"अथास्य शरीर मेवाग्निर्दहति ; तद्यथा पितुर्वा मातुर्वा जायेतैव मेषोऽग्नेरधिजायते ; शश्वद्ध वा एषः" २. २. ८.

"अन्नं वा आपः" १. १. ३.

"अयं वै यज्ञो योऽयं पवते" १. ४. २१.

"अयं वै वायुर्योऽयं पवते, एष वा इदं सर्वं प्रच्यावयति यदिदं किञ्च ; वर्षति, वृष्टादोषधयो जायन्ते ; ओषधीर्जग्ध्वापः पीत्वा तत एतदङ्गोऽधि पयः सम्भवति ; एष हि वा एतज्जनयति, तस्माद् वायव्यं भवति" ५. ४. ७.

"असौ (मृगशिराः) अमुष्यार्द्धस्य शिर इत्याहुः" १. २. ८.

"आदित्यस्त्वेव सर्व ऋतवः" २. १. ९.

"इन्द्रो वा एष पुरा वृत्रस्य वधात्, वृत्रं हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्" ५. १. ९.

"इन्द्रो वै यजमानः" १. २. ११.

"इयं वै पृथिवी पूषा" ५. १. ७.

"इयं वै पृथिव्यदितिः" १. ५. १९.

"उत्तरतो हि स्त्री पुमांस मुपशेते" ४. ३. १७.

"उत्तरा हि समर्धय उद्यन्ति" १. २. ४.

"उपङ्क्त्य प्राश्नन्ति । यावन्तो गृह्या हविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुः, अथो अप्यृत्विजः प्राश्नीयुः, अथो अप्यन्ये ब्राह्मणाः प्राश्नीयुः, यदि बहुरोदनः स्यादधैतां कुम्भीं मपिधाय निदधति" ४. ४. १६.

"उभये ह वा इद मग्रे सहासुरैर्वाश्च मनुष्याश्च" ३. २. ४.

"ऋतवः पितरः" ३. ४. २४ ; ५. २. ४२.

"एता ह वै देवता योऽस्ति तस्मिन् वसन्ति, इन्द्रो यमी राजा नडो नैषिधः" २. ४. १, २.

"एते वै विश्वेदेवा रश्मयः । योऽय परं भाः प्रजापतिर्वा स इन्द्रो वा" २. ३. ७.

"एष एव मृत्युर्य एष तपति ०—० अमुष्मिंल्लोके पुनः पुनरेव प्रमारयति" ३. १. ७, ८.

"एषं वै यज्ञो यदग्निः" १. ४. १८.

"कं वै प्रजापतिः" ४. ३. १३.

"कनीयांसो हि देवा मनुष्येभ्यः ०—० भूयांसो हि मनुष्या देवेभ्यः ०—० भूयांसो हि पशवो मनुष्येभ्यः ०—० कनीयांसो ह वा अस्य भार्या भवन्ति, भूयांसः पशवः" २. ४. १८.

"काल्वालीकृता हैव तर्हि पृथिव्यास, नौषधय आसुः, न वनस्पतयः" २. २. ३.

"छाययेव वा अयं पुरुषः" २. १. १०.

"तदग्निहोत्राच्छिष्टं ०—० नाब्राह्मणः पिबेत्" २. ३. ३९.

"तस्मादेतदृषिणाभ्यनूक्तम्— 'प्रजा ह तिस्रोऽत्याय मीयुरिति" (ऋ० सं० ८. १०१. १४.) ४. २. ४.

"तान् द्वयोर्मृतकयोरुपनह्य वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि हृदं वा स्थाणुं वा वल्मीकं वा विन्देत, तस्मिन्नासजति ;— 'एतत् ते रुद्रावसं तेन परो मूजवतोऽतीहि' —इति" ५. ३. १७.

"तिर इव वै पितरो मनुष्येभ्यः" ३. ४. २१.

"देवाः सन्ति ०—० पितरश्चौषधयश्च सन्ति ०—० मनुष्याः सन्ति" २. ३. १९.

"द्वौर्वह्नी नक्षत्रैः" १. ४. २८.

"द्वयं वा इदं जीवनम्, मूलि चैवामूलञ्च" २. ३. १०.

"द्वया वै देवाः। अहैव देवाः, अथ ये ब्राह्मणाः श्रुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः ;०—० आहुतिभिरेव देवान् प्रीणाति, दक्षिणाभिर्मनुष्यदेवान्" १. ६. ६ ; ३. ५, १४.

"न ह्यः श्व मुपासीत को हि मनुष्यस्य ह्यो वेद" १. ३. ९.

"नो ह्यनाहिताग्नेर्व्रतचर्यास्ति" १. ४. ७.

"नौर्ह वा एषा स्वर्ग्या यदग्निहोत्रम्" ३. १. १५, १६.

"पतयो ह्येव स्त्रियै प्रतिष्ठा" ५. २. १४.

"पयसो वै प्रजाः सम्भवन्ति" ४. ३. ९.

"परमां गतिं गच्छति" ५. ५. ९.

"पुत्रासो यत्र पितरो भवन्ति (ऋ० सं० १. ८९. ८.)" ३. १. ६.

"पूर्वाह्णो वै देवानाम्, मध्यन्दिनो मनुष्याणाम् अपराह्णः पितॄणाम्" ३. ४. ८.

"प्रजापतिं ०—० देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद् यज्ञो वोऽत्र मनुतत्वं व जर्ग वः सूर्यो वो ज्योतिरिति" ३. ४. १.

"(प्रजापतिं) पशव उपासीदन् तेभ्यः स्वेष मेव चकार यदैव यूयं कदा च लभध्वै यदि काले यद्यनाकालेऽथैवाश्राथेति" ३. ४. ४.

"(प्रजापतिं) पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीत् मासि मासि वोऽन्नं स्वधा वो मनोजवो वश्चन्द्रमा वो ज्योतिरिति" ३. ४. २.

"(प्रजापतिं) मनुष्याः प्राहृता उपस्थं कृत्वोपासीदंस्तानब्रवीत् सायम्प्रातर्वोऽशनं प्रजा वो मृत्युर्वोऽग्निर्वो ज्योतिरिति" ३. ४. ३.

"(प्रजापतिं) शश्वदप्यसुरा उपसेदुरित्याहुस्तेभ्यस्तमश्च मायाश्च प्रददौ" ३. ४. ५.

"प्रथमदुग्ध मुष्णं भवति ; अग्नेर्हि रेतः" २. २. १५.

"मनो ह वै देवा मनुष्यस्याजानन्ति ३. ३. ११.

"माता धेनुर्मातेव वा इयं मनुष्यान् बिभर्त्ति" १. ५. २१.

"मेधो वै पयः, मेधस्तण्डुलाः, त मुभयं मेध मात्मन् धत्ते, तस्मात् क्षीरौदनो भवति ४. ४. ४.

"यत्रैतत् प्रतितरा मिव तिरश्चीवार्चिः संशाम्यतो भवति, तर्हि हैष भवति मित्रः" २. ४. १२.

"यत्रैतत् प्रथमं समिद्धो भवति, धूप्यत एव, तर्हि रौद्रं भवति रुद्रः" २. ४. ९.

"यत्रैतत् प्रदीप्ततरो भवति, उच्चैर्धूमः परमया जूत्या बल्बलीति, तर्हि रौद्रं भवतीन्द्रः" २. ४. ११.

"यत्रैतत् प्रदीप्तो भवति, तर्हि रौद्रं भवति वरुणः" २. ४. १०.

"यत्रैतदङ्गारास्वाकश्यन्त इव, तर्हि रौद्रं भवति ब्रह्म" २. ४. १३.

"यथैवासौ सूर्य एवं (नक्षत्रम्)" १. २. १८.

"योषा वा आपः, वृषाग्निः" १. १. ४.

"वर्षा ह त्वेव सर्वेषा ऋतूनां रूपम्" २. १. ७, ९.

"वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवः" १. ३. १.

"वीर्यं वा अश्वः" १. ४. २४.

"शरद्धेमन्तः शिशिरस्ते पितरः (ऋतवः)" १. ३. १.

"शाखया वत्सानपाकृत्य पवित्रवति सन्दोह्य, तं चरुं अपयति, चरुरु ह्येव स यत्र क्व च तण्डुलानापयन्ति" ४. ४. ४.

"स उत्तरस्या मेव पयस्यायां मेषौ मवदधाति, दक्षिणस्यां मेषम्" ४. ३. १७.

"स एतास्तिस्रस्तनूरेषु लोकेषु विन्यधत्त" १. ५. १४.

"स एष पुत्रः सन् पिता भवति" ३. १. ५.

"स पत्नी मुदानेषन् पृच्छति केन चरसीति; वरुणं वा एतत् स्त्री करोति, यदन्यस्य सत्यन्येन चरति" ४. ३. २०.

"सप्त च वै शतान्यशीतीना मृचो विंशतिश्च" ३. १. १८.

"स यत्रोदङ्ङावर्त्तते देवेषु तर्हि भवति ०—० अथ यत्र दक्षिणावर्त्तते पितृषु तर्हि भवति" १. ३. ३.

"स यो हैवं विद्वान् सायम्प्रातराग्नी भवति, सर्वं हैवायुरेति" ३. ४. ६.

"सर्वतोमुखो वा असावादित्यः ०—० सर्वतोमुखोऽय मग्निः ०—० अन्यतोमुखः पुरुषः" ५. ४. १४—१६.

"सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्यै दिशश्चरन्ते" १. २. ३.

"सायुज्यं सलोकतां जयति" ५. ५. ८.

"सोमो राजा देवाना मन्नं यच्चन्द्रमाः" ४. १. १५.

"स्वो वै मा महिमाहेति स स्वाहेति" २. २. ६.

"हिरण्यम् ०—० अग्नेर्हि रेतः" १. १. ५.

॥ अथर्षिनामादिसूची ॥

ऋषिनामादि.	प्र०	आ०	क०	ऋषिनामादि.	प्र०	आ०	क०
अप्रवानः	३	२	१४	आसुरिः	२	३	६
अम्बिका	५	३	६	आसुरिः	३	३	२
अरुणः	१	६	२०	आसुरिः	५	२	२५
आरुणिः	२	३	३१	आसुरिः	५	२	३३
आरुणिः	२	३	३४	आसुरिः	५	४	१७
आसुरिः	१	४	२७	इन्द्रः	२	४	१, २

ऋषिनामादि.	प्र०	अ०	क०
उर्वारुकम्	५	३	१२
ऋषयः	१	५	१४
ऋषयः	३	२	२४
ऋषिः	४	२	४
एके	५	२	३३
औपवेशिः	१	६	२०
औशिजः	३	२	३५
कक्षीवान्	३	२	३५
कहोड़ः	३	५	१
कुमार्यः	५	३	१३
कुरवः	४	१	५
कौषीतकिः ...	३	५	१
चैलकिः	२	३	३४
जीवलः	२	३	३४
ज्ञातयः	१	६	२०
तक्षा	२	३	३१
दक्षः	४	१	१, ६
दाक्षायणाः ...	४	१	६

ऋषिनामादि.	प्र०	अ०	क०
देवभागः	४	१	५
नड़ः	२	४	१, २
नैधिधः	२	४	१, २
पाक्षिः	१	४	२७
पार्वतिः	४	१	६
प्रतीदर्श्वः	४	१	३
भाल्लवेयः	१	४	६
भृगवः	३	२	१४
माधुकिः	१	४	२७
यमः	२	४	१, २
याज्ञवल्क्याः ...	२	३	२१
याज्ञवल्क्याः ...	३	५	२
श्रौतर्षिः	३	१	५
श्वेतः	४	१	३
सहदेवः	४	१	४
सार्ङ्गयः	४	१	४
सुप्ता	४	१	४
सृञ्जयाः	४	१	४, ५

॥ सर्वसूची ॥

	पृष्ठ		पृष्ठ
अथ सम्प्रदकोक्तिः ...	अ, आ	अथ कण्डिकासूची ...	३
अथ मूलशुद्धिपत्रम् ...	क, ख	अथ विषयसूची ...	१५
अथ प्रपाठकसूची ...	१	अथ कर्मसूची ...	२४
अथाध्यायसूची ...	१	अथ स्मर्त्तव्यालोच्यवचनसूची	२६
अथ ब्राह्मणसूची ...	२	अथर्षिनामादिसूची ...	३४

(अथ द्वितीयं ब्राह्मणम्)

महाहविषा ह वै देवा व्वृत्रं जघ्नुः। तेनो ऽएव व्यजयन्त येय मेषां व्विजितिस्ता मथयानेवैषां तस्मिन्त्सङ्ग्राम ऽइषव आर्क्षंस्तानेतैरेव शल्यान्निरहरन्त तान् व्यवृहन्त यत् त्र्याम्बकैरयजन्त ॥ १ ॥

अथ यदेष एतैर्यजते। तन्नाह न्वेवैतस्य तथा कं चनेषुर्ऋच्छतीति देवा अकुर्व्वन्निति त्वेवैष एतत् करोति यास्य त्वेवास्य प्रजा जाता यास्याजातास्ता उभयी रुद्रियात् प्रमुञ्चति ता अस्यानमीवा अकिल्विषाः प्रजाः प्रजायन्ते तस्माद्वा ऽएष एतैर्यजते ॥ २ ॥

ते वै रौद्रा भवन्ति। रुद्रस्य ह्येषुस्तस्माद्रौद्रा भवन्त्येककपाला भवन्त्येकदेवत्या असन्निति तस्मादेककपाला भवन्ति ॥ ३ ॥

ते वै प्रतिपुरुषं *। यावन्तो गृह्याः स्युस्तावन्त एकेनातिरिक्ता भवन्ति तत् प्रतिपुरुष मे-

* 'प्रतिपुरुषं'—इति ग, घ।

वैतदेकैकेन या अस्य प्रजा जातास्ता रुद्रियात् प्रमुञ्चत्येकैनातिरिक्ता भवन्ति तद्या एवास्य प्रजा अजातास्ता रुद्रियात् प्रमुञ्चति तस्मादेकैनातिरिक्ता भवन्ति ॥ ४ ॥

स जघनेन गार्हपत्यं। यज्ञोपवीती भूत्वोदङ्ङासीन एतान् गृह्णाति स तत एवोपोत्यायोदङ् तिष्ठन्नवहन्त्युदीच्यौ दृषदुपले ऽउपदधात्युत्तरार्द्धे गार्हपत्यस्य कपालान्युपदधाति तद्यदेव तामुत्तरां दिशꣳ सचन्त ऽएषा ह्येतस्य देवस्य दिक् तस्मादेता मुत्तरां दिशꣳ सचन्ते ॥ ५ ॥

ते वा अक्ताः स्युः। अक्तꣳ हि हविस्त ऽउ वा 'ऽअनक्ता एव स्युरभिमानुको ह रुद्रः पशून्त्स्याद्यदञ्जात् तस्मादनक्ता एव स्युः ॥ ६ ॥

ताग्न्मार्ड् पात्राꣳ समुदास्य। अन्वाहार्यपचनादुल्मुक मादायोदङ् परेत्य जुहोत्येषा ह्येतस्य देवस्य दिक् पथि जुहोति पथा हि स देवश्चरति चतुष्पथे जुहोत्येतद्व वा ऽअस्य जान्मितं प्रज्ञात मवसानं यच्चतुष्पथं तस्माच्चतुष्पथे जुहोति ॥ ७ ॥

पलाशस्य पलाशेन मध्यमेन जुहोति। ब्रह्म वै पलाशस्य पलाशं ब्रह्मणैवैतज्जुहोति स सर्व्वेषा मेवावद्यत्येकस्यैव नावद्यति य एषो ऽतिरिक्तो भवति ॥ ८ ॥

स जुहोति। एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहेत्यम्बिका ह वै नामास्य स्वसा तयास्यैष सह भागस्तदुदस्यैष स्त्रिया सह भागस्तस्मात् त्र्यम्बका नाम तया अस्य प्रजा जातास्ता रुद्रियात् प्रमुञ्चति ॥ ९ ॥

अथ य एष एको ऽतिरिक्तो भवति। त माखूत्कर ऽउपकिरत्येष ते रुद्र भाग आखुस्ते पशुरिति तदस्मा ऽआखु मेव पशूना मनुदिशति तेनो ऽइतरान् पशून् न हिनस्ति तदुपकिरति तिर इव वै गर्भास्तिर इवैतदुपकीर्णं तस्मादा ऽउपकिरति तया एवास्य प्रजा अजातास्ता रुद्रियात् प्रमुञ्चति ॥ १० ॥

अथ पुनरेत्य जपन्ति। अव रुद्र मदीमह्यव देवं त्र्यम्बकम्। यथा नो व्यद्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात्॥ भेषज मसि

भेषजं गवे ऽश्वाय पुरुषाय भेषजꣳ सुखं मेषाय मेष्या ऽइत्याशीरेवैषैतस्य कर्मणः ॥ ११ ॥

अथापसलवि त्रिः परियन्ति। सुव्यानूरूनुपाघ्नानास्त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुक मिव बन्धनान्मृत्योर्मुक्षीय मामृतादित्याशीरेवैषैतस्य कर्मण आशिष मेवैतदाशासते तदु ह्येव ग मिव यो मृत्योर्मुच्यते नामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति ॥ १२ ॥

तदु ह्यापि कुमार्यः परीयुः। भगस्य भजामहा ऽइति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्मादु ह्यापि कुमार्यः परीयुर्भगस्य भजामहा ऽइति॥ १३ ॥

तासा मुतासां मन्थो ऽस्ति। त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुक मिव बन्धनादितो मुक्षीय मामुत इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥ १४ ॥

अथ पुनः प्रसलवि त्रिः परियन्ति। दधि-

गानूरूनुपाघ्राना एतेनैव मन्त्रेण तत्पत् पुनः प्रसवि त्रिः परियन्ति प्रसवि न इदं कर्मानुमन्तिष्ठाता ऽइति तस्मात् पुनः प्रसवि त्रिः परियन्ति ॥ १५ ॥

अथैतान्युजमानो ऽञ्जली समोप्य। ऊर्ध्वानुदखति यथा गौर्नोदाप्नुयात् तदात्मभ्य एवैतच्छल्यान्निर्मिमते तान्विलिप्सन्त उपस्पृशन्ति भेषज मेवैतत् कुर्वते तस्माद्विलिप्सन्त उपस्पृशन्ति ॥ १६ ॥

तान् * इयोर्मूतकयोरुपनह्य। व्वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् † परेत्य यदि व्वृक्षं वा स्थाणुं वा व्वेणुं व्वा व्वल्मीकं वा व्विन्देत् तस्मिन्नासजत्येतत्ते रुद्रावसं तेन परो मूजवतो ऽतीहीत्यवसेन वा ऽअध्वानं यन्ति तदेनꣳ सावस मेवान्ववार्जति यत्र-यत्रास्य चरणं तदन्वत्र ह वा ऽअस्य परो मूजवद्भ्यश्चरणं तस्मादाह परो मूजवतो ऽतीहीत्यवततधन्वा पिनाकावस इत्यहिꣳसन् नः शिवो

---

* 'तां'—इति च ह्रस्वं डा०-वेबरेण।

† 'आनध्योदङ्'—इति च डा०-वेबरह्रस्वः पाठः।

ऽतीहीत्येवैतदाह कृत्तिवासा इति निष्वापयत्येवैन मेतत् स्वपन्न हि न कं चन हिनस्ति तस्मादाह कृत्तिवासा इति * ॥ १७ ॥

अथ दक्षिणान् बाहूनन्वावर्तन्ते । ते प्रतीचं पुनरायन्ति पुनरित्याप उपस्पृशन्ति रुद्रियेणैव वा ऽएतदचारिषुः शान्तिरापस्तदग्निः शान्त्या शमयन्ते ॥ १८ ॥

अथ केशश्मश्रूत्वा । समारोह्याग्ना ऽउदवसायैव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नौ पौर्णमासेन यजत ऽउत्सन्नयज्ञ इव वा ऽएष यच्चातुर्मास्यान्यथैष क्लृप्तः प्रतिष्ठितो यज्ञो यत् पौर्णमासं तत् क्लृप्तेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥ १९ ॥ ३ ॥

॥ इति पञ्चमप्रपाठके तृतीयं ब्राह्मणम् [६. २.] ॥

---

* 'इति'—इति ग, घ।

अथ विधित्सितानां त्र्यम्बकहविषां * शल्यनिर्हरणहेतुत्व † मितिहासेनोपपादयति— "महाहविषेति ‡ । "अथ यानेवे-त्यादि । 'तस्मिन् सङ्ग्रामे' 'एषां' देवानां मध्ये 'यानेव' इन्द्र-'इषवः' इतस्मुक्ताः शराः 'आर्च्छन्' प्राप्नुवन्, 'तान्' देवान् 'एतैरेव' त्रैयम्बकैर्हविर्भिः तस्मात् 'शल्यात्' 'निरहरन्त' वियो-जितवन्तः । निर्हरणप्रकार माह— "तान् व्यबृहन्तेति । "बृह उद्यमने" § । शल्यप्रोतांस्तानस्माच्छल्यादुदरन्त ‖ इत्यर्थः । "एतैरेवेति । प्रतिनिर्देशस्य सन्निपेत्तत्वात् तन्निर्दिशति— "यत् त्र्यम्बकैरिति । अम्बिका नाम स्त्री अस्य स्वसा, अतस्त्र्यम्बको रुद्रः । देवतावाचिना लक्षणयात्र हवींष्युच्यन्ते ॥ १ ॥

आख्यायिकया प्रतिपादित मर्थं प्रकृते योजयति— "अथ यदेष इति । 'एषः' इदानीन्तनो यजमानः । "तत्राहेति । 'न, अह, नु, एव' इति चत्वारो निपाताः । 'तत्' तेन त्रैयम्बकहविर्यागेन अद्यापि 'एतस्य' यजमानस्य सम्बन्धिन मेव 'कञ्च' क मपि पुरुषम् 'इषुः' 'तथा' 'नैव' 'ऋच्छति' प्राप्नोति । देवानुकारित्वस्य हेतु माह— "इति देवा इति । "याश्च त्वेवास्येति । 'अस्य' यजमानस्य सम्बन्धिनीः 'प्रजाः' 'जाताः', 'याश्च' 'अजाताः' प्रजनिष्यमाणाः, 'ताः' 'सर्वाः' 'उभयीः' उभयविधाः प्रजाः 'रुद्रियात्' रुद्रक्रूरहिंसनात् 'प्रमु-

---

* 'त्रैयम्बकहविषां'—इति च। उत्तरत्राप्येव मेव।

† 'शल्यनिर्हरणहेतुत्व'—इति कादिपुस्तकेषु। एव मिहोत्तरत्रापि।

‡ 'त्रैयम्बकान्'—इति का० श्रौ० सू० ५. १०. १।

§ तु० प० ६६ धा०। 'दन्त्योष्ठादिः, पवर्गीयादिरित्यन्ये'—इति कौ०।

‖ "दुबृहुतवन्त'—इति च।

ऋति'। प्रतिपुरुषं सङ्ख्याय क्रियमाणैः एतैः त्रियम्बकैर्हविर्भिः तस्य रुद्रस्य प्रीणितत्वात्। "ता अस्येत्यादि, गतम् ॥ २ ॥

तेषां देवतां विधाय प्रशंसति— "ते वै रौद्रा भवन्तीति। रुद्रो देवता एषाम्। "तस्य देवता"–इत्यण् *। तत्र कारणं माह— "रुद्रस्येति। 'हि' यस्मात् रुद्रसम्बन्धी 'इषुः' त्रिपुरविजयार्थं रुद्रस्यायुधत्वेन निर्मितः, तस्मात्। अत एवान्यत्र रुद्रस्य त्रिपुरविजयप्रस्तावे श्रूयते— "त इषुं समस्कुर्वत" –इति †। हविषा मेककपालसंस्कार्यत्वं विधाय स्तौति— "एक कपाला इति। 'एकदेवत्याः' एकदेवतार्थाः सर्व इमे पुरोडाशाः 'असन्' भवन्त्वित्यभिप्रायेण ॥ ३ ॥

कियन्तस्ते त्र्यम्बकाः कार्या इति तत्परिमाणं माह— "ते वै प्रतिपुरुष मिति ‡। 'यावन्तः' यावत्परिमाणविशिष्टा यजमानस्य 'गृह्याः' गृहसम्बन्धिनो ज्ञातयो भवेयुः §, तत्र प्रतिपुरुष मेकैकः पुरोडाश इति गणयित्वा 'तावन्तः' ते पुरोडाशाः एकेनाधिकास्ते कर्त्तव्याः। एतत् प्रशंसति—

---

* पा० सू० ४. २. २४।

† तै० सं० ६. २. ३. १। ‡ का० श्रौ० सू० ५. १०. २।

§ 'गृह्याः पुत्रपौत्रप्रादीन्यपत्यानि। करम्भपात्रोक्तन्यायेन (३. ४.) गृह्यशब्दः प्रजाविषयो ज्ञेयः'–इति या० दे० (५. १०. २.)। मानवकल्पसूत्रेऽपि तथैव 'उत्तरतो०—० यावन्ति करम्भपात्राणि'—इति। काठकेऽपि 'यावन्तो यजमानस्य पुत्रपौत्राः'—इति। आपस्तम्बस्त्वाह—'प्रतिपुरुष मेककपालान् निर्वपति, यावन्तो यजमानस्यामात्याः सस्त्रीका स्तावत एकादितिरिक्तान्'—इति। "चतुरो वा"—इति च का० श्रौ० सू० ५. १०. ३। अनपत्यस्य एकापत्यस्य द्वापत्यस्य त्रापत्यस्य च चतुर एवेति तात्पर्यम्। करम्भपात्राण्यप्येवमेव। ५. ३. ५ द्रष्टव्यम्।

"तत् प्रतिपुरुष मिति। पुरुषं पुरुषं प्रतिपुरुषम्, वीप्साया मव्ययीभावः। "एकैकेनेति। "एकं बहुव्रीहिवत्"—इति वीप्सायां द्विर्वचनम् *। बहुव्रीहिवद्भावात् सुपो लोपः। अन्यदुक्तार्थम्। एकातिरेक मनूद्य तस्य प्रयोजन माह— "एकैकेनेति ॥ ४ ॥

यावदुक्तचोदना ह्येते पुरोडाशाः, अतस्तेषां संस्कारप्रकार माह— "स जघनेनेति। गार्हपत्यस्य पश्चात् 'यज्ञोपवीती भूत्वा', 'उदङ्मुख आसीन.' †, 'एतान्' पुरोडाशान् निर्वपतीति प्रक्रम्य, जुहोतयोऽवषट्कारा इति ‡, तत्र अवषट्कारा इति छेदः। हविरुत्पत्त्यन्यथानुपपत्त्याच्चिह्नानि तद्भक्षैकान्यवहननादीनि, वैकृतं विशेषं वक्तु मनुक्रामति— "स तत एवेत्यादिना। प्रागुदीच्यां रुद्राधिष्ठितत्वेनोत्तरदिशो रुद्रसम्बन्धात् तद्दिक्त्वाच्च रुद्रदेवताख्या, तस्मात् 'ताम्' एताम् 'उत्तरां दिशं' 'सचन्ते' सर्वेषु व्यापारेषु ऋत्विजः समवयन्ति § ॥ ५ ॥

एषां हविषा भक्तार्थ मभिधारणपक्ष माह— "ते वा अक्ताः स्युरिति ‖। 'वै'—शब्दो ऽवधारणे। खलु 'ते' पुरोडाशाः 'अक्ताः' आज्येनाभिधारिता एव 'स्युः'। तत्र हेतु माह— "अक्तं ह्येति। 'हि' यस्मात् 'अक्तम्' अभिधारित मेव हविः

* पा० सू० ८. १. १। † का० श्रौ० सू० ५. १०. ४।

‡ चैयम्बका जुहोतयो भवन्ति; न यजतय इति भावः। 'यः चाम्बकैरयजन्तेत्यादिः व्यवहारः (२. ६. २. १.), स होमान्तर्गतयागाभिप्रायो द्रष्टव्यः"—इत्यभाषयदिह हरिस्वामी।

§ का० श्रौ० सू० ५. १०. ६, ७ द्रष्टव्ये।

‖ का० श्रौ० सू० ५. १०. ८, ११।

भवति । तथा च तैत्तिरीयकम्— "प्रच्युतं वा एतदस्माल्लोकादगतं देवलोकं यच्छ्रुतं हविरनभिघारित मभिघार्योद्दासयति"—इति * । अनभिघारितपक्ष मप्याह— "उ वा इति । तत्र कारण माह— "अभिमानुक इति । पशुप्रभवेनाज्येन यदि रौद्रान् पुरोडाशान् अश्नात् , ततः स रुद्रः आज्यसम्बन्धद्वारा तत्कारणभूतान् पशून् 'अभिमानुकः' † अभिमन्तुं बाधितुं शक्तः स्यात् ॥ ६ ॥

"तान् सार्द्ध मित्यादि । निगदसिद्धम् । उत्तरदिशि विशेषं विधत्ते— "पथीति । उत्तरस्यां दिशि यः पन्था विद्यते , तत्रोल्मुकं निधाय , तस्मिन् पुरोडाशान् जुहुयात् ‡ । पथि होमे कारण माह— "पथा ह्येति । 'सः' खलु रुद्रो 'देवः' 'पथा' मार्गेण हि 'चरति' तत्रावतिष्ठत इत्यर्थः । पथ्यपि किञ्चिद् विशेषं विधत्ते— "चतुष्पथ इति । चतुर्णां पथां समाहारश्चतुष्पथः , चतसृभ्यो § दिग्भ्य आगतास्त्वारः पन्थानो यत्र सङ्गच्छन्ते , तत्र जुहुयादित्यर्थः ॥ । एतदुपपादयति— "एतद्ध वा इति । 'एतत्' खलु 'अस्य' रुद्रस्य 'जाम्बितम्' ¶ जनैः परिकल्पितम् , 'प्रज्ञातम्' प्रसिद्धम् , 'अवसानं' स्थानम् , यच्चतुष्पथाख्यम् । अत एवोक्त मभियुक्तैः— "वटे-वटे वैश्रवणः , चत्वरे-चत्वरे शिवः"—इति ॥ ७ ॥

---

* तै० सं २. ६. ३. ६ ।
† 'अभिमंसुकः'—इति च ।
‡ का० श्रौ० सू० ५. १०. ५ ।
§ 'चतुर्भ्यः'—इति क, ज ।
॥ का० श्रौ० सू० ५. १०. ६ क० ।
¶ जन + धित = हित । 'जाधितम्'—इत्यपि च ।

अथैतस्मिन् होमसाधनं विधत्ते— "पलाशस्य पलाशेनेति *। पलाशवृक्षस्य पर्णेनेत्यर्थः। "ब्रह्म वै पलाशस्य पलाश मिति। पलाशवृक्षस्य ब्रह्मत्वश्रवणात्, तदीयं पर्ण मपि ब्रह्मात्मकम्। ब्रह्मश्रवणञ्च तैत्तिरीयकैराम्नातम्— "देवा वै ब्रह्मवदन्त तत् पर्ण उपाशृणोत्"–इति †। अवदाने विशेष माह— "स सर्वेषा मिति। यावन्तः पुरोडाशाः, तत्र एक मपि रिक्तं विहाय तेषां सर्वेषा मेव सकाशात् तस्मिन् मध्यमपर्णेऽवद्येदित्यर्थः ‡॥ ८॥

इत्थं सर्वेभ्यः समवत्तस्य हविषः समन्वकं होमं विधत्ते— "स जुहोतीति §। मन्त्रस्यायं मर्थः— हे 'रुद्र!' 'ते' तव 'एष भागः'। कथम्भूतस्य? अम्बिकानामास्य स्वसा, तया सहितस्य। अतः 'तं' भागं 'जुषस्व' सेवस्व। इदं हविः 'स्वाहा' सुहुत मस्त्विति ‖। तत्र "सह स्वस्राम्बिकया"–इति मन्त्रभागस्याभिप्राय माविष्कुर्वन्नेतेषां हविषां तत्राम्बकनाम निब्रवीति— "अम्बिका ह वा इति ¶। "तदादस्यैष इति। 'तत्' तथा सति 'यद्' यस्मात् 'अस्य' रुद्रस्य तया 'स्वस्रया' 'सह' 'एष भागः' कल्पितः, 'तस्मात्' स्त्रीरूपाम्बिकासम्बन्धात् रुद्रस्यैते पुरोडाशाः

---

* का० श्रौ० सू० ५. १०. ६ ख।

† तै० सं० ३. ५. ७. ३।

‡ का० श्रौ० सू० ५. १०. १०। 'मध्यमपलाशपर्वे जुहूस्थानीये' इति च तत्र या० दे०।

§ का० श्रौ० सू० ५. १०. १२।

‖ मन्त्र एषः वा० सं० ३. ५७. १।

¶ "प्रारदा अस्याम्बिका स्वसा, तया वा एष क्रियते"—इति तै० ब्रा० १. ६. १०. ४ द्रष्टव्यम्।

(वर्णलोपेन) 'त्र्याम्बकाः'–इत्याख्यायन्ते । "तदु या अस्येति, व्याख्यातम् ॥ ९ ॥

अवदानकालपरिशेषितस्यातिरिक्तस्यैकस्य विनियोग माह–– "अथ य एव इति । उल्किरति पांशूनित्युल्करः ; आखुभिः क्रते 'आखूत्करे' 'तम्' अतिरिक्त मेकं पुरोडाशम् 'उपकिरति' उपक्षिपति * । "कृ विक्षेपे"–इति धातुः † । "एष ते"–इति मन्त्रः ‡ । तदर्थस्तु–– हे 'रुद्र !' 'ते' तव 'एषः' पुरोडाशः भागः, अस्मिन्नुत्करे स्थितो यः 'आखुः' असौ 'ते पशुः इति' । मन्त्रपाठस्य प्रयोजन माह–– "तदस्मा इति । 'तत्' तेन मन्त्रेण 'पशूनां' मध्ये 'आखु मेव' 'अस्मै' रुद्राय पशुत्वेन निर्दिशति । 'तेन' कारणेन 'इतरान्' मृगवाश्वादि-पशून् स रुद्रो 'न हिनस्ति' । अतिरिक्तस्यैकपुरोडाशस्य यदु-पक्षेपणं विहितम्, तदुपपादयति–– "तदु यदिति । "तिर-इवेति । 'गर्भाः' तिरोहिता इव भवन्ति । उपकीर्णञ्च द्रव्यं विगलितं सत् तिरोहित मेव भवति, अतो गर्भस्थाना मजातानां प्रजानां रुद्रकृतहिंसनविमोचनाय क्रियमाणस्योपकीर्णत्वं युक्त मिति भावः ॥ १० ॥

जपं विधत्ते–– "अथेति § । 'अथ' तदनन्तरम्, पुनश्चतु-ष्पथादग्निसमीप मेत्य "अवरुद्रम्"–इत्यादिमन्त्रौ ‖ सर्वे जपेयुः ।

---

* का० श्रौ० सू० ५. १०. १३ । 'मृषिकैरुत्कीर्णं पांसुभिरन्त-र्हितं करोतीत्यर्थः । † तु० प० १२६ धा० ।

‡ वा० सं० ३. ५७. २ ।

§ का० श्रौ० सू० ५. १०. १४ ।

‖ वा० सं० ३. ५८, ५९ ।

तयोः प्रथममन्त्रस्याय मर्थः ।— 'रुद्रम्' 'अवादीमहि' अवदीयामहै , हविर्भागेन रुद्र मवयुज्य पृथक्कृत्य प्रजाः रक्षामहै । "दीङ् रक्षणे"–इत्यस्मात् * लोटि , "बहुलञ्छन्दसि"–इति † शब्लुकि "घुमास्था"–इतीत्वम् ‡ । तथा 'देवं' देवनशीलं 'त्र्यम्बकं' स्त्रियाम्बिकाख्यया सहितम् , अवादीमहीत्यनुषङ्गः । अम्बिकासाहित्यप्रतिपादनपर मेतद् द्वितीयं वाक्यम् । स च रुद्रो 'यथा' येन प्रकारेण 'नः' अस्मान् 'वस्यसः' वसीयसः वसुमत्तमान् 'करत्' कुर्यात् , 'नः' अस्मान् 'यथा' च 'श्रेयसः' प्रशस्यकरान् 'करत्' कुर्यात् , 'यथा' च 'नः' अस्मान् 'व्यवसाययात्' व्यवमायेत, व्यवसितार्थान् कुर्यात् ; तथा 'अवादीमहि' इति सम्बन्धः ॥

अथ द्वितीयस्य ।— हे रुद्र ! त्वं स्वरूपेणैव 'भेषजम्' औषधम् 'असि' ; सर्वदुरितनिबर्हणहेतुत्वात् । अतस्त्वं 'सुखं' सुप्राप्तं भेषजम् अस्मदीयेभ्यो गवाश्वादिभ्यः प्रदेहीति शेषः । "आशीरेवैति । एतत् त्र्यम्बकाख्यकर्मणः 'आशीः' फलप्रार्थनम् ; गवाश्वादीना मारोग्य मेतस्य कर्मणः फल मित्यर्थः ॥ ११ ॥

अथाप्रदक्षिणं त्रिरग्नेः परिगमनं विधत्ते— "अथापसलवीति § । त्र्यम्बकस्य हविषः कर्त्तारः सर्वे चतुष्पथे अग्निमपसलवि त्र्यम्बक मिति मन्त्रेण 'त्रिः परियन्ति' । किं कुर्वन्तः ? 'सव्यान्' वामान् 'उरून्' 'अपघ्नानाः' हस्तेन कुट्टयन्तः ‖ ।

---

* दि० आ० ३४ धा० । ‡ पा० सू० २. ३. ७३ ।

‡ पा० सू० ६. ४. ६६ । "छन्दस्युभयथेत्यार्द्ध धातुकत्वम्"—इतीह मह्नीधरः (पा० सू० ६. ४. ५)।

§ का० श्रौ० स० ५. १०. १५ । ‖ वादयन्त इति यावत् ।

मन्त्रस्य * चाय मर्थः— त्रीणि अम्बकानि नेत्राणि यस्य, यद्वा अम्बिका स्वसा यस्य, तथोक्तः। शोभनो गन्धो यस्यासौ सुगन्धिः। "गन्धस्येदुत्पूतिसुसुरभिभ्यः"—इति † इकारादेशः। 'पुष्टिवर्द्धनम्' पुष्टेर्वर्द्धयितारम्। रुद्रं वयं 'यजामहे' पूजयामः। त्वत्प्रसादादहम् 'उर्वारुकम्' कर्कटीफलं ‡ पक्वं सत् यथा प्रसवबन्धनात् स्वय मेव मुच्यते, तथा 'मृत्योः' मरणात् 'मुक्षीय' मुक्तो भूयासम्; 'अमृतात्' अमरणात् 'मा' वियोगो भवत्विति। "आशीरेवेत्यादि, सिद्धम्। अन्तिमपादस्य तात्पर्यं माह— "तदु ह्येवेति। 'यः' 'मृत्योः' मरणात् 'मुच्यते' मुक्तो भवेत्, सः 'अमृतात्' अमरणात् 'न' मुक्तो भवति; एतदेव हि 'श मिव' प्राणिनां सुखं भवति ॥ १२ ॥

अस्य परिगमनस्य भगप्रसिद्धिहेतुत्व मुपपादयति— "तदु ह्यापीति। 'तत्' तदा 'कुमार्यः' अपि त मग्नि मुक्तप्रकारेण 'परीयुः', 'भगस्य' सौभाग्यस्य। कर्मणि षष्ठी। सौभाग्यम् 'भजामहै' प्राप्नुयामहै 'इति' अनेनाभिप्रायेण §। "यो ह वा इति। अम्बिका नाम 'या' खलु 'रुद्रस्य स्वसा', 'सा' 'भगस्य इष्टे' सौभाग्यस्य स्वामिनी भवति। "ईश ऐश्वर्ये"—इति

---

* मन्त्रोऽयम् वा० सं० ३. ६०. १।

† पा० सू० ५. ४. १३५।

‡ 'कर्कन्धादेः फलम्"—इति महीधरः। 'पर्कटीफलम्'—इति ह्र-पाठः। 'कर्मर्कटीफलं(!)'—इति च डा०-वेबरेण दृष्टः।

§ का० श्रौ० सू० ५. १०. १६। 'यजमानस्य कुमार्योऽपरिणीता पुत्राश्चोत्तरेण त्र्यम्बक मिति मन्त्रेण, पतिवेदन मित्यर्थेन०—० विप्रिः परियन्ति, पतिं सौभाग्यं कामयमाना वा'—इतीह या० दे०।

धातुः *। भगस्येति "अधीगर्थदयेशां कर्मणि"–इति † षष्ठी। 'तस्मात्' अम्बिकासहितस्य रुद्रस्य सम्बन्धिनि कर्मणि भगप्राप्तिकामाः कुमार्योऽपि परीयुरित्यर्थः ॥ १३ ॥

कुमारीणां परिगमनेऽपि मन्त्रो विद्यत इत्याह— "तासामिति। 'आसां' पूर्वोक्तानाम् 'तासां कुमारीणा मपि परिगमनेऽन्यो 'मन्त्रः' विद्यते। कः पुनरसाविति, तं पठति— "त्र्यम्बक मिति ‡। पतिर्विद्यते लभ्यत इति पतिवेदनो रुद्रः। अन्यदुक्तार्थम्। चतुर्थपादस्य तात्पर्य माह— "सा यदित इति। 'इदं'-शब्देन पितृकुलं परामृश्यते। 'इतः' अस्मात् पितृकुलात् 'ज्ञातिभ्यः' सकाशात् अहं 'मुच्चीय' मुक्ता भूयासम्; 'अमुतः' अमुष्मात् कुलात् पतिसकाशात् 'मा मुच्चीय' विप्रयुक्ता न भवेम इति तात्पर्यार्थः। "पतयो ह्येवेति। अग्निहोत्रादिधर्मेषु पत्या सहैव स्त्रिया अधिकारः 'हि' यतः, अतः स्त्रीणां 'पतय एव' 'प्रतिष्ठा' आश्रयभूता इत्यर्थः ॥ १४ ॥

तेनैव मन्त्रेण पुनः प्रदक्षिणं त्रिः परिगमनं विधत्ते— "अथ पुनरिति §। 'प्रसलवि' प्रदक्षिणम्। "एतेनैवेति। त्र्यम्बक मिति प्रागुक्तेनोभयविधेन मन्त्रेणेत्यर्थः। "तद्यत् पुनरित्यादिवाक्यशेषः पितृयज्ञवद् व्याख्येयः ॥ १५ ॥

हुतशिष्टानां पुरोडाशानां प्रतिपत्तिं विधत्ते— "अथैतानित्यादि। 'एतान्' पुरोडाशान् यजमानस्याञ्जलावध्वर्युः संवपेत्। यजमानश्च 'ऊर्ध्वान् उदस्यति' उत्क्षिपति।

* अदा० आ० १० धा०।

† पा० सू० २. ३. ५२। ‡ वा० सं० ३. ६०. २।

§ का० श्रौ० सू० ५. १०. १५।

'यथा' 'गौः' पृथिवीनामैतत् ; पृथिवी तान् पुरोडाशान् 'नोदाप्नुयात्' ! उत्क्षिप्ताः पुरोडाशाः यथा भूमौ न पतन्ति, तथा अन्तरिक्षे, पुनरञ्जलिना धारयेत्। तदुक्तं कात्यायनेन— "रौद्रान् यजमानेऽञ्जलिनोदस्यत्यगोः प्रापणम्, प्रतिगृह्णात्येतान्" —इति *। "आत्मभ्य एवैतदिति। 'एतत्' एतेन उदसनेन 'आत्मभ्यः' ऋत्विग्यजमानाः स्व-स्व-शरीरेभ्यः 'एव' 'शल्यान्' निर्मिमते' निर्हरन्ति। तेषां पुनर्ग्रहणाशक्तौ स्वर्गनं विधत्ते— "तान् विलिप्सन्त इति। लब्धुमिच्छन्तो लिप्सन्तः तद्विपरीतो 'विलिप्सन्तः' लब्धुं मशक्ताः सन्तः, भूमौ पतितान् 'तान्' पुरोडाशान् पश्चात् 'उपस्पृशन्ति'। उक्तं हि कात्यायनेन— "प्रतिगृह्णात्येनानशक्यऽउपस्पर्शनम्"—इति †। "भेषज मेवैतदिति। एतेन स्वर्गनेन निर्हृते शल्ये स्वशरीरदेशस्य पुनर्भेषज मेव कृतवन्तो भवन्ति ॥ १६ ॥

"तान् द्वयोरित्यादि। 'द्वयोर्मूतकयोः'। यत्र तृणमये आवपने धान्यं बध्यते, तत् मूतम् ‡, मूत मेव मूतकम्। स्वार्थे क-प्रत्ययः। 'तान्' रौद्रान् पुरोडाशान् 'द्वयोर्मूतकयोः' 'उपनह्य' 'वेणुयष्ट्यां' वेणुमय्यां यष्ट्याम् 'उभयतः आबध्य' ; यद्वा 'कुपे' वेणुनिर्मितभाजनद्वययुक्तो दारुविशेषो वीवधापरपर्यायः कुपः §, तस्मिन् ; 'उभयतः' उभयपार्श्वयोः वैणवभाजनयोः 'तान्' रौद्रान् 'आबध्य' ; तेन सार्द्धम् 'उदङ् परेत्य' उदङ्-

* का० श्रौ० सू० ५. १०. १८, १९।
† का० श्रौ० सू० ५. १०. २०।
‡ "मूतयोः, शिक्याकारयोः रज्जुनिर्मितयोः"—इति या० दे०।
§ 'कुपे, यज्ञियवृक्षजे तुलादण्डे'—इति या० दे०।

मुखोऽदूरं गत्वा, वृक्षस्याग्वादीना मन्यतमस्मिन्* उपलब्धे, वीवधम् 'आसजति' आलगयति†। तस्मिन्नासजने मन्त्र माह— "एतत्त इति‡।

तस्याय मर्थः।— हे 'रुद्र!' 'ते' तव 'एतत्' दृष्टिकरम् 'अवसम्' पाथेय मन्नम्; तत् स्वीकृत्य 'तेन' साधनेन 'मूजवतः परः' मूजवान्नामोदीच्यः पर्वतः, तस्य परस्ताद्भागम् 'अतीहि' अतिक्रम्य गच्छ, मास्मानधितिष्ठा इति भावः।

मन्त्रगत मवसशब्दं प्रशंसति— "अवसेन वा इति। लोके 'अवसेन' अन्नेन पाथेयेन हि जनाः दूरम् 'अध्वानं' 'यन्ति', 'तत्' तथा सति 'एनं' रुद्रं 'सावसम्' अवससहितम् 'एव' अस्मात् स्थानात् 'अन्ववार्जति' अनुगमयति। अस्य रुद्रस्य गमनयोग्यप्रदेश माह— "यत्र-यत्रेति। यस्मिन्-यस्मिन् स्थाने 'अस्य' देवस्य 'चरणं' वर्त्तनं भवति, 'तत्' स्थानम् 'अनु'-लक्ष्येत्यर्थः। "परो मूजवतः"-इति मन्त्रभागस्याभिप्राय माह— "अत्र ह वा इति। 'अस्य' रुद्रस्य 'अत्र' अस्मिन् मूजवत्पर्वत-सम्बन्धिनि 'परः' परस्ताद् भागे 'चरणं' वर्त्तनं भवति, 'तस्मात्' तेन "परो मूजवतः"-इति मन्त्रभागस्य पठनं युक्त मित्यर्थः। द्वितीयभाग मनूद्य व्याचष्टे— "अवततधन्वेति। अवतत मवरोपितज्यं धनुर्यस्य स तथोक्तः। "पिनाकावस इति। पिनाकः, तस्यैव रुद्रधनुषो नामधेयम्। तस्य अवसः

---

* 'स्थाणौ वा, वृक्षे वा, वंशे वा, वल्मीके वा'— इति, 'स्थाणु छिन्नाग्रं वृक्षमूलम्'— इति च या० दे०।

† का० श्रौ० सू० ५, १०, २१।

‡ वा० सं० ३, ६१, १।

व्यापारो परमो यस्य स तथा। एतेन विशेषणद्वयेन फलितमर्थं माह — "अहिंसन्निति। हे 'रुद्र!' 'नः' अस्माकं हिंसामकुर्वन् 'शिवः' सुखकरः सन् "अतीहि"–इति 'एतत्', अयं मन्त्रभागः प्रतिपादयतीत्यर्थः। अन्तिमं भागम् * अनूद्य तात्पर्यं माह— "क्षत्तीति। क्षत्तिः त्वग्वास आच्छादनं यस्य स तथोक्तः। अनेन च विशेषणेन 'एनं' नितरां स्वापयेत्†; क्षत्तेर्मृदुतरत्वेन सुखकरत्वात् रुद्रस्वापो भवत्येवेत्यनेनाभिप्रायेण विशेष्यते। स्वापोऽपि किमर्थं इत्यत आह— "स्वपन्निति। 'नु' खलु लोके 'स्वपन्' निद्रालुः पुरुषः 'कञ्चन' कमपि 'न हिनस्ति' न पीडयति। अतो रुद्रक्षतवाधविरहाय तस्य स्वापः प्रार्थ्यत इत्यर्थः॥ १७॥

तेषां पुनरागमनं विधत्ते— "अथ दक्षिणानिति। रौद्रपुरोडाशानां हृत्तादावासञ्जनानन्तर्य्य मथशब्दार्थः। रौद्रैर्हविर्भिः ये अचारिषुः, 'ते' सर्वे स्वं-स्वं दक्षिणं बाहुम् 'अनु'-लक्ष्य प्रादक्षिण्येनावर्त्तेरन्; आवृत्य च 'अप्रतीक्षं' रौद्रहविःप्रचरणस्थान मनवलोकयन्तः 'पुनः' वेदिसमीप मागच्छेयुः; आगत्य च

* महीधरमते याज्ञिकदेवमते च क्षत्तिवासा इत्यपरो मन्त्रः— वा० सं० ३. ६१. २। सूत्रतश्चैव मेव प्रतीयते। का० औ० सू० ५. १०. २२ द्रष्टव्यम्। 'क्रियान्तरस्यानुपदेशात् क्षत्तिवासा इति जपेत्'—इतीह या० दे०। महीधरस्तु "क्षत्तिवासा इत्यनयैव मेत्योपसृजन्त्यपः (५. १०. २२, २३)"—इत्येकं सूत्रं मन्त्रैव व्याख्यत्— 'उन्नते वृत्तादौ मूतदयेऽवसन्न प्रत्यावर्त्तमाना मूतदयस्यावेक्षण मकृत्वा वेदिसमीपं समागत्योदकं सृजेयुः'—इति।

† 'निष्वापयतीति श्रवणात् आसक्तस्य निश्चलीकरण मनेन कर्त्तव्य मिति केचित्'—इति चाल या० दे०।

हविःप्रचरणकृतोष्णनिवारणाय 'आपः' उपस्पृशेयुः । "तदद्भिः शान्त्येति । उष्णशमनहेतुभिः 'अद्भिः' 'तत्' रौद्रप्रचरणजनितं स्व-स्वात्मगत मौष्ण्यं 'शमयन्ते' निवर्त्तयन्तीत्यर्थः * ॥ १८ ॥

वरुणप्रघासान्ते इव केशश्मश्रुवपनादिकं साकमेधान्तेऽपि कर्त्तव्य मित्यनुक्रामति— "अथ केशश्मश्रूणीति । केशश्मश्रूणि वापयित्वा 'अग्नी' गार्हपत्याहवनीयौ 'समारोह्य' समारोप्य, दक्षिणाग्ने रप्युपलक्षणम् (यदि सर्वे धार्या भवेयुः ?) समारोपणेन गृहं गच्छन्तीति शेषः ॥

"उदवसायेत्यादिना , साकमेधस्यान्तकर्त्तव्यता अत्रापि प्रतिपाद्यते । "उदवसायेति । स्नानानन्तर खलु 'एतेन' साकमेधान्तेन 'यजते' । तदङ्गत्वेन योत्तरवेदिर्निर्मिता , तस्या मग्निहोत्रहोमो न युक्त इति पुनः स्वस्थानगमनं कर्त्तव्य मित्यादि शेषं पूर्ववद् † व्याख्येयम् ॥ १९ ॥ ३ ‡ [६. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे षष्ठाध्यायस्य द्वितीयं ब्राह्मणम् ॥

---

* का० श्रौ० सू० ५. १०. २३ ।

† २८६ पृ० ४ पं० , ३१२ पृ० ६ पं० द्रष्टव्यम् ।

‡ तै० सं० १ का० ८ प्र० ६ अनु० , तै० ब्रा० १ का० ६ प्र० १० अनु० । एतयोरनुवाकयोः त्र्यम्बकयागविधयस्तत्रत्या आम्नाता द्रष्टव्याः । 'त्र्यम्बक'-'त्रियम्बक'—इति शाखाभेदकृतौ पाठाविदानीं लेखकप्रमादत एकशाखीयवाक्येष्वपि बहुत्र सङ्क्रान्ताविति च ध्येय मिति ।

(अथ तृतीयं ब्राह्मणम्)

अक्षय्यꣳ ह वै सुकृतं चातुर्मास्ययाजिनो भवति। संव्वत्सरꣳ हि जयति तेनास्याक्षय्यं भवति तं वै चेधा व्विभज्य यजति चेधा व्विभज्य प्रजयति सर्व्वं वै संव्वत्सरः सर्व्वं वा ऽअक्षय्य मेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यृतुरू हैवैतङ्कृत्वा देवानप्येत्यक्षय्य मु वै देवाना मेतेनो हैवास्याक्षय्यꣳ सुकृतं भवत्येतन्नु तद्यस्माच्चातुर्मास्यै-र्यजते ॥ १ ॥

अथ यस्माच्छुनासीर्येण यजेत। या वै देवा-नाꣳ श्रीरासीत् साकमेधैरीजानानां * व्विजिग्या-नानां तच्छुनमथ यः संव्वत्सरस्य प्रजितस्य रस आसीत्तत्सीरꣳ सा या चैव देवानाꣳ श्रीरासीत् साकमेधैरीजानानां † व्विजिग्यानानां यु उ च संव्वत्सरस्य प्रजितस्य रस आसीत् तु मेवैतदुभयं परिगृह्यात्मन् कुरुते तस्माच्छुनासीर्येण यजते ॥ २ ॥

---

* † 'श्रीरासीत्साकमे०'—इति च दृश्यो डा०-वेबरीयः।

तस्यावृत् * । नोपकिरन्त्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयो ऽनुयाजा एकꣳ समिष्टयजुः † ॥ ३ ॥

अथैतान्येव पञ्च हवीꣳषि भवन्ति । एतैर्व्वै हविर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो व्वरुण-पाशात् प्रजाः प्रामुञ्चदेतैर्व्वै देवा व्वृत्र मघ्नन्नेतैर्व्वेव ‡ व्यजयन्न येय मेषां व्विजितिस्तां त्रयो ऽएवैष एतैर्या चैव देवानाꣳ श्रीरासीत् साक मेधेरोजानानां व्विजिग्यानानां य उ च मंव्व-त्सरस्य प्रजितस्य रस आसीत् त मेवैतदुभयं परिगृह्यात्मन् कुरुते तस्माद् वा ऽएतानि पञ्च हवीꣳषि भवन्ति ॥ ४ ॥

अथ शुनासीर्यो द्वादशकपालः पुरोडाशो भवति । स बभ्रुः शुनासीर्यस्य यं पूर्व्व मवो-चाम ॥ ५ ॥

---

* 'तस्यावृत्'—इति ग, घ।

† 'समिष्टयजुः'—इति ग, घ।

‡ "मघ्नन्नेतैर्व्वेव'—इति च दृष्टो डा०-वेबरेण।

अथ व्वायव्यं पयो भवति। पयो ह वै प्रजा जाता अभिसञ्जानते व्विजिग्यानं * मा प्रजाः श्रियै यशसे ऽन्नाद्यायाभिसञ्जानान्ता ऽइति तस्मात्पयो भवति ॥ ६ ॥

तद्वायव्यं भवति। अयं वै व्वायुर्यो ऽयं पवत ऽएष वा ऽइदꣳ सर्व्वं प्रप्याययति यदिदं किञ्च व्वर्षति व्वृष्टादोषधयो जायन्त ऽओषधीर्जग्ध्वापः पीत्वा तत एतदग्रो ऽधि पयः सम्भवत्येष हि वा ऽएतज्जनयति तस्माद् वायव्यं भवति ॥ ७ ॥

अथ सौर्य एककपालः पुरोडाशो भवति। एष वै सूर्यो य एष तपत्येष वा ऽइदꣳ सर्व्वमभिगोपायति साधुना त्वदसाधुना त्वदेष इदꣳ सर्व्वं व्विदधाति साधौ त्वदसाधौ त्वदेष मा व्विजिग्यानं प्रीतः साधुना त्वदभिगोपायत्साधौ त्वद्विदधदिति तस्मात्सौर्य † एककपालः पुरोडाशो भवति ॥ ८ ॥

---

* 'विजिग्यान मेनं—इति च दृष्टौ डा०-वेबरेण।

† 'तस्माद्गौर्य'—इति च दृष्टौ डा०-वेबरेण।

तस्याश्वः श्वेतो दक्षिणा। तदेतस्य रूपं क्रियते य एष तपति यदाश्वꣳ श्वेतं न विन्दे-दपि गौरेव श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति ॥ ९ ॥

स यत्रैव साकमेधैर्यजते। तच्छुनासीर्येण यजेत यद्वै त्रिः संव्वत्सरस्य यजते तेनैव संव्व-त्सर माप्नोति तस्मादाद्यैव कदा चैतेन यजेत ॥ १० ॥

तद्वैके। रात्रीरापिपयिषन्ति स यदि रात्री-रापिपयिषेदुदः पुरस्तात् फाल्गुन्यै पौर्णमास्या ऽउद्दृष्टं तच्छुनासीर्येण यजेत ॥ ११ ॥

अथ दीक्षेत। तं नानीजानं * पुनः फाल्गुनी पौर्णमास्यभिपर्येयात् (तत् †) पुनःप्रयोगरूप इव ह स यदेन मनीजानं पुनः फाल्गुनी पौर्णमास्य-भिपर्येयात्तस्मादेनं नानीजानं पुनः फाल्गुनी पौर्ण-मास्यभिपर्येयादिति नूरसृजमानस्य ॥ १२ ॥

अथ पुनः प्रयुञ्जानस्य। पूर्व्वेद्युः फाल्गुन्यै

---

* 'तन्नानीजानं'—इति, 'तस्मादेतन्नानीजानं'—इति च पाठौ दृश्यौ डा०-वेबरेण। † नास्त्येतत् पदं घ-ङ-पुस्तकयोः।

पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनैतदु पुनः प्रयुञ्जानस्य * ॥ १३ ॥

अथातः। परिवर्त्तनस्यैव सर्व्वतोमुखो वा ऽअसावादित्य एष वा ऽइदꣳ सर्व्वं निर्ऋयति यदिदं किञ्च शुष्यति तेनैष सर्व्वतोमुखस्तेनान्नादः ॥ १४॥

सर्व्वतोमुखोऽयमग्निः †। यतो ह्येव कुतश्चाग्नावभ्यादधति तत एव प्रदहति तेनैष सर्व्वतोमुखस्तेनान्नादः ‡ ॥ १५ ॥

अथायं मन्यतोमुखः पुरुषः। स एतत् सर्व्वतोमुखो भवति यत् परिवर्त्तयते स एव मेवान्नादो भवति यथैतावेतद्य एवं विद्वान् परिवर्त्तयते तस्माद्वै परिवर्त्तयेत ॥ १६ ॥

तदु होवाचासुरिः। किन्नु तत्र मुखस्य यदपि सर्व्वाण्येव लोमानि वपेत यद्वै त्रिः संवत्सरस्य यजते तेनैव सर्व्वतोमुखस्तेनान्नादस्तस्मान्नाद्रियेत परिवर्त्तयितु मिति ॥ १७ ॥ ४ ॥

॥ इति पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् [६. ३.] ॥

---

* 'प्रयुञ्जानस्य'—इति ग, घ।

† 'सर्वतोमुखोऽयमग्निः'—इति ग, घ। ‡ 'स्तेनान्नादः'—इति ग, घ।

अथ शुनासीरीयं * विधित्सुस्तस्य शुनासीर्यस्य चतुर्थपर्वणः संवत्सरसत्त्रक्षणफलसाधनत्वं प्रतिपादयिष्यंस्तावदुपोद्घातत्वेन चातुर्मास्याना मक्षय्यफलसाधनत्व माह— "अक्षय्यं ह वा इति। चतुर्षु-चतुर्षु मासेषु क्रियन्त इति चातुर्मास्यानि प्रयुक्तानि वैश्वदेवादीनि, तैरिष्टवान् चातुर्मास्ययाजी। "करणे यजः"—इति † भूतकाले यजतेर्णिनिः। तस्य 'चातुर्मास्ययाजिनः' 'सुकृतं' यागजनितफलसाधनधर्मापरपर्याय मपूर्वम् 'अक्षय्यम्' चेतु मशक्यम्; न कदाचिदपि भोगेन क्षययितुं शक्यते। "क्षय्यजय्यौ शक्यार्थे"—इति ‡, "क्षि क्षये"—इति § अस्मान्निपातितः। अक्षय्यत्व मुपपादयति— "संवत्सरं ह्येति। 'हि' यस्मात् उदीरितैस्त्रिभिः वैश्वदेवादिभिः पर्वभिः संवत्सरपरिमितकालं 'जयति' 'तेन' संवत्सरजयेन, तदतिरिक्तस्य कालस्याभावात् 'अस्य' सार्वकालिकस्य चातुर्मास्ययाजिनः सुकृतम् अक्षय्यं भवतीत्यर्थः ॥।

संवत्सरं कथ मेतेन जयत इति तदाह— "तं वा इति। 'तं' संवत्सरं त्रिधा 'विभज्य' चतुर्षु-चतुर्षु मासेषु वैश्वदेवादिभिः 'यजते' ¶, अतस्तं संवत्सरं त्रेधा 'विभज्य' एव 'प्रजयति' प्रकर्षेण जयते। अस्तु संवत्सरस्य जयः, एतावता कथं फलस्याक्षय्यत्वमिति चेति, तदाह— "सर्वं वा इति। भूतवर्त्तमान-

---

* 'शुनासीरीय मतः'—इति का० श्रौ० सू० ५. ११. १।

† पा० सू० ३. २. ८५।

‡ पा० सू० ६. १. ८१। § भ्वा० प० २३६ धा०।

॥ "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति"—इति आप० श्रौ० सू० ८. १. १। ¶ 'चातुर्मास्यानि त्रीण्येव'—इतीह हरिस्वामी।

भविष्यत्कालत्रयावच्छिन्नं सर्वं वस्तु संवत्सरमध्ये एवान्तर्भूतम् ; संवत्सरस्तु कृत्स्नव्यापितया अनादिरनन्त इति तज्ज्यं फल मपि अक्षय्यं भवतीत्यर्थः। प्रकारान्तरेणाप्यक्षय्यत्वं प्रतिपादयति— "ऋतुरु हैवैतदिति। 'एतत्' एतेन चातुर्मास्ययजनेन वसन्ता-द्यृत्वात्मक एव 'भूत्वा' 'देवानप्येति' चातुर्मास्ययाजी अपि गच्छति, देवानाञ्च सुकृत मक्षय्य मेव भवति। अतः 'एतेन' देवेष्वपि प्रापणेन 'अस्य' 'सुकृतम्' 'अक्षय्यम्' एव 'भवति' ॥ १ ॥

इत्थं वैश्वदेवादीनां त्रयाणां फल मुपपाद्य शुनासीर्य-यागस्य अग्न्यादिकं फलं दर्शयति— "अथ यस्मादिति। 'यस्मात्' हेतोः यजमानः 'शुनासीर्येण' पर्वणा 'यजते', तस्मात् तत्फल मुच्यत इत्यर्थः। "या वै देवाना मित्यादि। 'साकमेधैः' प्रागुक्तैर्यागैः 'ईजानानाम्' इष्टवतां 'विजिग्यानानां' हत्वासुरं जितवतां देवानां 'या' 'श्रीः' सम्पत् 'आसीत्', 'तत्' 'शुनम्' सुखनामैतत् *, सुखहेतुत्वात् शुन मित्युच्यत इत्यर्थः। 'अथ' वैश्वदेवादिभिः त्रिभिस्त्रिभिश्चातुर्मास्यैः प्रस्थितस्य 'संवत्सरस्य' 'यो रस आसीत्' सुखहेतुः सारभूतोंऽशोऽभवत्, तत् 'सीरम्' इत्युच्यते। "या चैव देवाना मित्यादिः, उक्तार्थानुवादः। "त मेवैतदुभय मिति। यदेतत् शुना सीरं चोक्तम्, 'एत-दुभयम्' एतेन शुनासीर्ययागेन 'परिगृह्य' यजमानः 'आत्मन्' स्वात्मनि 'कुरुते' धारयति। इत्थं प्रवृत्तिहेतुफल मुपपाद्य तत्साधनभूतं यागं विधत्ते— "तस्मादिति। उक्तलक्षणौ शुनासीरौ अधिदेववायुादिरूपेणावस्थितौ। सास्य देवतेत्यर्थे शुनासीरशब्दाद्

* निघ० २, ६. १७ ।

यत्। तद्वियोगात् वक्ष्यमाणं हविस्समुदायसाध्यं कृत्स्नं कर्म अनेन व्यपदिश्यते। यस्मादुक्तफलसाधनत्वम्, तस्माच्छुनासीरीयाख्येनानेन चतुर्थेन पर्वणा यजेतेत्यर्थः * ॥ २ ॥

प्रयोगकर्म वक्तुं प्रतिजानीते— "तस्यावृदिति। 'तस्य' शुनाशीर्यस्य 'आवृत्' क्रिया उच्यत इति शेषः। पूर्वेषु पर्वस्विव प्रसक्त मुत्तरवेदिनिर्वपनादिकं निषेधति— नोपकिरन्तीत्यादिना। प्रयाजानुयाजादयोऽपि प्रकृतिवदेवेत्याह— "पञ्चेति † ॥ ३ ॥

पञ्च हवींषि विधत्ते— "अथैतान्येवेति। वैश्वदेवादिषु पर्वस्वनुष्ठितान्याग्नेयादीनि पञ्च हवींषि अत्रापि कर्त्तव्यानि भवन्तीत्यर्थः। कृत्स्नफलत्वेनैतानि प्रशंसति— "एतैर्वा इति। वैश्वदेवेष्वनुष्ठितैः 'एतैर्हविर्भिः' खलु पुरा 'प्रजापतिः' 'प्रजाः' सृष्टवान्। वरुणप्रघासेष्वनुष्ठितैरेव ताः 'प्रजाः' 'उभयतो वरुणपाशात्' जङ्घाधःकायस्थितात् 'प्रामुञ्चत्' प्रमुक्तवान्। तथा साकमेधेष्वनुष्ठितैरेव पञ्चभिर्हविर्भिः 'देवाः' 'वृत्रम्' असुरम् 'अघ्नन्', हत्वा च 'एतैः' एव 'व्यजयन्त' विजयं प्राप्तवन्तः। यथैवैतानि कृत्स्नाभिलषितफलसाधनानि, 'तथो' तथैव खलु 'एषः' यजमानः 'एतैः' शुनासीर्याख्ये चतुर्थे पर्वणि अनुष्ठीयमानैः, आग्नेयादिभिः पञ्चभिर्हविर्भिः शुनासीरीयं ‡ यदेतदनुक्रान्तम्, 'तदुभयं' फलम् 'आत्मन्' आत्मनि 'परिगृह्य' स्वाधीनं 'कुरुते'। "तस्मादिति, प्रतिपादितार्थनिगमनम् ॥ ४ ॥

---

* का० श्रौ० सू० ५. ११. १।

† "पौर्णमासधर्मा बर्हिर्वर्जम्"— इति का० श्रौ० सू० ५. ११. ३।

‡ 'शुनासीर्ये'— इति क्व-पाठः।

षष्ठं हविर्विधत्ते— "अथ शुनासीर्य इति *। शुनासीरौ वायुादित्यौ देवते अस्य स शुनासीर्यः। 'सीर आदित्यः'—इति हि यास्कः †। द्विवचनेन कात्यायनोऽपीम मर्थ मस्चयत्— "शुनासीराभ्यां द्वादशकपालः"—इति ‡। उक्तं वाक्यशेष मत्राप्यतिदिशति— "स बन्धुरिति। कृत्स्नस्य कर्मणः फलप्रतिपादनसमये 'यं पूर्वं' वाक्यशेषं "या वै देवानाम्"—इत्यादिकम् 'अवोचाम' उक्तवन्तः §, 'सः' एव अस्यापि 'शुनाशीर्यस्य' हविषः स्तावकः; उक्तविधयोरेव वायुादित्यरूपेणावस्थितत्वादिति भावः ॥ ५ ॥

सप्तमं हविर्विधत्ते— "अथ वायव्य मिति ‖। वायुर्देवता अस्य तद् 'वायव्यम्'। "वाग्वृतुपित्वृषसो यत्"—इति ¶ यत्। पयसस्तावत् अन्नानुकूल्यं दर्शयति— "पयो ह वा इति। 'जाताः' सर्वाः 'प्रजाः' 'पयः' खलु 'अभि'-लक्ष्य 'सञ्जानते' सञ्जानाना भवन्ति। अतः पयसः सम्पत्तिहेतुत्वात् 'विजिग्यानं' साकमेधैर्विजितवन्तम् 'एनं' यजमानं 'श्रियै' सम्पदे, 'यशसे' कीर्त्यै 'अन्नाद्याय' अन्नादनसामर्थ्याय च सर्वाः 'प्रजाः' 'अभिसञ्जानान्तै' अभिसञ्जानीरन्, अनुमन्यन्ता मिति; अनेनाभिप्रायेण पयसः करण मित्यर्थः ॥ ६ ॥

---

* "नित्येभ्योऽधिकानि"—इत्यादीनीह का० श्रौ० सू० ५. ११. ५ द्रष्टव्यानि।

† "शुनासीरौ शुनो वायुः, शु इत्यन्तरिक्षे; सीर आदित्यः, सरणात्"—इति निरु० ६. ४. ६।

‡ का० श्रौ० सू० ५. ११. ५। § ४०४ पृ० १० पं०।

‖ "वायव्यं पयः, यवागूर्वा"—इति का० श्रौ० सू० ५. ११. ६, १०

¶ पा० सू० ४. २. ३१।

तस्य वायुदेवत्यत्व मनूद्य स्तौति— "तद्यदिति। "एष वा इत्यादि। 'यदिदं किञ्च' भूम्यां स्थितं स्थावरादिकं 'वर्षति' वृष्ट्या सिञ्चति, इदं सर्वम् 'एषः' खलु पवमानः 'प्रप्याययति' प्रवर्द्धति। "ओ प्यायी वृद्धौ"—इति * धातुः। तस्माद् वृष्टात् पवमानेन प्रप्यायितात् 'ओषधयो जायन्ते', ताश्च 'ओषधीः' 'जग्ध्वा' भक्षयित्वा "अदो जग्धिर्ल्यप् किति" —इति † अदेर्जग्धादेशः। ओषधिभक्षणानन्तरम् 'अपः पीत्वा' पशवः पयो दुहन्ति। 'एतदन्नः' सकाशात् 'पयः' 'सम्भवति' उत्पद्यते। तस्मात् परम्परया 'एष हि' पवमानः 'एतत्' पयो 'जनयति' उत्पादयति ‡। तस्मादस्य वायुदेवतेत्येतदुक्त मित्यर्थः ॥ ७ ॥

अष्टमं हविर्विधत्ते— "अथ सौर्य इति §। अस्य हविषः सूर्योऽभिगोप्तेत्याह— "एष वै सूर्य इत्यादिना। "साधुना त्वदित्यादि। 'साधुना' शोभनेन कर्मणा 'त्वत्' एकं पुण्यकृतं जनम् 'एषः' सूर्यः 'अभिगोपायति'। न केवलं रक्षणमत्र शोभनात्मकम्। 'इदं सर्वं' जगत्, एष एव सूर्यो 'विदधाति' करोति; विदधानः सः 'त्वत्' एकं 'साधौ' पुण्ये कर्मणि स्थापयति, 'त्वत्' एकम् अन्यत् 'असाधौ' पापकर्मणि स्थापयति। 'एषः' खलु हिरण्यगर्भरूपः स आत्मा। अस्य हि साध्वसाधुकर्मणः कारयितृत्व मन्यत्र चाम्नायते— "एष ह्येव साधु कर्म कारयति, तेषा मेभ्यो लोकेभ्य ऊर्ध्वं निनीषते;

---

* भ्वा० आ० ४८८ धा०। † पा० सू० २. ४. ३६।
‡ का० श्रौ० सू० ५. १. ७, ८, ९।
§ "सौर्य एककपालः"—इति का० श्रौ० सू० ५. ११. ११।

एष ह्यसाधु कर्म कारयति, तेषा मेभ्यो लोकेभ्योऽधो निनीषते"–इति।

"एष मेत्यादि। एव मुक्तविधः सूर्य एषः अनेन हविषा 'प्रीतः' सन् 'विजिग्यानं' साकमेधैः विजितवन्तं 'मा' मां 'साधुना' कर्मणा 'अभिगोपायत्' अभिरक्षति, तथा तस्मिन् 'साधौ' शोभने कर्मणि मां 'विदधत्' विदधातु, प्रेरयतु 'इति' अनेनाभिप्रायेण यजमानः सौर्यं हविः कुर्यात्। 'क्वत्' –इति, एतदत्र कियाविशेषणत्वेन योज्यम् ॥ ८ ॥

तस्येककपालस्य दक्षिणां विधत्ते— "तस्याश्वः प्रखेत इति। 'तस्य' सौर्यस्य हविषः प्रखेतः अश्वविशेषो 'दक्षिणा' *। शुनासीर्यस्य तु षड्भिरनड्वद्भिर्युक्तं सीरं दक्षिणा। तदुक्तं सूत्रकारेण— "सीरं षड्योगं दक्षिणा"–इति †। "तदेतस्येत्यादि। 'एतस्य' सूर्यस्य सितभावस्वरूपत्वात् प्रखेताश्वदान मेतदीय रूपकरण मित्यर्थः। तादृशाश्वालाभे तादृशो गौर्देय इत्याह— "यद्यश्वं मित्यादि ‡ ॥ ९ ॥

अथ शुनासीर्ययागस्य कालं विधत्ते— "स यत्रैवेत्यादिना। 'यत्र' यस्मिन् 'एव' काले 'साकमेधैर्यजते', 'तत्' तदानीम्, तदनन्तरकाले एव § (सः ‖) यजमानः शुनासीर्येण 'यजेत'।

---

* का० श्रौ० सू० ५. ११. १४ क।

† का० श्रौ० सू० ५. ११. १२। सीरम्= हलम्। 'युज्यन्त इति योगाः बलीवर्दाः'–इति च तत्र या० दे०। "ओष्टारौ वा"–इति च तदुत्तरसूत्रम्। 'वोढारौ महान्तौ बलीवर्दौ, न सीरम्'–इति च तद्वृत्तिः।

‡ का० श्रौ० सू० ५. ११. १५। 'गौः श्वेतः'–इति चात्र या० दे०

§ 'तदनन्तरकाल मेव'–इति च-पाठः।

‖ नास्त्येतत् पदं च-पुस्तके।

न तु शुनासीर्यस्यापि चातुर्मास्यत्वात् मासचतुष्टयस्य व्यवधान मपेक्षित मित्यत आह— "यदा इति। चतुर्षु चतुर्षु मासेषु संवत्सरस्य मध्ये वैश्वदेव-वरुणप्रघास-साकमेध-भेदेन 'त्रिः' त्रिवारं 'यजते' इति यत्, 'तेनैव संवत्सर माप्नोति'। वैश्वदेवादयः प्रत्येकं चातुर्मास्ययुक्ता * इति तदनुष्ठानेनैव तेषां द्वादशाना मवाप्तत्वात् तत्समुदायरूपः संवत्सरोऽपि यजमानस्य स्वायत्तो जात इत्यर्थः। उक्त मर्थं निगमयति— "तस्मादिति। यस्मात् चतुर्थपर्वणः शुनासीर्यस्य संवत्सरातिरिक्तः प्रातिस्विकः कालो नास्ति, तस्माद् यदा कदाचिदेव साकमेधानन्तरं यजेतेत्यर्थः †। एतदेवानन्तर्यं सूत्रकृताप्युक्तम्— "शुनासीरीय मतः"—इति ‡॥ १०॥

सोमेन यज्यमाणस्य पक्षान्तर माह— "तद्वैक इति। 'तत्' तत्र खलु शुनासीर्यानुष्ठाने 'एके' शाखिनः 'रात्रीः आयिषयिषन्ति' अनेन यागेन कतिचिद् रात्रीः आप्तु मिच्छन्ति। अत एवोक्त मापस्तम्बेन— "ततो द्व्हे त्र्हे चतुरहेऽर्हमासे मासि चतुर्षु वा मासेषु शुनासीरीयेण यजते"—इति §। तेषां मते सोमेन यज्यमाणस्य शुनासीर्यकाल उच्यत इत्यर्थः।

* 'चतुर्मास्ययुक्ता'—इति का०-सू०-वृ०-धृतः पाठः (५, ११, १,)।

† अत्र हरिस्वामिनः— "यस्मिन् काले साकमेधैर्यजते, ततः तत्रैव शुनासीर्येणेति, न तद्दिवसनियमोऽयम्, किन्तर्हि? यत् पूर्वयोः पर्वणोरुक्तम् चतुर्थे मासीति, तदाग्रङ्कानिवृत्त्यर्थम्। साकमेधः प्रत्याग्रयणे यजनीयेऽहनि यजेत, नियमतश्चतुर्थे मासं नातिक्रामेतेत्यर्थः। कुत एतत्? तस्माद् यदेव कदा चैतेन यजेतेत्युपसंहारात्"—इति।

† का० श्रौ० सू० ५, ११, १। "यदेच्छेत्"—इति चैतदुत्तरसूत्रम्।

§ आप० श्रौ० सू० ८, २०, १।

यदि हि 'रात्रीः' 'आपिपयिषेत्' आप्तु मिच्छेत्, तदा आगामिनीभ्यां फाल्गुनीभ्यां युक्ता पौर्णमासी फाल्गुनी; षष्ठ्यर्थे चतुर्थी; 'फाल्गुन्यै' फाल्गुन्याः पौर्णमास्याः 'पुरस्तात्' 'यत्', 'अदः'–इति विप्रकृष्टे, 'उत्' ऊर्ध्वं चन्द्रमाः अस्मिन् दृश्यते इति 'उद्दृष्टं' शुक्लपक्षः, 'तत्' तत्र प्रतिपदाद्यन्यतमस्यां तिथौ 'शुनासीर्येण यजेत' * ॥ ११ ॥

"अथ दीक्षेतेति। 'अथ' अनन्तर मेव सोमयागार्थं 'दीक्षेत' कालविलम्बो न कार्य इत्यर्थः। दैवान्मानुषाद्वा विघ्नात् विलम्बेऽपि तस्यावधि माह— "तं नानीजान मिति। इमा मेव श्रुति मभिप्रेत्यापस्तम्बोऽप्याह— "चातुर्मास्यैरिष्ट्वा सोमेन पशुना वा यजते, फाल्गुन्या उद्दृष्टे सोमाय दीक्षते, तं ततो नानीजान मपरा फाल्गुनी पर्यवेयात्"–इति †। तदत्यये दोष माह— "पुनरिति। 'अनीजानम्' 'एनम्' यजमानम् 'पुनः' फाल्गुनी पौर्णमासी न अतिक्रामेत् इति यत्, स 'पुनः-प्रयोगरूप इव ह' भवति; चातुर्मास्यानां प्रयोगस्य एतस्मिन् काले कर्त्तव्यत्वात्, तस्य चानाचरितत्वात् पुनःप्रयोगाङ्गभूतोऽयं कालो भवेदित्यर्थः। प्रतिपादितं प्रतिषेधं निगमयति— "तस्मादिति। अयञ्च पक्षोऽधिकारिविशेषस्यैवेति निगमयति— "इति न्विति। द्विविधौ हि चातुर्मास्ययाजिनौ सकृदनुष्ठायो-

* का० श्रौ० सू० ५. ११. १५। 'फाल्गुन्युद्दृष्टे = फाल्गुनशुक्लप्रतिपदि'–इति या० दे०। "उद्दृष्टं = शुक्लपक्षः, तस्मिन् प्रतिपदीव शुनासीर्येण यजेत, अथानन्तरं तस्मिन्नन्यस्मिन् वा दिवसे दीक्षानुसारेण दीक्षेत"–इतीह हरिस्वामी।

† आप० श्रौ० सू० ८. २१. २, ३, ४।

त्सृजमानः पुनः-प्रयुञ्जानस्य । तत्र 'उत्सृजमानस्य' खलु अयमुक्तः पक्ष इत्यर्थः ॥ १२ ॥

कस्तर्हि तानि पुनः-प्रयुञ्जानस्य पक्ष इति दर्शयति— "अथ पुनरिति *। चातुर्मास्यानि सङ्कल्प्य संयज्य अनन्तरमेव यः तानि पुनरारभ्यते, तस्य पुनरारभमाणस्य 'फाल्गुन्यै पौर्णमास्यै' षष्ठ्यर्थे चतुर्थी, तस्याः 'पूर्वेद्युः' पूर्वदिवसे चतुर्दश्यां 'शुनासीरीयेण यजेत', 'अथ' अनन्तरमेव 'प्रातः' काले पौर्णमास्यां 'वैश्वदेवेन' 'यजेत', तदनन्तरम् नित्येन पौर्णमासयागेनेत्ययं प्रयोगक्रमः। तदुक्तं कात्यायनेन— "फाल्गुन्युपवसथे शुनासीरीयम्, प्रातर्वैश्वदेवम्"-इति †। "एतदु पुनरिति, प्रतिज्ञातार्थनिगमनम् ॥ १३ ॥

चातुर्मास्याङ्गभूतं वपनं मीमांस्यते— "अथात इत्यादिना। अत इति वक्ष्यमाणार्थपरामर्शः। 'अतः' अस्माद् वक्ष्यमाणाद्धेतोः 'परिवर्त्तनस्य' परितः केशश्मश्रुादीनाम् वर्त्तनस्य ‡ वपनस्य विचारो § ऽधिक्रियते इत्यर्थः ॥। एतत् परिवर्त्तनं विधातु मन्वादत्वेनादित्य मन्त्रं च स्तौति— "सर्वतोमुखो वा

---

* का० श्रौ० सू० ५. ११. १६ द्रष्टव्यम्; आप० श्रौ० ८. २१. ६।

† का० श्रौ० सू० ५. ११. १७, १८।

‡ 'आवर्त्तनस्य'—इति ङ्क-पाठः।

§ 'विकारो (विवारो)'—इति च-पाठः।

॥ "हृदयशूलान्ते वपनम्"—इति का० श्रौ० सू० ५. ११. २६। 'पर्वसंस्थासु यद् वपनं मुक्तं वैकल्पिकम्, तत् सपशुषु हृदयशूलान्ते= हृदयशूलसमिदाधानान्ते कर्त्तव्य मित्यर्थः'—इति तट्टीकायां या० दे०। अन्यत् सर्वं मत्र निरूढवदिति चैतावतैव सम्यङ्नम्।

असावादित्य इत्यादिना। सर्वतः सर्वासु दिक्षु मुखं रसादानसामर्थ्यं यस्य स तथोक्तः। सर्वतोमुखत्व मुपपादयति— "एष वा इति। 'निर्हरति' रसं निष्कृष्य पिबति। अत एतत् सर्वं घर्मकाले 'शुष्यति' शोषणं प्राप्नोति, सर्वं जगद् व्याप्य स्थितस्य सूर्यस्य स्वकिरणैरित्यर्थः॥ १४॥

"सर्वतोमुखोऽथ मग्निरिति। अत्रापि तथैव योजना। "यतो ह्येवेति। यतः कुतश्चिदपि दिग्भागादित्यर्थः। 'अभ्यादधति' अभिप्रक्षिपति। "तत एवेति। तस्मिन्नपि दिग्भागे इत्यर्थः॥ १५॥

एव मग्न्यादित्ययोः सर्वतोमुखत्वेन अन्नादत्त्वं प्रतिपाद्य पुरुषस्य स्वाभाविकं तद्विपरीत माह— "अथाय मिति। 'अथ'शब्दः त्वर्थे। 'अयं' तु 'पुरुषः' यजमानः 'अन्यतोमुखः'। अन्यशब्द एकशब्दपर्यायः। अन्यतः एकत्र स्थित मेव मुखं यस्य, स तथोक्तः। तस्य सर्वतोमुखत्वसम्पत्ति माह— "स एतदिति। 'यद्' यस्मात् परितः शिरो वर्त्तयते, केशान् वापयति, 'एतत्' एतेन अलोमकत्वसाम्यात् शिरसः प्रान्तदेशा अपि मुख मिव भवन्तीति स यजमानः सर्वतोमुखो भवति। इत्थं पुरुषस्य सर्वतोमुखत्वं प्रतिपाद्य प्रागुक्तं दृष्टान्तद्वयसिद्धमर्थं दार्ष्टान्तिके योजयति— "स एव मेवेति। 'यथा' 'एतौ' आदित्योऽग्निश्च सर्वतोमुखत्वात् अन्नादौ, 'एव मेव' यजमानोऽपि 'अन्नादः' सर्वतो दिक्षु समत्तुं समर्थो भवति। "तस्मादिति, उपपादितस्य परिवर्त्तनस्य निगमनम्॥ १६॥

प्रकारान्तरेण सर्वतोमुखत्वं प्रतिपादयन् परिवर्त्तनं न कर्त्तव्य मिति पक्षान्तर माह— "तदु ह्येवाचेति। 'तत्'

तत्र, तस्मिन् परिवर्त्तनविषये 'आसुरिः' नाम महर्षिः आह स्म। 'यदपि' यदि नाम 'सर्वाण्येव लोमानि' परितो 'वपेत', तथापि तत्तन्मुण्डिते देशे 'मुखस्य' सम्बन्धि किन्नामावयवजातं निष्पन्नं भवति? न ह्यलीमकत्वमात्रेण मुख मिति व्यवहर्त्तुं शक्यते, किन्तु बहुश्मश्रुत्राद्यवयवसमन्वयेव; अतो नैतेन परिवर्त्तनेन सर्वतोमुखत्वं लभ्यत इत्यर्थः। कथन्तर्हि सर्वतोमुखत्वं पुरुषस्य? तत्राह— "त्रिः संवत्सरस्येति। 'संवत्सरस्य' मध्ये वैश्वदेवादिभेदेन 'त्रिः यजते', 'तेनैव' अयं यजमानः 'सर्वतोमुखः'; ह्यत्रस्य संवत्सरस्य यागेन प्राप्तत्वात्। "तेनैवेति। अत्रादहेतुभूतं सर्वतोमुखत्वं प्रकारान्तरेणैव सिध्यति। "तस्मादिति। 'तस्मात्' परिवर्त्तनं 'न आद्रियेत' इत्यासुरेर्मतस्य निगमनम् ॥ १७ ॥ ४ * [६. ३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे षष्ठाध्यायस्य तृतीयं ब्राह्मणम् ॥

---

* त्रिविधानि चातुर्मास्यानि भवन्ति। ऐष्टिकानि, पाशुकानि, सौमिकानि च। तत्र ऐष्टिकान्येवेहोक्तानि विशेषतः, ह्यान्दोग्यादिविहितानि सौमिकानि तु का० श्रौ० सू० द्वाविंशाध्याये सप्तम्यां कण्डिकायां वर्णितानि, पाशुकान्यपि तत्रैव तत उत्तरस्मिन्नध्याये वर्णितानीति द्रष्टव्यम्। "सप्तसु पशुतन्त्रम् प्राधान्यात्, पूर्वेद्युर्वैश्वदेवे पाशुकम्"—इत्यादीनि च सूत्राणीह (का० श्रौ० सू० ५. ११. १६—३१.) समालोच्यानीति दिक् ॥

(अथ चतुर्थं ब्राह्मणम्)

तदुदाहुः । साकमेधैर्वै देवा व्रृत्रमघ्नंस्तैर्वेव * व्यजयन्त येषु मेषां व्विजितिस्ता मिति सर्व्वैर्हैत्वेव देवाश्चातुर्मास्यै र्व्रृत्रं मघ्नन्त्सर्व्वैर्व्वेव व्यजयन्त येषु मेषां व्विजितिस्ताम् † ॥ १ ॥

ते होचुः । केन राज्ञा केनानीकेन योत्स्याम इति स होवाग्निरुवाच मया राज्ञा मयानीकेनेति ते ऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्तान् ब्रह्मणा च त्रय्या च व्विद्यया पर्य्यगृह्णन् ॥ २ ॥

ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स ह व्वरुण उवाच मया राज्ञा मयानीकेनेति ते व्वरुणेनैव राज्ञा व्वरुणेनानीकेनापरांश्चतुरो मासः प्राजयंस्तान् ब्रह्मणा चैव त्रय्या च व्विद्यया पर्य्यगृह्णन् ॥ ३ ॥

---

* ०स्तैर्यैव'—इति, ०वैर्यैव'—इति च पाठौ दृष्टौ डा०-वेबरेण।

† 'व्विजितिस्ताम्'—इति ग, घ।

ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स होन्द्र उवाच मया राज्ञा मयानीकेनेति त ऽइन्द्रेणैव राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्राजयंस्तान् ब्रह्मणा चैव चय्या च विद्यया पर्यगृह्णन् ॥ ४ ॥

स यदैश्वदेवेन यजते । अग्निनैवैतद्राज्ञाग्निनानीकेन चतुरो मासः प्रजयति तत् चोनी श्रल्ली भवति लोहः चुरः सा या चोनी श्रल्ली सा चय्यै विद्यायै रूपं लोहः चुरो ब्रह्मणो रूपमग्निर्हि ब्रह्म लोहितं वै ह्यग्निरुत्साल्लोहः चुरो भवति तेन परिवर्त्तयते तद् ब्रह्मणा चैवैन मेतच्चय्या च विद्यया परिगृह्णाति ॥ ५ ॥

अथ यद्वरुणप्रघासैर्यजते वरुणेनैवैतद्राज्ञा वरुणेनानीकेनापरांश्चतुरो मासः प्रजयति तत् चोनी श्रल्ली भवति लोहः चुरस्तेन परिवर्त्तयते तद् ब्रह्मणा चैवैन मेतत् चय्या च विद्यया परिगृह्णाति ॥ ६ ॥

अथ यत्साकमेधैर्यजते । इन्द्रेणैवैद्राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्रजयति तत्

चोनी शलली भवति लोहः खुरस्तेन परिवर्त्तयते तद् ब्रह्मणा चैवैन मेतच्छ्रय्या च विद्यया परिगृह्णाति ॥ ७ ॥

स यदैश्वदेवेन यजते। अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद् व्रतप्रघासैर्यजते व्रतव एव तर्हि भवति व्रतवस्त्रैव सायुज्यꣳ सलोकतां जयत्यथ यत्साकमेधैर्यजत ऽइन्द्र एव तर्हि भवतीन्द्रस्त्रैव सायुज्यꣳ सलोकतां जयति ॥ ८ ॥

स यस्मिन् हऽर्तावमुं लोक मेति। स एन मृतः परस्मा ऽऋतवे प्रयच्छति पर उ परस्मा ऽऋतवे प्रयच्छति स परम मेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिन मनुविन्दन्ति परमꣳ ह्येव खलु * स स्थानं परमां गतिं गच्छतीति ॥ ९ ॥ ५ ॥

॥ इति पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् [९. ४.] ॥

---

* 'खलु'—इति च दृष्टो डा०-वेबरेण।

वैश्वदेवादिषु सर्वेषु परिवर्त्तनं सेतिकर्त्तव्यताकं विधित्सुस्तेषां सर्वेषां हवनवधहेतुत्वं विजयहेतुत्वं च समान मिति प्रतिपादयति— "तद्यदाहुरिति। 'तत्' तत्र उक्तविषये साकमेधाना मेव हवनवधहेतुत्वं जयहेतुत्वञ्चेति 'यद्' 'आहुः' कथयन्ति, तत्र; तथा 'सर्वैरेव' हि 'चातुर्मास्यैः' चतुर्षु-चतुर्षु मासेषु प्रयुज्यमानैः वैश्वदेवादिभिः हवनहननं विजयश्च प्राप्तवन्तो 'देवाः' इत्यर्थः ॥ १ ॥

तत्र वैश्वदेवेन जित मर्थं माख्यायिकया दर्शयति—"ते होचुरिति। 'ते' देवाः खलु प्रजापतिं पितर मभिलक्ष्य परस्परं वाचम् 'ऊचुः'। "कैनानीकेनेति। अनीकं सेनामुखम्, सेनान्येत्यर्थः। "चतुरो मास इति। "पद्दन्०"—इत्यादिना * मासशब्दस्य मास् इत्यय मादेशः। "तान् ब्रह्मणा चेति। 'तान्' विजितान् मासान् 'ब्रह्मणा' "अग्नि र्हि ब्रह्म"—इत्यग्रे विवरिष्यते †, अतो ब्रह्मणा अग्निना, 'त्रय्या' वेदत्रयरूपया 'विद्यया च' देवाः 'पर्यगृह्णन्' परितो धारयन् ॥ २ ॥

एवं वैश्वदेवस्याग्निप्रमुखत्व मुक्त्वा वरुणप्रघासेषु वरुणप्रमुखत्वञ्चाह— "ते होचुरिति। "अपरांश्चतुर इति। आषाढादीनित्यर्थः। अन्यत् पूर्ववत् ॥ एवं साकमेधेषु इन्द्रप्रमुखत्वम्, 'अपरान्' कार्त्तिकादीनित्येव विशेषः ॥ ३, ४ ॥

इत्थं प्रतिकृत्युपन्यासेन वैश्वदेवादिषु पर्वसु प्रतिपादित मर्थं यजमानेऽपि क्रमेण योजयति— "स यद् वैश्वदेवेनेत्यादिना। "ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन्"—इति यदुक्तम्, तस्य प्रतिकृति माह— "त्रेधेति। त्रिषु स्थानेषु 'एतः'

* पा० सू० ६, १, ६३। † उत्तरकण्डिकायां द्रष्टव्यम्।

चेत्नी शलली भवति लोहः क्षुरस्तेन परिवर्त्तयते तद् ब्रह्मणा चैवैन मेतच्छ्मश्रु च व्रिद्यया परिगृह्णाति ॥ ७ ॥

स यदैश्वदेवेन यजते। अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद् व्वरुणप्रघासैर्यजते व्वरुण एव तर्हि भवति व्वरुणस्यैव सायुज्यꣳ सलोकतां जयत्यथ यत्साकमेधैर्यजत ऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकतां जयति ॥ ८ ॥

स यस्मिन् हऽर्तावमुं लोक मेति। स एन मृतः परस्मा ऽऋतवे प्रयच्छति पर उ परस्मा ऽऋतवे प्रयच्छति स परम मेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिन मनुविन्दन्ति परमꣳ ह्येव खलु * स स्थानं परमां गतिं गच्छतीति ॥ ९ ॥ ५ ॥

॥ इति पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् [९. ४.] ॥

---

* 'खलु'— इति च दृष्टो डा० वेबरेण ।

वैश्वदेवादिषु सर्वेषु परिवर्त्तनं सेतिकर्त्तव्यताकं विधित्सुस्तेषां सर्वेषां हवनवधहेतुत्वं विजयहेतुत्वं च समान मिति प्रतिपादयति— "तद्यदाहुरिति। 'तत्' तत्र उक्तविषये साकमेधाना मेव हवनवधहेतुत्वं जयहेतुत्वञ्चेति 'यद्' 'आहुः' कथयन्ति, तत्र; तथा 'सर्वैरेव' हि 'चातुर्मास्यैः' चतुर्षु-चतुर्षु मासेषु प्रयुज्यमानैः वैश्वदेवादिभिः हवनहननं विजयश्च प्राप्तवन्तो 'देवाः' इत्यर्थः ॥ १ ॥

तत्र वैश्वदेवेन जित मर्थं माख्यायिकया दर्शयति—"ते होचुरिति। 'ते' देवाः खलु प्रजापतिं पितर मभिलक्ष्य परस्परं वाचम् 'ऊचुः'। "केनानीकेनेति। अनीकं सेनामुखम्, सेनान्येत्यर्थः। "चतुरो मास इति। "पद्दन्०"—इत्यादिना * मासशब्दस्य मास् इत्यय मादेशः। "तान् ब्रह्मणा चेति। 'तान्' विजितान् मासान् 'ब्रह्मणा' "अग्नि र्हि ब्रह्म"—इत्यग्ने विवरिष्यते †, अतो ब्रह्मणा अग्निना, 'त्रय्या' वेदत्रयरूपया 'विद्यया च' देवाः 'पर्यगृह्णन्' परितो धारयन् ॥ २ ॥

एवं वैश्वदेवस्याग्निप्रमुखत्व मुक्ता वरुणप्रघासेषु वरुणप्रमुखत्वञ्चाह— "ते होचुरिति। "अपरांश्चतुर इति। आषाढादीनित्यर्थः। अन्यत् पूर्ववत् ॥ एवं साकमेधेषु इन्द्रप्रमुखत्वम्, 'अपरान्' कार्त्तिकादीनित्येव विशेषः ॥ ३, ४ ॥

इत्थं प्रतिकृत्युपन्यासेन वैश्वदेवादिषु पर्वसु प्रतिपादित मर्थं यजमानेऽपि क्रमेण योजयति— "स यदु वैश्वदेवेनेत्यादिना। "ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन्"—इति यदुक्तम्, तस्य प्रतिकृति माह— "त्रेधेति। त्रिषु स्थानेषु 'एतः'

---

* पा० सू० ६, १, ६३। † उत्तरकण्डिकायां द्रष्टव्यम्।

श्वेतवर्णा * यस्याः सा त्वेनी। "वर्णादनुदात्तात्०"—इति † एतशब्दात् ङीप्, तकारस्य नकारादेशश्च। श्वाविधामकस्य मृगस्य लोम 'शलली' ‡। उत्पत्तिलक्षणा सा वक्ष्यमाणपरिवर्त्तनहेतुत्वेन स्वीकार्या। तत्र शलल्यास्त्रयीप्रतिरूपत्व माह— "सा येति। 'सा' पूर्वोक्ता 'या' 'त्वेनी शलली', सा त्वित्यस्याविशिष्टगुणोपेतत्वात् त्रय्या विद्यायाः स्वरूपम्। 'लोहः' लोहितवर्णस्ताम्रमयः 'स्रुरः', स 'ब्रह्मणो रूपम्'। कथं ब्रह्मणो लोहितवर्णत्व मिति तदाह— 'अग्निर्हीति। स च ब्रह्मशब्दवाच्यो ऽग्निः लोहितवर्णः 'इव' हि भवति; 'तस्मात्' लोहितवर्णः 'स्रुरः' ब्रह्मणः प्रतिरूप मित्यर्थः। "तेनेत्यादि। 'तेन' स्रुरेण, तया शलल्या च 'परिवर्त्तयते' शलल्या केशान् विभज्य स्रुरेण परितो वापयेदित्यर्थः §। "ब्रह्मणा चैवेति। 'एनं' यजमानम् 'एतत्' एतेन शललीलोहस्रुरक्तेन परिवर्त्तनेन, अग्निरूपेण तेन 'ब्रह्मणा' स्रुरनिदानभूतेन, 'त्रय्या वेदत्रयरूपया 'विद्यया' च सर्वतोमुखत्वसम्पादनद्वारा अनया 'परिगृह्णाति' परितः सर्वासु दिक्षु धारयतीत्यर्थः ‖ ॥ ५ ॥

---

* 'एतं (एनं) श्वेतं वर्णा'—इति च-पाठः।

† पा० सू० ४. १. ३९।

‡ 'शल्यकस्थगस्याङ्गरुहा सूचिः शललो'—इति (८. ४. १.) आप० श्रौ० सू० व्याख्यायां रुद्रदत्तः।

§ 'वापेत्'—इति कु-ज-पाठो डा०-वेबर-इष्टश्च।

‖ "त्रैण्या शलल्यास्रुकाखनेस्रशलाकया वा लौहेन च स्रुरेणौदुम्बरेण नि केशान् वर्त्तयते वापयते प्रसमूह्य"—इति आप० श्रौ० सू० ८. ४. १। 'निवर्त्तयते = क्षिपति'—इति रुद्रः। प्रथमस्य वैश्वदेवपर्वणः फलम् तै० ब्रा० १. ४. १०. १ ५ द्रष्टव्यम्।

वरुणप्रघासयागस्य वरुणप्रधानकत्वात् तेन जेतव्यं फल मनुक्रामति— "अथ यद् वरुणप्रघासैरिति। "त्रेधनीयफललाभादि, उक्तार्थम् * ॥ ६ ॥

साकमेधयागस्येन्द्रप्रधानकत्वात् तेन जेतव्यं फल मनुक्रामति— "अथ यत् साकमेधैरिति † ॥ ७ ॥

इत्थं वैश्वदेवादिभिः पर्वभिः द्वादशमासात्मकसंवत्सरस्वरूपावाप्तिं फलत्वेन प्रतिपाद्य ‡, अग्न्यादिदेवतासायुज्य मपि तेषां फलत्वेनाचष्टे— "स यदिति। "अग्निरेव तर्हीति। 'तर्हि' तस्मिन् वैश्वदेवे यागेऽनुष्ठिते 'सः' यजमानः 'अग्निः' अग्न्यात्मकः 'एव भवति'। 'अग्नेरेव सायुज्यम्'–इति, अस्यैव विवरणम्। प्रथम मग्नेः सालोक्यं जयति, पश्चात् सायुज्य मिति योजनाक्रमः। "वरुण एव तर्हि"–इत्यादावप्येवं योज्यम् ॥ ८ ॥

अथ म्रियमानस्य चातुर्मास्ययाजिनो मार्गं ब्रुवन् ब्रह्मलोकप्राप्तिपर्यन्तं फल माह— "स यस्मिन्निति। 'सः' खलु चातुर्मास्ययाजी 'यस्मिन् ऋतौ' 'अमुं' विप्रकृष्टं परं 'लोकम्' 'एति' म्रियते, 'सः' ऋतुः 'एनं' यजमानं स्वस्मात् 'परस्मै ऋतवे' 'प्रयच्छति'। उक्तेऽर्थे विदुषः मिदं सम्पादयति— "तदाहुरिति। यस्मात् चातुर्मास्ययाजी परमां गतिं प्राप्तवान्, 'तत्' तस्मात् अभिज्ञाः 'आहुः' कथयन्ति। कि

---

* द्वितीयस्य वरुणप्रघासपर्वणः फलम् तै० ब्रा० १. ४. १०. ६, ७।

† तृतीयस्य साकमेधपर्वणः फलम् तै० ब्रा० १. ४. १०. ८।

‡ चतुर्थस्य शुनासीरीयपर्वणः फल मपि तै० ब्रा० १. ४. १०. ३।

मिति, तदुच्यते— 'चातुर्मास्ययाजिनम्' चातुर्मास्येनेष्टवन्तं यजमानम् अन्विच्छन्तो जनाः ब्रह्मलोकादवाचीनेषु लोकेषु 'न विन्दन्ति' न लभन्ते *। "परमं व्रजेति, तत्र कारणाभिधानम् ॥ ८ ॥ ५ [६. ४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे षष्ठाध्यायस्य चतुर्थं ब्राह्मणम् ॥

---

* "विराजो वा एषा विक्रान्तिः, यच्चातुर्मास्यानि। वैश्वदेवेनार्धिलोके प्रत्यतिष्ठत्, वरुणप्रघासैरन्तरिक्षे, साकमेधैरमुष्मिंल्लोके; एष ह वा वै तत् सर्वं भवति, य एवं विदांश्चातुर्मास्यैर्यजते"—इति तै० ब्रा० १. ४. ६. ५। अत्रैव दृग्मेऽनुवाके वैश्वदेववरुणप्रघाससाकमेधपित्रयज्ञात्मकहविःसुनासीरीयाणां प्रशंसाः पृथक्-पृथगाम्नाताः, ताश्चैव द्रष्टव्याः। चातुर्मास्ययाजिनः पुनराहुतिराहित्यरूपं मिथो भेदं तत्रैव समाम्नास्त मिति ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् * पञ्चसीरीं-†-स्त्रिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नोक्षां रुक्मवाजिद्विपसहितरथौ सायणिः ‡ सिङ्गणार्यौ §,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्षमुख्यः,
कार्पासीयं क्षपावान् गुडकृत मजडो ‖ राजतं राजपूज्यः ।
प्राज्योत्थं प्राज्यजन्मा ¶ लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाब्धो रत्नरूपं गिरि मकृत मुदा पात्रसाक्षिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
द्वितीयकाण्डे षष्ठाध्यायः समाप्तः ॥ ६ ॥

---

* 'पञ्चाब्धीन्'—इति ठ (१)। † 'सप्तसीरीं'—इति ठ।
‡ 'सायणः' स्यात् ? § स्यात् 'सिङ्गणार्यौ' ?
‖ 'मजडं'—इति ठ। ¶ 'प्राज्यबुद्धिर्'—इति ठ।
(१) ठ-इति प्रथमकाण्डीयमन्त्यादकोत्तां विटतं द्रष्टव्यम्।

॥ इति द्वितीयकाण्डे पञ्चमः प्रपाठकः समाप्तः* ॥

॥ इत्येकपादिकानाम द्वितीयं काण्डं समाप्तम् † ॥

---

* "कण्डिकासङ्ख्या १०४"—इति क, "कण्डिकाः १०४"—इति ख, "कण्डिकासङ्ख्या १०४"—इति ग-घौ। तत्र १ ब्रा० ११ क०, २ ब्रा० ४८ क०, ३ ब्रा० १६ क०, ४ ब्रा० १७ क०, ५ ब्रा० ६ क०; सङ्कलनयाच्च प्रपाठके १०४ कण्डिकाः सम्पन्नाः॥

† "एवं काण्डे ब्राह्मणानि सङ्ख्या २४। एवं काण्डे कण्डिकासङ्ख्या शत ५४७"—इति क, खान्त्यपृष्ठे मतिजीर्णं मित्यपाठ्यम्, "अस्मिन् काण्डे कण्डिकासङ्ख्या ५४६"—इति ग-घौ। तत्र प्रथमे प्रपाठके ११४, द्वितीये १०३, तृतीये ११३, चतुर्थे ५०५, पञ्चमे १०४; सर्वसङ्कलनयात्र काण्डे ५४६ कण्डिकाः श्रुता इति सिद्धम्॥

	Rs.	A.	P.
Padmavawat, Fasc. 1–4 @ 2/			
Paribhāṣā Sangraha, (Text) Fasc. 1–5 @ /6/ each...	1	14	
Prāk[illegible]ga'am, Fasc. 1–7 @ /6/ each	2	10	
Prthvirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14	
[illegible] (English) Part II, Fasc. 1	0	12	
Prā[illegible] Lakṣaṇam, (Text) Fasc. 1	1	8	
Puraṭara Smriti, (Text) Vol. I, Fasc. 1–8 Vol. II, Fasc. 1–6 ; Vol. III, Fasc. 1–9 @ /6/ each	7	8	
[illegible] Institutes of (English)	0	12	
Ramaṇa Cintāmaṇi (English) Fasc. 1–3 @ /12/ each	2	4	
[illegible] Veda Saṁhitā, (Text) Vols. I, Fasc. 5–10 ; II, 1–6 ; III, 1–7 ; IV, 1–6 ; V, 1–8 @ /6/ each Fasc....	12	6	
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/	1	8	
Ditto (English) Fasc. 1–3 @ /12/ each	2	4	
Shaddarśana-Samucchchaya, Fasc. 1 , ...	0	6	
Śraddha Kriya Kaumudi, Fasc. 1–6	2	4	
Sucruta Saṁhitā, (Eng.) Fasc. 1 @ /12/	0	12	
Suddhi Kaumudi, Fasc. 1–4	1	8	
*Taittereya Saṁhitā, (Text) Fasc. 22–45 @ /6/ each	9	0	
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2	
Tantra Vartika (English) Fasc. 1–6 @ /12/	4	8	
Tattva Cintāmaṇi, (English) Vol. I, Fasc. 1–9, Vol. II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each	14	4	
Tattvarthadhigama Sutrom, Fasc. 1–3	1	2	
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1–3 @ /6/	1	2	
Tul'si Satsai (Text) Fasc. 1–5 @ /6/	1	14	
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1–5 @ /6/ each ...	3	0	
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8	
Vallala Carita, Fasc. 1	0	6	
Varsa Kṛyā Kaumudi, Fasc. 1–6@ /6/	2	4	
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6 ; Vol. II, Fasc. 1–7 , @ /6/ each	4	8	
Vidhano Parigata, Fasc. 1–7	2	10	
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10	
Vṛhat Sayambhū Purāṇa, Fasc. 1–6	2	4	

Tibetan Series.

Pag-Sam Jhi Śiṅ, Fasc. 1–4 @ 1/ each	4	0	
Sher-Phyin, Vol. I, Fasc. 2–5 ; Vol. II, Fasc. 1–3 ; Vol. III, Fasc. 1–6 @ 1/ each	14	0	
Rtogs brjod dpag bkhari Siṅ (Tib. & Sans.) Vol. I, Fasc. 1–5 ; Vol. II. Fasc. 1–5 @ 1/ each	9	0	

Arabic and Persian Series.

'Ālamgirnāmah, with Index, (Text) Fasc. 1–13 @ /8/ each	4	14	
Al-Muquaddasi (English) Vol. I, Fasc. 1–3 @ /12/	2	4	
Ain-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0	
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12	
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0	
Ditto (English) Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1–2 @ 1/ ...	10	0	
Arabic Bibliography, by Dr. A. Sprenger	0	6	
Badshāhnāmah, with Index, (Text) Fasc. 1–10 @ /6/ each	7	2	
Catalogue of Arabic Books and Manuscripts 1–2	2	0	
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0	
Dictionary of Arabic Technical Terms, and Appendix, Fasc 1–21 @ 1/ each	21	0	
Farhang-i-Rashidi, (Text) Fasc. 1–14 @ 1/ each	14	0	
Fihrist-i-Tūsi, or, Tūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0	
Futūh-ush-Shām of Wāqidi, (Text) Fasc. 1–9 @ /6/ each	3	6	
Ditto of Āzādi, (Text) Fasc. 1–4 @ /6/ each	1	8	
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12	
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8	
Iqbālnāmah i-Jahāngīri, (Text) Fasc. 1–3 @ /6/ each	1	2	
Isābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4	
Masīr-ul-Umarā, Vol. I, Fasc. 1–9 ; Vol. II, Fasc. 1–9 ; Vol. III. Fasc. 1–10 ; Index to Vol. I, Fasc. 10–11 ; Index to Vol. II, Fasc 10–12 ; Index to Vol. III, Fasc. 11–2 ; @ /6/ each	13	2	
Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each	3	14	

The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /6/ each ...	5
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7 ; Vol. II. Fasc. 1-5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each ...	3
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each ...	7
Ma'āṣir-i-'Ālamgirī, (Text) Fasc. 1-6 @ /6/ each ...	2
Nukhbatu-l-Fikr, (Text) Fasc. 1 ...	0
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc 1-2 @ /12/ each	1
Riyāzu-s-Salātīn, (Text) Fasc. 1-5 @ /6/ each ...	1
Ditto Ditto (English) Fasc. 1-5 ...	3
Tabaqāt-i-Nāṣirī, (English) Fasc. 1-14 @ /12/ each ...	10
Ditto Index ...	1
Tārīkh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each ...	2
Tārikh-i Firūshāhi, of Shams-i-Sirāj Alif, (Text) Fasc. 1-5 @ /6/ each ...	2
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	3
Tuzuk-i-Jahāngirī, (English) Fasc. 1 ...	0
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each ...	1
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II. Fasc. 1-8 @ /6/ each	6

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each 20
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No. ; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), *1897* (*8*), *1898* (*8*), *1899* (*8*), 1900 (7) & 1901 (7), 1902 (9), 1903 (*8*), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., Vol. 1, No. 1, 1905, @ 1-8 per No. to members and Rs. 2/ per No. to Non-members. ... ...
5. Memoirs Vol 1, No 1,4,5 @ 1/8 to non members and to members ... 1
   Ditto No. 2 @ 1/- Ditto Ditto ...
   Ditto No. 3 @ 2/- Ditto Ditto ... 1
6. Centenary Review of the Researches of the Society from 1784–1883 ... 3
   A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, *1878*) 4
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, *1868*) 2
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, *1875*) 4
7. Anīs-ul-Musharrahīn 3
8. Catalogue of Fossil Vertebrata 3
9. Catalogue of the Library of the Asiatic Society, Bengal 3
10. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each ... 32
11. Jawāmlu-l-'ilm ir-riyyāṣi, 168 pages with 17 plates, 4to. Part 1 ... 2
12. Khizānatu-l-'ilm 4
13. Mahābhārata, Vols. III and IV, @ 20/ each 40
14. Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III with *8* colored plates, 4to. @ 6/ each 18
15. Sharaya-ool-Islām 4
16. Tibetan Dictionary, by Csoma de Körös 10
17. Ditto Grammar ,, ,, ... 8
18. Kacmīracabdāmṛta, parts I and II @ 1/8/ 3
19. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson... 1
20. Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899 4
21. Persian Translation of Hāji Bābā of Ispāhān, by Hāji Shaikh Ahmad-i-Kirmā and edited with notes by Major D. C. Phillott. 10

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each 29
Nepalese Buddhist Sanskrit Literature, by *Dr.* R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

16 9 06.

BOOKS ARE SUPPLIED BY V.-P.-I.

آخری درج شدہ تاریخ پر یہ کتاب مستعار
لی گئی تھی مقررہ مدت سے زیادہ رکھنے کی
صورت میں ایک آنہ یومیہ دیرانہ لیا جائے گا۔